भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्

(Modern Sanskrit Literature in India : A Bird's Eye View)

Dr. Subhrajit Sen
Assistant Professor, Department Of Sanskrit,
University of Gour Banga,
Malda, West Bengal

SANSKRIT PUSTAK BHANDAR
38, Bidhan Sarani, Kolkata– 6

Modern Sanskrit Literature in India : A Bird's Eye View
by Dr. Subhrajit Sen

Publisher:
Sri Debasis Bhattacharya
Sanskrit Pustak Bhandar
38, Bidhan Sarani, Kolkata– 6

First Edition:
23rd January, 2019

ISBN: 978-93-87800-50-2

Cover : Rakesh Das

Laser Print:
Binapani Laser Print
Kolkata– 700114

Printed at:
Abhinaba Mudrani
Kolkata– 700006

॥उत्सर्गः॥

'गुरुर्ब्रह्मा गुरुर्विष्णुः ... तस्मै श्रीगुरवे नमः'
इति स्मृतिस्मृतं स्मारं स्मारं
मद्गुरुवर्येभ्यः श्रीसीतानाथाचार्यशास्त्रिभ्यः
तारापदचक्रवर्तिभ्यः
तथा चार्वाचीनकाव्यपरम्पराणाम् उद्गातृभ्यः
प्राचार्यवरेभ्यः राधावल्लभत्रिपाठिमहोदयेभ्यः
समर्प्यते ग्रन्थप्रसूनम्।

विनयावनतः
शुभ्रजित्सेनः

॥ आशीर्वाक् ॥

सेनवंशमहासिन्धोर्निष्कलङ्ककलाभृता।
शुभ्रजिता कृतो ग्रन्थ आधुनिकसंस्कृताश्रयः॥१॥
अध्यायैश्च समायुक्तः सप्तभिः सुमनोहरैः।
देदीप्यतां सदा विद्वत्पर्षदि धरणीतले॥२॥
आधिव्याधिविनिर्मुक्तं सुदीर्घं शुभजीवनम्।
प्रार्थये ग्रन्थकारस्य भगवत्पादपङ्कजे॥३॥
तरुणेषु च शिष्येषु काव्यशास्त्रार्थवेदिषु।
श्रीमान् त्वया समानोऽन्यो दृष्टिं नायाति प्रायशः॥४॥
इष्यते तेन चास्माभिः भजस्व भारतीपदम्।
निष्कामपाठयोगेन काले स्यात्ते परोन्नतिः॥५॥
काव्ये च काव्यतत्त्वे प्रतिभा यदीयोत्तमा।
शिष्येषु कृतिमान् धीमान् शुभ्रजित् स विवर्धताम्॥६॥

श्रीसीतानाथाचार्यशास्त्रिणः
गोपीनाथकविराजाध्यापकचरस्य
कलिकाताविश्वविद्यालयस्य
तथा
राष्ट्रपति-साहित्याकाडेमीपुरस्काराभ्यां सभाजितस्य

॥शुभाशंसा॥

श्रीमता शुभ्रजित्सेनेन विरचितम् 'भारतवर्षे आधुनिकसंस्कृतसाहित्यम्: विहङ्गमदृष्ट्या परिशीलनम्' इति आधुनिकसंस्कृतसाहित्यविषयकं पुस्तकं विदुषोऽस्य साम्प्रतिके संस्कृतसाहित्येऽभिनिवेशं व्यनक्ति। आसेतुहिमाचलं आकच्छकामरूपं समग्रेऽपि अस्माकं राष्ट्रे संस्कृतभाषा साहित्यसर्जनायास्तथैव प्रकृष्टं साधनं वरीवर्ति यथा कालिदासभारविमाघप्रभृतीनां महाकवीनां काले। श्रीमता सेनेन अस्य साहित्यस्य विविधाः नवीनाः प्रवृत्तयः मीमांसिताः, विशेषतो स्त्रीकवीनां साहित्यकर्त्रीणां महिलानां वा साम्प्रतिके काले संस्कृतसाहित्येऽवदानमनेन विशद्य परामृष्टम्। जगन्नाथादर्वाञ्चः ये साहित्यतत्त्वकाराः अलंकारशास्त्राणि अर्वाचीनशास्त्रप्रपञ्चं समृद्धवन्तस्तेषां कृतित्वं स्थालीपुलाकन्यायाद् विव्रितम्। किञ्च, समसामयिकसंस्कृतसाहित्यं लोकधर्मि-वैदेशिकच्छन्दोभिः गीतिभिश्च समृद्धमित्येतदपि श्रीमता शुभ्रजिता सुष्ठुतया विशदीकृतम्। समग्रस्य देशस्य प्रत्येकं राज्ये क्षेत्रे वा ये ये प्रमुखाः संस्कृतकवयः साहित्यकारा वा विंशशतके सुरसरस्वत्याः साहित्यभाण्डागारं समेधितवन्तस्तेषां कर्तृत्वमत्र साधु विशदीकृतम्। पुस्तकमिदं श्रीमतः सेनस्य प्रखरां समीक्षादृष्टिं योरोपसाहित्यसिद्धान्तानामवगतिं चापि चरितार्थयति। अनेन समकालिकसंस्कृतसाहित्यस्य समृद्धेः वैविध्यस्य विपुलतायाश्च परिचयोऽधिगन्तुं शक्यते। यूनोऽधीतिनः श्रीसेनस्य परिश्रमं श्लाघमानोऽहं पुस्तकस्यास्य सर्वविधं प्रचारं कामये।

राधावल्लभः त्रिपाठी
(भूतपूर्वः कुलपतिः, राष्ट्रिय-संस्कृत-संस्थानम्)

प्रो० प्रफुल्लकुमारमिश्रः

आचार्यः

ड० राजेन्द्रप्रसाद-केन्द्रिय-कृषि-विश्वविद्यालयः

पुसा, समस्तिपुरम्, विहारः

भूतपूर्वः कुलपतिः

उत्तर-ओडिष्याविश्वविद्यालयः

वारिपदम्, ओडिष्या

॥पुरोवाक्॥

आधुनिकसंस्कृतसाहित्यपरिक्रमा

'भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गदृमष्ट्या परिशीलनम्' इति श्रीमतः शुभ्रजित्सेनस्य पञ्चशतपत्रसंवलितम् आधुनिकसंस्कृतसाहित्यविषयकं पुस्तकम्। ग्रन्थेऽस्मिन् आधुनिकतायाः स्वरूपस्य तथा आधुनिकसंस्कृतसाहित्य-शास्त्रीयाणां तथा काव्यग्रन्थानां परिशीलनं ग्रन्थकृता संसाधितम्। संस्कृतसाहित्ये याः बाहुल्येन मौलिकरचनाः साम्प्रतिके काले प्रभवन्ति, ताः खलु प्रागेव गुप्तकाले चासन् न वेति मनसि महान् सन्देहः। तथापि लोकव्यवहारे विवाह-व्रतादिकर्मसु अस्मरणीयकालादारभ्य अद्यतनकालं यावत् संस्कृतव्यवहारः प्रचलति।

राष्ट्रिय-पाण्डुलिपि-अभियानतो ज्ञायते यद्ये खलु प्रकाशितग्रन्थाः परिदृश्यन्ते, ते सर्वे अप्रकाशितग्रन्थानाम् अपेक्षया अत्यल्पा एव भान्ति। षष्टि-सप्तति-कोटिग्रन्थानामवाप्तिः राष्ट्रस्य ग्रन्थसम्पत्तिं सूचयति। परन्तु संख्या ततोऽप्यधिकतरा भवेत्। किमर्थमिति चेन्नैके ग्रन्थाः उपप्लवकारणादग्न्युत्पातकारणाच्च विनष्टाः। महावात्या तथा वल्मीकभक्षणादीनि कारणानि तेषां मूलसंख्यां ह्रासयितुं क्षमन्ते। परं यानि काव्यनाटकादीनि पाण्डुलिपिरूपेणैव विलयं गतानि, तेषां संख्यां को वा कलयेत्?

इदानीं मुद्रणकौशलस्याभिवर्द्धनेन प्रकाशनसारल्येन संस्कृतभाषायां बह्व्यः सामयिकपत्रिकाः तथा पुस्तकादीनि धाराप्रवाहरूपेण प्रकाशितानि दृश्यन्ते। अत आसेतु सितगिर्यन्तं कच्छतः कामरूपं मणिपुरपर्यन्तं वा संस्कृतकवयः स्वकोद्यमेन काव्यकदम्बं प्रकाशयन्ति निरवच्छिन्नतया।

प्रस्तुतेऽस्मिन् ग्रन्थे आधुनिककालस्य कलनं शुभ्रजित्सेनेन दर्शितम्। बाहुल्येन मतानि तेनैवोपन्यस्तानि। यतो हि आधुनिक-उत्तराधुनिकादिपाश्चात्त्यविदुषां राद्धान्तान् प्राच्यसमालोचकाः व्यवहरन्ति। एतद्दृष्ट्या विचारोऽपि पाश्चात्त्यशैल्या अग्रेसरिष्यति न वेति खलु महान् प्रश्नः। प्रसङ्गेऽस्मिन् किं तावत् वक्तव्यम्? भारतीयार्वाचीनभाषासु पाश्चात्त्यसाहित्यस्य प्रतिध्वनिः दृश्यते। खृष्टीयविंशशतकस्य प्रथमचरणे ये खलु पाश्चात्त्यदेशे समाविर्भूतास्ते एलियट्, एजरा-पाउण्ड, जेमस्-जयस्, आई.ए.रिचार्ड, भर्जिनाया-उल्फ, माथ्यु-आरनोल्ड, मालार्मे इत्यादयः साहित्यकर्तारस्तथा समालोचकाः विविधदार्शनिकं सिद्धान्तमुररीकृत्य साहित्यशास्त्रं प्रणिन्युः। उद्योग-विप्लवसमये योरोपे समाजतन्त्रस्य च परिवर्तनं बाहुल्येन जातम्। तेन ततः प्रभृतिः ग्रामजीवनं प्रायेणैव ध्वस्तं जातम्। पारिवारिकव्यवस्थायाः क्रमह्रासात् तथा 'आवां द्वौ', 'वयं वा त्रयः' इति विकृते जीवनदर्शने विश्वासवताम् आधुनिकानामस्माकं निम्नाभिरुचिः आधुनिकस्य उद्योगमूलसमाजस्य मूलम्। तस्मात् स्त्रियः गृहस्य रसवतीं परिहृत्य बृहत्कारुशालां प्रति गता आसन्। स्तनन्धयाः परिचरणगृहे अथवा प्राग्विद्यालये धात्रीभिः परिपालिताः। स्वामिनः स्त्रियश्च स्वस्वकैङ्कर्ये मग्नाः सन्तः स्वस्य सुकुमारतां विस्मृत्य शिस्नोदरपरायणाः सञ्जाताः। पुनस्तत्र शिशुवृद्धिं तथा तेषाञ्च रक्षणावेक्षणं धात्री एव करोति स्म। स्वाभाविकगत्या भावप्रवणतायाः स्थानं समाजे नादृतम्। क्रमशो मनुष्यः यन्त्रवज्जीवनं यापयति। कुत्रचिन्नगरे नानासंस्कृतिप्रभावाद्विविधभाषावलम्बिभिः सह सम्बन्धाच्च स्वमातृभाषामपि ते विस्मरन्ति। अस्यां परिस्थितौ ये केचन कवयः कवयन्ति तेषां काव्येषु शृङ्गारिकतायाः सौकुमार्यं न स्यात्। तदनुगुणं काव्ये प्रतिफलितं तथाऽपि तस्य प्रतिध्वनिः श्रूयते। एतस्य साहित्यस्य परिभाषां निर्मातुम् उल्लिखिताः विद्वांसः पुरतः समागत्य साहित्यशास्त्रं प्रणिन्युः। भारतीयसमाजे पाश्चात्त्यदेशस्याधुनिकतावादः नानुभूतः। परन्तु वृत्तिनिमित्तं दूरं गतस्य भर्त्तुरागमनेन गृहे भार्या प्रतीक्षते। एषा प्रतीक्षा

बहुकालतो नाम क्रैस्तीयप्रथमशतकेऽप्यनुभूयते। गाथासप्तशती-अमरुशतकादिषु ग्रन्थेषु तथाभूताः रचनाः विलसन्ति इति सहृदयाः जानन्ति।

"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्
दूरे पतिः कथय किं करणीयमद्य॥
दूरे पतिः किं करणीयम् अद्य?
रे रे पान्थ पुस्तककर क्षणमत्र तिष्ठ
वैद्योऽसि किं गणितशास्त्रविशारदोऽसि।
केनौषधेन मम द्रक्ष्यति नक्तमम्बा-
ऽथवाऽऽगमिष्यति पतिः सुचिरः प्रवासी"॥

बहुषु शुकसप्तति-पञ्चतन्त्रादिषु लोककथासञ्चरेषु स्ववृत्तिनिमित्तं दूरदेशगमनं बहुकालात् प्राचलत्। परम् औदासीन्यं नासीत्।

प्रागेव स्वतन्त्रतासङ्ग्रामेऽपि श्रीअरविन्दादयः केचन संस्कृतकवयः भारतस्य स्वतन्त्रतासङ्ग्रामनिमित्तं भवानी-भारती इत्यादीनां काव्यानां प्रणयनं कृतवन्तः। परन्तु स्वतन्त्रतोत्तरकाले बहवः कवयः भारतमातुर्वर्णनं संस्कृतमातुः महिमगानं कृतवन्तः। तत्रापि वर्णेकरादयः केचन कवयः सफलतामवापुः। आधुनिकता यथा पाश्चात्त्यराष्ट्रे आसीत् तथा संस्कृतकवीनां मनसि अपि अर्वाचीनभारतीयभाषामाध्यमेन प्रविवेश।

आङ्गलाध्यापकाः पत्रकाराः कवयश्च स्वस्वमातृभाषया पाश्चात्त्यसाहित्यम् अभिज्ञाय तदनुगुणं काव्यानि विरचयामासुः। तेषां प्रभावबलेन अन्ये आधुनिकम्मन्याः कवयः काव्यानि रचयामासुः। अपि च, राजा-रावः, के. आवास्, आर. के. नारायणः, दारुवाला, विक्रमशेठश्चेति आङ्गलभाषया भारतीयकथामाधारीकृत्य स्वस्वरचनायां प्रसिद्धिं गताः। भारतस्य विभाजनमधिकृत्य बहबः कथाग्रन्थाः काव्यरचनानि अपि प्रवृत्तानि। परन्तु संस्कृतसाहित्ये तस्य प्रतिध्वनिः नासीत्। विलम्बेन केशवदाश-राधावल्लभत्रिपाठि-राजेन्द्रमिश्र-हरिदत्तशर्म-सीतानाथाचार्य-हर्षदेवमाधव-प्रफुल्लकुमारमिश्र-मनमोहनाचार्य-कलानाथशास्त्रि-श्रीनिवासरथ-वच्चुलालावस्थि-

रुद्रदेवत्रिपाठि-भास्कराचार्यत्रिपाठि-रमाकान्तशुक्ल-जनार्दनानन्दपाण्डेय-व्रजेशशुक्ला-वसन्तगाडगिल्-वनमालीविश्वालादयः शताधिकाः कवयः स्वस्वलेखन्यां संस्कृतभाषायां नूतनशैल्याः निर्णयं स्वस्ववृत्त्या कृतवन्तः। शुभ्रजित् स्वग्रन्थे तेषां विवरणमपि प्रददाति। तत्सर्वं पठित्वा यः कोऽपि तानि काव्यानि अधीत्य आधुनिककाव्यानां मार्मिकं विवेचनं कर्तुं प्रभविष्यति।

आधुनिकानाम् अलङ्कार-च्छन्दःप्रभृतीनां ग्रन्थानां विवरणमपि शोधकर्त्तॄणामानन्दवर्द्धनं कृत्वा उपकाराय भविष्यति। मन्ये लेखकोऽसौ एकैकेषां कवीनामध्ययनपुरःसरम् आधुनिकं तथा उत्तराधुनिकं काव्यमपि वाचयित्वा सर्वेषां कृते दिग्दर्शनं करिष्यति। काव्यशैल्या अध्ययनं तथा शब्दपरिपाकयोजनाऽपि अनुसरणीया। प्राच्यपाश्चात्त्ययोः विविधभाषासु लिखितानां काव्यानां साहित्यशास्त्रदृष्ट्या तुलनात्मकं विवेचनं कर्तुं शक्यते। आङ्गिक-वाचिक-तात्त्विकविषयाणां तदनुगुणं विवेचनमपि करिष्यते। कथावस्तु-उपन्यासशैली-भाषा-शब्दयोजना-सुकुमारताः बोद्धव्याः तथा अप्रचलितशब्दानां परिवर्जनं समकालिकसमस्यानां विषयेऽस्मिन् परिवर्द्धनं अपि कर्तुमिष्यते। संस्कृतभाषया छन्दसा च यत्किमपि लेखनेन तत्साहित्यपदं नालङ्करोति। प्रत्युत सुकुमार-काव्यकलायाः प्रदर्शनं यदा भवति, तदेव तत् काव्यपदवाच्यं भवति। बहवः संस्कृतज्ञाः देवता-राजनेतृ-भारतमातृ-संस्कृतानां स्तुतिं विधाय आत्मानं कवय इति मन्यते। परन्तु तानभितः याः याः सामाजिकीः समस्याः वर्तन्ते तत्सर्वं प्रतिफलितं काव्ये यदि न स्यात्तर्हि तत्साहित्यपदवाच्यं न भवति। अतः कवयः आधुनिक-उत्तराधुनिकतयोर्विस्तारमभिज्ञाय किमपि विषयविवेचनमभिव्यक्तेः प्रकारनिर्णयञ्च कृत्वा नवीनतां प्रकटयन्तु। नूतननूतनशब्दानाञ्चयनं कृत्वा तान् व्यवहारपथे नियोजयन्ति चेत् संस्कृतस्य नूतनसाहित्यरूपं प्रकटितं भविष्यति। अतः मन्यते एतत् सर्वं मनसि निधाय लिखितं शुभ्रजित्सेनेन पुस्तकमिदम्। स खल्वस्माभिरभिनन्दनीयः। तस्योत्तरं बृद्धिं कामये।

इति

३०.०३.२०१८ **प्रफुल्लकुमारमिश्रः**

FOREWORD

Professor Arun Ranjan Mishra
Department of Sanskrit, Pali and Prakrit
&
Director, Center for Buddhist Sutdies
Visva-Bharati, Santiniketan, W.B.

It is heartening to read this valuable work by Dr. Subhrajit Sen, an uprising scholar of Indology in the Eastern part of India. Dr. Sen has collected rare and useful data from varied sources for justifying his opinions on modern Sanskrit literature in India. He has also made his work shining with clarity through appropriate diagrams. His deliberations over the features of modernity are aptly equipped with the references to the Eastern and Western scholars in literary criticism. Quoting Irving Howe, he has rightly discovered that 'contemporary' refers to time and 'modern' refers to literary sensibility and style. There is a very common notion that all the writers in the modern period are modern. But actually that is not the case. The writers who write like *Kālidāsa* or *Bāṇabhaṭṭa* in modern times are not really modern. They may be regarded as contemporary simple because they are contemporaneous to the modern writers of the modern time. As far the modern poetic sensibility is concerned, the modern writers make use of symbols, metaphors, myths and images as against the traditional poetic embellishments. They look at life not as an opportunity for enjoyment but as a great crisis. Beauty is not the only goal for them

since their writing gives wide scope for the ugly and aversive. The idea of beauty cannot be very wholesome if it comes at the cost of the ugly. Modern artist recognizes the existence of ugly as a necessary backdrop for the beautiful and wins over the contrasts in his art in a way of creating beauty as a fruit of his artistic will. In fact the idea of beauty is a great divide between the classical and the modern.

In his book The Will to Power (1896), Friedrich Nietzsche views that the artist does not passively record a beauty that finds rooted in nature. Beauty is not found- it is made by the artist who imposes it by his own will, and thus wins a victory over disorder in nature. For, in beauty, "contrasts are overcome, the highest sign of power thus manifesting itself in the conquest of opposites." The most convincing artists are precisely those "who make harmony ring out of every discord". The great artist is able to acknowledge "the terrible and questionable character of existence" and still affirm the goodness of life. [William. K. Winsatt, Jr. and Cleanth Brooks, Literary Criticism- A Short History, Yale University, 4th Indian Reprint, 1790, p.565]

The realization of the intellectual elements in beauty has also practically changed the traditional notion of beauty in to the modern notion of beauty. Perhaps this fact should restrain the new Sanskrit poets from falling into the traditional patterns and from adopting the elements of beauty oft-used erstwhile. In the modern notion of beauty the beautiful goes, beyond the carnal and emotional limits.

Plato has dealt with beautiful (to klon) in the three of his dialogues – the Phaedo, the Symposium and the Phaedrus. In the Phaedo,

the beautiful things are beautiful "by reason of beauty"- that is, by participating in the beautiful. In the Symposium and the Phaedrus, the preparation for the approach is that of a lover, by way of mortal beauty. The lover graduates, in the Symposium (210-12) from single beautiful bodies to all beautiful bodies, from bodies, to forms and from forms to practices and notions, until he contemplates " the vast sea of beauty", and in the Phaedrus (249,265-66,277), he graduates from bodily beauty not only to ideal beauty, but to "wisdom, goodness and the like", all the hierarchy of ideas. The lover becomes in effect the philosopher.

Just as the modern writers prefer to give scope for the intellectual assimilation of beauty so also they reject the theory that any art including the creative writing must give pleasure. More than pleasure, the clarifications over the human existence, the meaning of life and realization of the decrepitude in the morden society and a criticism of life in general happen to be the goal of literature. Dr. Sen has rightly pointed out the role of translation in globalizing the local literature. His profuse instances of valuable translations would surely enlighten the students of modern Sanskrit literature.

Modern Sanskrit literature in fact faces a great crisis in the form of the bankruptcy of modern themes and modern style. The persons who have a sound command over the Sanskrit language may not be great creative writers. So their flawless Sanskrit writings do not help in thematic innovations and experiments. Many of them do not seem to be even reading the modern literature in the non-Sanskrit languages. On the other hand, there are many writers who have good grip over

the modern literary sensibility and theme by virtue of their wide reading. But their creativity gets dismally thwarted because of their gross incapability in expressing their thoughts in grammatically correct Sanskrit. Even then we are fortunate to have still a good number of writers who are encouragingly creative and innovative and yet have a sound command over the Sanskrit Language. The dearth interesting and novel theme in modern Sanskrit can be easily assessed by just nslating them into another language and judging where those writings stand in the mainstream of that language.

Dr. Sen's findings and observations on the structural changes in Sanskrit terature in its modernist pursuit are highly laudable. Modernism also came in with new types, new metres and new attitude to life and universe. The present book also incorporates discussions on some prominent modern rhetoricians. In the post *Jagannātha* period, they have significant contributions to the progress of Indian Poetics and Dramaturgy. There is do doubt that Sanskrit tradition has a long followers of poetic embellishments. *Bhāmaha*'s words spoke of the indispensability of ornaments – 'न कान्तमपि निर्भूषं विभाति वनितामुखम्'। He even brought वक्रवाक् and वक्रार्थ under the purview of ornaments – 'वाचां वक्रार्थ-शब्दोक्तिरलङ्काराय कल्पते'। The impact of this statement was so much that his other statement – 'अतिशेते ह्यलङ्कारमन्यं व्यञ्जन-चारुता' seems not to have been heeded to by the classical poets.

But still they have to work out more for shaking off the classical slough in oeder to theories the modern Sanskrit trends in a broader ramifications. Some modern rhetoricians like Revaprasad Dwivedi, Radhavallabha Tripathi, Rajendra Mishra and Harsdev Madhav have

conspicuous tilt to be moden and to make the modern poetics in Sanskrit progress in the direction of Literary Criticism in the modern world. This is because global patterns and outlooks have already crept in to the gamut of new Sanskrit writings. Dr. Sen has also shown various theories, styles and 'isms' that have already appeared as the modern credentials in the new Sanskrit writings.

Another credential of the modernist writing is the rejection of indispensability of meters in poem. However, although free verse is in vogue in many of the modern Sanskrit poetry – some authors of such poetry being Keshab Chandra Dash, Harshdev Madhav, Banamali Biswal and Prafulla Kumar Mishra etc. – there are many Sanskrit poetics who are not convinced about the fecundity of an endeavour for forsaking the lyrical values in the name of modernism. No doubt, if idea and theme is modern lyrical and metrical expressions don't come in the way of modernity. We have seen many great Sanskrit poets even in this century who are highly lyrical and yet unparalleled in modern visions and themes- Bacchular Avasthi, Srinivas Rath, Jagannath Pathak, R.V. Tripathi, Rajendra Mishra, Sitanath Acharya and Rabindra Kumar Panda to name a few timeless talents. R.V. Tripathi even went some steps ahead to become the fountain-head of the post-modern nuances in Sanskrit writings just to open a new avenue of post-moderrnist writings where Keshab Candra Dash, Harshadev Madhav, Banamali Biswal, Pramod Kumar Nayek and P.K. Mishra etc. are successfully whetting their creative pens.

There is no question of banishing metres from poetry. This is because it has its own unmatched beauty. It is another matter that

some Western poets argued against it as a handicap in free expression. They say, it distracts poet's mood, thought, fancy and depth and concepts to sacrifice everything for the protection of a metre – 'अपि भाषं भषं कुर्यात्, छन्दोभङ्गं न कारयेत्'। But then, extra-ordinary poets are not rare in Sanskrit who are equally fluent and unobstructed in both metres and thought-flows. Moreover, all the free verses have a metre underlying them in the forms of rhythm and pause.

Dr. Sen has beautifully projected the traditional and modern approaches and aptitudes towards metrical expression and lyricism. Lyrics percolate through all the ages because of its divine spell. Modernism has no escape. It can't escape the fact that to be lyrial was natural to birds and humans even in the primitive ages. Dr. Sen has done a good service in the present book by highlighting how modern poets have devised new ways to be metrical and lyrical.

He has also made his book a great research tool in that he has put together huge information about poetic embellishments, metres, male and female authors of modernist creative works in Sanskrit. Reflecting over the concept of poet and long list of modern poets and their works, Dr. Sen has clearly set a direction. It is interesting to note that even the Vedic poets knew the core elements of a poet. To them, a man becomes a poet only when his mind is capable (दक्ष), like the mind of Soma, of catching and assimilating the truth and beauty of the universe – 'सं दक्षेण मनसा जायते कविर्ऋतस्य गर्भो निहितो यमा परः'।

It is again interesting to note that Dr. Sen has taken care of modern Sanskrit poetesses in his critical appreciation. In fact a society is proved to be progressive through the fact of its women coming

into circle of academia and creativity. Even in the *Ṛgveda*, we find twenty-four female seers and in the Atharva Veda five women writers are placed in record.

I have no doubt that this commendable endeavour of Dr. Sen will not only fetch him a new identity in the field of modern literary criticism but will also enlighten this arena with a fresh look at it by the scholarly readers.

॥आमुखम्॥

'संस्कृतं नाम मृतभाषे'ति दुर्वचं श्रावं श्रावं कर्णौ नः शब्दान्तरप्रवेशनानर्हत्वमाप्तौ। ततः प्रभृति मन्मनसि प्रश्नोऽयं समुदितो यद् दुर्वचसोऽस्य याथार्थ्यमस्ति किम्। तस्मादेव प्रमाणीकर्तुमीष्यते मया – 'न मृता न म्रियते न वा मरिष्यति वा' भाषेयम्। स्नातकोत्तरवर्गे यदासम्, तदा अर्वाचीनसंस्कृतसाहित्यविषयिणी अनुसन्धित्सा जागरिता। दृश्यन्ते च तदा साम्प्रतिके भारतवर्षे आधुनिकसंस्कृतसाहित्यस्यौघा निरन्तरं साहित्यतटवेलायां प्रपतिताः।

पुरातनी साहित्यसर्जनपरम्परा कियद्विपुलेति नास्ति कस्याश्चन पौनरुक्तेरवकाशः। परमयमत्यन्तं प्रमोदविषयो यत् संस्कृतस्य पठनपाठनव्यवस्थायाः सञ्जातेऽपि शैथिल्येऽद्यापि संस्कृतं साहित्यत्वेन वर्तमानप्रवर्तमानभाषाभिः सममेवात्मानमभिव्यनक्ति। अद्यतने युगे विरचिताः नैकाश्च साहित्यकृतयः इमामुक्तिं प्रमाणीकुर्वन्ति। अस्या विपुलायाः अर्वाचीनसंस्कृतधारायाः किञ्चिद्वैशिष्ट्यचित्रं समासतः समुपस्थापयितुं प्रयासः कृतो मयका। प्रसङ्गतः समुल्लेखार्हं यदाधुनिकतायाः कालं स्वरूपञ्चोल्लिख्य समकालिकत्वाधुनिकत्वयोरर्थगतं वैसादृश्यं प्राच्यपाश्चात्त्यदृग्भङ्ग्या सह पर्यालोचयितुं प्रयतितम्। आधुनिकसंस्कृतसाहित्यस्य गतिं प्रकृतिञ्चानुसृत्य कालविभाजनं स्पष्टतया विहितमत्र ग्रन्थे। समसामयिककवीनाम् उदाहरणान्युद्धृत्य प्रमाणयितुं यत्यते यदद्यतनकालस्यार्वाचीनत्वं न केवलं कालगतञ्चापि मनोभावनिष्ठमपि। तस्यामेवार्वाचीनसंस्कृतसाहित्यधारायां प्रतिविम्बितायाः समाजमुखीनतायाः सामासिकञ्चित्रं तथा चाङ्गिकदिशाभिनवत्वं समङ्कितं मया।

युगरुच्याधुनिकसंस्कृतकवितायाः आङ्गिके परिवर्तनं छन्दःप्रयोगधारायाम् अप्यलक्षि। मया अर्वाचीनसंस्कृतकाव्यपरिसरे मुक्तकानां लोकधर्मिणाञ्च छन्दसां तथा च हाइकु-तान्का-सिजो-सनेट्-काव्यानां नाम वैदेशिकच्छन्दसां वैचित्र्यमाधुनिकसंस्कृतकाव्येभ्यो दृष्टान्तान् उद्धृत्योपस्थापितम्। प्रसिद्धेः परां काष्ठामुपगतानां केषाञ्चित् हिन्दीछन्दसां देववाण्यां पुनरावर्तनं विधीयते।

भट्टमथुरानाथशास्त्र्यनन्तरं प्रायेण खवैंया-घनाक्षरी-होहा-छपपयादिच्छन्दांसि प्रयुक्तान्येवावतिष्ठन्। प्रसङ्गेऽस्मिन् ममाभिमतमेतद्यद्वैदेशिकलोकधर्मच्छन्दसां प्रयोगेऽपि मालिन्याः शिखरिण्या वा सौन्दर्यं नापचीयते कदापि। विकाशदृष्ट्या भूषणमिदं, न तु दूषणम्। अपि च, जगन्नाथादर्वाञ्चः काव्यतात्त्विकाः जनिं लेभिरे, येऽल्पप्रसिद्धाप्रसिद्धकोट्योः स्थानं लभमानाः समासन्। तथाहि अर्वाचीनालंकारिकपक्षञ्चतुर्धा विभजयितुं शक्यम् क) प्रसिद्धाचार्यपक्षः ख) अप्रसिद्धाचार्यपक्षः ग) टीकाकृदाचार्यपक्षः घ) अज्ञातलेखकवर्गश्चेति। जगन्नाथोत्तरवर्तिकाव्यिकानां काव्यशास्त्रविरचनप्रवृत्तिः पूर्वापेक्षयाधिका संदृश्यते। मन्ये अष्टादश-ऊनविंश-विंशैकविंशशतकेषु लक्षणग्रन्थविरचनं विद्वत्ताया असिद्धेश्च सूचकमिति। विना काव्यशास्त्रविरचनं प्रतिष्ठा न लभ्यते, न तु नूत्नकाव्यराद्धान्तस्थापनं लक्ष्यमिति कृत्वौपचारिकतावशात्साम्प्रतं काव्यशास्त्रीयग्रन्था विरच्यन्ते यत्र तत्र पिष्टपेषणादपि।

भारतवर्षस्य प्रायः त्रिंशत्संख्यकेषु प्रदेशेषु एकविंशतिः प्रदेशगतानाम् अनालोचितपूर्वाणां बहूनां कवीनां विशेषेण कवयित्रीणाञ्च नामानि कृतयश्चात्र संयोजितानि। विशेषतः समुल्लेखार्हं यत् कस्यचिद् देशस्योन्नतिः संसूच्यते तत्र समाजे नारीणामवस्थानेन सारस्वतचर्चया समाजस्य प्रतिपदं तासां भूमिकया चेति। तस्मान्मया ग्रन्थेऽस्मिन् अर्वाचीनसंस्कृतसाहित्ये भारतवर्षे प्रायेण पञ्चाशत्संख्यकानां कवयित्रीणां सारस्वतकृतित्वं पर्यालोचितम्। अन्तिमेऽध्याये मया प्राथम्येन विहङ्गमदृशा पश्चिमवङ्गे लिखितसाहित्यानां नामग्राहोल्लेख-मूलवस्तु-प्रकाशनादिविषये पर्यालोच्यते, ततः परं द्वितीयांशे द्वादशवङ्गीयकवीनां सारस्वतकृतीः समासेन विचारयिष्यन्ते। भारतवर्षे कृत्स्ने विरचितं समसामयिकं संस्कृतसाहित्यं विषयीकृत्य ग्रथितेऽस्मिन् ग्रन्थे न केवलमाधुनिकसंस्कृतसाहित्यस्य पृष्ठभूमिः विशदीकृता, नूत्नसाहित्यरचनाधाराया नवीना मानदण्डा अपि विस्तरशो विचारिताः। अत्र नैके उपेक्षिता अज्ञातप्रायाः स्वल्पज्ञाताः महाकवयो रचनारचनानदीष्णाः काव्यिकाश्च चर्चाविषयतां गताः। लघुकाये ग्रन्थेऽस्मिन् आभारतवर्षात् समेषां कविवराणां समीक्षा न सम्भवेत्। साम्प्रतं ऋषिराज-कौशलतिवारी-राकेशदाशादयो बहुश्रुताः परःशतम् उदीयमानाः युवानः

स्वकारयितृप्रतिभया सुरभारतीं सेवमानाः दरीदृश्यन्ते। ग्रन्थकलेवरभयात्तेषां युवकवीनां सारस्वतकृतित्वं नोल्लिखितुमलमिति कृत्वा क्षमां प्रार्थये।

येषां मौलिकग्रन्थाः नेत्रातिथ्यं गताः अथवा गोणोत्सेभ्यः नाममात्रम् उल्लेखः प्राप्यते, तदनुसारं स्थालीपुलाकन्यायात् समीक्षां विधातुं प्रयतामहे। परवर्तिनि काले अवशिष्टानां वङ्गीयकवीनां सारस्वतकृतीः विस्तरशः पर्यालोचयितुं प्रयासं करिष्यामि।

सर्वभारतीयपरिसरे अर्वाचीनसंस्कृतसाहित्यस्य योगदानमिति सन्दर्भे पञ्चषाः सम्पादिताः ग्रन्थाः मम नयनपथे पान्थायन्ते। ते तावत् राधावल्लभत्रिपाठिनः 'आधुनिकसंस्कृतसाहित्यसन्दर्भसूची', रामजी-उपाध्यायस्य 'आधुनिकसंस्कृत-साहित्यानुशीलनम्', राजेन्द्रमिश्रस्य 'Catalogue of the 19th Century Sanskrit Works', ऋताचट्टोपाध्यायस्य '20th Century Sanskrit Literature (A Glimpse into Tradition and Innovation)', रमाकान्तशुक्लायाः 'अर्वाचीनसंस्कृतसंग्रहः' (प्रथम-द्वितीय-तृतीयखण्डाः, देववाणीपरिषद्, दिल्ली, १९९२), कलानाथशास्त्रिणः 'आधुनिकसंस्कृतसाहित्येतिहासः' (जगदीशसंस्कृतपुस्तकालयः, जयपुरम्, २००४), रामकुमारदाधीचस्य 'आधुनिकसंस्कृतसाहित्येतिहासः' (हंसाप्रकाशनम्, जयपुरम्, २००२)। मदीयग्रन्थविरचने एतेषां पुरोगामिनां नानङ्गीकार्यमृणं भूयो भूयः स्मरामि। परमत्रेदमुल्लेखार्हं यत् ग्रन्थप्रसूनमिदं नहि विद्यावारिधिः (Ph.D) इत्युपाधिलाभाय निर्मितं परञ्च विगतानि दश वर्षाणि यावद् अर्वाचीनसंस्कृतसाहित्यविषयकाणाम् आचितानां तथ्यानां समष्टिपरकम्।

तथ्यसंग्रहे संयोजने संशोधने च राधावल्लभत्रिपाठि-सीतानाथाचार्य-ऋताचट्टोपाध्याय-धनञ्जयचक्रवर्ति-अरुणरञ्जनमिश्रादयः अकुण्ठं साहाय्यं कृतवन्त इति तेषाम् ऋणं नम्रशिरशा स्वीकरोमि। विशेषतः प्राचार्याः राधावल्लभत्रिपाठिनः शुभाशंसनेन, प्राचार्याः सीतानाथाचार्यशास्त्रिणः आशीर्वादाः, आचार्याः प्रफुल्लकुमारमिश्राः पुरोवाचा, तथा च विश्वभारत्याः अध्यापकाः अरुणरञ्जनमिश्राः भूमिकया मदीयग्रन्थस्य क्षतिपूर्तिं साधितवन्तः। दुर्लभग्रन्थ-तथ्यादिपरिवेशनेन अर्वाचीनसाहित्यगतः लब्धप्रतिष्ठानां नारायणदाशवर्याणामृणं स्वीकरोमि।

अद्यावधि मयका आधुनिकसंस्कृतसाहित्यविषयकं यत्सामान्यं ज्ञानमधीतम्, तच्छ्रेयो याति मद्गुरुभ्यः सीतानाथाचार्येभ्यस्तथा च अध्यापिकाभ्यः ऋताचट्टोपाध्यायाभ्यः। तयोश्च निरामयं जीवितं प्रार्थ्यते परमकारुणिकस्य सविधे। तथाह्युक्तम् –

'यशोऽभिवृद्धिं भवदर्थमीशं सम्प्रार्थयेऽहञ्च सुदीर्घमायुः।
स्वस्था भवन्तः सुखिनश्च सन्तो नयन्तु कालं भुवि कीर्तिमन्तः'॥

प्रसङ्गतः उल्लेख्यं यन्मदीयगुरवो धनञ्जयचक्रवर्तिनः छात्रवात्सल्येन ग्रन्थविरचने सौविध्यमकल्पयन्। तेषाम् ऋणं शिरसा वहन् प्रणतिततिभिः प्रह्वीभवामि। तथ्यचित्रादिप्रदानेन सौविध्यमकल्पयन्त्यः कलिकाताविश्वविद्यालयीयाः प्राध्यापिकाः मौदासगुप्तमहाभागास्तथा च रवीन्द्रभारतीविश्वविद्यालयस्य संस्कृतसंकायस्य अध्यापिका मणिदीपादासवर्याः। रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य सहाध्यापकानां राकेशदाशानां निःस्वार्थं सहायता ग्रन्थप्रकाशने विशेषमुल्लेखार्हा। तेभ्यः प्रणतिततिं ज्ञापयामि।

मुद्रणप्रमादसंशोधनाय तथा च टङ्कनकार्ये अक्षरपरिष्कारादिकर्मणि च साहाय्यमाचरितवद्भ्यो रामकृष्णमिशन्-विवेकानन्द-शैक्षिकशोधसंस्थानस्य शोधच्छात्रेभ्यो जयदेवेभ्यः सविनयं धन्यवादान् वितरामि। तेषां निरामयं दीर्घजीवनम् उत्तमा सारस्वती सिद्धिश्च प्रार्थ्येते भगवतश्चरणकमले। संस्कृतसाहित्यपरिषदो ग्रन्थागारिकेभ्यो मिठुरक्षितमहाभागेभ्यः, चान्यग्रन्थालयाध्यक्षेभ्यश्च तथा च मम सारस्वतबन्धुवरेभ्यः सकार्तज्ञ्यं धन्यवादान् विज्ञापयामि।

पुस्तकस्य विरचनावसरे मम सहधर्मिन्याः शम्पाया आन्तरिकी भूमिका संस्मरणीया। मत्कृते महार्णवतुल्ये लघुग्रन्थेऽस्मिन् मदीयानां पूर्वपुरुषाणां परोक्षप्रभावो वरीवर्तीति मन्ये। ययोराशीर्वादमतिरिच्य कथमपि ग्रन्थकार्यमिदं सुष्ठुतया न सम्पद्येत, तौ हि मम जन्म-कर्म-ज्ञानदातारौ पितरौ। तेभ्यो निरामयं जीवनं काङ्क्ष्यते।

एतदनुसन्धानात्मककार्यं सम्पादयितुं झण्टु-वाप्पा-प्रदीपप्रभृतिभिः मदीयान्तेवासिभिर्मनोवाक्कायकर्मधनैर्यद्यत्साहाय्यं प्रादायि, तत्सर्वं स्मारं स्मारं सम्प्रत्यनुसन्धानतपःपूर्तिवेलायां तेभ्यो भूयो भूयो मनसा वाचा बुद्ध्या च हार्दिकान्

धन्यवादान् निवेदयामि। संस्कृतग्रन्थानां प्रकाशने निरन्तरमुत्साहं प्रकाशयतः प्रकाशकस्य देवाशिषभट्टाचार्यस्य स्वस्थजीवनं प्रकामये।

चान्तिमे श्रीरामकृष्ण-सारदा-विवेकानन्दपादाः समासां भूतततीनां समस्तसन्मङ्गलानि साधयन्त्विति भूयो भूयः सम्प्रार्थ्य तेभ्यश्च साष्टाङ्गप्रणतिततिं विनिवेदयामि। 'आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इति कालिदासोक्तिमनुसृत्य विद्वत्परितोषेणैव मे परितोषः। इदमपि निवेदनं यत् मम ज्ञानात् प्रमादात् भ्रमवशाद् सङ्गणकजन्यदोषाद्वा काश्चन त्रुटयः सञ्जातास्ताः संशोध्य सविद्वद्भिः निरक्षीरविवेकिभिः शास्त्रावगाहनशेमुषिसम्पन्नैः सूचनीयोऽयं जनः। संस्कृतानुरागिणां गवेषकाणाञ्चाध्येतॄणामुत्कर्षः साफल्यं चेद् ग्रन्थेनैतेन संपाद्यते, तर्हि श्रमो मे फलेग्रहिः।

विदुषां वशंवदस्य
शुभ्रजित्सेनस्य

सूचीपत्रम्

शब्दसंक्षेपाः

1. अभिनवकाव्यालंकारसूत्रम् – अभि.सूत्र.
2. अर्वाचीन संस्कृत काव्य की परिक्रमा – अ.सं.का.प.
3. आधुनिक संस्कृत कथायैँ : स्थिति और प्रवृत्ति – आ.क.स्थि.प्र.
4. आधुनिक संस्कृत काव्यशास्त्र – आ.सं.का.शा.
5. आधुनिक संस्कृत साहित्येर रूपरेखा – आ.स.सा.रू.
6. काव्यादर्शः – का.द. (चिन्मयी)
7. काव्यमीमांसा – काव्य.मी. (सीता)
8. धरित्रीपतिनिर्वाचनम् – धरित्री.नि.
9. नाट्यशास्त्रम् – ना.शा.(नागरः)
10. नाट्यशास्त्रम् – ना.शा.(द्विवेदी)
11. रथ्यासु जम्बुवर्णानां शिराणाम् – र.जम्बु.शि.
12. राजनीतिलीलामृतम् – राज.लीला.
13. विंशशताब्दीकं संस्कृतनाटकम् – वि.स.ना. (रामजी)
14. शिशुयुवदुर्दैवविलसितम् – शिशु.युव.
15. श्रीजीवन्यायतीर्थेर सारस्वत साधना – श्री.सा.सा.(ऋ)
16. संस्कृतसाहित्य : बीसवीं शताब्दी – स.सा.बी.श.
17. संस्कृतसाहित्यपरिषत्पत्रिका – स.सा.प.
18. संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम् – सं.प.अ.
19. संस्कृतेऽनूदितं रवीन्द्रसाहित्यम् – सं.अनु.सा.
20. साहित्यदर्पणः – सा.द. (हरिदासः)
21. सिद्धेश्वर चट्टोपाध्याय ओ ताँर रचित अथ किम् – सिद्धे.अथ.किम्.
22. सीतानाथ आचार्य : कवि ओ प्राबन्धिक – सी.आ.क.प्रा. (ऋ)

23. 20th Century Sanskrit Literature : A Glimpse into Tradition and Innovation – S.L. (20th)
24. Modern Sanskrit Dramas of Bengal (20th Century AD) – M.S.D.
25. Modern Sanskrit Literature : Some Observations – M.S.L. (2)
26. Modern Sanskrit Plays (1970-1998) – M.S.D (1)
27. Modern Sanskrit Literature : Tradition and Innovation – M.S.L. (3)

प्रथमोऽध्यायः

॥ आधुनिकता तत्स्वरूपञ्च ॥

१.०. प्रस्तावना

भाषान्तरविलक्षणैर्विशिष्टैः प्रकृतिप्रत्ययादिसंस्कारविशेषैः संस्कृतत्वादियं किल संस्कृतभाषेत्यन्वर्थसंज्ञां लेभे। भाषा हि द्विविधा श्रूयते– 'प्राकृतभाषा संस्कृतभाषा' चेति। विदितचरमेव विदुषां यत् संस्कृतं हि नाम दैवी वाक्। सेयं देवैर्विद्वद्भिर्व्यवह्रियमानत्वाद् देवभाषेत्युच्यते। संस्करणैः संस्कृतत्वाच्च सैव संस्कृतमित्युच्यते। उक्तञ्च– 'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः'[१] इति। सेयमन्वर्थसंज्ञा गीर्वाणवाण्या यत्संस्कृतभाषा देवभाषा वा नामेति। 'भाष्यते भाषणादिव्यवहारोऽनुष्ठीयते यया सा भाषेति'। भाषाधीनो हि सर्वोऽपि व्यवहारो लोकस्य। संस्कृतस्यास्य साहित्यं संस्कृतसाहित्यम्। इदञ्च किल द्वेधा विभज्यते– वैदिकं लौकिकञ्चेति। तत्र वैदिके तावद् वेदाः, उपवेदाः, वेदाङ्गानि, ब्राह्मणानि, उपनिषदः, आरण्यकानि च संगृह्यन्ते। लौकिके पुनः रामायण-महाभारतादिमहाकाव्य-खण्डकाव्य-नाटक-गद्यपद्यमयचम्पून्यासादीनि परिगण्यन्ते। प्रागैतिहासिकयुगादारभ्य प्रवहन्ती पुलिनप्लाविनी संस्कृतसाहित्यसुधाधारापि मार्गोपमार्गेषु स्वकीयां गतिं व्यधत्त विधत्ते च। तथाहि वैदिकसाहित्यस्यापि प्रकृतिः विपर्यस्ता रामायणमहाभारतपुराणादिसाहित्ये। तदनु लौकिकसाहित्ये विविधं वैचित्र्यं तथा भिन्नस्वादशैली समदृश्यत। तेन कालिदासपूर्ववर्तिनी काव्यधाराभिनवगतिमवाप कालिदासीयकाव्यसंग्रहे। कालिदासोत्तरवर्तिकाले समदृश्यत भारविप्रभृतिकविरवीणां लेखनीषु कालिदासीयकाव्यरीतेः परिवर्तमानता। अर्थान्नदी यथा सहसा गतिं वक्रयति तथैव साहित्यमपि काले काले दिक्परिवर्तनं करोति। विश्वस्य सर्वासु भाषासु परिवर्तनमिदं दरीदृश्यते। विश्वकविना रवीन्द्रनाथेन 'आधुनिक काव्य' इति प्रबन्धस्य 'साहित्येर पथे' इत्यंशे समभ्यधायि– "नदी येमन हठात् वाँक फेरे, तेमनि साहित्यओ दिक्परिवर्तन करे, सेइ वाँकटाके वला येते पारे आधुनिक"[२] इति।

---

[१]का.द. (चिन्मयी) श्लोकः – १।३३।

[२]रवीन्द्र रचनावली, 'आधुनिक काव्य', पृ. – ४९७-४९८।

अर्थात् स्रोतस्विनी यथा क्वचित् सहसा गतिं वक्रयति, तथैव साहित्यमपि काले काले दिशं परिवर्तते। सैव वक्रता (दिक्परिवर्तनम्) ह्याधुनिकी। वस्तुतः स्रोतस्वदिव साहित्यामृतप्रवाहः अविच्छिन्नत्वेन विज्ञानप्रयुक्तिपरिस्फूर्तिकमनुजसभ्यतायाः तथा मानविकमूल्यबोधापक्षयात् स्खलद्गतिसमाजस्य च विवर्तनेन समं स्वकगतिप्रकृति-विपर्यासं विधाय आधुनिकतामेति। अतो, नितरामापेक्षिक आधुनिकशब्दोऽयम्। शेलि-कीट्स्-रवीन्द्रनाथादयः कोविदकवयस्तदीये युगे यथार्वाचीना आसन् तथैव काल्या दासः कालिदासोऽपि आसीदाधुनिकः स्वकाले।

'अधुना भव आधुनिक' इति विग्रहेऽधुनाशब्दादुत्तरं ठञ्प्रत्ययेन आधुनिकशब्दो निष्पन्नः। आङ्गलभाषायां 'Modern' इति शब्दः प्रयुज्यते आधुनिकस्य कृते। 'Modern' इत्यस्माच्छब्दात् 'Modernity', 'Modernism', 'Modernization' चेत्यादिकाः जाताः। अधुनाशब्दाद् आधुनिक-आधुनिकता-आधुनिकीकरण-आधुनिकतावादाश्चैते शब्दाः निष्पन्नाः। अधुनाशब्दस्य साम्प्रतम्, इदानीम्, अद्यतनमित्यर्थः। अस्मिन्नेवार्थे अर्वाचीनमद्यतनमित्यादिकाः शब्दाः प्रयुज्यन्ते।[३] किन्तु डा० भागीरथिनन्दः किञ्चिद्भिन्नमतं पोषयति। तेन 'आधुनिकसंस्कृतकवित्वम्' इत्याख्ये प्रबन्धे भणितम्– "आधुनिकशब्दो नाम नूतनसाम्प्रतिकादिशब्देभ्योऽर्थदृष्ट्या भिन्नः। साहित्यक्षेत्रेऽस्यार्थः स्वतन्त्रः। नूतनशब्दे सन्निहिता आधुनिकशब्दे व्याप्ततरा। आधुनिकं सर्वदा विप्लवात्मकम्। विप्लवात्मकं नाम परिवर्तितदृष्टेः प्रकाशः। इदं चैका भिन्नप्रकारा चेतना। अतीताद् वर्तमानाद्वा बीजं संगृह्याधुनिकः कविः स्वतन्त्रं नवं रूपं सृजति। अनुभूयमानमेकमपि नावीन्येन रूपयन्ति कवयः पृथक् पृथक्। स्वादोऽपि तेषां परस्परं भिन्नः। आधुनिकसंस्कृतकवीनां कृतिषु आधुनिकतादृष्टिरितरभारतीयभाषा साहित्यकृतिष्विव विलोक्यते। आधुनिकतावादिनामेका सुदीर्घा परम्पराप्यस्ति। आधुनिककवयः प्रकारैरनेकैराधुनिकतायाः स्वरमुपस्थापयन्ति सम्प्रति। सर्वत्र तु प्रकारभिन्नतायामपि आस्वादाल्लब्ध आनन्द एव"[४] इति।

यान्त्रिकीकरण-नगरीसभ्यता-विश्वयुद्ध-अणुबोम्बकृतनृसंहारादिभिः कारणैः

[३]आधुनिकता अने गुजराती कविता, पृ. – ३-४।
[४]अ.सं.सा., पृ. – १३१।

मनुष्यनियतिविधायकाः प्रश्ना जाताः। किमिदं सर्वं परमेश्वरः करोति कारयति वा? किं वा निर्दोषजनसंहारस्य कृते निष्कारुण्यमीश्वरस्य येऽणुबाम्बँस्फोटेन मृतास्ते सर्वे पापात्मन आसन्? प्रश्नानामेषां समाधानं न जातं पारस्परिकसामाजिकमूल्यैः? मानवमस्तिस्कस्य मार्गणं मनुष्यस्य स्वस्योत्तरदायित्वं जातम्। अस्मात् संघर्षादाधुनिकचेतनायाः प्रार्दुर्भावो जातः।[५] पाश्चात्त्यसाहित्ये यान्त्रिकीकरण-नगरीकरण-विश्वयुद्धकृत-नरसंहारजातनैराश्यात् प्रसूता विशिष्टा सर्जकचेतनार्थाद् आधुनिकतेति व्याख्या प्रवर्तत आधुनिकतायाः।[६]

अरविंगहोवेमहाभागः (Irving Howe), 'The Culture of Modernism' इति प्रबन्धे 'समकालीनम्' 'आधुनिकता' चेत्येतयोः शब्दयोर्मध्ये भेदरेखां स्पष्टीकृतवान्– "Where the contemporary refers to time, the modern refers to sensibility and style and whereas the contemporary is a term of natural reference, the modern is a term of critical treatment and judgment"[७] इति।

वस्तुतः, आधुनिकतायाः धारणा निसर्गत एव गतिमती। प्रसङ्गेऽस्मिन् कविगुरुवर्यस्य रवीन्द्रनाथस्य भणितिः स्मरणीया–

"सेकालेर यौवनमदमत्ता आधुनिकता एकाले लोलचर्म पलितकेश आवार एकालेर झकझके आधुनिकता पँचिश पञ्चाश कि एकश वछर परे वेजाय सेकेले हये यावे" इति। अर्थात् "तत्कालस्य (प्राचीनकालस्य) यौवनमदमत्ता आधुनिकता अधुनातने काले लोलचर्मान्विता पलितकेशा च, पुन इदानीन्तनी चाक्चिक्यमयी आधुनिकता पञ्चविंशतिवर्षेभ्यः परमतीव तात्कालिकी भवेदि"ति। एवं जनिर्भविता आधुनिकतायाः। यस्या यौवनद्युत्या बभूव विमुग्धो भविष्यसहृदयसम्प्रदायः। आधुनिकशब्दस्य विचारावसरे प्राह क्रिस्तोफार-कड्ओयेल-महाभागः–

"When we use the word Modern in a general sense, we use it to describe a whole complex of culture…, This complex rests on

[५]अ.सं.का.प., पृ. – १-२।
[६]साम्प्रतिकसंस्कृतकवितायामाधुनिकतावादी वलणो, पृ. – ५७-५९।
[७]Modernism : Critical Concepts in Literary and Caltural Studies (vol. III, 1971-81) p.– 19.

economic foundation .This complex itself is changeful"[८] इति।

कश्चन साहित्यविशेषो विशिष्टसमये यदा परित्यक्तप्रत्नगतिपथः सन्नूत्नपथे प्रवाहितः, विलक्षणशैलीवैशिष्ट्येन चानुरञ्जितो भवति, तदा तदाधुनिकसंज्ञां लभते। कालिदासः स्वककविकर्म प्रत्नमिति तथा च काव्यसर्जनं नूतनमित्याख्यातवान्– "पुराणमित्येव न साधु न चापि काव्यं नवमित्यवद्यम्"[९] इति।

नित्यनवीनस्य पुराण्युषावत्संस्कृतकाव्यधारापि नित्यनूतना चिरन्तनी च विलसति। खृष्टप्राग्दशसहस्रवर्षेभ्योऽद्यावधि प्रवहमान्ती धारा नवनवरसैः जनमान-समाप्यायन्ती सद्यः प्रस्फुटितशतदलमिव दिग्दिगन्तेषु स्वसुरभिं सञ्चारयति। परिवर्तनेनैव जीवितास्ति जीवच्छक्तिः काव्यस्य। अधिकन्तु यत्प्रतिक्षणमभिक्षणं परिवर्तनशीलं तदेव रम्यम्– "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः"[१०] इति। अस्या रमणीयतायाः प्रत्यग्रतायाश्च हेतवस्तु तेऽभिनवा भावास्ता नूत्ना विधा नवीनाः प्रवृत्तयश्च याः समुन्मीलिताः समकालिकैः अर्वाचीनैश्च कविभिः स्वस्वकाव्यसृष्टिषु। किन्त्वत्रेदमुल्लेख्यं यदाङ्गलवङ्गसाहित्यादिकं तदीययात्रापथे आधुनिकयुगम् अतिक्रम्योत्तराधुनिकताया युगमाप्नोति। परमेतदेव चिन्तनं न हि युक्तिसहं मनुते। यदाङ्गलवङ्गसाहित्ययोः गूढतात्त्विकालोचनानुसारि संस्कृतसाहित्यस्य अस्याधुनिकताया विचारः करणीयः। वस्तुतः, प्रत्येकं साहित्यस्यास्ति कश्चन स्वतन्त्रगतिपथः, समस्ति तस्य विशिष्टवैशिष्ट्यञ्च। यन्नूत्नयुगगतमननं हृत्प्रतिन्यासञ्च साहित्यमुकुरे सम्यक्तया पदं कुरुतः, तद्धि आधुनिकसाहित्यधारा यदि विलक्षणे मार्गे पदं कुर्यात्तर्हि नास्ति किमप्यस्वाभाविकत्वम्। अत्रेदं वक्तुं पार्यते यत्– संस्कृतविदः नैव वा ते अतीतकालमात्रनिमग्ना आसन्। समानपरिवर्तनधारामनुसृत्य तेऽपि तत्कालोपयोगिसाहित्यविनिर्माणे सदा तत्पराः।

[८]The Development of the Modern Illusion and Heality, द्रष्टव्यम् – अ.सं.का.प.।
[९]मालविकाग्निमित्रम्।
[१०]शिशुपालवधम् – ४।१७।

२.०. साहित्ये आधुनिकतायाः प्रारम्भविषयकवादाः

क) पाश्चात्त्यसाहित्यसमालोचका वुल्फवर्जिनियापादः कथयति यत्– 'on or about December 1910 human nature changed'[११] इति। १९१० खृष्टाब्दाद् उत्तरकाले मानवस्वभावस्य परिवर्तनमभवदिति कृत्वा साहित्येऽप्यस्य प्रभावः संलक्ष्यते।

ख) रिचार्ड-एलम्यान-चार्ल्समहाभागस्तथा च फाइदलपादो मन्येते यत्– एकोनविंशतिशततमे ईशवीये संवत्सरे संजात आधुनिकसाहित्यस्यारम्भः।

ग) फ्राङ्ककरमोडवर्यः 'आधुनिकता १९०७ खृष्टाब्दतः १९२५ पर्यन्तम् एकोनविंशतिसंवत्सराणां मध्ये प्रतिष्ठिता जाता'[१२] इति कथयति।

ग) जगन्नाथादुत्तरवर्ति संस्कृतसाहित्यमेवाधुनिकसंस्कृतसाहित्यमिति वक्तुकामो रामजी-उपाध्यायः।[१३]

ङ) अभिराजराजेन्द्रमिश्रश्चिन्तयति यत् ईशवीयस्य चतुरशीत्यधिकसप्तदशशत-तमस्य संवत्सरस्योत्तरवर्ति निर्मितसाहित्यमर्वाचीनमिति। कोविदः अयमर्वाचीनसंस्कृत-साहित्यं युगत्रयेन विभक्तवान्–

क) पुनर्जागरणकालः (१७८४-१८८४)
ख) स्थापनकालः (१८८४-१९५०)
ग) समृद्धिकालः(१९५०-अद्यावधि)[१४]

च) अर्वाचीनसंस्कृतसाहित्यस्यास्य प्रचलितेषु सीमाविषयकवादेषु एकतमं तावत्–

१८५० खृष्टाब्दतः १९०० खृष्टाब्दपर्यन्तमर्वाचीनसाहित्यस्य 'प्रारम्भलग्नः', १९०० खृष्टाब्दतः १९४७ पर्यन्तं पुनरुत्थानकालोऽस्य, १९४७ खृष्टाब्दतो वर्तमानकालं यावदस्य 'समृद्धिलग्न' इति। परन्तु श्रीधरभास्करवार्णेकारमतानुसारिणी सप्तदशशताब्दी किल आधुनिकसंस्कृतसाहित्यस्य प्रारम्भकाल इति सर्वैर्विदितम्। राजनैतिकपरिवर्तनस्य दृक्कोणतः आधुनिकसंस्कृतसाहित्यं स्वातन्त्र्यपूर्वोत्तरभेदाद् द्वेधा विभक्तवान्

[११]आधुनिकता अने गुजराती कविता, पृ. – ६-१०।
[१२]तत्रैव, पृ. – ११-१२।
[१३]आधुनिकसंस्कृतसाहित्यानुशीलनम्, पृ. – ६३-६४।
[१४]प्राग्वाचिकम् (राजेन्द्रमिश्ररचितम्), पृ. – घ-४।

श्रीचन्द्रकिशोरगोस्वामी।[१५]

छ) जगन्नाथपाठकेन व्यक्तिविशेषमाधारीकृत्य संस्कृतसाहित्यस्य आधुनिककालो युगत्रयेन विभज्यते–

१) अप्पाशास्त्रीराशिवडेकरयुगः (१८७३-१९१३)

२) भट्टयुगः (भट्टमथुरानाथशास्त्रियुगः) (१९३०-१९६०)

३) डा० वेंकटराघवन्युगः (१९६०-१९८०)[१६]

साहित्यसमालोचककवयैः कलानाथशास्त्रिमहाभागैः जगन्नाथपाठकस्य नयः स्वीकृतः। परं प्रश्नो जायते १९८० खृष्टाब्दात्परवर्तिकालः कस्य कयोर्वा नाम्ना व्यपदेष्टुं शक्यते? समयेऽस्मिन्नभिराजेन राधावल्लभेन च विशेषेणार्वाचीनसंस्कृत-साहित्यमभवद्भवति समृद्धम्। हर्षदेवमाधवेन मन्यते यत् १९८० खृष्टाब्दादुत्तरवर्तियुगः 'अभिराजयुग' इति निश्चप्रचम्।

अत्रेदं विचार्यं यत् किं साहित्ये विशेषेण संस्कृतवाङ्मये कालगतम् एवाधुनिकत्वं युक्ततया अङ्गीकार्यम्? सन्दर्भेऽस्मिन् रवीन्द्रनाथस्योक्तिः उल्लेखार्हा रवीन्द्ररचनावल्याः 'आधुनिक काव्य' इत्याख्ये प्रबन्धे –

"पांजि मिलिये Modern एर सीमा निर्णय करवे के? एइ आधुनिकता समय निये नय, मर्जि निये"[१७] इति। अर्थात् "कः खलु पञ्चाङ्गमनुसृत्याधुनिकतायाः सीमानिर्णयं करिष्यति?"– एतदाधुनिकत्वं न कालगतं किन्तु मनोभावगतमिति। किन्तु न हि केवलं मनोभावापरपर्यायमाधुनिकत्वं, समयनिष्ठमपीति। एतद्द्वयमाधुनिकसाहित्यस्य तथा संस्कृतसाहित्यस्यापि नियामकशक्तिरूपम्। तथाहि ऊनविंश-विंशशतकयोः संस्कृतसाहित्यप्रवाहः प्रचलितेतिहवाहिनीं सृष्टिधर्मितां बाहुल्येन परित्यज्य नवखातावच्छिन्नगतिमयतायां प्रवहन् दरीदृश्यते।

[१५]अ.सं.का.प., पृ. – ३।

[१६]तत्रैव, पृ. – ३।

[१७]रवीन्द्ररचनावली, 'आधुनिक काव्य', पृ. – ४९७-४९८।

३.०. आधुनिकतायाः स्वरूपम्

ननु का नामाधुनिकता, कानि चाधुनिकतायाः लक्षणानीति चेदुच्यते निर्मलया उपाध्यायया–

क) शृङ्गारितभावनायाः ह्रासः

ख) राष्ट्रियभावनायाः प्राबल्यम्

ग) समग्रदेशायैक्यस्य सन्देशः

घ) समकालीनप्रासङ्गिकवृत्तान्तनिरूपणे जागरुकता चेति।

आधुनिकताया लक्षणान्यधस्तादुल्लिख्यन्ते[१८] –

१) आधुनिकविलक्षणं जीवनदर्शनम्

२) प्रकृतेश्च्युतिः रतेश्च केन्द्रच्युतिः

३) कुत्सित-क्षोभकारक-दुर्ग्राह्यवस्तूनां निर्भीकाभिव्यक्तिः

४) अस्तित्वं मार्गयितुं प्रयत्नाः

५) प्रतीक-विम्ब-अतिवास्तववादादिभिः कलागतां विभावनां निरूपयितुं प्रीतिः

६) आदिमप्रवृत्तिं प्रति गमनम्

७) विप्रतीकस्य (Anti-Hero) नायकस्य, जन्तुकल्पमानवस्य नैराश्यस्य च मार्मिकञ्चित्रणम्।

एतान् व्यतिरिच्याप्याधुनिकताया अन्यानि लक्षणानि वर्तन्ते[१९]–

क) निषेधात्मिका वृत्तिः

ख) प्रयोगधर्मिता

ग) साहित्यस्वरूपं प्रत्यभिनिवेशः

घ) परम्पराणामुन्मूलनम्

ङ) नवीनविषयाणां सर्जनम्

च) नूतना चेतना प्राचीनविषयान् परित्यज्य

[१८]साम्प्रतिकसंस्कृतकवितायामाधुनिकतावादी वलणो, पृ. – ५७-५९।

[१९]प्रतिभाषानुङ्कवचः (द्वितीयप्रकरणम्)।

छ) केन्द्रोत्सर्गित्व-निर्भयत्व-निर्बलत्वादीनां स्वीकारः चेत्यादीनि।

डा० राधावल्लभत्रिपाठिना आधुनिकसंस्कृतकाव्यनिर्माणे निम्नोल्लिखितानि प्रेरकतत्त्वान्यङ्गीकृतानि[२०]–

१. राजनैतिकी पार्श्वभूमिः
२. राष्ट्रवादी काव्यप्रवाहः
३. गान्धिवादस्य प्रभावः
४. नवचेतना
५. विषयनावीन्यम्
६. समकालिकता
७. व्यङ्ग्यप्रधानाभिव्यक्तिः
८. सामाजिकी चेतना
९. यथार्थबोधः
१०. राष्ट्रवादस्य सातत्यम्
११. नूत्नविधत्वम् अभिनवत्वं वेति
१२. परम्पराधुनिकतयोः सहावस्थानम्
१३. व्यक्तिवादस्योदयः
१४. परम्पराधुनिकतयोर्द्वन्द्वम्
१५. नवार्थसन्धानञ्चेति।

हर्षदेवमाधवेन 'आधुनिकतावाद और शाश्वतता' इति प्रबन्धे आधुनिकतावाद-लक्षणानि पर्यालोचयतोक्तानि–

"परम्परा मेँ श्रद्धा रखने वाला, ईश्वर की भक्ति करने वाला , नियति को मानने वाला कोइ भी व्यक्ति आधुनिकता में नायक नहीं हो सकता क्योंकि वे सभी परस्पराबद्ध हैं। आल्बेर कामु का उपन्यास 'the out sider' और सेम्युअल बेकेट् का 'waiting for god' इस संदर्भ में पढने चाहिये। जातीयता, विद्रोह, विस्मय, स्वतन्त्रता , मानव के

[२०]सं.सा.बी.श., पृ. – ९-७५।

आदिम आवेगों की मुक्त अभिव्यक्ति, अचेतन मन, अन्तर्द्वन्द्व, मानसिक तनाव, हताशा का चित्रण आदि आधुनिकता से जुडे हुए है। प्रस्तापित मूल्यों के विच्छेद, श्रद्धाविनाश, शैलीगत प्रयोगशीलता, संस्कृति ह्रास पर प्रतिक्रिया, नास्तिवाद, सौन्दर्यनिष्ठा का अनादर, विविध वादों की जानकारी और प्रतीक, बिम्ब, मिथक के विना आधुनिकता की संज्ञा किसी भी तरह योग्य नहीं है"[२१] इति।

इत्थं पाश्चात्यसाहित्ये आधुनिकताया योऽर्थोऽवगम्यते, न तादृशोऽर्थः समुपलभ्यतेऽर्वाचीनसंस्कृतवाङ्मये। तथापि आधुनिकतायाः कानिचिल्लक्षणान्यवश्यमेव संलक्ष्यन्त आधुनिकसंस्कृतसाहित्ये।

शिक्षासंस्कारादिजन्या कवेः प्रतिभा कदापि स्वदेशीयसमकालिकीं सामाजिकीं स्थितिं परिवर्ज्य स्थातुं नार्हति। साहित्यं मानवसभ्यतायाः सहस्रदिग्विवर्तनेन निरूपयति स्वरूपम् आधुनिकतायाः? आधुनिकशब्दोऽयं विषयाङ्गिकोभयं प्रति प्रासङ्गिकः। उच्यते– 'Literature is the reflection of the society' इति। अर्थात् समाजाविविक्तत्वादार्थसामाजिकराजनैतिकपरिवर्तमानतायाः प्रकाशनं वरीवृत्यते हाराद्यलंकारसुशोभितेषु साहित्याङ्गेषु। राधावल्लभत्रिपाठिनोक्तम्–

"साहित्ये जीवनं सर्वं सर्वाङ्गीनं नवं नवम्।
प्रतिविम्बत्वमायाति समुल्लसति वर्धते॥
अद्भुतः प्रतिविम्बोऽयं विम्बमेव विभावयन्।
संस्कुर्वन् जीवनं तस्मिन् समवेतो नवायते॥
जीवने चास्ति साहित्यं साहित्ये जीवनं तथा।
परस्परकृता सिद्धिरनयोः सम्प्रवर्तते॥"[२२] इति।

तथा चाह यायावरीयो महाकवी राजशेखरः – कविवचनासत्ता च लोकयात्रा। सैव निःश्रेयसमूलमिति। तथाहि आधुनिके गीतवाङ्मये प्रथमतया परमाणुविस्फोटानां, तारकायुद्धविभीषिकाणां, पाश्चात्यसंस्कृतेरकाण्डताण्डवानां, भारतीयमूल्यबोध-जीवनाचार-संस्कृत्यादीनाम् उत्तरोत्तरह्रासानाञ्च यादृशी

[२१]दृक् (संख्या अज्ञाता)।
[२२]अभि.सूत्र., पृ. – ६।

चर्चावाप्यते, तस्या आत्यन्तिकोऽभावोऽलक्षि प्राचीनकाव्येषु। एतन्महत्प्रमोदकारणं यदर्वाचीनं संस्कृतवाङ्मयं मानदृष्ट्या (Quality) परिमाणदृशा (Quantity) चापि परां काष्ठां भजते। महाकाव्य-खण्डकाव्य-मुक्तक-नाटक-प्रकरण-चम्पू-कथाख्यायिकादयः प्राचीनकाव्यशास्त्रसम्मताः काव्यप्रकाराः प्रणीयन्त एवाधुना। किञ्च, पारम्परिककाव्यप्रकारेभ्योऽतिरिक्ताः भाषान्तरप्रयुक्तकाव्यविधा उपन्यास-पत्रकाव्य-चित्रकाव्य-भ्रमणकथानुवादादयः, वैदेशिकाश्चापि काव्यप्रकाशाः सम्प्रति संस्कृतरचनाधर्मिभिः यथायथं प्रस्तूयन्ते।

किञ्च, विश्वनाथ-मम्मटाद्यालंकारिकैः उक्तानि महाकाव्य-नाटकादिकाव्यप्रकाराणां वैशिष्ट्यानि सर्वथा नानुसृत्य शास्त्रीयरीतीश्चोल्लङ्घ्य अर्वाचीनकविभिः ग्रथितानि काव्यानि। फलतो दरीदृश्यन्तेऽर्वाचीनसुरभाषासाहित्ये साम्य-वास्तव-राष्ट्र-प्रभाव-घनाभिव्यक्ति-विदेशज-शाश्वत-नारीजनाकाशप्रयोग-स्वच्छन्दतादिवादानां प्रभावः, आधुनिककवितासु टाइपोग्राफी-सन्दिग्धता-चित्रकाव्य-नाट्य-प्रगीतकविता-गाणितिक-संज्ञाप्रयोगादिरूपं बहिरङ्गपरिवर्तनं, बिम्ब-प्रतीक-तरङ्ग-पुरातत्त्वादिरूपम् अन्तरङ्गपरिवर्तनं, सामाजिकमूल्यबोधात्मकपरिवर्तनं, भाषाणां छन्दसामलंकाराणाञ्च बहुविचित्रितो व्यवहारः। न हि केवलं काव्य-नाटक-महाकाव्योपन्यास-कथादिसाहित्येषु दरीदृश्यते वैप्लविकं विवर्तनञ्चापि काव्यशास्त्रे नूत्नानि तत्त्वानि पुस्तकानि नवीनव्याख्यापद्धत्या सह प्रचरद्रूपतां यान्ति। तथाहि वक्तुं साम्प्रतं यदर्वाचीनसंस्कृतकाव्यसर्जनाया मानदण्डो व्यायतः, प्रतिपाद्यक्षेत्रं विस्तृततरं, प्रतिपाद्यविषयाणां संख्यापि भूयसी। अतश्च "विंशशताब्दी किल संस्कृतसाहित्यस्य स्वर्णयुग" इति युक्तमुक्तवान् कविवरोऽभिराजराजेन्द्रमिश्रः। अपि चोक्तं प्राच्यतत्त्वविदुषाचार्यरमारञ्जनमुखोपाध्यायवर्येण–

"Twentieth century has witnessed a large volume of original Sanskrit literary creations that was never witnessed by any of the preceding centuries."[२३] इति। अतः साम्प्रतिक्यामस्याम् एकविंशशताब्द्यामपि अविच्छिन्नमजस्रमविकलञ्च सकलकलं कलयति कलां

[२३]M.S.L. (3), p.– 180.

कामपि संस्कृतकविताकल्लोलिनी। संस्कृतसाहित्यस्याभ्रंलिहाग्रे भव्ये राजप्रासादे ये खल्वर्वाचीनाः सरस्वतीदत्तवरप्रसादाः प्रतिभापरिपाकं बिभ्रति संस्कृतकवितायाश्च प्राक्तनीं साधु पुष्णन्ति रक्षन्ति च, तेषु जानकीवल्लभ-श्रीनिवासरथ-परमानन्दशास्त्रि-राधावल्लभ-रमाकान्त-जगन्नाथपाठक-पुष्पादीक्षित-रेवाप्रसादद्विवेदि-अभिराजराजेन्द्र-बच्चुलालावस्थिसदृशाः सरसगीतिकाराः गलज्जलिकाशिल्पनिष्णाताः कोविदकवयो राराज्यन्ते। एभिरनङ्गुलिमेयैः कविभिर्विरचितेषु काव्यग्रन्थेषु यत्र यत्र काव्यसर्जनविधेर्विवर्तनं विलसति, तेषामीक्षणदिशालोचनमाशयो हि मम।

द्वितीयोऽध्यायः
॥ आधुनिकसंस्कृतसाहित्ये वस्त्वाङ्गिकदृष्ट्या परिवर्तनम् ॥

क. भूमिका

काव्यं द्विविधम् – दृश्यं श्रव्यञ्च। तथाहि विश्वनाथेनोक्तं – 'दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्'[२४] इति। तत्र दृश्यकाव्यं नामाभिनेयम्। अस्य दर्शनात्मकचाक्षुष-प्रत्यक्षयोग्यत्वाद् दृश्यमिति संज्ञा। तद्दृश्यकाव्यं नटे रामादिस्वरूपारोपाद् रूपकम् इत्युच्यते। रूपकस्य दशविधत्वं नाट्यतत्त्वकृद्भिरङ्गीकृतम्। तथाहि दर्पणकृतोक्तं –

"नाटकमथ प्रकरणं भाण-व्यायोग-समवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश"[२५]॥ इति।


रूपकेषु नाटकस्य सुदीर्घैका परम्परासीत्। प्राचीनभारतीयनाट्यपरम्परायामासन् भास-अश्वघोष-कालिदास-भवभूति-शूद्रक-श्रीहर्षादयो नाट्यकारा अग्रगण्याः। वस्तुतः संस्कृतनाट्यपरम्पराया धारा कदाचिदपि नासीदवरुद्धा। नाटकमतिरिच्य व्यायोग-भाण-प्रकरण-प्रहसनश्रेणीयानां रूपकाणां समलक्षि निरवच्छिन्नः प्रवाहः। अपरतः श्रव्यकाव्यं केवलं श्रवणयोग्यम्। तथाहि विश्वनाथेन समवादि – 'श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा' इति। दृश्यकाव्यवत् श्रव्यकाव्यस्यापि नैके विभागा आर्कषन्त्यस्मद्दृष्टिम्। तेषु महाकाव्य-खण्डकाव्य-गीतिकाव्य-गद्य-चम्पूकाव्यानामपि नो नयनयोरापतति परम्परैका। श्रेण्यामस्यां कालिदास-भारवि-माघ-श्रीहर्ष-दण्डि-बाणादिकवयो राराज्यन्ते। सर्व एते महाकवयः अलङ्कारशास्त्रोक्तनियमान् आश्रित्य पारम्परिकतया काव्यानि विरचयामासुः। परं साम्प्रतिके काले ये खलु कवयः काव्यानि कुर्वन्ति, ते न केवलं परम्परावाहिकाव्यानि, चापि वैदेशिकप्रादेशिक-साहित्यैः साकं गहनपरिचयवशात्तेभ्य उपादानानि समाकल्य नूतनाङ्गिकेन काव्यानि ग्रथयन्ति। तथाहि, आधुनिककवीनां लेखनीतो निर्गतानि निर्गच्छन्ति च महाकाव्य-दृश्यकाव्यादिप्राचीनसाहित्यधाराम्

[२४] सा.द. (हरिदासः), पृ. – २८७।
[२५] तत्रैव, पृ. – २८८।

अतिरिच्य कोषकाव्य-संस्तवकाव्य-मुक्तकोपकथा-चरितकथाद्यवान्तरभेदैः शतशो रुचिराणि रूपाणि, प्रतीक-नभ-पथैकाङ्कात्मक-रूपकाणि च दृष्ट्वा श्रुत्वा पठित्वा वा भृशं ह्लादयन्ति सहृदयहृदयानि।

पारम्परिकं महाकाव्यम्, खण्डकाव्यम्, गीतिकाव्यम्, दूतकाव्यम्, चम्पूकाव्यम्, स्तोत्रकाव्यम्, नाटकम्, कथा चेत्याद्याः रचनाः वर्त्तमानकालेऽपि प्रणीयन्ते। एतत्सार्धं पूर्वतः अनामिताः विभागाः प्रवृत्तयो वा साम्प्रतिके साहित्ये अन्तर्भूक्ताः सन्ति। अभिराजराजेन्द्रमिश्रेण 'Modern Sanskrit Poetry' इति प्रबन्धे अर्वाचीनकाव्यप्रभेदविषये चर्चा कृता – "The Post Independence Sanskrit Poetry was really the Modern Sanskrit Poetry from that point of view. Not only the preceding rhetorical techniques of the Poetry were changed, but the inherent poetic values also proved to be amazingly different. In short, it was a complete overhauling of the old Sanskrit Poetry. Apparently, this Modern Sanskrit Poetry seems to be two folds: Metrical and Lyrical. The metrical Sanskrit Poetry is again divided in to various titles like महाकाव्य, खण्डकाव्य (दूतकाव्य, शतककाव्य, लहरीकाव्य, स्तोत्रकाव्य), कोषकाव्य etc. The lyrical Sanskrit poetry is also dominant in the shape of splendid collections and anthologies. …A new genre of the Modern Sanskrit Poetry has emerged very recently. I name it 'विमानकाव्य'. This poetry is based upon the experience of the Plane journey. 'विमानबाला' by Dr. P.N.Kavathakar, 'धरित्रीदर्शनम्' by Dr. R.V.Tripathi and 'विमानयात्राशतकम्' by Abhiraj Rajendra Mishra are the full fledged works of the variety. …The modern sensibility and style of the expression of the two fold bewitching power of these lyrics differentiate them from others. …These lyrics have popularised the Modern Sanskrit Poetry in the real sense. Simplicity of language, musical notes and clarity of the theme are

the salient features of the Modern Sanskrit lyrics. These lyrics are social, political, religious, subjective and objective in nature."[२६] आधुनिकसंस्कृतसाहित्यस्य निम्नोक्तदिशा अवान्तरभेदाः भवितुमर्हन्ति –



[२६]M.S.L. pp . 115, 124-125.

रहसविहारीद्विवेदिना 'नव्यकाव्यत्तत्वमीमांसा'याम् आधुनिककाव्यस्य बहवः अवान्तरभेदाः प्रस्तुताः। तेन महाकाव्य-रागकाव्य-विमानकाव्य-दूतकाव्य-लहरीकाव्य-प्रगतिशीलकाव्य-सैन्दर्यविधान-बिम्बविधान-प्रतीकस्तोत्रकाव्य-समस्यापूर्ति-अन्योक्ति-गजल-गीत-हाइकु-तान्का-सीजो-लघुबिम्ब-लिपिरूपक-लघुवर्णकाव्यादीनां परिभाषाः विशद्य परामृष्टम्। स्तोत्रकाव्यस्य परिभाषां प्रस्तुवता प्रो.रहसबिहारीद्विवेदिना स्वनव्यकाव्यतत्त्वमीमांसायां प्रोक्तम् – इष्टदेवरतिं व्यक्तीकर्तुं कविः स्तोत्रसंज्ञकं देवभक्तिमयं काव्यं रचयितुं प्रवर्तते –

"इष्टदेवरतिं स्वीयां व्यक्तीकुर्वन् कविः पराम्।
देवभक्तिमयं काव्यं कुरुते स्तत्रसंज्ञकम्"।।

अभिराजराजेन्द्रमिश्रेण 'अभिराजयशोभूषणा'ख्ये अलंकारग्रन्थे स्तोत्रकाव्य-गीतिकाव्य-नीतिकाव्य-शतक-काव्यानाञ्च परिभाषाः समेकीकृत्य प्रस्तुताः। तन्मतानुसारेण काव्यगीतितत्त्वप्रयोगात् गीतिकाव्यं, देवस्तुतिप्रवृत्तिवशात् स्तोत्रकाव्यम्, पद्यानाञ्च शतसंख्यककारणात् शतककाव्यं तथा च नीतिसम्पादनकारणाच्च नीतिकाव्यमित्यभिधीयते । तदुक्तं तेन –

"अन्यापदेशकाव्यं तत् प्रवृत्त्यान्योक्तिनिष्ठया।
गीतिकाव्यं तदेवोक्तं गीतितत्त्वप्रयोगतः।।
देवस्तुतिप्रवृत्त्या च स्तोत्रकाव्यं तदुच्यते।
पद्यानां शतसंख्यात्वाच्छतकाव्यं तदेव हि।।
सम्पादनाच्च नीतीनां नीतिकाव्यं न तत्पुनः।
एवमेवाभिधाप्यन्या तत्तद्वृत्त्यनुरोधतः"।।

अध्यायेऽस्मिन् काव्यप्रभेदानां दिङ्मात्रमुदाहरणं प्रदीयते।

आधुनिकसंस्कृतसाहित्यस्य श्रव्यकाव्यश्रेण्यां महाकाव्यम् (दिङ्मात्रमुदाहरणं– रेवाप्रसादद्विवेदिनः 'स्वातन्त्र्यसम्भवम्'), रागकाव्यम् (राधावल्लभत्रिपाठिनः 'गीतधीवरम्'), लहरीकाव्यम् (राधावल्लभत्रिपाठिनः 'धरित्रीदर्शनलहरी'), चम्पूकाव्यम् (जयकृष्णमिश्रस्य 'मातृमुक्तिमुक्तावली'), मौलिकनूतनच्छन्दोभिः प्रणीतं गीतिकाव्यम् (श्रीनिवासरथस्य 'तदेव गगनं सैव धरा'), खण्डकाव्यं वा

(दीपकघोषस्य 'राजनीतिलीलामृतम्'), दूतकाव्यम् (राजेन्द्रमिश्रस्य 'मृगाङ्कदूतम्'), अन्यापदेशकाव्यम् (बदरीनाथशर्मणः 'अन्योक्तिसाहस्री'), स्तोत्रकाव्यम् (विन्ध्येश्वरीप्रसादमिश्रस्य 'महाकालेश्वरस्तुतिपञ्चरत्नम्'), हास्यव्यङ्ग्यकाव्यम् (प्रशस्यमित्रशास्त्रिणः 'हासविलासः'), दार्शनिककाव्यम् (हर्षदेवमाधवस्य 'प्रकाशोपनिषद्'), नव्यशतककाव्यम् (हर्षदेवमाधवस्य 'मृत्युशतकम्'), छन्दोमुक्तं काव्यम् (हर्षदेवमाधवस्य 'निष्क्रान्ताः सर्वे'), हाइकु-सिजो-तान्कादि-काव्यम् (हर्षदेवमाधवस्य 'ऋषेः क्षुब्धे चेतसि'), सॉनेट्कविता (वीरेन्द्रकुमारभट्टाचार्यस्य 'कलापिका'), गलज्जलिका (अभिराजराजेन्द्रमिश्रस्य 'मृद्वीका'), कब्बाली (काव्याली) प्रमुखानि लोकगीतानि (कमलेशमिश्रस्य 'कमलेशविलासः'), प्रहेलिकाकाव्यम् (रामाशीषपाण्डेयस्य 'प्रहेलिकाशतकम्'), विमानकाव्यम् (रमाकान्तशुक्लस्य 'वैमानिकम्'), यात्राकाव्यम् (सत्यव्रतशास्त्रिणः 'थाइदेशविलासम्'), चरितकाव्यम् (रामजीठाकुरस्य 'लीलाशुकीयम्'), बालकविता (हरिदत्तशर्मणः 'बालगीताली', रवीन्द्रकुमारपण्डाया 'मलालायुसफजइचरितम्'), सूक्तिकविता (हरेकृष्णमेहेरस्य 'सूक्तिकस्तूरिका') चेत्यादीनि विविधविभाजनान्युपलभ्यन्ते।

पारम्परिकगद्यकाव्यस्य द्विविधं विभाजनं विद्यते – कथा आख्यायिका चेति। किन्तु साम्प्रतं गद्यकाव्यस्य विविधा नूतना विभागाः वर्त्तन्ते – उपन्यासः (रामकरणशर्मणः 'रयीशः'), दीर्घकथा (अभिराजराजेन्द्रमिश्रस्य 'इक्षुगन्धा'), लघुकथा (केशवचन्द्रदाशस्य 'ऊर्मिचूडा'), टुप्-कथा (लघुकथा) (प्रमोदकुमारनायकस्य कथा 'सप्ततिः'), नव्यकथा (राधावल्लभत्रिपाठिनः 'अभिनवशुकसारिका'), अरण्यकथा (अभिराजराजेन्द्रमिश्रस्य 'कान्तारकथा'), स्पशकथा (डिटेक्टिव् स्टोरी) (जनार्दनहेगडेकृतः 'व्यूहभेदः'), त्रासदकथा (नारायणदाशस्य 'नरेन्द्रपुरीयं रेलस्थानकम्'), हास्यव्यङ्ग्यकथा (प्रमोदकुमारनायकस्य 'उवाच कण्डुकल्याणः'), शिशुकथा अथवा बालकथा (केशवचन्द्रदाशस्य 'एकता') चेत्यादयः। साम्प्रतिके संस्कृते 'कथा'शब्दाय 'कथानी' इति, 'कथानिका' इति शब्दोऽपि प्रचलितो दृश्यते।

आधुनिकसंस्कृतसाहित्यस्य रूपकश्रेण्यां विद्यन्ते नाटकम् (रमाकान्त-शुक्लस्य 'पण्डितराजीयम्'), एकाङ्किका (राधावल्लभत्रिपाठिनः

'प्रेक्षणसप्तकम्'), वीथीनाटकम् 'स्ट्रीट् प्ले' इति (अभिराजराजेन्द्रमिश्रस्य 'चतुष्पथीयम्'), रेडियोनाटकम् (रमाकान्तशुक्लस्य 'नाट्यसप्तकम्'), नृत्यनाटिका (नलिनीशुक्लायाः 'राधानुनयः'), गीतिनाट्यम् (वीरेन्द्रकुमारभट्टाचार्यस्य 'श्रीगीतगौराङ्गम्'), शिशुनाटकम् अथवा बालनाटकम् (रवीन्द्रकुमार-पण्डायाः 'यो मे भक्तः स मे प्रियः') चेत्यादयो विभागाः।

आधुनिकसंस्कृतसाहित्यस्य गुरुत्वपूर्णमुपादानं तावद् अनुवादसाहित्यम्। अत्र सन्ति गोविन्दचन्द्र-पाण्डेयस्य 'अस्ताचलीयम्' (आङ्ग्ल-कवितानुवादः), अनन्तत्रिपाठिशर्मणः 'यथा ते रोचते' इति शेक्सपीयर-नाटकानुवादः, भागीरथिनन्दस्य ओड़िआ-भाषातः 'याज्ञसेनी' उपन्यासानुवादश्चेति कथानुवादाः चेत्याद्याः कृतयः सहृदयहृदये परिचिताः।

ख. आधुनिकसंस्कृतनाटकेष्वागतानि प्रमुख्यपरिवर्तनानि

भरतमुनेर्नाट्यशास्त्रं भारतवर्षस्य ललितकलायास्तदन्तर्गतसङ्गीत-नाट्य-नृत्यादिविधानां मार्गप्रदर्शकम्। किन्तु आधुनिकसंस्कृतनाट्यसाहित्यं पूर्णतया नानुकरोति नाट्यशास्त्रम्। विज्ञानपरिस्फूर्तिकमनुजसभ्यतायां लोकरुच्यनुसारं विंशशताब्दीयसंस्कृतकवयः स्वनाटकेषु परिवर्तनान्यानेतुं नित्यं विनूतनान् प्रयोगांश्च कर्तुं दृश्यन्ते ते कृतप्रयत्ना विवशाश्च। परमेतत्सुखदं यत्तत्परिवर्तनेषु सत्स्वप्यर्वाचीनसंस्कृतनाटकानां कालिदासादीनां नाटकैः सह साम्यं संलक्ष्यते। आधुनिकनाटकान्यस्मज्जीवनसमस्याभिः साक्षात्तया सम्बद्धानि। अतो दृग्गोचरीभवति अर्वाचीननाटकानां परिवर्तितस्वरूपं भाषा-अभिव्यक्ति-शैली-वस्तु-शिल्प-गीतादिप्रसङ्गेषु।

१. भाषागतं विवर्तनम्

विश्वनाथेन नाटकस्य भाषाविषयकं मतमुक्तं–

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्"[२७]॥ इति।

[२७]सा.द. (हरिदासः), ६।१५४।

भाषानियमोऽयं लङ्घितो दृश्यते केषाञ्चिद् अर्वाचीनसंस्कृतनाटकेषु। केषुचिन्नाटकेषु सर्वैः पात्रैर्व्यवहृता संस्कृतभाषा, केषुचिच्च प्राकृतस्थले हिन्दीभाषा, चान्या कापि प्रादेशिकी। गौरीधर्मपालविरचितं 'जननीति' रूपकमेकतमम्। तत्र प्रस्तावनोपनिबद्धा वङ्गगिरा। अपरतो यतीन्द्रविमलादिभी रचितेषु रूपकेषु विशेषेण सर्वैः पात्रैर्व्यवह्रियते संस्कृतभाषा। आधुनिकसंस्कृतनाट्यकारैः ओजःसमासबहुलभाषाः परिवर्त्य सरलाः सुबोध्याः प्रादेशिकभाषाश्च प्रयुक्ताः। भरतेन तदीये 'नाट्यशास्त्रे' स्त्री-विदूषक-परिचारिकादीनां वाङ्माध्यमत्वेन प्राकृतभाषानुमिता। कुत्रचित् क्रियते प्रादेशिकभाषाणां प्रयोगो नाट्यकृद्भिः। यथा भट्टमथुरानाथदीक्षितेन 'भूभारोद्धरणम्' इति नाटके प्रादेशिकभाषाया व्यवहारः कृतः प्राकृतभाषां परिवर्त्य। किञ्च, 'भारतविजयनाटकमि'त्यत्र प्राकृतभाषायाः स्थाने नेपालदेशस्य नेवारीभाषां प्रयुङ्क्ते कवयिता। राधावल्लभानां नाटकानां भाषायां कुत्रचिदाधुनिकसूक्तिप्रवचनानामपि प्रयोगो द्रष्टुं शक्यते। आदावेव वङ्गीयकवीनां नाटकेषु प्रवादप्रवचनानां व्यवहारः प्रदर्श्यते[२८]–

वङ्गभाषायाम्	संस्कृतभाषायाम्
१। प्रथमे ग्रासे माछि पडलो (Stumbling at the first step)	१। प्रथमे ग्रासे मक्षिकापातः[२९]
२। खिदेते पेटे चुँया डन मारछे (Someone is extremely hungry)	२। काकाः क्रन्दन्ति ममोदरे[३०]
३। कारुर पौषमास कारुर सर्वनाश (What is Sport to the cat is death to the rat: in German (tr))	३। चात्रिमां पौषमासः मम तु सर्वनाशः[३१]

[२८]निम्नोक्तसूची ऋताचट्टोपाध्यायस्य 'Modern Sanskrit Plays (1970-1998)' इति ग्रन्थात् परिगृहीता। तस्मात् तस्यै आधमर्ण्यं निवेदयामि।
[२९]मधुरा, पृ. – ४,१०।
[३०]विवेकानन्दविजयम् (वर्णेकरकृतम्)।
[३१]जननीनाटकम्।

४। तोमार मुखे फुल चन्दन पडुक (मुखमे घी शक्कर, हिन्दी)	४। भवेतां मुखे घृतसर्करा[३२]
५। यतक्षण श्वास ततक्षण आशा (If there is life, there is hope)	५। यावत् श्वासः तावदाशः[३३]
६। एक ढिले दुइ पाखि मारल (To kill two birds with one stone)	६। एकलोष्ट्रप्रहारेण पक्षिद्वयघातनम्[३४]
७। तखन इनि नाके सरषेर तेल दिये घुमोच्छिलेन नाकि? (To put oil in the nose and sleep peacefully)	७। निद्रित आसीत् किं तदासौ नासिकायां सर्षपतैलं प्रक्षिप्य

उदाहरणान्तरं यथा– 'इत्थं च सर्पोऽपि मृतो यष्टिकापि न भग्ना',[३५] 'लवणमरिचमिश्रणपुरःसरं मां विषयीकृत्य यद्वा तद्वा गुरोः पुरो जल्पिष्यसि'[३६] इति। प्रादेशिकसाहित्यानां प्रवादप्रवचनानि संस्कृतायितान्यभवन् स्वच्छन्दसा यथा– 'बद्धा मुष्टिः लक्षाधिकमूल्या' (माराठीभीषायाम् 'झाक्ली सव्वा लखाची'), 'दुलदुलायितनेत्रकाः', 'दत्वा करं वक्ष्यामि ते' चेति। राधावल्लभत्रिपाठिनः कवित्वरूपमत्र प्रतिस्थानं ध्वनितम्। तद्विरचितानां श्लोकानां रचनाप्रवाहः, भावप्रवणता, कमनीया पदावली तथा चालंकारसौन्दर्यं प्रतिच्छत्रं लसन्ति। राधावल्लभस्य 'तण्डुलप्रस्थीय'स्य नाटकीया भाषाशैली प्रशस्या, या नैकस्थलेषु कालिदास-भास-शूद्रकादीनां नाट्यसाहित्यं स्मारयन्ति। दिङ्मात्रमुदाहरणं– 'एवं शून्यमिदं परिसरं ग्रामीकुर्वन्ति',[३७] 'तेजः सिंह! स्वनियोगमशून्यं कुर्वः'[३८]।

[३२]नवमालती, पृ. – ४०।
[३३]तत्रैव, पृ. – ५६।
[३४]ननाविताडनम्।
[३५]तण्डुलप्रस्थीयम्, पृ. – ८३।
[३६]तत्रैव, पृ. – २५।
[३७]स्वप्नवासवदत्तम्।
[३८]अभिज्ञानशकुन्तलम्।

२. अभिव्यक्तिसापेक्षं परिवर्तनम्

भाषायां शुद्धत्वं पाण्डित्वञ्च इदानीं कवीनामभिव्यक्तेर्न खलु केवलं मानकम्। वैदेशिकशब्दानां संस्कृतीकरणं तेषाञ्च साक्षात्तया प्रयोगोऽद्यतनकालीननाटकेषु द्रष्टुमलम्। किञ्च, वङ्ग-आङ्गल-ओडिया-हिन्दीप्रभृतिभाषाणां शब्दाः प्रयुज्यन्ते नाट्यकृद्भिरनायासेनैव। तथाहि केरोसिन, बैडमिण्टन (Badminton), टेनिस् (Tennis), पोलिस् (Police), बस् (Bus), म्याक्सि (Maxi) इत्यादीनामप्रचलितानां व्यवहारिकशब्दानां सम्यक्तया बहुविचित्रितः प्रयोगः संदृश्यते। दिङ्मात्रम् उदाहरणं यथा[३९]–

आङ्गलभाषायाम्	संस्कृतभाषायाम्
1. Loud-speaker	ध्वनियन्त्रम्, ध्वनिविस्तारकयन्त्रम्
2. Pastry	पिष्टकम्
3. Boy-bearer	बालसेवकः
4. Morning-alarm-sound	घटिकोद्बोढकध्वनिः
5. Gas	मञ्जुषा
6. Electric-calling bell	विद्युद्घण्टिकास्वरः
7. Salute	एकहस्ताभिवादनम्
8. Ration Bag	शून्यगोणिटिका

वाक्यगतान्युदाहरणानि यथा –

1. ‘नगरे किं ट्राम-बस्कर्मिणां धर्मघटः प्रचलति’।
2. ‘मासं यावद्-ग्यासो नास्ति, क्यारोसिनं किं दुर्लभम्’।
3. “बिस्केट् ब्रेड् चाक्लेट् च चर्वणकमित्यत्यन्तहीनान्यहो।
श्लाघ्यान्येव समाश्रयन्ति सुलभारम्भाणि कष्टानि तैः”॥ चेत्यादीनि।

अपि च, पट्का-तुवरी-इत्यादीनां वङ्गीयशब्दानां क्वचिदपरिवर्तिततया,

[३९]निम्नोक्तसूची ऋताचट्टोपाध्यायस्य ‘Modern Sanskrit Plays (1970-1998)’ इति ग्रन्थात् परिगृहीता। तस्मात् तस्यै आधमर्ण्यं निवेदयामि।

कुत्रचिद्वा प्रत्ययविभक्त्यादिसंयोगेन सुविन्यस्तं शब्दपरिपाकं कुर्वन्त्यर्वाचीन-नाट्यकाराः।

राधावल्लभत्रिपाठिनः ‘सुशीला’ नाम्नि नाटके सुशीलायाः जीवनव्यथायाः, संघर्षस्य, जिजीविषायाः, नियतिविधानस्य चात्र साङ्केतिकी व्यञ्जना वर्तते। नाटकस्य सर्वे संवादा आधुनिकनाट्यपरम्परानुरूपं क्षुद्राः, व्यवहारिकाश्च ये सहजकथानकस्य लक्ष्यप्राप्ताः समर्थाः प्रतीयन्ते। उदाहरणं यथा –

“स्त्री ५– न इदानीं भेतव्यम्। यावता विभेम तावतैव भाययन्ति पुरुषा अस्मान्। यदि साहसं कुर्मस्तर्हि न किमपि कुर्यात् पुरुषः।

स्त्री १– सत्यम्, सत्यम्। स्त्री आत्मनैवात्मानमुद्धरेत्। आत्मनैव तया जीवितव्यम्।

सुशीला– जीविष्यति स्त्री, मरिष्यति पुरुषः”[४०] इति। वस्तुतो, यस्य कस्यापि नाटकस्य सर्वाधिकः संवेदनशीलः पक्षस्तस्य भाषा, संवादश्च भवतः। किन्तु, आधुनिकसंस्कृतनाटकेषु भावपक्षः कलापक्षश्चेति उभावेव गुरुत्वपूर्णौ वर्तेते। एतेन प्रमाणीभवति नाट्यकृतां मानम्।

३. तकनिक्यां परिवर्तितं स्वरूपम्

तकनिकी नाम नाट्यशैलीति। शैलीगतदृष्ट्याधुनिकसंस्कृतनाटकं परिवर्तितरूपं दधाति पाश्चात्त्यनाट्याङ्गिकमनुसृत्य। तथाहि, अर्वाचीननाट्यकृद्भिरुपेक्षितानि भरतप्रवर्तितानि नान्दी-भरतवाक्य-प्रस्तावना-पताका-प्रवेशक-विष्कम्भकादीनि नाट्यतत्त्वानि। किन्तु, नैतत्सत्यं यद् आधुनिकनाट्यकारैः न क्रियन्ते सर्वथा भरत-विश्वनाथादीनां कथितानि नाट्यतत्त्वानि, परं तादृशाः प्रयासा विरला एव दृश्यन्ते। तथाहि प्राचीननाट्यकृद्भिः अङ्कात्मको विभागः प्रकल्पितः। परन्तु अर्वाचीनैः दृश्यात्मको विभागो गृहीतः प्रतीच्यनाट्यरीत्याः प्रभावभावेन। यथा– रमाचतुर्धुरीमहाभागया विरचितं श्रीरामकृष्णजीवनाधारितं ‘युगजीवनमि’ति दशभिर्दृश्यैर्विभक्तम्, ‘निवेदितानिवेदितमि’ति द्वादशभिर्दृश्यैर्युक्तम्। नित्यानन्दस्मृतितीर्थस्य यतीन्द्रविमलचतुर्धुरिणश्च दृश्यकाव्येष्वपि दृश्यात्मकविभाजनं नयनपदवीमेति।

[४०]दृक् (संख्या अज्ञाता), पृ. – १२-१३।

"तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये" इति दर्पणकृदुक्त्यनुसारं नान्द्यवश्यकर्तव्यतयालंकारिकैरभ्युपगता। किन्तु, केषुचिद्रूपकेषु नान्दी न विलसति। उदाहरणत्वेन वक्तुं शक्यं सिद्धेश्वरचट्टोपाध्यायस्य 'ननाविताडने' नान्द्या नास्त्युल्लेखः। बहुषु रूपकेषु भरतवाक्यं नैव संलक्ष्यते, केषुचिदपि स्थलेषु दृश्यमानं भरतवाक्यं वा पारम्परिकीं पद्धतिं नानुसरति। वीरेन्द्रकुमारभट्टाचार्यस्य 'वेष्टनव्यायोगो'ऽस्यैवोदाहरणम्।

विज्ञानसभ्यतायाः कारणादद्यतनकालीनमानवानाम् अभिनयदर्शनस्य समयाभावो नितरां सन्दृश्यते। तेषामभिप्रायं रुचिञ्चाभिलक्ष्याद्यत्वे संक्षिप्तनाटकानि एकाङ्कीरूपकाणि लिखितानि भवन्ति। तथाहि, आधुनिकसंस्कृतनाट्यप्रपञ्चे एकाङ्क– 'रेडिओनाटकानां बाहुल्यं दृष्टिपथमायाति। 'रेडिओनाटकं' नाम यत् वेतारयन्त्रेण प्रचारितं स्वल्पक्षणाभ्यन्तरे समाप्तिं गतम्। तदुदाहरणं यथा– त्रिपाठिनः 'प्रेक्षणसप्तकमि'ति नाटकसंग्रहस्य सर्वाणि नाटकानि वेतारयन्त्रेण प्रचारितानि। किञ्च, रेडिओरूपकस्योदाहरणं तावद् हरिदत्तशर्मणः 'आक्रन्दनम्', रमाकान्तशुक्लस्य 'कचदेवयानी चेति। अद्यतनकालीनज्वलत्समस्याभिराधुनिकबोधैश्चोपेतान्येतानि प्रेक्षणकानि संकलितानि। अर्वाचीनसंस्कृतनाट्यपरिसरे छायानाटकानामाविर्भावो युगान्तकारीति। जे.टी.परीखस्य 'छायाशकुन्तलमु'ल्लेखयोग्यमेकं छायानाटकम्। पाश्चात्त्याङ्गिकेन प्रभावितेन वी.राघवन्-महोदयेनारब्धं सर्वप्रथमं गीर्वाणवाण्यां यात्रामूलकानाम् ओपेरानाटकानां प्रचलनम्। तस्य 'रासलीला', 'प्रेक्षणकत्रयी', 'कामशुद्धिः', 'विमुक्तिश्चे'त्यादिषु नाटकेषु तादृशः प्रयोगो दृश्यते।

विश्वनाथेन नाटकस्य नायकस्वरूपविषये भणितम्–

"प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः"॥[४१] इति।

किन्तु धीरोदात्त-धीरललितनायकानां स्थले सामान्यनिम्नवर्गीयचरित्राणि नायकत्वेन स्थानं लभन्ते अर्वाचीनसंस्कृतनाटकेषु। पाश्चात्त्यनाट्यरीतिं प्रादेशिक-नाट्यधारां वाश्रित्यार्वाचीनसंस्कृतवाङ्मये भावनाट्यानि (Abstract Plays), प्रतीकनाट्यानि (Symbolic Plays) वा विरच्यन्ते। एतान्येव संस्कृतनाट्यधारायाम्

[४१]सा.द. (हरिदासः) , पृ. – २८९।

अभिनवसंयोजनरूपेण विवेचनीयानि। प्रसङ्गेऽस्मिन् प्राच्यनाट्यतत्त्ववेत्ता नाट्यनिर्देशकः सिद्धेश्वरचट्टोपाध्यायः समुल्लेखार्हः। तेन विरचितेषु रूपकेषु व्रेशट्-वेकेट्-वादलसरकारादीनां नाट्यकाराणां संलक्ष्यते प्रभावः सुस्पष्टतया।

सिद्धेश्वरस्य 'अथ किमिति' नाटके पात्रादयः श्रेणीविशेषाणां कुर्वन्ति प्रतिनिधित्वम्। मध्यवित्तश्रेणीभाजां शिक्षितानां जनानां प्रतिनिधित्वेनोपस्थापितं 'क' इति चरित्रं, निम्नमध्यवित्तश्रेणीस्थितानां प्रतीकरूपेण 'ख' इति चरित्रं, राजनैतिकदलेषु मुख्यपात्रानां प्रतीकतयावतारितानि 'ग-घ-ङ-प्रभृतीनि चरित्राणि। कुत्रापि पात्रादयो न केवलं मञ्चस्थाः, परं दर्शकेभ्य एव समागताः। अत्रेदं सम्प्रधार्यं यत्सिद्धेश्वरस्य नाट्यरीत्या सह पाश्चात्त्यनाट्यतात्त्विकस्य व्रेशट्-पादस्य मतसाम्यं बिभर्त्ति। आधुनिकनाट्यजगति ब्रेकेट्-महोदयस्य नाटकानि अभिनीतानि भवन्ति। Klaus Volker महोदयेन सुष्ठुतयोक्तम्–

"Brecht has become one of the most frequently performed dramatists of any country."[४२] इति। ब्रेकेट्-महोदयेन समं तदीयम् 'Alienations Effect' (A-Effect) इति तत्त्वमपि समग्रेऽपि विश्वे ख्यातिमगात्। ननु किमासीदस्य तत्त्वस्य वैशिष्ट्यम् इति चेत् तत्रोच्यते–

"To alienate the audience from the play and to make them think over it" इति। तथाहि नाटकीयकथावस्तुनो दर्शकावस्थानमविच्छिन्नतया काङ्क्षितमस्ति। नाटकस्थवस्तुजातं दर्शं दर्शं सहृदया दर्शकाश्च चिन्तामग्ना भवन्तीति एवास्य वैशिष्ट्यद्वयम्। तस्मादेव नाटकीयपात्राणि स्वस्वचरित्रैः साकमत्रैकीभूतानि न भवन्ति। ब्रेकेट्-महोदयस्य "Brecht on Theatre" इति ग्रन्थादुद्धृत्य सिद्धेश्वरेण सिद्धान्तितम्–

"A-Effect as a technique is to make spectator adopt an attitude of enquiry and criticism in his approach to the incident"

"The actor also does not allow himself to become completely

[४२]The Theatre in ancient India (Edt. by Siddheswara Chattapadhyay), p. – 42.

transformed on the stage into the character he is portraying."[४३] इति।

तर्हि ब्रेकेट्-तत्त्वस्य प्रधानं वक्तव्यद्वयं तावत्–

१. नाटकस्य द्रष्टृभिः समं नाटकसम्बन्धश्चरित्राणाञ्च सम्बन्धः।

२. अभिनेतृभिः सह नाटकीयचरित्राणां सम्बन्धः।

अर्थान्नाटकस्य दर्शकैः सह पात्राणां सम्पर्कः स्यादिति। सिद्धेश्वरस्य 'अथ किमि'ति 'ननाविताडनमि'ति नाटकद्वितये प्रतिफलनमस्यैवोपलभ्यमानम्। अर्वाचीनकालस्य नाटकेषु 'स्मृतिदृश्यविधिः' (Flash Back System) प्रयुक्तः। अभिराजराजेन्द्रमिश्रस्य "एकं सद् विप्रा बहुधा वदन्ति" इत्यस्मिन् रूपके स्मृतिदृश्यविधेः दृश्यते प्रयोगः। रमाकान्तस्य 'ध्वनिरूपकद्वयं' वर्तते– 'पण्डितराजीयम्', 'अभिशापम्' चेति। तत्रापि स्मृतिदृश्यविधेः व्यवहारः लक्ष्यते।

साम्प्रतं नाट्यकारैः वीथिनाटकानि तथा च उद्घटनाटकानि ग्रथितानि। क्षेत्रेऽस्मिन् हर्षदेवमाधवस्य योगदानमनस्वीकार्यम्। तेन 'मृत्युरयम्', 'कस्तूरीमृगोऽस्ति', 'परीक्षा', 'कल्पवृक्षश्चे'त्यादीनि नाटकानि लिखितानि। मृत्युविषये द्वयोः प्रतयोर्वार्तालापम् आधारीकृत्य 'कल्पवृक्षाख्ये' सप्त नाटकानि संगृहीतानि वर्तन्ते। कल्पवृक्षनाटके विशेषवेशभूषाणामावश्यकता न भवतीति कृत्वा प्रवृत्तिरियं वीथिनाटकेषु दृश्यमाना विलसति।

४. वस्तुगतं परिवर्तनम्

नवे युगे जगति अस्माभिः विज्ञानोद्योगोपलब्धिभिः समृद्धिः प्राप्ता। जीवनरीत्यां द्रुतगत्या परिवर्तनं जातम्। साहित्यकैस्तत्कालीनपरिस्थितीनां चित्रणे स्वतः प्रवृत्तम्। तथाहि, आतङ्कवाद-यौतुक-भ्रूणहत्या-बालिका-निर्यातनादिसमस्याजातमाश्रित्य रोचकानि नाटकानि विरचितानि इदानीन्तननाट्यकारैः। निम्नोपेक्षितचरित्राणां प्राधान्यं संलक्ष्यतेऽधुना। किञ्च, रामायणमहाभारतपुराणादीनां विषया नाट्यवस्तुत्वेन उपस्थापिता नूतनाङ्गिकेन। अतः श्रीजीवस्य यौतुकसमस्याधारितं 'विधिविपर्यासम्', काश्मीरसमस्याश्रितं नृपजेभीमभट्टस्य 'काश्मीरसन्धानसमुद्यमः', लिङ्गपरिवर्तनम् आश्रित्य श्रीजीवेन लिखितं 'पुरुषरमणीयम्', अम्बिकादत्तव्यासस्य 'सामव्रतम्',

[४३]The Theatre in ancient India (edt. by Siddheswara Chattapadhyay), p.– 43.

गजानन-बालकृष्ण-पळसुलेपादस्य राष्ट्रीयैकताम् आधारीकृत्य 'समानमस्तु वो मनः', शरणार्थिणां वास्तवोचितं नग्नचित्रमुजीव्य 'शरणार्थिसंवादः', भारतस्य स्वाधीनतासंग्रामाधारीकृत्य हरिदासस्य नाटकत्रयं वङ्गीयप्रताप-मिवारप्रताप-शिवाजीचरिताख्यञ्चेति सर्वाण्यद्यतनकालीनसमस्यापूरितानि वर्तन्ते। परीक्षितदीक्षितस्य 'पानशाला','प्रेमपरीक्षा', 'अपराजितम्', 'न स्त्री स्वातन्त्रमर्हति' चेत्यादिषु नाटकेष्वत्याधुनिकं रूपं द्रष्टुं शक्यम्। राधावल्लभत्रिपाठिनः प्रक्षणकसप्तकस्य प्रेक्षणकेषु नैकाः सामाजिकविसङ्गतयश्चित्रिताः। तत्र 'सोमप्रभ' इत्यत्र वधूदहनं, 'मेघसन्देशे' पर्यावरणं, 'मुक्तनामके' नाटके नायकनिष्ठगृहस्थधर्मपालनार्थमादर्शः, 'मशकधान्यां' राजनैतिकस्वार्थपरत्वं, 'गणेशपूजनमि'त्यत्र धार्मिकोत्सवं प्रति साधारणानामनास्था, 'प्रतीक्षायां' मध्यवर्गीयस्य पितुर्व्यथा चेति विविधसामाजिकसमस्याश्रितविषयाः अङ्किता वर्तन्ते। प्रेक्षणसप्तकस्य भरतवाक्यमपि उल्लेख्यार्हं नाट्यकर्तुस्तत्र पर्यावरणचेतनाया उल्लेखात्। त्रिपाठिनः 'तण्डुलप्रस्थीयमि'ति नाटके कस्यचिद्बालकस्य जीवनसंघर्षस्तथा च निम्नवर्गीयनायकस्य अन्तःबाह्यजगतः प्रतिच्छाया रूपायितौ वर्तेते। राजेन्द्रमिश्रस्य केषुचिद्रूपकेषु सामाजिकमनोवैज्ञानिकसमस्याश्चित्रिताः। 'रूपरुद्रीयम्', 'चतुष्पथीयम्', 'नाट्यसप्तदम्, 'नाट्यपञ्चगवम्', 'अकिञ्चनकाञ्चनञ्चे'ति तस्य एकाङ्किनाटकानि।

'प्रमद्वरा', 'विद्योत्तमा', 'लीलाभोजराजञ्चे'ति तद्विरचिता नाटिकाः। 'फण्टूसचरितभाणे' आधुनिकच्छात्रसमाजे व्याप्ताया दुर्नीतेर्विशृङ्खलतायाः चित्रञ्चित्रितम्। 'रूपरुद्रीये' संकलिते पुनर्मेलने, 'नाट्यसप्तपदीय'स्य साक्षात्कारे चाहूतबालिकावेश्यावृत्तिः (Call Girl Profession), कार्यालयीयाकर्मण्यता, अनियन्त्रितपरिवारः, नियुक्तौ दुर्नीतिश्चोपस्थापिताः। 'वाणीघटकमेलनमिति नाटके पात्राणि यङ्-लुक्-यङन्त-कृदन्तनामभिरभिहितानि स्वतो हास्यमुत्पादयन्ति।

५. सङ्गीतस्य समावेशः

अद्यकालस्य नाटकेषु गीतानां प्रयोगविधौ प्रवृत्तिर्दृश्यते। केषुचिद्रूपकेषु रागनिर्देशपुरःसरं दीर्घगीतानां समावेशो लक्ष्यते। श्रीरामवेलङ्करमहोदयस्य 'सङ्गीतसौभद्रे' तथा च 'कालिदासचरिते' एतादृशाः प्रयोगा नयनयोरापतन्ति।

मूलशङ्करमाणिकलालयाज्ञिकेन तदीयेषु ऐतिहासिकरूपकेषु (संयोगिता-स्वयंवर-छत्रपतिसाम्राज्य-प्रतापविजयादिषु) प्रयुक्तेषु गीतेषु ताल-स्थायि-अन्तरादीनां स्पष्टं निर्देशः कृतः। यतीन्द्रविमलरचितनाटकेषु स्तोत्रानुकृतानां भक्तिसङ्गीतानां प्राचुर्यं लक्ष्यते। अपि च, वीरेन्द्रकुमारस्य श्रीगीतगौराङ्गमि'ति संस्कृतगीतिनाट्यं ६ रागैः, ७५ रागिणीभिः, ८१ गीतैर्गुम्फितम्। अपरतः, अर्वाचीनरूपकेषु गीतेषु किञ्चिन्नावीन्यं द्रष्टुमलम्। तद्यथा, 'छत्रपतिसाम्राज्यस्य' चतुर्थाङ्के मार्शालगीतं, 'वङ्गीयप्रतापस्य' तृतीयाङ्के धीवरगीतं, 'मिवारप्रतापस्य' प्रथमाङ्के भीलगीतञ्च श्रूत्वा पाठकानां मनो मोमुद्यते। एतेषु रूपकेषु नास्ति किमपि छन्दः, सर्वाणि गीतानि प्रायेण मुक्तकानि। प्रादेशिकसाहित्ये मुक्तकगीतानां व्यवहारः प्रथमतया समारब्धः।

६. नृत्यनाटिका

यस्मिन् नाट्यविधौ सङ्गीतेन समं नृत्यमपि परिवेशितं भवति, तदेव नृत्य-नाटिकेति। प्रयोगोऽयम् अर्वाचीनसंस्कृतस्य परिवर्तितरूपं प्रद्योतयति। एस्० रङ्गनाथेन "Post Independence Sanskrit Dramas" इत्यस्मिन् ग्रन्थे वलमालाभवालकरस्य दृश्यत्रयसंवलितस्य रामवनगमनस्योदाहरणं प्रस्तुतं यत्र यमन-हमीर-काफी-सारङ्ग-वसन्तरागाख्यानां सुष्ठु समावेशो दृश्यते। वस्तुतः उत्कलप्रदेशे नृत्यनाटिका विधा प्रसिद्ध्यति। गणपतिवैष्णवपाणिना प्रस्तुतशैलीम् आधारीकृत्य वैकुण्ठबिहारीनन्दशर्मणा काश्चन नृत्यनाटिका रचिताः। तद्यथा– 'अभिशप्तचन्द्रम्', 'मदनदहनम्', 'मातृशक्तिः', 'दक्षयज्ञः', 'मेघनादवधम्' तथा 'दानवीरहरिश्चन्द्रश्चे'त्यादयः। नलिनीशुक्लाया 'राधानुनय' इति नृत्यनाटिकायामेकत्र कत्थकशैली समादृता–

"कन्दर्पः कन्दर्पः तत्त थेइ थेइ।
धुमकिट धक धकिट धकिट।
तक तक तक तकिट तकिट।
नटवरः परिरजयः जयति विजितकालः विजितकालः"[४४]॥

किञ्च, नाट्यशास्त्रे नेपथ्यसंगीतस्य प्रसङ्ग उक्तः–

"एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः।

[४४]राधानुनयः, पृ. – २।८।

प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च"[४५]॥

नेपथ्यसंगीतस्य प्रासङ्गिकत्वं नाट्यकारस्य शम्भुमित्रस्य रचनायामपि समुपलब्धम्। समीरितं तत्र–

"Acting and background music are complimentary to each other.... Music enlightens the acting on stage.[४६]" इति कैश्चित्। अर्वाचीनसंस्कृतवाङ्मये नेपथ्यसंगीतस्य (Back ground music) स्रष्टा तावत् सिद्धेश्वरचट्टोपाध्यायः। तेन 'ननाविताडनमिति रूपके संगीतोऽयं सम्प्रयुक्तः। लौकिकिरागे सूत्रधारेण गीतम्–

"शृणु शृणु समागत सर्वगुणिजन।
अधिकारिगीतेऽधुना दीयतां हि मनः।
ननावृत्तं समालम्ब्य निवेद्यते मया
सरसकटुकाकथा हीनताललया॥"[४७] इति।

७. नाट्यमञ्चगतं परिवर्तनम्

भरतमुनिप्रणीताया रङ्गमञ्चव्यवस्थायाः प्रभूतं विवर्तनं संदृश्यत आधुनिककाले। प्राचीनकाले रङ्गमञ्चव्यवस्थायां या जटिलता विस्तृतता वासीत् सा प्रायः लघूक्रियते अर्वाचीननाट्यकारैः। तथाहि अद्यतनीयं संस्कृतनाटकं मुक्ताकाशे वृक्षतले वाभिनीतं भवति। वीथीनाटकानामपि प्रदर्शनं यत्र तत्र द्रष्टुं शक्यत इदानीन्तने काले। सिद्धेश्वरस्य नाटकाध्ययनावसरे पौनःपुण्येन वादलसरकारस्य '3rd Theatre' इति स्मर्यते। विशेषतयाङ्गिकदृष्ट्या तस्य नदीते, मिछिल, गण्डी चेत्यादीनां नाटकानां कथा मनसि समायाति। एकस्यां भूमौ एकस्यैवालोकस्य तले जीवन्तो दर्शका जीवतश्च नाटकीयपात्राणि समागच्छन्ति अभिनयशब्दस्य जीवनवृत्तमित्येवार्थवत्त्वात्। अतो दर्शकासनस्थले अन्धकारः नटादीनां शरीरोपरि आलोकपात इति तत्त्वं तु '3rd Theatre' इत्यत्र नास्ति। तथाहि प्रागेवोक्तं यत्सिद्धेश्वरस्य नाटकेषु भरत-ब्रेकेट्-

[४५]ना.शा. (द्विवेदी) – ५।११।
[४६]सिद्धे.अथ.किम्., पृ. – २४।
[४७]तत्रैव।

वादलसरकारादीनां एकत्र समन्वयः समवलोक्यते। पाणिक्कर-शान्तिनाथघोषादीनां नाट्यनिर्देशकानां नाट्याभिनयमञ्चादिव्यवस्थायां विविधं विवर्तनं संदृश्यते।

ग. संस्कृतगद्यकाव्यस्य अधुनातनप्रवृत्तयः

आधुनिकगद्यकाव्यस्य प्रकृतिर्न केवलं प्रणयवर्णनपरा, नापि राजचरित-चर्चोपेतापि तु वर्तत एवेदानीं समाज-राजनीति-विधिक्षेत्र-दशा-वर्णन-रीति-व्यवहार-कदाचारोत्थितसमस्यानिरूपणदृष्टिधारा च। अधुनातनगद्यकाव्यस्य सन्त्यनेके मार्गा कथोपन्यासयात्राजीवनवृत्तादिवर्णनभेदाल्लसिताः। तथापि कथानामुपन्यासानाञ्च प्राधान्यं लक्ष्यते। कथासु लघुकथासु च न केवलं सरसवस्तुनिबन्धनं क्रियते अपि तु देशकालानुरोधाद् विविधवस्तुवर्णनविच्छित्तिर्विराजते। अत्र कथानां प्रवृत्तिमूलानि प्रकरणानि प्रदर्श्यन्ते।

१. प्रणयवर्णनपराः कथाः – प्राचीनैरर्वाचीनैः गद्यकाव्यकृद्भिः नायकनायिकयोः शृङ्गाररससिक्तः प्रणयसम्बन्धः सुनिपुणं निरूपितः। क्षमाराव-इत्यास्याः 'प्रेमरसोद्रेकः', भट्टमथुरानाथस्य 'प्रेम्नः प्रतिदानमि'ति सर्वोत्कृष्टं प्रणयवर्णनपरं कथाद्वयम्।

२. सामाजिककथाः – समाजमुपेक्ष्य कविः काव्यं विरचयितुं नालम्। कथाकारा अपि सामाजिका इति कृत्वा समाजस्थितिमधिकृत्य निर्मितिर्निरता। क्षेत्रेऽस्मिन् क्षमारावपादा अग्रगण्या। तां विहाय कलानाथशास्त्रि-केशवचन्द्रदास-राधावल्लभत्रिपाठि-राजेन्द्रमिश्रादयः स्वककथासु वर्तमानसमाजस्य पक्षवर्णने धुरिणः सन्ति।

३. भावप्रधानाः कथाः – भावप्रधानकथासु रेवाप्रसादद्विवेदिनः 'त्रिपादी', राधावल्लभत्रिपाठिनः 'न ममार न जीर्यति', भट्टमथुरानाथस्य 'विषमा समस्या' चेति समुल्लेखार्हाः। एतासु कथासु मनोवैज्ञानिकं मार्मिकञ्चित्रञ्चित्रितम्।

४. उपदेशकथाः – यासां कथानामुपसंहृतौ सदुपदेशाः वर्तन्ते, ता उपदेशकथा इति। केशवचन्द्रदासस्य महानिति कथासंग्रहे नैका बालसुलभा उपदेशकथा विलसन्ति। किञ्च, 'धर्मस्य सूक्ष्मा गतिः', 'ईश्वरस्य धनदानक्रमः', 'बुद्धिमाहात्म्यम्','सद्गुरुश्चे'ति सन्त्युपदेशकथाः।

५. लोककथाः – कैश्चित्कथाकारैरर्वाचीनकाले बह्व्यः लोककथा विरच्यन्ते। तासु

कथासु ग्राम्यसाहित्यकल्पासु दृश्यन्तेऽनेकाः लोककथाः, या अधुनापि प्रचलन्ति भारतीयग्रामेषु। उदाहरणं यथा प्रभुनाथद्विवेदिनो 'विंशतिवितस्तिदीर्घा नासिका', 'उद्यमिनौ बालकौ' चेति लोककथाद्वयम्। 'चन्दमामा' तथा च 'सम्भाषणसन्देशश्चे'ति पत्रिकाद्वितये प्रभूता लोककथाः प्रकाशिताः सन्ति।

६. हास्यकथाः – अद्यतनकालस्य कथाकारास्तदीयकथासु हास्यरसस्य प्रयोगं कृत्वा सहृदयहृदयानां मनो रञ्जयन्ति। हास्यकथासु अप्पाशास्त्रिणो 'वेषमाहात्म्यम्', 'पुरोहितधौर्त्यम्', प्रभुनाथद्विवेदिनः 'दूरभाषः', 'महाकविः', 'शिखापण्डितश्चे'ति कथाः हास्यप्रधानाः।

एतान्विहायापि राजेन्द्रमिश्रस्य 'इक्षुगन्धा', 'राङ्गडा', कलानाथस्य 'महांश्च', बनमालीविश्वालस्य 'नीरवस्वनः', 'बुभुक्षा', वीणापाणिपाटिन्या 'अपराजिता' चेति प्रमुखाः सन्ति। आधुनिककालस्य कथाकृत्स्वन्यतमत्वं भजते बनमालीविश्वालो यः एकलप्रयासेन कथासंग्रहत्रयं– 'नीरवास्वनः', 'बुभुक्षा', 'जीजिविषा' चेति रचितवान्।

प्रसङ्गतः समुल्लेखार्हं यत् आधुनिकसंस्कृतकथाप्रपञ्चं बहुभिरवान्तरभेदैः विभक्तम्। तस्माद् बनमालीबिश्वालवर्यैरुदितम्– "Form the last two decates of 20th century, we observe that the writers of contemporary Sanskrit are almost crazy to apply and introduce each and every trend that is available in world literature. As a result, we find some new trends in the field of contemporary Sanskrit Story writings in the form of (i) *Laghukathā* (ii) *Spaśakathā* (iii) *Ṭupkathā* (iv) *Vyaṅgakathā* or *Hasyakathā* of *Vinodakathā* and so on."[४८]

७. <u>उपन्यासः</u>– साधारणतया वङ्गीयसंस्कृतसाहित्ये उपन्यास-विरचनप्रयासो न प्रायशः दृश्यते। किन्तु अर्वाचीनसंस्कृतसाहित्ये गद्यकाव्यविधायामुपन्यासोऽन्तर्भुक्तः। परमर्वाचीनसंस्कृतसाहित्ये सर्वप्रथमम् अम्बिकादत्तव्यासेन 'शिवराजविजय' इत्यनेनोपन्यासो लिखितः। गद्यकाव्यस्य भेदयोः कथाख्यायिकयोः समन्वयो

[४८] आ.क.स्थि.प्र., पृ. – ११।

हि उपन्यासः। रामजी-उपाध्यायस्य 'द्वा सुवर्णा', केशवचन्द्रदाशस्य 'विसर्गः', मेधाव्रतशास्त्रिणः 'कुमुदिनीचन्द्रः', राजगोपालाचार्यस्य 'शैवालिनी', 'कुमुदिनी', मथुरानाथभट्टस्य 'आदर्शरमणी', 'अनादृता' चेत्यादयः प्रख्याता उपन्यासाः। द्वारिकाप्रसादस्तथा देवीदयालश्च युगपत्तया विवाहे पणव्यवस्थामादाय 'दिव्यज्योतिरि'ति उपन्यासं रचितवन्तौ। केशवचन्द्रदासः उपन्यासकृत्स्वन्यतमत्वं भजते, यो द्वादशाधिकान् उपन्यासान् ग्रथितवान्। तस्योपन्यासेषु अन्तर्दृष्टिः, मानसिकद्वन्द्वः, मानविक-मूल्यबोधापक्षयः, भारतीयकृष्टिर्दार्शनिकतत्त्वानि च कल्पनायास्तलस्पर्शेन प्रतिविम्बिता वर्तन्ते। 'तिलोत्तमा', 'शीतलतृष्णा', 'आवर्तम्', 'पटाका', 'ऋतम्', 'ओँ शान्तिश्चे'त्यादयः श्रेष्ठा उपन्यासास्तस्य।

अत्रेदमुल्लेखार्हं यदर्वाचीनकाले वङ्गवास्तव्यस्तारापदभट्टाचार्यो विशिष्ट-कथाकारेष्वग्रणीः वर्तते, येन न केवलं वङ्गभाषया लिखिता बह्व्यः कथाश्चापि संस्कृतभाषया। तासु कथासु द्वादश कथाः आहृत्य 'द्वादश कथे'ति ग्रन्थः प्रकाशितः। कथाकृतः तारापदस्य कथासु मनोवैज्ञानिकं, सामाजिकं, हास्यरसाश्रितं, पौराणिकञ्च वस्तुजातं स्थानं लभमानमासीत्।

८. चित्रकथा (Pictorial Story) – आधुनिकसंस्कृतकथासाहित्ये लघु-टुप्[४९]-पुट्-पत्र-त्रासद-ललित-स्पश[५०]-व्यङ्ग-विनोदकथानां समतालमेव चित्रकथा-नामाविर्भावो नो नयनपथे पान्थायते। चित्रनिर्माणं पञ्चदश्यामुपलब्धम् "उत्तमाधमभावेन वर्तन्ते पटचित्रवत्" इति। चित्रकथाशब्दस्याङ्गलरूपान्तरं तावत् Pictorial Story इति, यस्यार्थोऽयमाङ्गलशब्दकोषे – "A magazine especially for children, that tells stories through pictures." इति। शिशूनां मनोरञ्जनेन सममुपदेशप्रदानञ्च चित्रकथाया उद्देश्यम्। तथाहि, संस्कृतभारत्या २००८ ईशवीयवर्षे चित्रकथाः प्रकाशिताः। किन्तु सम्भाषणसन्देशे सर्वप्रथमं २००६ ईशवीयवर्षे धारावाहिकभावेन

[४९]अतिलघुकथा (अर्धपृष्ठमध्ये या कथा समाप्तिं गता।)। बिश्वालस्य मते – "The concepts of Tupkathā refers to very small stories written only in one or two pragraphs of at the best in a half page". (तत्रैव, पृ. – १७)।

[५०]गुप्तचरकथा (उदाहरणं नारायणदाशस्य नरेन्द्रपुरीयं रेलस्थानकम्)।

चित्रकथायाः प्रकाशनमभवत्। ग्रन्थस्य कथाकारास्तावद्रेणुवारियत्, चन्दन-चूलुस्सेरिपादः, एम्.मोहनदासश्च। प्रस्तुते कथासंग्रहे एकादश चित्रकथा विलसन्ति। प्रत्येकं चित्रकथाया मूलं वस्तु पौराणिकम्, महाभारतीयञ्च। किञ्च, 'सम्भाषणसन्देशः' कथासरित् चेति द्वयं विशिष्टं कथामूलकपत्रिकारूपम्। आयाल्र्याण्डवास्तव्येन रजार-कोयार्टेनहोस्ट-महाभागेन शिशूनां संस्कृतशिक्षायै 'सरलं संस्कृतम्', 'पठ लिख', 'सोपानम्' चेति सचित्रं ग्रन्थाः प्रकाशिताः।

९. ललितनिबन्धसाहित्यम् – विशेषविषयमवलम्ब्य भावनाविशेषं चाश्रित्य स्वकं हार्दमुद्रितां वा निबन्धानां परम्परा न हि प्राच्यसाहित्यस्य परं पाश्चात्त्यसाहित्यस्यैव अवदानमिति विदां राद्धान्तः। एसे (Essay), मोनोग्राफ् (Monograph), ट्रीटीज् (Treatise) चेत्यभिधानानि वहन्ती सेयं विधा विषयस्यैकस्य विवेचनं कुर्वाणान् बन्धान् निर्दिशति, यत्र तद्विषयकस्य परिज्ञानस्य संक्षिप्तः समावेशः क्रियते। अपरतः, हृदि उन्मीषन्तीनां भावानां ललितमुद्गमनमपि निबन्धस्यापरः प्रकारो यः Personal Essay इत्याख्यायते पाश्चात्यहिन्द्यादिभाषासु ललितनिबन्धादिनामभिर्व्यपदिश्यते। किन्तु प्राचीनसंस्कृतसाहित्ये ललितनिबन्धानां प्रसारो नैवालक्षि। परं विंशशताब्द्याः प्रारम्भत एव संस्कृतपत्रिकासु नैकविधा निबन्धाः प्रकाशिता अवर्तन्त। ललितनिबन्धाः ललितकथाः वा व्यङ्ग्यकथाभिः सह मिश्रिताः त्यक्तवत्यः स्वीयां प्रतिष्ठाम्। समकालीनसंस्कृतसाहित्यपर्यालोचनादेव नो नयनपथे पान्थायन्ते त्रिविधा नव्यविधाः – 1. प्रमुखव्यङ्ग्यशैली 2. साधारणव्यङ्ग्यशैली 3. ललितशैली चेति। यत्र विविधैरुपायैरुदाहरणैश्च पुरस्कृत्य स्वकथ्यमुपस्थापयति कथाकारः तदेव ललितशैली। एवंविधानां निबन्धानां स्रष्टा तावद् भट्टमथुरानाथशास्त्रीति। समकालीकसंस्कृतसाहित्यानुसारं ललितशैली खलु रम्यरचनेति मामकी मतिः। ललितशैलीयं द्वेधा विभजयितुं पार्यते – 1. ललितनिबन्धः 2. ललितकथा चेति। तत्र ललितनिबन्धे कथांशः स्वल्पो वर्तते, लेखकस्तत्र स्वकथ्यं विविधयुक्तिभिरुपस्थापयति।

अर्वाचीनसंस्कृतपरिसरे कविशिरोमणिभिः 'निबन्धविद्ये'ति शीर्षकं पुस्तकं १९३३ईशवीयवर्षे व्यरचि, यत्र बन्धानां प्रकाराः, लेखनविधाः, चान्ये शिक्षार्थिनामुपयोगयोग्या विषया विशदीकृता आसन्। निबन्धविद्ययानया समं

वर्णनात्मक-विवेचनात्मक-यात्रावृत्तात्मक-विचारात्मकशोधात्मकललितनिबन्धानां विविधवर्गविभक्तानां निबन्धानां विबोधनाय त्रयोदश निबन्धान् कलानाथपितृव्यैः विलिखितान्समाकल्य कलानाथशास्त्रिपादेन प्रबन्धपारिजाताख्यो ग्रन्थः प्राकाशि। ग्रन्थस्यास्य ललितनिबन्धेषु 'किन्तोः कुटिलता' इति, 'बालकभृत्यः', 'मकारमहामेलकः' चेत्यादयः विशिष्टत्वं भजन्ते।

१९२० ईशवीयवर्षे नृसिंहदेवेन 'प्रस्तावचन्द्रिके'ति ललितबन्धसंकलनं प्रकाशितम्। तत्र षोडश विविधविषयका निबन्धाः – यथा 'सङ्गः', 'रमते न मरालस्य मानसं मानसं विना', 'दारिद्र्यम्', 'विद्या', 'छिद्रेष्वनर्था बहुलीभवन्ति' चेत्यादयः स्थानं लभन्ते स्म।

'संस्कृतप्रबन्धरत्नाकरः' प्रकाशितः मायादत्तपाण्डेयशास्त्रिणा १९३८ तमे संवत्सरे। तत्र 'ईश्वरोऽस्ति वा', 'क्रोधः', 'पृथ्वीग्रहः', 'ब्रह्मचर्यमि'त्यादयो निबन्धा विलसन्ति। ललितनिबन्धस्यापरः प्रकारो व्यक्तिव्यञ्जकः। ललितनिबन्धत्वेन व्यक्तिव्यञ्जकनिबन्धत्वेन वा या शैली आधुनिकभारतीयभाषासु प्रचलिता, तस्याः प्रथमो निबन्धकारो भट्टमथुरानाथशास्त्रीति निश्चप्रचमभिधातुमलम्। विष्णुकान्तशुक्लः पत्रपत्रिकासु तादृशान् निबन्धान् व्यलिखत्। कलानाथशास्त्रिणः केचिल्ललितनिबन्धाः 'आख्यानवल्लरी'ति संकलनग्रन्थे मुद्रिता आसन्। साम्प्रतिके काले छन्दसश्छटा, पथिकानुभूतिः, कुक्कुरस्य भाग्यञ्चेति ललितनिबन्धा दृष्टिपथमायान्ति।

घ. आधुनिकमहाकाव्येषु विवर्तनम्

अर्वाचीनकालस्य महाकाव्यविरचनक्षेत्रेऽपि बहुविचित्रितं परिवर्तनं संदृश्यते। कैश्चिदाधुनिककविभिः दण्डिविश्वनाथोक्तप्राचीनशैलीमादाय नूत्नाङ्गिकेन नवविषयोपस्थापनेन रोचिष्णुतया च महाकाव्यानि ग्रथितानि। परं केचिच्च महाकाव्यीयरीतीश्च परिवर्त्य व्यतिक्रमतया कालिदासादीनामिव महाकाव्यानि प्रीणयन्ति। अर्वाचीनकविभिर्महाकाव्यीयनायकधारणायाः परिवर्तनं कृतम्। विश्वनाथानुसारं महाकाव्यस्य नायको भवेद् धीरोदात्तः। अस्य लक्षणविषये विश्वनाथपादैरुक्तम्–

"सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।

एकवंशभवा भूपाः कुलजा बहवोऽपि वा"[५१]॥ इति।

किन्तु, साम्प्रतं साधारणमानवा महाकाव्यीयचरित्रत्वेन स्थानं लभन्ते। किन्त्वर्वाचीनकवयो भारतवर्षस्य स्वाधीनतान्दोलने समुत्सर्गीकृतानां देशप्रेमिकानां च जीवनं, प्रदेशविशेषस्येतिहास-सांस्कृतिक-राजनैतिक-सामाजिकजीवनं विवेकानन्दादि-महापुरुषाणां जीवनञ्च महाकाव्यस्य विषयीकुर्वन्ति। क्षमारावमहाभागा, स्वामी भगवदाचार्यश्च महात्मागान्धिजीवनमाधारीकृत्य महाकाव्यद्वयं विरचितवन्तौ। द्विजेन्द्रनाथशुक्लस्य 'स्वराज्यविजयम्', साधुचरणमिश्रस्य 'गान्धिचरितम्' इति महाकाव्ययोर्वस्तु स्वाधीनतावाप्तय उत्सर्गीकृतं गान्धिजीवनमिति। गङ्गाप्रसाद-उपाध्यायेन स्वकीये एकविंशाध्यायात्मके 'अयोध्यामहाकाव्ये' भारतीयसभ्यतायाः सृष्टिस्तथा विकाशः, स्वामिदयानन्दजीवनञ्च वर्णितानि। हिमालयात् सागरं यावद् गङ्गायाः परिभ्रमणमाश्रित्य 'गङ्गासागरीयमि'ति तथा च मेघनादस्य स्त्रियः सूलोचनायाश्चरित्रमवलम्ब्य 'सौलूकनीयमि'ति महाकाव्यद्वितयं व्यरचयत् विष्णुदत्तशुक्ला। पि.सि.देवास्सिओ-महाभागः त्रयस्त्रिंशत्सर्गोपेतं भगवतो यिशुखृष्टस्य जीवितं तथा च तद्वाणीः समाश्रित्य 'कृस्तुभागवतमि'ति, विवेकानन्दस्य जीवनाधारितं 'विश्वभानुः', अविच्छिन्नकेरालाराज्यस्य इतिहासं, विस्तृतप्रेक्षापटे राज्यस्यास्य वास्तुतन्त्रं, सामाजिक-राजनैतिकजीवनञ्चाधारीकृत्य एकविंशतिसर्गसम्पूर्णं 'केरलोदयमि'ति च महाकाव्यानि रचितवान्। विशेषेण केरलोदये महाकाव्ये स्वप्न-स्मृति-ऐतिह्य-बोध-चरित्रात्मकं 'मञ्जरीपञ्चकं' विलसति। गजाननबालकृष्णप्रणीतं पञ्चविंशतिसर्गात्मकं 'वैनायकमि'ति महाकाव्यं प्रकाशितम्। तत्र स्वाधीनतान्दोलने साभारकारस्य जीवनोत्सर्गोऽनन्यभङ्ग्या कविना वर्णितः। रेवाप्रसादद्विवेदिनो महाकाव्यत्रितयमध्ये दशसर्गप्रपूरिते 'राष्ट्रदेवते'ति महाकाव्ये देव्या सीताया आदर्शवादः, महत्त्वञ्च वर्णिते। १८५७ ईशवीयवर्षादारभ्य इन्दिरागान्धिमहाभागाया मृत्युं यावद् वृत्तजातम् ऊनत्रिंशत्सर्गैः प्रविभक्तं 'स्वातन्त्रसम्भवमिति व्यरचि तेन। राधामोहनोपाध्यायेन विरचिते 'भारतविजयमि'ति महाकाव्ये वैदिकयुगादारभ्य भारतीयसभ्यताया वृद्ध्याः समं पोखरान्-परमाणुबोम्बविस्फोटार्थमाब्दुलकालाम-

[५१]सा.द. (हरिदासः), पृ. – ४२३।

वाजपेयीवर्ययोः प्रशंसापरका उक्तयो विव्रियन्ते। आधुनिकदेवस्य सत्यनारायणस्य वृत्तमाधारीकृत्य महाकाव्यीयरीत्यनुसारं प्रभविष्णुतया 'सत्यानुभावमि'ति महाकाव्यं महामहोपाध्यायेन कालीपदतर्काचार्येण रचितम्। तत्र कविनाभिनवच्छन्दः प्रयुक्तम्। परम्परावाहिषु महाकाव्येषु परम्परावैलक्षण्येन स्त्रीणामपि नायकत्वं संदृश्यते। उदाहरणं यथा – रेवाप्रसादद्विवेदिकृते 'सीताचरिते', नारायणशुक्लरचिते 'ऊर्मिलीयमहाकाव्ये' स्त्रीनायकता परिदृश्यते। अपि च, समुल्लेखार्हम् इन्दिरागान्धिचरितमनन्यमेकं महाकाव्यमस्मिन् सन्दर्भे।

अत्रेदमुल्लेखार्हं यद् आधुनिककालस्य महाकाव्येषु बहवो देशप्रेमिकाः नायकायमाना, अपि न भूपा न वा एकवंशभवाः। झाँशीश्वरीचरितादिषु केषुचिन्महाकाव्येषु नायककर्तृकधर्माद्यन्यतमपुरुषार्थप्राप्तिर्नापि सम्भवति अभीष्टसिद्धेः पूर्वं तत्तन्नायकानां नामशेषतां गतत्वात्।

अर्वाचीनमहाकाव्येषु रसविषयकं किञ्चिद्वैलक्षण्यमपि दृष्टिपथमायाति। तथाहि प्राचीनकविकर्मसु कवेः प्रतिभा सहृदयचित्तवृत्तिर्वा रसोपस्थापने रसास्वादने च यथा गुरुत्वपूर्णा, न तथा साम्प्रतिककविकृतौ दरीदृश्यते। वस्तुतः, महाकाव्येष्वर्वाचीनेष्वाधुनिकदेशसमाजगतानां प्रश्नानामुपस्थापनं बाहुल्येनालोक्यत इति कृत्वा केषुचिद्रसस्य सर्वस्वायमानत्वं न संलक्ष्यते। तथापि कविवर्णितं सर्वमेव प्रत्यक्षविधया परोक्षविधया वा रसपर्यवसायीति काव्यमीमांसाकृतां राद्धान्तः। तथाहि पण्डितराजेन जगन्नाथेनोक्तम्– "अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वात्" इति। अद्यतनकालस्य महाकाव्येषु न तु शृङ्गाररस्य परं वीररसस्याङ्गित्वमेवातिशयम् आलोक्यते।

महाकाव्ये कति सर्गाः स्युः इत्यस्मिन् प्रसङ्गे ईशानसंहितायामुक्तं- "अष्टसर्गान् न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्" इति। अर्थात् महाकाव्ये विद्यमानानां सर्गाणां संख्या अष्टाभ्यो न न्यूना त्रिंशद्भ्यश्चाधिका न भवेत्। किन्तु अर्वाचीनकालस्य महाकाव्येषु सर्गसंख्यागतं वैशिष्ट्यमव्यभिचरिततया नानुश्रियते। अपि च, सर्गबन्धात्मकं वैशिष्ट्यमप्यनुसृतं सदपि केषुचित् स्थलेषु प्राचीनधारां नानुसरति पूर्णतया। तथाहि 'भारतीयस्वातन्त्र्योदयमहाकाव्यं' पर्वभिः,

'नारायणस्वामिचरित'मलंकारैः, 'रक्ताक्तहिमालयं' शिखरैः, 'गान्धिगाथामहाकाव्य'ञ्च भागैर्विभक्तं वर्तते। भारतीयस्वातन्त्र्योदये षट् सर्गाः, 'श्रीभक्तसिंहचरिते' सप्त सर्गाः, क्षमारावरचिते 'स्वराज्यविजये' चतुःपञ्चाशत्सर्गाः, वर्णेकरविरचिते 'शिवराज्योदये' अष्टाधिकषष्टिसंख्यकाः सर्गाः सन्तीति कृत्वा सर्गसंख्यागतनियमा नात्र परिपालिताः।

ङ. आधुनिकसंस्कृतकवितासु परिदृश्यमानं विषयनावीन्यम्

शिक्षासंस्कारादिजन्या कवेः प्रतिभा कदापि स्वदेशीयसमकालिकीं सामाजिकीं स्थितिं परिवर्ज्य स्थातुं नार्हति। साहित्यं मानवसभ्यतां प्रभावयच्चिरं देदीप्यते देदीपिष्यति च। तथाहि भरतेनोक्तं- "त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्" इति। नवे युगे जगतीतले विज्ञानोद्योगेन जीवनरीत्याञ्च परिवर्तनं सञ्जातम्। काव्यसृष्टौ नालक्षि कोऽप्यवशिष्टोऽविषयः खलु।

ट्राम-रेल-जलपोत-विमान-छायाचित्रादिविषयेषु विविधाः पद्यात्मिका रचनाः कविभिः प्रस्तुताः। राजेन्द्रमिश्रेण 'विमानयात्राशतकम्' इति, राधावल्लभेन विमानाद्रम्यदर्शनरूपं 'धरित्रीदर्शनलहरी'ति काव्यं, 'वातानुकूलिते याने' इति पद्यञ्च विरच्य संस्कृतस्याधुनिकत्वं प्रमाणितम्। कवठेकरस्य 'मोनालिसा', सत्यव्रतशास्त्रिणः 'थाइदेशविलासम्', हर्षदेवमाधवस्य 'आतङ्कवादः', 'कालोऽस्मि', 'ओलोम्पिकसमारोहः', 'प्रतिच्छाया', 'Vasectomy– पुरुषनसबन्दीबन्ध्यीकरणम्', 'एकाकिनः शून्यावकाशम्' इत्यादिषु काव्येषु वैश्विकी संवेदना प्रवाहयति। एतानि काव्यान्यवश्यमेव संस्कृतसाहित्यस्याधुनिकत्वस्य प्रमापकाणि।

अद्यतनकालीनसंस्कृतकवयः आन्तराष्ट्रियचेतनां वोढुमलं विश्वसाहित्येन तथा चान्तराष्ट्रियघटनाभिः समं गहनपरिचयवशात्। बांलादेशमुक्तिसंग्रामः, अमेरिका-इराकयोर्युद्धम्, आतङ्कवादः, मुम्बाइनगर्यां बोम्बविस्फोटश्चेत्यादिविषयानवलम्ब्य रचितास्वर्वाचीनरचनासु युगसंवेदनायाः प्राप्यते आभासः। अद्यतनकालीयकविभिर्न केवलं राधाकृष्णपार्वतीपरमेश्वरादीनाञ्चापि स्वस्यैव प्रणयवृत्तं निरूपितम्। तथाहि राजेन्द्रमिश्रेणोक्तं–

> "इन्सेट बी उपग्रहोऽपि
> मम प्रणयवेगस्य छविं गृहीतुं

न शक्नुयात्[५२]॥" इति।

विंशशताब्द्यां संस्कृतकाव्येषु कविभिः स्वानुभवेष्वात्मकेन्द्रिकत्वं, व्यक्तित्वपरकत्वञ्च वर्णिते। तत्रापि नैराश्यं, निर्वासनपीडा, व्यक्तेर्विविक्तम्, अस्तित्वलोपवेदना चेति संसूच्यन्ते। दिङ्मात्रमुदाहरणं यथा ईशाकवितातः –

"अत्राहं समयस्य / गरलं पिवामि / शिशुर्यथा अङ्गुलीं पिबति॥"[५३] इति।

१. अलंकारयोजनायां परिवर्तनम्

भाषान्तरप्रयुक्ता वैदेशिकाश्चापि काव्यप्रकाशाः सम्प्रति संस्कृतरचनाधर्मिभिः यथायथं प्रस्तूयन्ते। तथाह्यधुना कवयः प्राचीनरुढोपमानां स्थले नूतनोपमानानि व्यवहरन्ति स्म। इतरभाषाणामुपमानानि संगृह्य प्राचीनबन्धनानि त्यक्त्वा च जाता विंशशतकस्य संस्कृतकविताधुनिका। उदाहरणं यथा–

"समुद्रः
होनालुलुसुन्दरिहस्तसन्निभो मसृणः।
समुद्रः
ओडीसीयमहाकाव्यनायक– 'ओडिस्युस प्राप्तशापप्रतिभटः
कयालः॥"

हर्षदेवमाधवेन होमरोपमां (Homeric Simile) स्वककाव्येषु संयुज्य उपमानस्य दीर्घं वर्णनं कृतम्। अनन्तरमुपमेयेन सममुपमानस्य तुलना क्रियते। दिङ्मात्रमुदाहरणं यथा–

"यथा
कोऽपि महाविषादग्रस्तः,
सर्वनाशवार्ताचकितः,
स्वजनमृत्युदर्शनभीतः,
विपद्वज्रपातवशीभूतः,
शोककलुषितमानसः,
अज्ञातभयवेपमानः,

[५२]निष्क्रान्ताः सर्वे, पृ. – ११५।
[५३]ईशा, पृ. – ७।

...............,
रोदितुमिच्छन्नपि
अश्रूणि न मुञ्चति
न मोक्तुं शक्नोति
तथैव
ध्वंसावशेषाः स्थिताः,
वेदनाभरव्यथिताः
रोदितुमक्ताः
साक्षाद्घनीभूतरोदनाकारा इव
शोकात् पतनदिवसं प्रतिपालयन्ति"[५४]। इति।

एवञ्चाधुनिकसंस्कृतकाव्यजगति उपमानयोजनायां परिवर्तनं संलक्ष्यते। किञ्च, आधुनिकसंस्कृतसाहित्ये अलंकारव्यवहाररीत्यां दृश्यन्त उपमानस्य नवीनत्वम्, अलंकारस्य सजीवारोपणम्, अन्योक्तेः सफलप्रयोगः, वक्रोक्तेश्चमत्कारत्वम्, प्रकृतेर्मानवीकरणम्, उपमानोपमेययोः सार्थकव्यवहारश्चेति।

२. अर्वाचीनसंस्कृते छन्दसामभिनवत्वम्

आधुनिकः कविर्यथारुचि छन्दांसि नापेक्षते। सत्यन्तर्वर्त्तिनि छन्दसि आधुनिकसामग्रीं यां स प्रयुङ्क्ते, तस्या यः शब्दप्रवाहः, स च किमपि नवीनच्छन्दोनिर्माणं विदधातीति न दोषाय। नवीनच्छन्दसां प्रासङ्गिकत्वं स्वीकृत्य राधावल्लभत्रिपाठिनोक्तं–

"उन्मीलिता नवीना
मार्गा दृष्यनवीनपद्धतयः।
छन्दश्चलितं भूत्वा
पाथेयं दीर्घयात्रायाम्"[५५]॥ इति।

अर्वाचीनाः कवयः पारम्परिकच्छन्दोभिः सह छन्दसां व्यत्ययं कृत्वा

[५४]निष्क्रान्ताः सर्वे, पृ. – ११५।
[५५]सप्लवः(७)।

उत छन्दोद्वयस्य मिश्रणं विधाय काव्यानि ग्रथयन्ति। केचिद्वा कवयो गद्यरीत्यापि श्लोकान् रचितवन्तः रचयन्ति च। अथवानुष्टुभः पादत्रयमवलम्ब्य श्लोको विनिर्मितः। हर्षदेवमाधवाः जापानदेशीयां छन्दःपद्धतिं संस्कृते प्रयुञ्जन्ति। अपि च, कोरियादेशे प्रचलिते सीजो-छन्दसि, तान्काछन्दसि, हाइकुच्छन्दसि च संस्कृतकाव्यानि प्रणयन्ति। तत्र हाइकुच्छन्दोवैशिष्ट्यं तावत्– "पादत्रयात्मके सप्तदशाक्षरेऽस्मिन् पंक्तिः ५-७-५ संख्यका वर्णाः सन्ति" इति। उदाहरणं यथा हाइकुच्छन्दसः–

"काँलेजकन्या
सौन्दर्य-मधुकोशः
रूपस्य प्रपा"[५६]। इति।

अत्रेदमुल्लेखार्हं यत् हाइकुच्छन्दसा रचितं काव्यं 'हाइकुकाव्य'मिति संज्ञा।

तान्काछन्दसो वैशिष्ट्यं पादपञ्चात्मके एकत्रिंशदक्षरविशिष्टे पंक्तिः ५-७-५-७-७ संख्यका वर्णाः सन्ति। उदाहरणं यथा–

"गवाक्षे मुखम्
गवाक्षेऽस्ति वसन्तः
गवाक्षे चन्द्रः
वैद्यराजो वदति
अयं ते नेत्रव्याधिः"[५७] इति।

तान्कावृत्तेनालिखितं काव्यं तान्काकाव्यनाम्ना परिचीयते।

सिजोकाव्यस्य लक्षणानि तावत्–

1. त्रिपंक्तिमयं काव्यस्वरूपमिदम्
2. अत्र पञ्चचत्वारिंशत्संख्यका वर्णाः सन्ति
3. प्रथमपंक्तौ वस्तुनिरूपणप्रारम्भः, द्वितीयपंक्तौ कथावस्तुनो विकाशः, तृतीयचरणे चमत्कृतिपूर्णा कथितव्यवक्रता।

उदाहरणं यथा–

[५६]ऋषेः क्षुब्धे चेतसि, पृ. – ४१।
[५७]तत्रैव, पृ. – ६१।

"अश्वा जाताः जातो वायुः
जातः सूर्यो मनसि
शैलाः/नद्यः/वृक्षाः/आशाः!
वसन्ति मे रहसि
मृदः प्रत्यणु मयि
त्वमसि तत् त्वमसि॥"[५८] इति।

पुरातनविधानां स्थाने नवविधानां स्वीकार आधुनिकतायाः लक्षणं वर्तते। मथुरानाथशास्त्री दोहा-सोरठा-कवित्त-सवैया-घनाक्षरी-गजलरचनाः अकरोत्। अभिराजराजेन्द्रमिश्रो गजलशब्दस्य संस्कृतोचितं नाम निश्चिनोति 'गलज्जलिके'ति। तथाहि तेनोक्तम्–

"गलन्ति जलानि नयनाश्रूणि यस्यां सा मर्मन्तुदगीतिर्गलज्जलिका" इति।

वङ्गवास्तव्यो दीपकघोषो 'विलापपञ्चिके'ति काव्यसंग्रहे विलापकाव्य-परम्पराम् अरचयत्। राधावल्लभो 'गीतधीवरमिति संग्रहे नवीनतमां रागकाव्यरचनाम् उपायनीकरोति। हर्षदेवमाधवो लघुविम्ब-प्रतीक-बाउल-उपनिषत्परावास्तववादयुक्तानि-काव्यानि लिखित्वा संस्कृते वैश्विकीञ्चेतनामवतारयति।

आधुनिकी भाषा युगानुरूपां सरलामर्थावबोधक्षमां लालित्यपूर्णाम् इतरभाषाणां शब्दैर्युक्तां रूढिमूलां शैलीं स्वीकरोति। उदाहरणं यथा–

"सर्वे मेघा
राजनीतिज्ञाः
भ्रान्तिजनकाः"[५९]। इति।

३. आधुनिकसंस्कृतकवितायामाङ्गिकपरिवर्तनम्

आधुनिकता अद्यतनकालस्य कवितास्वात्मेवाभाति। यतः कवितायाः सर्वाङ्गेष्वनुस्यूतेयं वर्तते। दृक्पत्रिकायां रवीन्द्रपण्डा-महाभागेनाधुनिककविताया वैशिष्ट्यान्युल्लिखितानि–

[५८]ऋषेः क्षुब्धे चेतसि, पृ. – ७०।
[५९]पिनकुशनः, पृ. – ३०७७।

क). मुक्तच्छन्दोबद्धा रचना

ख). प्रान्तीयभाषाणां छन्दसां स्वीकरणम्

ग). सरलसंस्कृतस्य प्रयोगः

घ). वास्तविकताया अभिधेयाभिव्यक्तिः

ङ). नवीनशैली

च). क्षुद्रकविता

छ). चित्रकल्पानां प्रयोगः

ज). प्रादेशिकवैदेशिकभाषाजशब्दानां संस्कृतीकरणम्

झ). बिम्बात्मकादिनवीनविधानां प्रचलनञ्चेति।

आधुनिकसंस्कृतकवितानां परिवर्तनं बहिरङ्गान्तरङ्गभेदाद् द्विधा व्याकर्तुं शक्यम्–

३.१. बहिरङ्गपरिवर्तनम्

अद्यतनकालस्य काव्ये बहिरङ्गपरिवर्तनं नाम शैलीगतं विवर्तनम्। बहिरङ्गपरिवर्तनकारणात्संस्कृतभाषायां युगान्तरं समागतम्। तथाहि परिदृश्यते अद्यतनकाले मुद्रणकलायां वैप्लविकं परिवर्तनम्। मुद्रणकला नामाङ्गलभाषायां यदुच्यते 'टाइपोग्राफी'ति। रेवाप्रसादद्विवेदिनः 'प्रमथ' इति काव्यसंग्रहे टाइफोग्राफीत्यस्य प्रयोगोऽभिलक्ष्यते। शैल्यानया यत्किमपि वस्तु इन्द्रियग्राह्यं तथा च व्यञ्जनया नयनरम्यं भवतः। शैल्या अस्या उदाहरणं यथा–

प्रतिच्छायायां प्रतिबिम्बस्य विपरीतभावेन पतनं तथा च–

"दी ई
ई ई ई ई...र्घा...आ...आ...आ...
न
म
ति शनैः शनैः...वृद्धावस्थात्॥"[६०]

इत्यत्र प्रतिबिम्बस्य लम्बरूपेण पतनस्याभासो दृश्यते।

उदाहरणमेकमपरं यत्र भुजङ्गवनयोर्वक्रता चित्रिता वर्तते–

[६०]निष्क्रान्ताः सर्वे, पृ. – ४०।

"वक्रा कुक्कुर
पु शी"[६१]। इति।
च्छ दृ
स

अर्वाचीनकालस्यापरैका शैली तावत् सन्दिग्धता। कविः यल्लिखति तन्नाभिधातुं वाञ्छति, किञ्च, तदपेक्षयाधिकार्थमभिव्यनक्ति। अतः, अस्पष्टार्थान्यार्थो हि सन्दिग्धता। विविधैः प्रकारैरुत्पद्यते सन्दिग्धता। विचारद्वयं यदा शब्देनैकेन व्यक्तं भवति, तदा सन्दिग्धता जायते –

"दिल्ली निष्प्राणाः
समाधयः सौधामृताः
निर्जीवा चितिः।"[६२] इति।

राधावल्लभत्रिपाठिना रागकाव्यरूपं गीतधीवरमिति काव्यं व्यरचि। राजेन्द्रमिश्रेण तदीयकाव्येषु नाट्यप्रगीतकविताया अद्भुतं संयोजनं विहितम्। दिङ्मात्रमुदाहरणं यथा–

"मृतघट्टोऽहं मृतघट्टोऽहं
जीवितां जनानां घृणास्पदं
प्रेतानां वंशीवाटोऽहं
मृतघट्टोऽहम्।"[६३] इति।

आधुनिककविभिः संस्कृतकवितासु गाणितिकसंज्ञायाः प्रयोगः अकारि। उदाहरणं यथा–

'ऑफिस-चिन्ता / गृहणी + उपनेत्रं क्षयः= जीवितम्।'[६४]इति।

३.२. अन्तरङ्गपरिवर्तनम्

नवीनस्वरूपविशिष्टकवितास्वन्तरङ्गपरिवर्तनं दृष्टिपथमायाति। बिम्ब-प्रतीक-

[६१]निष्क्रान्ताः सर्वे, पृ. – ४०।

[६२]ऋषेः क्षुब्धे चेतसि, पृ. – ३५।

[६३]मधुपर्णी, पृ. – ९२।

[६४]ऋषेः क्षुब्धे चेतसि, पृ. – ३५।

मिथ-तरङ्ग-रूपकादीनि अन्तरङ्गपरिवर्तनस्योपकरणानि। अर्वाचीनसंस्कृतकाव्यं बिम्बं विहायापूर्णतामेति। अनया शैल्या कवयितुरनुभूत्या सह सहृदयानां सम्बन्धो जायते। एवंविधायाः कविताया वैशिष्ट्यानि तावत्–

१. वस्तूनां प्रत्यक्षनिरूपणम्

२. लयबद्धशब्दक्रमः

३. लाघवः

४. सर्वग्राहिणी भाषा

५. इन्द्रियग्राह्यं बिम्बञ्चेति।

बिम्बमिदं क्वचिद्दृश्यकल्पनया कुत्रचिद्वा स्पर्शकल्पनया भवत्यभिव्यञ्जितम्। उदाहरणं यथा–

"निधिभवनस्य / अलिन्दे यथा/
श्रूयते भौतिकता स्वरः/ विक्षिप्तदीनतासु च/
चीत्करोति / शैलकल्पक्षुधा/ कमहं श्रावयिष्यामि/
प्रसूतिकाव्यथां मम?
नाहं निक्षिप्तकन्दुकः/ प्रत्यागमिष्यामि /
भूतलं संस्पृश्य/ परमेको मिमिलिषु/
आषाढस्य बिन्दुः।"[६५] इति।

अन्तरङ्गपरिवर्तनस्यापरमेकमुपादानं प्रतीकमिति। प्रतीकं कविताया ईदृशमेकम् उपादानं, येन सामान्यविषयस्यापि गौरवान्वितरूपमुपलभ्यते, चापि गूढातिगूढ-भावानामभिव्यक्तिरनायासेनैव व्यक्तीभवति। उदाहरणं यथा–

"बुद्धस्य भिक्षापात्रे
निमज्जतमस्ति
अणुबम्बदग्धनगरम्।"[६६] इति।

एतान्युदहरणानि विहायापि आधुनिकसंस्कृतकवितायां मिथ-रूपकग्रन्थि-

[६५] ईशा, पृ. – १।
[६६] निष्क्रान्ताः सर्वे, पृ. – १२७।

तरङ्गानां बहुविचित्रितः प्रयोगः संलक्ष्यते। राधावल्लभत्रिपाठी-रवीन्द्रपण्डा-बनमालीबिश्वालादयः कोविदकवयः तदीयमौलिककाव्येषु एषां प्रयोगम् अनवद्यशैल्या कृतवन्तः।

च. जीवनीमूलककाव्यम्

संस्कृतस्य सर्वप्रथमं जीवनीमूलकं काव्यं तावद् वाणभट्टरचितं हर्षचरितमिति महाकाव्यम्। परमर्वाचीनकाले वासुदेवशर्मणा शाहुराजारामस्य जीवनमुपरि 'शाहुचरितम्' इति विरचितम्। क्षमारावमहोदया स्वपितृजीवनमाधारीकृत्य जीवनीमूलकं 'शङ्करजीवनाख्यानम्' इति काव्यं विरचितवती। ऋषेररविन्दस्य उत्साहमूलकं जीवनं, कर्माणि, नीत्युपदेशान् चाधारीकृत्य सप्तदशाध्यायैः प्रविभक्तमात्मजीवनं यज्ञेश्वरशास्त्रिणालिखितम्। अष्टसर्गसम्पूर्णं 'पूर्वसाभारकारचरितम्' नरेन्द्रप्रतापसिंहेन लिखित्वा प्रभूतं यशोऽर्जितम्। वङ्गीयेन सीतानाथेन गौरीनाथस्य जीवनमाश्रित्य 'गौरीनाथचरितमि'ति जीवनीमूलककाव्यं व्यरचि।

साम्प्रतिके काले संस्कृतसाहित्ये येषां प्रसिद्धपुरुषाणां महापुरुषाणां राजनैतिकव्यक्तीनाञ्च महज्जीवनमुपजीव्य रचनाकर्तृभिः काव्यानि ग्रथितानि, तेषां स्थालिपुलाकन्यायात्सूची प्रस्तूयते –

प्रसिद्धपुरुषाः	ग्रन्थनाम	ग्रन्थकृत्
विवेकानन्दः	विवेकानन्दचरितम्[६७] (चरितकाव्यम्)	विश्वनाथकेशवच्छत्रे
	विवेकानन्दचरितम्[६८] (तदेव)	जि.बि.पळसुले
	विवेकानन्दचरितम् (रूपकम्)	श्रीजीवन्यायतीर्थः
	विवेकानन्दचरितामृतम्[६९]	गणेशदत्तशर्मा

[६७] विवेकानन्दचरितम् – भारतीसंस्कृतमासिकपत्रिका, जयपुरम्, १९८२।
[६८] विवेकानन्दचरितम् – शारदागौरवग्रन्थमाला, पुणे, १९७०।
[६९] विवेकानन्दचरितात्मकम् – अमेटी यूनिवर्सिटी प्रेस्, नई दिल्ली, २००४।

	(महाकाव्यम्)	
	विवेकानन्दम् (खण्डकाव्यम्)	सूर्यनारायणशास्त्री
	विवेकानन्दविजयम्[७०] (नाटकम्)	श्रीधरभास्करवार्णेकरः
	विवेकानन्दात्मकम् (रूपकम्)	शम्भुनाथाचार्यः
	विश्वभानुः (महाकाव्यम्)	पी.के.नारायणपिल्लै
अटलविहारीवाजपेयी	अटलविहारीवाजपेयि-शतकम्[७१] (शतककाव्यम्)	देवनारायणझा
	वाजपेयिकविताः (अनूदितम्)	पी.टी.जी.वी.-रङ्गाचार्ययलुः
इन्दिरागान्धी	इन्दिराकीर्तिशतकम्[७२]	श्रीकृष्णसेमवालः
	इन्दिरागान्धिचरितम् (महाकाव्यम्)	सत्यव्रतशास्त्री
	इन्दिराजीवनम्[७३] (महाकाव्यम्)	बलभद्रप्रसादशास्त्री
	इन्दिराप्रशस्तिशतकम् (काव्यम्)	हाजारिलालशास्त्री
	इन्दिराप्रशस्तिशतकम् (काव्यम्)	शान्तिदेवीरथी
	इन्दिराविजयम्[७४]	अम्बटिपूणिवेङ्कटरत्नः

[७०]विवेकानन्दविजयम् – विवेकानन्दशिलास्मारकसमितिः, मद्रास्, १९७२।
[७१]अटलविहारीवाजपेयिशतकम्– कामेश्वर-सिंह-दरभाङ्गा-संस्कृतविश्वविद्यालयः, बिहारः, २००७।
[७२]इन्दिराकीर्तिशतकम् – भारतीयभाषासङ्गमः, दिल्ली, १९७६।
[७३]इन्दिराजीवनम् – नागप्रकाशकः, दिल्ली, १९९७।
[७४]इन्दिराविजयम् – एड्डवाडुः, हैदरावादः, १९७२।

	(नाटकम्)	
झाँसी-राणीलक्ष्मीवाई	झाँसीश्वरीचरितम्[७५] (महाकाव्यम्)	सुबोधचन्द्रपन्तः
दयानन्दसरस्वती	दयानन्दतिमिरभास्करः[७६] (महाकाव्यम्)	अखिलानन्दशर्मा
	दयानन्ददिग्विजयम्[७७] (महाकाव्यम्)	मेधाव्रतः
	दयानन्दसूक्तिसप्तशती[७८]	शिवकुमारमिश्रः
जवाहरलालनेहेरुः	जवाहरचिन्तनम्[७९] (लघुकाव्यसंग्रहः)	भि. वेलङ्करः
	जवाहरज्योतिः	मुकुन्दशास्त्री
	जवाहरदिग्विजयम्[८०] (महाकाव्यम्)	श्यामवर्णद्विवेदी
	जवाहरज्योतिः (काव्यम्)	राजारामशुक्लः
	नेहेरुचरितम्[८१] (महाकाव्यम्)	ब्रह्मानन्दशुक्लः
विनायक-साभारकारः	क्रान्तवीरः साभारकारः	सरोजचौगुले
	वैनायकम्[८२]	जि.बि.पळसुले
महात्मा गान्धी	गान्धिचरितामृतम्[८३]	विद्यानिधिशास्त्री

[७५]झाँसीश्वरीचरितम् – गङ्गानाथझा-केन्द्रीयसंस्कृतविद्यापीठम्, इलाहवादः, १९७९।
[७६]दयानन्दतिमिरभास्करः – बुलन्दशहर
[७७]दयानन्ददिग्विजयम् – बजौडा, १९३८।
[७८]दयानन्दसूक्तिसप्तशती – देववाणीपरिषद्, नई दिल्ली, १९८८।
[७९]जवाहरचिन्तनम् – सुरभारतीप्रकाशनम्, भोपालः, १९६६।
[८०]जवाहरदिग्विजयम् – गोरखपुरम्, १९६७।
[८१]नेहेरुचरितम् – शारदासदनम्, खुरजा, १९६९।
[८२]वैनायकम् – सारदागौरवग्रन्थमाला, पुणे।
[८३]गान्धिचरितामृतम् – भारतीयोदयपत्रिका, १९६७।

	गान्धिनान्दीश्राद्धामृतम्[८४]	प्रभुदत्तशास्त्री
	गान्धिविजयम्[८५] (महाकाव्यम्)	लोकनाथशास्त्री
	गान्धिचरितम्[८६] (महाकाव्यम्)	साधुशरणमिश्रः
	गान्धिसूक्तिसप्तशती[८७] (खण्डकाव्यम्)	शिवकुमारमिश्रः
येषुखृष्टः	श्रीयेषूखृष्टमाहात्म्यम्[८८]	जान्-मूरः
	श्रीखृष्टसंहिता[८९] पुत्राभिषेकपर्व	उइलियम-हज-मिलः
	श्रीखृष्टसंहिता[९०] – सत्पालकचरित्रपर्व	उइलियम-हज-मिलः
	श्रीखृष्टसंहिता मोक्तृमाहात्म्यपर्व	उइलियम-हज-मिलः
	क्रिस्तुसहस्रनाम[९१]	आइ.सि.चक्रो

छ. अनुवादसाहित्यम्

कस्याञ्चन भाषायां साहित्यस्य प्रवृद्धौ वर्तते अनुवादसाहित्यस्य विशिष्टं स्थानम्। यद्यपि अपरस्य कृतिः उत स्वकृतिरेव रूपान्तरीक्रियते तथापि अनन्यपरतन्त्रत्वं

[८४]गान्धिनान्दीश्राद्धामृतम् – राष्ट्रकाव्यामृतम्, दिल्ली, १९५६।

[८५]गान्धिविजयम् – जबलपुरविश्वविद्यालयः, जबलपुरम्, १९६४।

[८६]गान्धिचरितम् – जानकीसंस्कृतविद्यालयः, चम्पारण्यम्, विहारः, वि.सं.- २०१९।

[८७]गान्धिसूक्तिसप्तशती – देववाणी परिषद्, दिल्ली, १९८४।

[८८]श्रीयेषूखृष्टमाहात्म्यम् – The Glory of Jesus Christ; A Brief Account of Our Lord's Life and Doctrines. Bombay: 1852.

[८९]श्रीखृष्टसंहिता – Bishop's college, Calcutta, 1834.

[९०]श्रीखृष्टसंहिता – Bishop's college Press, Calcutta, 1838.

[९१]क्रिस्तुसहस्रनाम – प्रदेशीयपत्रिका, केराला, १९१४।

निराकर्तुं न शक्यते। तथाहि, साम्प्रतं मनीषिणः अनुवादशब्दमुपेक्ष्य अनुसर्जनमिति शब्दं प्रयुञ्जन्ते। अनुसर्जनं नाम तादृशं किञ्चन यत्र मूलस्य शब्दसम्पत्तेर्भावसम्पत्तेश्च चमत्कारित्वमविहाय भाषान्तरीकरणं क्रियते। एतत्तु दृश्यते यत् कस्याश्चन भाषायाः प्रारम्भिकं साहित्यमनुवादात्मकं भवति।

अर्वाचीनसंस्कृतसाहित्यमपीदानीं कैशोरदशापन्नमित्यङ्गीकर्तुं न द्वैधीभावम् आपद्येरन् तत्त्वज्ञाः। विंशशताब्दी ह्यर्वाचीनसंस्कृतानुवादसाहित्यस्य कालः। सर्वप्रथमं विंशशतकस्य प्रथमे दशके महामहोपाध्यायो लक्ष्यणशास्त्रितैलङवर्यः सेक्सपीयारस्य नाटकानि अनूदितवान्। भारतवर्षवद् बहुभाषामण्डिते देशे अनुवादकार्यं गुरुत्वपूर्णमिति मनसि निधाय समसामयिकभारतीयसाहित्ये कर्मेदं निश्चप्रचं महत्पदमलङ्करोति। भारतस्य धर्मार्थिप्रचारकाः प्रथममेव तदीयधर्मग्रन्थानाम् अनुवादं कुर्वन्ति। किन्तु, भट्टमथुरानाथशास्त्री असाधारणत्वेनेतरभाषाभ्यः विशेषेण प्राकृततस्तथा च विहारभाषाया दोहाछन्दसानुवादं कृत्वा यथाक्रमं 'गाहासतसई' 'सतसई' चेति अनुवादग्रन्थद्वयं ररर्च। विंशशतकस्य प्रारम्भिकलग्ने आधुनिकभारतीयभाषाभ्योऽनुवादाः प्रकाशिता अवर्तन्त संस्कृतचन्द्रिका-मञ्जूषादिषु पत्रिकासु। 'संस्कृतचन्द्रिकायां' वङ्किमचन्द्रस्य वङ्गोपन्यासा संस्कृतभाषयानूदिता इन्दिरा (१९०७) देवीकुमुद्वती(१९०३) लावण्यमयी(१९०६) कृष्णकान्तीयस्य निर्वाणः(१९०७) च प्रभृतिशीर्षकैः रेणुदेवीमहाभागया। सत्यदेवभार्मा पवित्रकोरान्-ग्रन्थस्यानुवादं चकार संस्कृतं 'कुराणम्' इति नाम्ना। इराणस्य गीतिकाव्यस्य 'ओमर-खैयामस्य' न्यूनातिरिक्ता अष्टानुवादका प्राप्यन्ते। तेष्वनुवादकेषु वीरेन्द्रकुमारभट्टाचार्यः, राजगोपाल-आयेङ्गारः, हरिचरण-शर्मा, सदाशिव-दङ्गे, अदिभट्ट-नारायण-दासश्चान्यतमाः। सुखमयमुखोपाध्यायेन तस्य 'दीनार्कराजकुमारहेमलेकम्' इति अनुवादः कृतः सेक्सपीयारस्य हेमलेटनाटकस्य रोचिष्णुतया पाश्चात्यप्राच्ययोर्मेलबन्धनेन।

अनुवादसाहित्ये वङ्गीया प्रतिभा चिरं प्रगल्भा चकास्ति। संस्कृतभाषायाम् अनूदितवङ्गीयसाहित्यं द्विधा विभजयितुमलम्– १) रवीन्द्रसाहित्यम् २) रवीन्द्रेतर-साहित्यमिति। किन्तु, रवीन्द्रसाहित्यस्य अनुवादक्षेत्रे वङ्गीयकवीनां यादृशः प्रयत्नः, न तथा दृश्यते रवीन्द्रेतरसाहित्यानुवादे। रवीन्द्रनाथस्य गीताञ्जलेरनुवादकर्मणि

तेऽतीवात्युत्साहिनः। तथाहि, अमरेन्द्रमोहनतर्कतीर्थभट्टाचार्येण २ गीते, कामिनीकुमार-अधिकारिणा २५ गीतानि, दुर्गादासेन गोस्वामिना षड्गीतानि, शैलेन्द्रनाथमौलिकेन चत्वारि गीतानि, कालीपदतर्काचार्येण सम्पूर्णा गीताञ्जलिः, दीपकघोषेण १० गीतानि चानूदितानि। अन्ध्रदेशीयेन पुल्लेलश्रीरामचन्द्रेण तथा च केरलवास्तव्येन एन० गोपालपिल्लाइ-पादेन विहितानुवादे त्र्यधिक्यमेकशतमिति गीतसंख्या विद्यते। पुल्लेलमहोदयेन मन्दाक्रान्ताछन्दसा तथा च पिल्लाइपादेन उपजातिछन्दोऽनुसृत्य अनुवादो विहितः। साहित्य-अकादेमीतः प्रकाशिते वि.राघवन्-वर्यैः सम्पादिते 'संस्कृतरवीन्द्रमि'ति ग्रन्थे विविधैः प्राज्ञैः क्रियमाणस्य गीताञ्जलेरनुवादस्य सामूहिकचित्रम् आप्यते। आङ्गलगीताञ्जलिगीतेषु गणेशलक्षण-अमलादिना त्रयोदशानाम्, उडालिसुब्बरायशास्त्रिणा द्वादशानाम्, को.ल.व्यासरायशास्त्रिणा एकस्य गीतस्यानुवादः कृतः। मद्गुरुपादेन निखिलेशचक्रवर्तिना ८० रवीन्द्रसंगीतानि, ७ नजरुलगीतानि, ४ अतुलप्रसादस्य गीतयः, २ रजनीकान्तगीते, शिवदासवन्द्योपाध्यायस्य भाषायां भूपेनहाजारिकावर्यस्य २ गीते चानूदिते, यत्र मूलरचयितॄणां भावसम्पत्तिरक्षुन्ना वर्तते। अपरतः, रवीन्द्रभारतीविश्वविद्यालयस्य अध्यापिकाया इन्दिरा-चट्टोपाध्यायमहाभागाया 'विराज मम नयनसम्मुखे' नाम्ना सान्द्रमुद्रिकैका रागागीतप्रकाशनालयतः प्रचरद्रूपतामेति, यत्र कवीन्द्ररवीन्द्रस्य दश गीतान्यनूदितानि लसन्ति। अवङ्गीयेषु मा.कृष्णनम्पूतिरिपादेन ४ संङ्गीतानि, पुल्लेलश्रीरामचन्द्रवर्येण ९०३ गीतानि, निखिलेशचक्रवर्तिना गौरीदत्तशर्मशास्त्रिणा १५७ गीतानि चानूदितानि। अपि च, ध्यानेशनारायणचक्रवर्तिना रवीन्द्रनाथस्य मुक्तधारायाः (१९६४) अनुवादः, तन्मयकुमारभट्टाचार्य-नारायणदास-राकेशदासैः कविगुरोः कथानामनुसर्जनं 'रवीन्द्रकथाकल्लोलिनी'ति नाम्ना, विहारिलालमिश्रेण शरच्चन्द्रस्य सप्त कथानामनुवादः 'शरत्सप्तकमि'ति (१९९६) नाम्ना, राकेशदासेन वङ्किमचन्द्रचट्टोपाध्यायस्य कथानामनुवादो 'मेघमल्लार' इति शीर्षकेन च प्रकाशिताः।

श्यामविमलेन हिन्दीभाषाया उपन्यासस्य 'भ्यामोह' इत्यस्य सरलसंस्कृतेनानुवादः कृतः आत्मजीवनीमूलकशैल्या समसामयिकप्रेक्षापटे हृदयस्पर्शिनानुरागेण च। जगन्नाथपाठकेन पार्शि-ऊर्दुभाषयोः कवितानां नान्दनिक-

बोधेनाद्रीकृत्यानुवादो विहितः 'गालिवकाव्यमि'ति शीर्षकेण। साम्प्रतिककाले कानाडावास्तव्यस्य एस.एल.भाइराप्पापादस्य केषाञ्चिद् उपन्यासानाम् अनुवादः प्रकाशितो वर्तते संस्कृतभाषायाम्। अशोकन-पुरुनाटुकरः मालायलामभाषाया 'मानटुम्वु कुञ्जुकुट्टन' इत्युपन्यासस्य संस्कृतानुवादं विधाय 'महाप्रस्थानमि'ति शीर्षकेण प्रकाशितवान्। वङ्गवास्तव्येन विष्णुपदभट्टाचार्येण रोणाल्डसे-महाभागस्य "Heart of Ãryavarta" इत्याङ्गलग्रन्थस्यानुवादः कृतः 'आर्यावर्तहृदयमि'ति नाम्ना। विष्णुदेवपण्डितः कश्चनानुवादको यः ललितकुमारशर्ममहाभागस्य गुजरातीभाषायां लिखितानां दार्शनिकप्रबन्धानां गीर्वाणवाण्यामानुवादं कृत्वा 'अमृतधारे'ति नाम्ना प्रकाशयति स्म। तेनैव अरविन्दस्य "The Mother" इति ग्रन्थस्यान्तिमभागस्यानुवादो विहितः २६२मितश्लोकैर्विन्यस्तो 'मातृत्वप्रकाशो नाम्ना। अपि चारविन्दस्य 'सावित्री'त्यस्य प्रथमसर्गस्यानुसर्जनं कृतं कापालिशास्त्रिणा। अभिराजराजेन्द्रमिश्रः रामकुमारभार्मामहाभागस्य हिन्दीभाषानुवादं कृतवान्। आधुनिकसंस्कृतसाहित्यस्य भगीरथस्वरूपेण राधावल्लभत्रिपाठिना 'विश्वभारा' इति शीर्षकेण विश्वसाहित्यस्य कथानामनुवादः कृतो यत्रानुवादकस्य नैकासु भाषासु नैपुण्यं तथा च तद्भावविश्वमुन्मिलितं वर्तते।

एतदवश्यमेवानस्वीकार्यं यदर्वाचीनकाले भारतवर्षस्य सर्वाभ्यो भाषाभ्यः देवभाषायामनुवादोऽभूद्भवति च। साम्प्रतिके काले अनूदितसाहित्ये नारायणदाशस्य विशेषयोगदानं वर्तते। अनूदितसंस्कृतसाहित्यक्षेत्रे प्रायः ५ शोधपत्राणि, १० पुस्तकसमीक्षा अस्य सन्ति। अस्याष्टावनूदितग्रन्थेषु द्वे काव्ये 'वाजिराउतम्' , 'वेदुइनगीतम्' इति, षट् कथासंग्रहाः- १. सृष्टिः, २. वात्यासारः, ३. सप्तपदी, ४. सप्ताहेर सात दिन, ५. कवीन्द्रकथाकल्लोलिनी, ६. लिपिका इति च वर्तन्ते। अयञ्च ओडिआभाषातोऽनुवादकर्मणि विशेषनिपुणो वर्तते।

ज. शास्त्रीयग्रन्थानां नवीनव्याख्यानम्

किमपि साहित्यं समालोचनाग्रन्थान् तथा चालंकारशास्त्रं विहाय पूर्णत्वं न लभते। अतः, साहित्ये अलंकारशास्त्रस्य महद्दानं वरीवर्त्ति। नूत्नानि शास्त्रीयपुस्तकानि तत्त्वानि चाद्यतने काले शास्त्रकारैरुपायनीकृतान्यस्मत्सकाशे। ब्रह्मानन्दशर्मणा तस्य

नन्दनतत्त्वविषयकदार्शनिकभावाः रससूत्रचतुष्टयमुपरि स्वकाव्यव्याख्यानञ्च विलिख्य– 'काव्यशास्त्रालोकः', 'अभिनवरसमीमांसा', 'रसालोचनम्', 'वस्त्वलंकारदर्शनम्' इति शीर्षैकैः परिवेशितम्। तन्मते रसाभिज्ञता नाम सत्यानुभूति-धार्मिक-काव्यिक-वैज्ञानिकाद्यभिज्ञतानामालोकैर्यदुत्पद्यते। राष्ट्रपतिपुरस्कारेण सभाजितेन सीतानाथाचार्येण कवितायाः स्वरूप-गुण-कार्यकारित्वादिकम् आदाय 'कविते विश्ववन्दिते' इति १०५ मितश्लोकैः पूरिता कविता प्रकाशिता। एतान् विहायार्वाचीनकाले नन्दनतत्त्वविषयका अलंकारग्रन्थाः त्रयोदशाधिक-द्विसहस्रसंख्यका उपलभ्यन्ते। तेषु प्रामाणिकत्वेन केषाञ्चिन्नामान्युल्लिख्यन्ते –

काव्यशास्त्रमूलग्रन्थाः	**आलंकारिकाः**
अभिराजराजेन्द्रमिश्रः	अभिराजयशोभूषणम्
आशाधरभट्टः	क). अलंकारदीपिका ख). कोविदानन्दः
कृष्णकविशर्मन्	मन्दारमरन्दचम्पूः
चन्द्रकान्ततर्कालंकारः	अलंकारसूत्राणि
जगन्नाथपाठकः	सौन्दर्यकारिका
नरसिंहकविः	नञ्जराजयशोभूषणम्
बलदेवविद्याभूषणः	साहित्यकौमुदी
मथुराप्रसाददीक्षितः	कवितारहस्यम्
राधावल्लभत्रिपाठी	अभिनवकाव्यालंकारसूत्रम्
रेवाप्रसादद्विवेदी	क). अलं ब्रह्म ख). सौन्दर्यपञ्चाशिका ग). नाट्यानुशासनम् घ). काव्यालंकारकारिका ङ). साहित्यशारीरकम्

शिवाजी उपाध्यायः	साहित्यसन्दर्भः
हरिदाससिद्धान्तवागीशः	काव्यकौमुदी

झ. समसामयिकसंस्कृतसाहित्यविषये विचारः

केचन कविवरा अद्यतने काले जनिं लभमाना अपि विज्ञानप्रयुक्तिपरिस्फूर्तिकमनुजसभ्यतया प्रभावभाविताः सन्तोऽपि प्राचीनविषयानवलम्ब्य समसामयिक-जीवनम् आधारीकृत्य शैलीञ्चाश्रित्य काव्यानि ग्रथयन्ति, ते न ह्यर्वाचीनकवित्वेन परं समसामयिकसाहित्यकृद्रूपेण परिगण्यन्त इति केषाञ्चित् समीक्षकाणामाशयः। पक्षस्यास्य समार्थकौ तावदुत्कलविश्वविद्यालयस्य भूतपूर्वः उपाचार्यः प्रफुल्ल-कुमार-मिश्रः, विश्वभारतीविश्वविद्यालयस्य प्राध्यापकः अरुणरञ्जनमिश्रश्च। अत्रेदमुल्लेखार्हं यत् प्रफुल्लकुमारमिश्रेण तस्य ग्रन्थस्य नाम "The Contemporary Sanskrit Literature" इति तथा चारुणरञ्जनमिश्रेण "Contemporary Sanskrit Writings in Orissa" इत्यभिधानं प्रदत्तम्। तेषां नये समसामयिककविषु सीतानाथाचार्यः, केशवचन्द्रदाशः, बनमालीबिश्वालः, प्रफुल्लकुमारमिश्रः, मनमोहनाचार्यः, प्रमोदकुमारनायेकः, सत्यव्रतशास्त्री, हरिदत्तशर्मा, रामकरणशर्मा चेत्यादयः समुल्लेखार्हाः। कथञ्चैते समसामयिका इति युक्तिपुरःसरं प्रमाणयितुमीष्यते प्रफुल्लमिश्रेण निम्नोक्तसूच्या–

कवयितारः	ग्रन्थविशेषाः	विषयाः	मन्यव्यम्
1. सीतानाथाचार्यः	a. का त्वं शुभे b. भावविलसितम् c. काव्यनिर्झरी	i. प्रेमाश्रितम् ii. प्रकृतिप्रेम-स्तोत्रभावाश्रितम्	कविना प्राचीननवीनयोः मेलबन्धनं कृत्वा काव्यानि लिखितानि अपि कवेः भावसाम्राज्यं प्राक्तनस्य मूले रोपितम्। किञ्च, तस्य प्रायेण सर्वासु कवितासु अतीतकालनिमग्नानां वस्तूनां प्राधान्यं दृश्यते।
2. केशवचन्द्रमिश्रः	a) अलका b) महातीर्थम् c) हृदयेश्वरी d) ऋतम् e) प्रतिपदम् f) आवर्तनम् g) तिलोत्तमा h) अरुणा	प्रकृतिप्रेम-जीवन-सामाजिक-मानसिक-मूल्यबोधानां मूल्यायनम्।	केशवचन्द्रस्य विषयवैचित्र्योपेतम्। तेन अन्धस्रोतस्य भूमिकायामगादि– “Consiquently, my main concem necessitated a change of literacy forms to expand parallel to poem and story writting. I started divising plots for novels instead of giving to moral new content in interpreting life a new.”
3.प्रफुल्लकुमारमिश्रः	a)धर्मपदीयम् b) तव निलये c) ब्रह्मनाभिः d) चित्राङ्गदा e) चत्वारि शृङ्गाः f) कोणार्के g) चित्रकुरङ्गी	आत्मतत्त्वम्, जीवनोद्देश्यम्, प्रेम, भावराजयश्चेति।	आस्तिकानां मूलम् उद्देश्यमात्मोपलब्धिः इति कृत्वा प्रफुल्लकुमारमिश्रस्य काव्येषु विलसन्ति प्रतिच्छत्रं प्राचीनभारतीयसंस्कृतेर्जीवनदर्शनम् ऐदिह्यं सामाजिकमूल्यबोधश्चेति।

प्राध्यापिका ऋताचट्टोपाध्यायमहोदया समसामयिकतत्त्वस्य सामान्ययुक्तिम् अङ्गीकुर्वत्यपि प्रसङ्गेऽस्मिन् विलक्षणं मतं परिपोषितवती। सा न केवलं वस्तुगतम् अर्वाचीनत्वं स्वीकरोति, कालगतम् आधुनिकत्वमपि। अर्थादुभयोः वस्तुकालयोः समन्वयो ह्याधुनिकत्वस्य मानदण्ड इति तन्नयः। तस्या मतम् अङ्गीकुर्यात् चेद् भवेद् व्याप्ततरम् आधुनिकसंस्कृतक्षेत्रम्। नयोऽयं युक्तिग्राह्यः सर्वापेक्षयेति मन्मतम्।

स्थालीपुलाकन्यायाद् बिन्दुशः केषाञ्चिद् एवाधुनिकसंस्कृतकाव्य-नाटकोपन्यास-कथानुवादानां वैशिष्ट्यादिविषये चर्चात्र विहिता। प्राचीनकाव्यपरम्परया सह चर्चा क्रियते चेद्दृश्यते प्राचीनकाव्यानां कवित्वपक्षः प्रबलः समासीत्, किन्तु आधुनिककाले तेन समं सर्जनशैल्यपि गुरुत्वपूर्णा वर्तते। एतदेव स्वीकरणीयं यद् वैदेशिकसाहित्येन सार्धं गहनपरिचयवशाद् अर्वाचीनसंस्कृतसाहित्यम् उत्तराधुनिकतायुगम् आप्नोतीति। अतः, साम्प्रतिकः संस्कृतकविर्न हि विषयदरिद्रः, शब्दार्थदीनः, कल्पनाविहीनो वा। स प्राचीनाद्यतनभाविविषयेषु काव्यप्रणयने रमते, न च विरमति संस्कृतकाव्यामृतस्वादलुब्धसुधियां मनोरञ्जनात्। प्रत्येकमर्वाचीन-संस्कृतकाव्यप्रकारेष्वाधुनिकता आभरणादिवल्लसति। परिशेषे वक्तुमलं यत् संस्कृतकाव्यविरचनप्रवृत्तिः सततं स्पन्दनशीलां तथा नववोन्मेषशालिनीमेष्यतीति ममाशयः।

तृतीयोऽध्यायः

॥ अर्वाचीनसंस्कृतालंकारशास्त्रम् ॥

०. उपोद्घातः

कस्या अपि भाषाया व्युत्पत्तिविवर्धनाय यथा व्याकरणशास्त्रं नितरामपेक्षते तथैवालंकारशास्त्रमपि साहित्ये नैपुण्याय। अलंकारज्ञानदरिद्रो जनः शब्दशास्त्रादिकं जानन्नपि – 'चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे'[९२] इति रीत्या मन्दभाग्यावतिष्ठते। शास्त्रमिदं वैदिकलौकिकग्रन्थानां पूर्णत्वज्ञानार्जनायात्यावश्यकं वर्तते। नैतद्विना अर्थावगतिः स्पष्टत्वेन। इदञ्च, तितउरिव कार्यं साधयति। तितउना यथा वस्तु निर्मलीक्रियते, तृणकणादिकं दूरीक्रियते तथैवालंकारशास्त्रं साधयित्वालंकारिकोऽपशब्दानपसार्य स्वकवाक्यं व्यङ्ग्यार्थबोधकं सुशब्दललितञ्च विद्यते, सम्यगर्थमभिव्यनक्ति च। सुशब्दप्रयोगेन यथार्थार्थावगमनेन च शब्दार्थयोर्मध्य ऐक्यभावनोपजायते। ऐक्यभावनायाश्चास्या फलमिदं मधुरमुत्पद्यते यत् सोऽलंकारशास्त्रविशेषज्ञः सुधीरमनुभवतीदं यत्तस्य वस्तुभिः सर्वैः सार्धमैक्यमेव न, किञ्च वस्तु भिन्नभिन्नपदार्थस्तद्द्वयमपि वस्तुतः एकमेवाविलक्षणम्। यत्स तदेव वस्तु, यद्वस्तु तदेव स इत्येतेनैक्यानुभवेन भवति स ब्रह्मज्ञः। ब्रह्मास्वादसहोदरस्य परमपदलाभस्य साधनभूतं तावदलंकारशास्त्रम्। यस्मिन्नवगते काव्यनिर्माणे स्वरूप-दोष-गुणालंकारादीनामवधारणे च शक्तिरुन्मिषति, तदलंकारशास्त्रम्। शास्त्रमिदं स्वजनिसमयादेव नितरां गतं लोकप्रियताम्। तस्माद् एतत् काव्यालंकार-काव्यशास्त्र-क्रियाकल्प-साहित्यविद्या-अलंकारशास्त्र-साहित्यशास्त्राद्यभिधानैः ससस्मानं समाहूत-मभूत्। राजशेखरेण तदीयायां 'काव्यमीमांसायाम्' 'उपकारकत्वादलंकारः सप्तममङ्गमिति यायावरीयः, ऋते च तत्स्वरूपपरिज्ञानादेवार्थानवगतिः। पञ्चमी साहित्यविद्येति यायावरीयः',[९३] 'शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्येति'[९४]

[९२]काव्यप्रकाशः (दशम उल्लासः) – ५१०।

[९३]काव्य.मी. (सीता) पृ. – ३४।

[९४]तत्रैव, पृ. – ३५।

समीरितम्। 'सा च विद्या चतसृणामपि विद्यानां निष्यन्दः'[९५]। 'विक्रमाङ्कदेवचरिते' विह्लहेण–

"साहित्यपाथोनिधिमन्थरोत्थं कर्णामृतं रक्षत हे कवीन्द्राः।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति"॥

इति प्रोक्तश्लोकानुसारं साहित्यशब्दो व्यञ्जयति काव्यार्थत्वम्। कविकर्मणः शासकत्वात् साहित्यशास्त्रमिति कथ्यते। अपि च, समस्तविद्यास्थानैकायतनं तावत् काव्याख्यविद्यास्थानम्। सीतानाथाचार्येणोक्तं 'कविते विश्ववन्दिते' इति कवितायाम् –

"संस्कृतेर्मानवीयाया लग्ने पुण्यतमे पुरा।
कवेर्मानसजन्मासि कविते विश्ववन्दिते॥
क्षणे विशेषे कविमानसोत्थतीव्रानुभूतेर्लभसे स्वसत्ताम्।
स्थितिस्तथाप्यस्ति चिरन्तनी ते सगौरवा विश्वजनीनमानसे॥
जन्मतः शुद्धसंस्कारास्तारुण्यपरिमण्डिता।
आकर्षन्ती च चेतांसि राजसे त्वं सचेतसाम्॥
वयसातिप्रवीणापि नवीना कविते चिरम्।
अम्लानरूपसम्पन्ना लावण्यगरिमोज्ज्वला॥
विश्वविश्रुतचारित्रा रहस्यपुलकाञ्चिता।
रञ्जयन्ती मनो नित्यं पाठकानां विराजसे"[९६]॥ इति।

कवयिता कौति कारयितृप्रतिभया काव्यानि। परं भावकैः भावयितृप्रतिभाबलाद् दुर्विज्ञेयं सरहस्यं कवितास्वरूपं समीक्ष्यते। अतः कविभिः भावकैः निरन्तरञ्च पोषिता संशोधिता च वाग्वाणी पाश्चात्यसाहित्यशास्त्रैः नितरां परिचयवशादेव विवर्धिता। कवितानां दोषगुणादीनां प्रतिपादकमपीदं शास्त्रं यमकोपमाद्यलंकाराणां विषयकतया काव्यव्यवहारप्रयोजकतया शास्त्रे चात्र प्रधानत्वेन तत्प्रतिपादकत्वाद् एव 'अलंकारशास्त्रमि'ति व्यपदिश्यते। अलंकाराणां काव्यव्यवहारप्रयोजकत्वञ्च 'काव्यवृत्तेस्तदाश्रयात्' इति आनन्दवर्धनोक्त्या पञ्चमोल्लासे मम्मटाचार्यैः एव

[९५]काव्य.मी. (सीता), पृ. – ३४।

[९६]कविते विश्ववन्दिते (श्लोकः – १-५)।

अभ्युपगतम्। किञ्च 'अलंकारशास्त्रम्' इत्युक्ते ये खलु अलंकारनिबन्धकाराः भरत-भामह-दण्डि-वामन-भट्टोद्भट-रुद्रट-भट्टनायक-मुकुल-प्रतीहारेन्दुराज-आनन्दवर्धन-महिमभट्ट-कुन्तक-अभिनवगुप्त-शौद्धोदनि-वाग्भट-रुय्यक-भोजराज-मम्मट-हेमचन्द्र-केशवमिश्र-पीयूषवर्ष-विद्यानाथ-विश्वनाथ-गोविन्दठक्कुर-अप्पय्यदीक्षित-जगन्नाथान्ताः सप्तविंशतिः प्राञ्चो बभूवुः तैः धन्यमानमर्थं वाच्योपकारकतयालंकारपक्षनिक्षिप्तं मन्यमानैरलंकाराः काव्ये प्रधानमिति राद्धान्तितम्। 'काव्यस्यात्मा क' इत्यस्मिन् विषये विप्रतिपत्तिर्विद्यते विदुषाम्। साहित्यशास्त्रप्रस्थान-प्रवर्तकेष्वाचार्येषु केचन रसं, परेऽलंकारम्, अपरे गुणम्, इतरे ध्वनिमन्ये वक्रोक्तिं भिन्नाश्चौचित्यमेव प्रतिपादयन्ति। तथाहि समुद्रबन्धनेनालंकारसर्वस्वटीकाकर्त्रोक्तम्–

"इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन वेति त्रयः स्फुटा विचारधाराः। आद्येऽप्यलंकारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्। इति पञ्चसु पक्षेष्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन"[१७] इति।

अद्यतनसमीक्षणसरणिम् अवलम्बमाना आचार्याः तत्तद्विच्छित्तिविशेषान् ध्वनिसिद्धान्त एव अन्तर्भाव्य तस्यैव प्रामुख्यं सङ्गिरन्ते। ध्वनिसिद्धान्तमिमं केन्द्रीभूय काव्यशास्त्रं त्रिधा विभक्तम् –

१) पूर्वध्वनिकालः

२) ध्वनिकालः

३) उत्तरध्वनिकालश्चेति।

भरत-भामह-दण्डि-वामन-उद्भट-रुद्रटादयश्चाचार्याः पूर्वध्वनिकाले विलसन्तः काव्यतत्त्वं परिशीलयन्ति स्थापयन्ति च स्वराद्धान्तान्। ध्वनियुगे केवलम् आनन्दवर्धनाचार्यो विलसन् आसीत्। उत्तरध्वनिकाले मम्मट-विश्वनाथ-राजशेखर-जयदेव-क्षेमेन्द्र-शारदातनय-भानुदत्त-जगन्नाथाः जनिं लब्ध्वा काव्यशास्त्राणि विचारयन्ति स्म। पण्डितराजो जगन्नाथो ह्यन्तिमो मूर्धन्यालंकारिकः अलंकार-

[१७]अलंकारशास्त्रेतिहासः, पृ. – १८।

शास्त्रप्रपञ्चे। तस्मात्परं काव्यशास्त्रसन्तानप्रवाहः श्लथश्चोपेक्षितो जातः। एतदपि वक्तुं शक्यं यज्जगन्नाथात् परवर्तिकाले कोऽप्यालंकारिको नागतो, यः स्वकमौलिकराद्धान्तान् प्रतिष्ठाप्य भरत-भामह-वामन-आनन्दवर्धनादिसंकाशो भवितुम् अर्हति। नोत मम्मट-विश्वनाथ-जगन्नाथाद्याचार्यश्रेण्याम् अन्तर्भावयितुं शक्यते कोऽपि साम्प्रतिककाव्यतात्त्विकोऽस्माभिः। किन्तु न हि काव्यशास्त्रविरचनप्रवृत्तिः न्यूना पूर्वापेक्षया। पण्डितराजोत्तरवर्तियुगे नैके काव्यशास्त्रज्ञा जनिं लेभिरे, येऽपेक्षाकृताल्पप्रसिद्धाप्रसिद्धकोट्योः स्थानं लभमानाः समासन्। तथाहि आलोचना-सौविध्यर्थमचार्यपक्षः चतुर्धा विभजयितुं शक्यः –

१. प्रसिद्धाचार्यपक्षः

२. अप्रसिद्धाचार्यपक्षः

३. टीकाकृदाचार्यपक्षः

४. अज्ञातलेखकवर्गश्चेति

१. जगन्नाथोत्तरवर्तिनः प्रसिद्धा आचार्याः

जगन्नाथात् परवर्तिकाले प्रसिद्धाचार्यवर्गेषु राजचूडामणिदीक्षित-भूदेवशुक्ल-रामदेवचिरञ्जीवभट्टाचार्य-विश्वेश्वरपण्डित-नरसिंहकवि-विद्याराम-आशाधरभट्ट-वेणीदत्तशर्म-अच्युतरायशर्म-श्रीकृष्णकवि-रेवाप्रसादद्विवेदि-राधावल्लभत्रिपाठि-हर्षदेवमाधवाश्च राराज्यन्ते। एतेऽलंकारिकाः स्वमौलिककर्मभिः अर्वाचीनकाव्यशास्त्रस्य अविच्छिन्नगतिं पर्यरक्षन्।

१.१. राजचूडामणिदीक्षितः

दक्षिणभारतस्य सोमयाजीकुले जन्म लब्ध्वा सम्यक्तया काव्य-काव्यशास्त्र-दर्शनादिशास्त्राण्यधीत्य द्वाविंशतिः ग्रन्था विरचिता अनेन। तेष्वन्यतमाश्च मौलिका यथा– १. शङ्कराभ्युदयम् २. कंसवधम् ३. रुक्मिणीपरिणयम् ४. कमलिनीकलहंसनाटिका ५. आनन्दराघवनाटकम् ६. अलंकारचूडामणिः ७. चित्रमञ्जरी ८. काव्यदर्पणञ्चेति। परं तस्य काव्यशास्त्रविषयकग्रन्थद्वयं तावत् 'अलंकारचूडामणिः', 'काव्यदर्पणञ्चे'ति। काव्यदर्पणविश्लेषणादेतदेव प्रतीयते यत् मम्मटप्रभावितस्तावद् दीक्षितपादः। काव्यप्रकाशस्य तत्त्वजातमाश्रित्यानेन कारिकावृत्तिभ्यां ग्रन्थोऽयं ग्रथितः। केषुचित्

स्थलेषु मम्मटकृतशब्दावल्यामूलचूडं समानीतानेन। प्रस्तुतग्रन्थे समदृश्यत समावेशः समस्तकाव्यशास्त्रीयतत्त्वानाम्। ग्रन्थोऽयं दशोल्लासैर्विभक्तः। परं ग्रन्थस्यास्य मौलिकत्त्वं प्रायेण नास्त्येव।

१.२. भूदेवशुक्लः

गुजरातप्रदेशस्य जम्बूसरस्थानवास्तव्योऽयं श्रीकण्ठदीक्षितसकाशात् काव्यशास्त्राण्यधीत्य स्वजीवद्दशायां ग्रन्थसप्तकं व्यरचयत्। ते च ग्रन्था यथा – १. रसविलासः २. रुक्मिणीविलासः ३. रामचरितम् ४. धर्मविजयः ५. आत्मतत्त्वप्रदीपः ६. ईश्वरविलासदीपिका चेति।

'रसविलासो' ह्यस्य अलंकारशास्त्रविषयकग्रन्थः सप्तस्तवकैः पूरितः। अत्र कारिकागद्याभ्यां काव्यतत्त्वसम्बन्धिलक्षणानि लिखितानि। ग्रन्थस्य विषयाः स्तवकानुसारं यथा – रसविवेकः, नवरसविवेचनम्, भावनिरूपणम्, गुणनिरूपणम्, दोषनिरूपणम्, दोषोद्धारः, काव्यलक्षणं वृत्तिनिरूपणञ्चेति। काव्यप्रकाश-काव्यप्रदीप-रसगङ्गाधराणां प्रभावो विशेषेणोपलभ्यते ग्रन्थेऽस्मिन्।

१.३. रामदेवचिरञ्जीवभट्टाचार्यः

गौडदेशनिवासी ब्राह्मणकुलजोऽयं पितुः राघवेन्द्र[९८]सकाशात् तथा च रघुदेवन्यायालंकाराच्च[९९] शास्त्रादिकमध्याप्य पञ्च ग्रन्थान्[१००] रचितवान्। ग्रन्थपञ्चकेषु 'काव्यविलासः'[१०१] अलंकारशास्त्रविषयको गद्यकारिकाभ्यां ग्रथितः अध्यायद्वयोपेतो लघुकायश्च। काव्यविलासस्य मङ्गलाचरणे श्रीकृष्णस्य स्तुतिः विद्यते।

[९८] "द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतौ।
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत् कविः॥" (काव्यविलासः, पृ. – ११)।

[९९] "इमौ भट्टाचार्यप्रवररघुदेवस्य चरणौ।
शरणौ चिन्तान्तर्निरवधि विधाय स्थितवत्॥" (तदेव, पृ. – १२)।

[१००] आफ्रक्ट-महोदयस्तदीये 'Catalogus Catalogoram' इत्याख्यग्रन्थे चिरञ्जीवस्य पञ्च ग्रन्थान् उल्लिखितवान्। तद्यथा – १. काव्यविलासः २. माधवचम्पूः ३. विद्वन्मोदतरङ्गिनी ४. शृङ्गारतटिनी ५. वृत्तरत्नावली।

[१०१] ग्रन्थोऽयं वटुकनाथशर्मणा जगन्नाथशर्मणा च सम्पादितः। ग्रन्थोऽयं वाराणस्याः 'Govt. Sanskrit Library' इति प्रकाशनालयात् प्रकाशितः।

प्रथमभङ्ग्यां काव्यस्वरूप-प्रयोजन-रसनिरूपणादि-विषयाः तथा द्वितीयायाञ्च शब्दार्थालंकारयोः विवेचनम् उपवर्णिताः सन्ति। पण्डितराजपरवर्तिनाम् अलंकारग्रन्थानां मध्ये ग्रन्थोऽयं सर्वाधिकप्रचारितो हस्तलिखितश्चेति। तदानीन्तनकाले अलंकारप्रसङ्गः मम्मट-अप्पय्यदीक्षितयोरनुसारी परं लक्षणानां वृत्त्युदाहरणानि स्वरचितानि । वामनदण्डनोः रसस्य गौणत्वमिति तथा च विश्वनाथस्य काव्यसारतत्त्वेन रसत्वमिति तत्त्वद्वयं निराकृत्य चमत्कारस्य साररूपत्वं प्रतिष्ठापितं रामदेवेन। ग्रन्थोऽयमतीव लोकप्रियतां गतः। यद्यपि काणे-महाभागनये 'शृङ्गारतटिनी'त्यप्यलंकारग्रन्थोऽनेनैव रचितः। अयञ्च कामोद्दीपकः श्लोकसङ्ग्रहः।

१.४. विश्वेश्वरपण्डितः

उत्तरप्रदेशस्याल्मोडामण्डलान्तर्गते पाटियाख्ये ग्रामे ब्राह्मणकुले अष्टादशशताब्द्यां जनिं लभमानोऽयं वैयाकरणसिद्धान्तसुधानिधेर्दीधितिप्रवेशस्य च प्रणेतापि अलंकारकौस्तुभनामकम् उच्चकोटिकम् अलंकारशास्त्रीयग्रन्थं प्रणीतवान्। तेन विरचितेषु चतुर्विंशतिग्रन्थेषु 'काव्यरत्नम्', 'अलंकारमुक्तावली', 'अलंकारप्रदीपः', 'रसचन्द्रिका', 'कवीन्द्रकर्णाभरम्', 'लक्ष्मीविलासकाव्यम्', 'व्यङ्ग्यार्थकौमुदी', 'होलिकाशतकम्', 'ऋतुवर्णनञ्'चेति समुल्लेखार्हाः।

'परमलकारकौस्तुभः' अस्य अत्यन्तप्रामाणिकग्रन्थः। ग्रन्थस्य विवेच्यविषयाः नव्यन्यायपरिभाषया जगन्नाथवन्निबद्धाः। षट्षष्टिकारिकाभिः लक्षणानि स्पष्टीकृतानि विश्वेश्वरेण। रसस्य प्रतिपादनमलंकारादयश्चेति विषया प्रभविष्णुतया वर्ण्यन्ते। मम्मट-सम्मतान् एकषष्ठिसंख्यकान् अर्थालंकारान् पर्यालोचनात्मकशैल्या निरूपयन्नयं तदतिरिक्तानर्थालंकारान् खण्डितवान्।

'अलंकारमुक्तावल्ल्यां' सरलवचोभिः विश्वेश्वरः एकषष्टेरतिरिक्तान् अष्टौ रसवदाद्यलङ्कारान् निरूपितवान्। नायकनायिकादिभेदैः सह नवविधानां रसानां विश्लेषणं वर्तते 'रसचन्द्रिका'याम्।

१.५. नरसिंहकविः

'अभिनवकालिदासा'परनामधेयो नरसिंहकविः प्रतिभावान् प्रभाववांश्च विद्वान् योऽष्टादशशताब्द्याः पूर्वभागे जन्म लब्ध्वा नञ्जराजस्य सभापण्डितरूपेण यशोऽलभत।

असौ 'नञ्जराजयशोभूषण'मिति ग्रन्थं न्यबध्नादित्यसौ 'यशोभूषणकार' इत्येव सर्वत्रालंकारशास्त्रे विख्यातोऽभूत्। विद्यानाथकृतं प्रतापरुद्रयशोभूषणमाधारीकृत्य 'नञ्जराजयशोभूषणमि'[१०२]ति निरमान्नरसिंहः।

विलाससप्तकं वर्तते ग्रन्थस्यास्य। प्रथमे नायकस्वरूपं, द्वितीये काव्यविषयकानौचित्यं, तृतीये ध्वनिप्रकारं, चतुर्थे रसस्वरूपं, पञ्चमे दोषप्रसङ्गे अन्यालंकारिकाणां मतखण्डनं, षष्ठे नायकविषयकानौचित्यं, सप्तमेऽलंकाराणां सिद्धान्ताः प्रतिपादिताः। अत्रेदमुल्लेख्यं यत् षष्ठविलासे सम्पूर्णनाटकस्यैकस्य समावेशः कृतः। जगन्नाथस्य 'निर्माय नूतनमुदाहरणानुरूपमिति' उक्त्या प्रभावितः सन् नरसिंहः स्वरचितान्युदाहरणानि प्रस्तुतीकृतवान् स्वकेऽलंकारग्रन्थे।

१.६. आशाधरभट्टः

रामजीभट्टस्य पुत्रत्वेन तथा च धरणीधरस्य शिष्यरूपेण प्रख्यात आशाधरभट्ट आनुमानिके १६५० ईशवीयाब्दे जन्म लेभे। अयञ्चासीद् व्याकरण-न्याय-मीमांसा-काव्यशास्त्रेषु पिता रामजीभट्ट इव प्रवीणः। आलंकारिक आशाधरभट्टः कृतिपञ्चकम् अलिखत् – १. कोविदानन्दः २. त्रिवेणिका ३. अलंकारदीपिका ४. प्रभापटलम् ५. अद्वैतविवेकश्चेति। अयं ग्रन्थरचनायां वस्तुवर्णनशैलीम् अलंकारविधानञ्च अवश्यमेव अप्पय्यदीक्षिताज्जग्राह। 'कोविदानन्दः'[१०३] हि सर्वापेक्षया तस्य महत्त्वपूर्णग्रन्थः। अत्राभिधा-लक्षणा-व्यञ्जनासु शब्दशक्तिषु सारगर्भं पर्यालोचनं विहितम्। कारिकया निबद्धस्यास्य ग्रन्थस्योपरि 'कादम्बरी'ति स्वरचितटीका रचितानेन।

'त्रिवेणिका'[१०४] कोविदानन्दस्य संक्षिप्तरूपमात्रम् 'विस्तारस्तु कोविदानन्दे द्रष्टव्यः' इत्युक्तेः। वेणीशब्दस्य केशपाशादिरूपेष्वर्थेषु सत्स्वपि प्रवाहात्मकोऽर्थः प्रयुक्तस्तेन। यथा गङ्गा-यमुना-सरस्वतीनां समवायः त्रिवेणीत्युच्यते तथैव वृत्तित्रयस्य समन्वयाद् ग्रन्थस्याभिधानमिदम् –

[१०२] Edt. E. Krishnamacharya, Oriental Institute, Baroda, 1930.

[१०३] Edt. Aufrecht, ii. 25a.

[१०४] Saraswati Bhavan Series, Benaras, 1925 (द्रष्टव्यम् – P.V. Kane, History of Sanskrit Poetics, p.– 416).

"शक्तिं भजन्ति सरला लक्षणं चतुरा जनाः।
व्यञ्जनां मर्ममर्मज्ञाः कवयः कामनाजनाः॥"[१०५] इति।

तन्मते अभिधावृत्तिः लक्ष्यव्यङ्गयोः प्रतीतेराश्रयभूता। लक्षणा मुख्यार्थ-बाधाद्विलम्बप्रतीतये मलिना जाता। गद्येन विरचितायामस्यां त्रिवेणिकायां प्रसिद्ध-प्राचीनोदाहरणैर्विश्लेषणं दृश्यते। यद्यप्पय्यदीक्षित-आशाधरयोर्ग्रन्थद्वयं पर्यालोच्यते तर्हि रचनादृष्ट्या कुवलयानन्दस्य प्रभावेणाशाधरः प्रभावित इत्यवबुध्यते।

'अलंकारदीपिका'यां[१०६] त्रीणि प्रकरणानि सन्ति। कुवलयानन्दस्य कारिकाभागस्य टीकालंकारदीपिकायां निवेशिताशाधरेण, परं न वृत्तिभागस्य। किन्तु ग्रन्थान्ते एकविंशतिः कारिकाः संयोजिताः।

१.७. वेणीदत्तशर्मा

अष्टादशशताब्द्या उत्तरार्धे वत्सगोत्रीयस्तीरभुक्तिप्रदेशजो वेणीदत्तशर्मा 'रसकौस्तुभम्', 'अलंकारमञ्जरी' चेति काव्यशास्त्रविषयकग्रन्थद्वितयमरचयत्।

रसकौस्तुभे नवविधानां रसानां तथा च विशेषेण शृङ्गाररससम्बन्धिनायक-नायिकादिभेदविषये मनो दत्तं वेणीदत्तेन। संक्षेपेणात्र मानभङ्गोपाय-कामदशागतविभाव-नायिकाभेद-सखी-दूतीभेद-नायकभेद-भाव-सात्त्विक-स्थायि-व्यभिचारि-अनुभाव-शृङ्गारातिरिक्तरसाष्टकानां निरूपणं विहितं ग्रन्थेऽस्मिन्। शास्त्रार्थशैलीं नानुसृत्य कारिकायाम् अभिमतलक्षणानि उपस्थाप्य लक्ष्याणि च निरूप्य अभीष्टश्रीकृष्णमाहात्म्य-विषयकैः उदाहरणैः उपस्थापितं लक्ष्यस्वरूपमालंकारिकेण वेणीदत्तेन। अयञ्च भानुदत्तेन प्रभावभावितः।

'अलंकारमञ्जर्यां' शब्दालंकारनिरूपणात्परम् ऊनषष्टिसंख्यकार्थालंकारा निरूपिता वर्तन्ते। समीक्षाशैली ग्रन्थेऽस्मिन् नानुसृताचार्येण। आदावेव कारिकायामलंकाराणां लक्षणान्युपस्थाप्योदाहरणैस्तत्परिष्कृतवान् वेणीदत्तः।

१.८. अच्युतरायशर्मा

जगन्नाथोत्तरवर्तिकाले विशिष्टस्थानं लभमानोऽच्युतरायशर्मा महाराष्ट्रस्य

[१०५] त्रिवेणिका, पृ. – २४, आ.स.का.शा., पृ. – १४९।

[१०६] तत्रैव (P.V. Kane, History of Sanskrit Poetics, p.– 426).

नासिके १८३१ ईशवीयात्पूर्वं जनिं लब्धवान्। अनेन विरचितेषु ग्रन्थेषु 'साहित्यसारः' काव्यशास्त्रविषयकः कश्चन प्रसिद्धो ग्रन्थः। ग्रन्थमुपरि शर्मणा 'सरसामोदा'ख्यटीका स्वोपज्ञा विरचिता। द्वादशाध्यायैर्ग्रथितः 'साहित्यसारः'। आचार्येण समुद्रमन्थनात् प्राप्तपदार्थानां नामानुसारमध्यायानां नामकरणं विहितम्। अध्यायानां विषया यथा –

क. धन्वन्तरिरत्नम् – मङ्गलाचरणं, काव्यभेदः साहित्यशास्त्रस्वरूपञ्च

ख. ऐरावतरत्नम् – शब्दार्थस्वरूपं शक्तित्रयञ्च

ग. इन्दिरारत्नम् – अर्थव्यञ्जकता

घ. दक्षिणावर्तकम्बुरत्नम् – ध्वनिभेदः, रसभेदः, व्यभिचारिभावलक्षणादिश्च।

ङ. अश्वरत्नम् – गौणादिव्यङ्ग्यभेदः

च. विषरत्नम् – काव्यदोषः

छ. गुणरत्नम् – काव्यगुणः

ज. कौस्तुभरत्नम् – अर्थालंकारः

झ. कामधेनुरत्नम् – अधमकाव्यभेदः शब्दालंकारश्च

ञ. रम्भारत्नम् – नायिकाभेदः

ट. चन्द्ररत्नम् – नायकनिरूपणं तद्भेदश्च

ठ. अमृतरत्नम् – उपसंहारः

साहित्यसारे स्वरचिताः १३१३ कारिका निबद्धा विलसन्ति। तत्र प्राचीनमतानां निरूपणपुरःसरं केषुचित् स्थलेषु नवीनमतानि समीक्ष्य समुपस्थापितानि वर्तन्ते। अत्रेदमुल्लेख्यं यल्लक्ष्यरूपाण्युदाहरणानि प्रायेणाद्वैतपरकानि।

१.९. श्रीकृष्णकविः

सप्तदशशताब्द्या उत्तरार्धः श्रीकृष्णकवेः समयकाल इति विदुषां मतम्। तेन काव्यविषयकग्रन्थचतुष्टयं लिखितम्। ते च यथा – १. मन्दारमरन्दचम्पूः[१०७] २. काव्यलक्षणम् ३. रसप्रकाशः ४. सारस्वतालंकारसूत्रं भाष्यञ्चेति। रसप्रकाशः खलु काव्यप्रकाशस्य टीकेति। मन्दारमरन्दचम्पूरिति ग्रन्थेऽस्मिन् काव्यशास्त्रविषयकलक्षणानि गद्यपद्याभ्यां निबद्धानीति कृत्वा चम्पूरिति नामधेयम्। न केवलमत्र काव्यशास्त्राणामपि,

[१०७]निर्णयसागरतः १८९५ ईशवीयाब्दे प्रकाशितम्।

छन्दो-नाट्यशास्त्र-कविशिक्षादीनां पर्यालोचनं विद्यते। ग्रन्थोऽयम् एकादशबिन्दुभिः विभक्तः – १. वृत्तबिन्दुः (छन्दः) २. सारबिन्दुः (नायकवर्णनम्) ३. श्लिष्टबिन्दुः (श्लेषः) ४. चित्रबिन्दुः (यमकचित्रम्) ५. बन्धबिन्दुः (बन्धः) ६. गुप्तबिन्दुः (क्रिया-कर्म-कर्तृसम्बन्धगोपनम्) ७. नर्तनबिन्दुः (नाट्यशास्त्रम्) ८. शुद्धबिन्दुः (नायक-नायिका-वृत्तिलक्षणम्) ९. रम्यबिन्दुः (भाव-रसौ) १०. व्यङ्ग्यबिन्दुः (अलंकार-ध्वनी) ११. शेषबिन्दुश्चेति (छन्दो-दोष-गुण-शब्दार्थ-पाक-काव्य-वर्ण्यावर्ण्यपदार्थप्रकरणम्)।

२.१०. हरिदाससिद्धान्तवागीशः

गङ्गाधरविद्यालङ्कार-विधुमुखीदेव्योः सुयोग्यपुत्रोऽयं हरिदासः जीवानन्द-विद्यासागरस्य शिष्यत्वेन प्रसिद्धिं गतः काव्यकौमुदी[१०८]ति अलंकारशास्त्रविषयकं ग्रन्थं लिखितवान्। एतं व्यतिरिच्य नैकाश्च टीका अनेन रचिताः। तेषु साहित्यदर्पणग्रन्थमुपरि 'कुसुमप्रतिमा', नैषधटीका, 'चञ्चलाख्या' मेघदुतटीका, शिशुपालवधटीका, दशकुमारचरितटीका, रघुवंशटीका, किरातार्जुनीयटीका चेत्यन्यतमाः।

काव्यकौमुदीति ग्रन्थस्य रचनानेन कृता वर्तते १८४२ शकाब्दे। तदुक्तं तैः –

"पक्षाब्धिनागेन्दुमिते शकाब्दके सौराश्विने तेन चतुर्दशे दिने।
विनिर्मिता श्रीहरिदासशर्मणा समाप्तिमाप्ता किल काव्यकौमुदी॥"

लक्षणसूत्राभ्यां ग्रथितो ग्रन्थोऽयं पञ्चदशकलासम्पूर्णः। ग्रन्थेऽस्मिन् प्रायः सर्वाणि काव्यशास्त्रीयतत्त्वानि व्याख्यातानि सन्ति। तत्र प्रथमे काव्यप्रयोजनं, स्वरूपञ्च, द्वितीये दृश्यकाव्यं, तृतीये श्रव्यकाव्यम्, चतुर्थे ध्वनिः, पञ्चमे गुणीभूतव्यङ्ग्यं, षष्ठे शक्तित्रयं, सप्तमे रसः, अष्टमे नायकादिः, नवमे नायिकादिः, दशमे दोषः, एकादशे गुणः, द्वादशे रीतिः, त्रयोदशे शब्दालंकारः, चतुर्दशे चित्राद्यलंकारः, पञ्चदशे अर्थालंकारश्चेति वर्णिताः सन्ति। ग्रन्थस्यास्य लक्ष्यरूपान्युदाहरणानि स्वरचितानि तथा च माघादिग्रन्थेभ्यो निबद्धानि। ग्रन्थे पूर्ववर्तिकाव्यशास्त्रीयग्रन्थानां सरस्वतीकण्ठाभरण-काव्यप्रकाश-साहित्यदर्पणानामपि समुल्लेखः समस्ति।

१.११. रेवाप्रसादद्विवेदी

मध्यप्रदेशस्य सीहौरजिल्लान्तःपातिनि नादनेरग्रामे १९३५ ईशवीये वर्षे पूते

[१०८]काव्यकौमुदी – (सम्पा०) वासवचन्द्रभट्टाचार्यः, कलिकाता, १९५५।

ब्राह्मणवंशे ज्योतिषाचार्यस्य पुत्रत्वेन रेवाप्रसादद्विवेदी जनिमलभत। महाकाव्यत्रयं, खण्डकाव्यसप्तदशतयम्, अलंकारशास्त्रविषयकं ग्रन्थचतुष्टयञ्च विरचितवान् आचार्योऽयम्। काव्यशास्त्रविषयकग्रन्थास्तावत् – १. काव्यालंकारकारिका[१०९] २. साहित्यशारीरकम्[११०] ३. नाट्यानुशासनम्[१११] ४. अलं ब्रह्म। काव्यालंकारकारिकायां काव्यशास्त्रीयतत्त्वानां नवीनरीत्या व्याख्यानं विहितमनेनालंकारिकेण। तथाहि अभिनव-काव्यशास्त्रमित्युपशीर्षकं वर्तते ग्रन्थस्यास्य। प्रत्ययवादिदृष्टिभङ्ग्या (Idealistic) रेवाप्रसादद्विवेदिना स्वकाव्यदर्शनं पर्यालोचितम्। काव्यदर्शनमिदं न हि प्रमातृमूलकं, परं प्रमेयमूलकम्। ध्वनिमार्गस्य परमाचार्याणां तत्त्वानि तेनाकाट्ययुक्तिपुरःसरं खण्डितानि। २६१संख्यककारिका विलसन्ति संस्कृताङ्गलभाषाभ्यां विरचितटीकोपेताः। चौखाम्बासुरभारतीप्रकाशनालयतः १९७७ ईशवीये वर्षे प्रकाशपदवीं गतो ग्रन्थोऽयम्।

अलंकारवादी रेवाप्रसादद्विवेदी काव्यात्मत्वेनालंकारं स्वीकृतवान्। रसादिप्रस्थानषट्कमलंकारवादानुसारं समीक्षितमनेन। तत्र रस-रीत्यौचित्यानां ध्वनावन्तर्भावोऽङ्गीकृतः। किञ्च, वक्रोक्तेरलंकारत्वमुरीचकार द्विवेदी। तन्नये ध्वनिरप्यलंकारप्रस्थानेऽन्तर्भवेत्। अतः अलंकारः काव्यात्मा। तदुदितम् –

"अस्मन्मते त्वलंकारः काव्यस्याङ्गस्य वीक्षणे।
ध्वनिं सोमं यथा वह्निः कवलीकृत्य राजते"॥ इति।

१.१२. अभिराजराजेन्द्रमिश्रः

दुर्गाप्रसादाभिराजीदेव्योः सुपुत्रोऽयं १९४३ ईशवीयाब्दे जनवरीमासस्य द्वितीये दिनाङ्के उत्तरप्रदेशस्य जौनपुरजनपदमलञ्चकार स्वजन्मना। साहित्यरचनायां तथा च शोधसर्जने राजेन्द्रमिश्रः अद्वितीय इत्यत्र नास्ति संशयः। अर्वाचीनसंस्कृतजगद् अस्य महाकाव्यद्वयेन, खण्डकाव्यपञ्चदशकेन, नवगीतसंग्रहचतुष्टयेन, गजलसंग्रहचतुष्टयेन, बालकृतिद्वितयेन, नाटकचतुष्टयेन, एकाङ्की-संग्रहनवकेन, कथासंग्रहादिभिः सुसमृद्धम्।

न हि मौलिककाव्यरचनायामपि च काव्यशास्त्रग्रथनविधौ स्वभावयितृप्रतिभायाः

[१०९]काव्यालंकारकारिका – कालिदाससंस्थानम्, वाराणसी, २००१।
[११०]साहित्यशारीरकम् – तत्रैव, वाराणसी, २००८ (द्वितीयं संस्करणम्)।
[१११]नाट्यानुशासनम् – तत्रैव, वाराणसी, २००५।

परिचयं प्रादादयम्। 'अभिराजयशोभूषण'मि[११२]ति महनीयकाव्यशास्त्रीयकृतिरस्य। पारम्परिकपद्धत्या लिखित्वापि काव्यशास्त्रीयतत्त्वानां साङ्गोपाङ्गं विवेचनं कृतमनेन। ग्रन्थेऽस्मिन् गद्यात्मकवृत्त्या ५६८कारिका विलसन्त्यत्र। ग्रन्थकृता प्रायेण स्वरचितान्युदाहरणानि केषुचित् स्थलेषु चापि विंशशताब्द्याः समसामयिककवीनां काव्येभ्यो दृष्टान्ताः समाकलिताः। ग्रन्थस्यास्य मङ्गलाचरणे भरतमुनितो रेवाप्रसादद्विवेदीं यावत् सर्वेषामाचार्याणां नम्रशिरसा संस्मरणं विहितम्।[११३] २००७ ईशवीये वर्षे एलाहवादस्य वैजयन्तप्रकाशनात्प्रकाशपदवीं गतो ग्रन्थोऽयम्।

अभिराजयशोभूषणमिति पञ्चभिरध्यायैर्विभक्तम् –

१. काव्यपरिचयोन्मेषः – काव्यप्रशंसा-लक्षण-हेतु-प्रयोजनानि पर्यालोचितानि विद्यन्ते। काव्यविभाजनमिदं सहृदयहृदयानां पाठकानां दृक्कोणतः कृतमास्ते। तन्मते सहृदयास्वाद्यम्, कोविदास्वाद्यम्, लोकास्वाद्यमिति काव्यस्य भेदत्रियतं भवितुमर्हति, न तु उत्तममध्यमाधमभेदेन विभागः सरस्वत्या अधमत्वस्य अनौचित्यात्।

२. शरीरतत्त्वोन्मेषः – शब्दशक्ति-वृत्ति-रीति-गुणालंकाराश्चालोचिताः।

३. आत्मतत्त्वोन्मेषः – काव्यात्मतत्त्वत्वेन रसस्य स्थापनं विहितम्।

४. निर्मितितत्त्वोन्मेषः – गद्य-पद्य-मिश्रभेदात् पद्यबन्धाः दृश्य-श्रव्यकाव्ये चालोचितानि। प्राचीनकाव्यभेदानां नवीनकाव्येषु प्रयोगो दर्शितोऽनेन।

५. प्रकीर्णतत्त्वोन्मषः – गीतकाव्य-गलज्जलिका-छन्दोमुक्तादिरचनानां लक्षण-उदाहरणानि प्रस्तुतीकृतानीहाध्याये।

१.१३. राधावल्लभत्रिपाठी

राधावल्लभत्रिपाठी साम्प्रतिककालस्य संस्कृतनभस्यर्जुन इव राराज्यते। स फेब्रुयारीमासस्य पञ्चदशे दिने १९४९ईशवीयाब्दे मध्यप्रदेशेषु राजगडजनपदे जनिं अलभत। संस्कृतहिन्द्याङ्गलभाषासु नवोत्तरशतं ग्रन्था अस्य प्रकाशिताः येषु काव्यशास्त्र-नाट्शास्त्र-संस्कृतकाव्यादिविषयानधिकृत्य विमर्शपूर्वं विरचिताः केचन

[११२]अभिराजयशोभूषणम् – वैजयन्तप्रकाशनम्, इलाहबादः, २००६ (प्रथमं संस्करणम्)।
[११३]"सञ्चिनोति यथा भृङ्गः पुष्पात् पुष्पाद्रसासवम्।
करोमि संग्रहं तद्वद् यावद् भरतकाश्यपम्॥" इति (अभिराजयशोभूषणम्)।

प्रबन्धाः कथासंग्रहत्रयी, उपन्यासाः पञ्च संस्कृतकाव्यसङ्कलनानि च परिगण्यन्ते।

कृत्स्नेऽपि ग्रन्थे नवनवोन्मेषनिदर्शकान् स्वाभिमतनूत्नराद्धान्तान् प्रतिपाद्य 'अभिनवकाव्यालंकारसूत्रं'[११४] व्यरचयदयमाचार्यः। तत्रैव स्वोपज्ञव्याख्यया सूत्रात्मको ग्रन्थः संवलितः। ग्रन्थेऽस्मिन् त्रीण्यधिकरणानि सन्ति। तत्र काव्यस्वरूपनिरूपणनामके प्रथमाधिकरणे षडध्यायाः, अलंकारविमर्शात्मके द्वितीये च षडध्यायाः, काव्यविशेष-विमर्शात्मके तृतीयेऽधिकरण एकोऽध्यायो विलसन्ति।

आचार्यस्यास्य विशेषत्वमत्रैव यदद्यतनसमाजपरिप्रेक्षे काव्यभेदो निरूपितस्तेन। तथाहि प्राचीनाचार्यैर्व्यपदिष्टं श्रव्यं पाठ्यनाम्ना व्यपदिशति त्रिपाठी। तन्नये यस्मिन् काले कवयः सदसि स्वकाव्यं पाठं पाठं श्रावयन्ति स्म, सहृदयहृदयाः श्रावं श्रावं काव्यार्थं विभावयन्ति स्म , तस्मिन् काले श्रव्यकाव्यमिति नामान्वर्थमासीत्। परं साम्प्रतं साहित्यस्य श्रवणं न तथा प्रचलितं, यथा मुद्रितैः पुस्तकैस्तस्य पाठः। अतः पाठ्यमिति संज्ञैवोचिता। विषयमूला महाकाव्योपन्यासाद्या विधा गजलगीतिश्चेत्याद्या विषयिप्रधानाः गद्यभेदेषु निबन्धालोचना-कथोपन्यास-संस्मरणजीवनचरित्रात्मककथा-रेखाचित्र-यात्रावृत्तान्त-दैनन्दिनीवार्तासाक्षात्कारादयो भेदा निरूपिताः परिभाषिताश्चाभिनवपरिपाट्या।

यथा मम्मटाचार्याणां काव्यलक्षणानि परिशील्य 'लोकानुकीर्तनं काव्यमिति' काव्यलक्षणं पुरस्करोति पुनः पुनः व्याख्याति च। एवं 'मुक्तिस्तस्य प्रयोजनमिति' नूतनं काव्यप्रयोजनं प्रस्तौति। पुनश्च 'जागरिता प्रतिभा तस्य कारणमिति' काव्यहेतुं प्रतिपादयति। ततः 'अलंकारः काव्यजीवनमिति' प्रतिपाद्य अलंकारवादिभिरलंकारतयैवाभिमतेषु गुणरीतिरसादिष्वलंकारपदमलंङ्करोतीति अलंकारः, अलंकृतिश्चालंकार इति निर्वचनं विधीयते। साम्प्रतिकरचनाधारां दर्शं दर्शं काव्येन सह नूतनाङ्गिकेन कविभेदनिरूपणम् अकारि राधावल्लभत्रिपाठिना। तथाहि अभिनवकाव्यालङ्कारसूत्रवृत्तावुक्तं – "चतुर्विधकाव्यानुसारी चातुर्विध्यमुक्तं कवीनाम्– उत्तमोत्तमं कवयन् सिद्धः, उत्तमं कवयन् साधकः, मध्यमं कवयन्नाभ्यासिकोऽवरञ्च

[११४]अभिनवकाव्यालंकारसूत्रं – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००५।

कुर्वाणो घटकः। भवति चैषां चतुर्विधानां कवीनां तासु तासु विधासु रचनाभिनिवेशः।"[११५]

इत्थं प्राच्यप्रतीच्यकाव्यशास्त्राणां क्षोरोदधिं निर्मथ्य नवीनसिद्धान्तावलीम् अस्मत्सविधे समुपायनीकरोति राधावल्लभत्रिपाठी। तदुक्तं तेन स्वयमेव –

"प्राच्यपाश्चात्त्यसाहित्यशास्त्राणां क्षीरसागरम्।
निःसारितं विनिर्मथ्य नवसिद्धान्तमौक्तिकम्॥
राधावल्लभ-इत्याख्येयो विदुषां स वशंवदः।
काव्यालंकारसूत्रं सोऽभिनवं व्यदधादिदम्॥
कारिकाभिः परिकरैः श्लोकैर्वृत्त्या तथान्वितम्।
नवीनैर्लक्षणयुक्तं नवोन्मेषनिदर्शकम्॥
प्राचीनानां नवीनां कवीनां समुदाहृतैः।
पद्यैः सुललितैर्जुष्टं नव्यकाव्यं परामृशत्॥
भूयादिदं सरस्वत्याः कण्ठहारश्चिरं पुनः।
काव्यतत्त्वविदां चापि हृदयाणि परामृशेत्॥[११६] इति।

२. अप्रसिद्धा अल्पप्रसिद्धाश्चाचार्याः

२.१. नरहरिः

नरहरिणा 'नवरसमञ्जरी'ति उल्लासषटकेन पूरितोऽलंकारशास्त्रीयग्रन्थो विरचितः। ग्रन्थेऽस्मिन् प्रत्युल्लासं विषयाः तावत् – १. गुरुप्रशंसा २. नायकभेदः ३. नायिकाभेदः ४. नायिकोपभेदः ५. रसः ६. भावः। प्राचीनाचार्येभ्यो लक्षणानि आकलितान्यप्युदाहरणप्रदानावसरे मौलिकत्वं प्रदर्शितं नरहरिणा।

२.२. कृष्णदीक्षितः

आचार्यस्यास्यालंकारशास्त्रविषयकं ग्रन्थद्वितयं वर्तते – 'रघुनाथभूपालीयः' 'अलंकारमुक्तावली'[११७] चेति। कृष्णदीक्षितः प्रथमे ग्रन्थे स्वाश्रयदातू रघुनाथस्य

[११५]अभि.सूत्र., पृ. – २६।

[११६]काव्यालङ्कारसूत्रम् (अन्तिमकारिका)।

[११७]अलंकारमुक्तावली – चौखम्बा संस्कृत सिरिज्, वाराणसी (परं कृष्णाचार्यनाम्ना अपरः कश्चनालंकारिको बभूव, यः 'अलंकार-मुक्तावल्या' रचयिता। ग्रन्थोऽयं सत्यध्यानविद्यापीठात् प्रकाशितः)।

प्रशंसापरकान्युदाहरणानि प्रदत्तवान्। रघुनाथः सप्तदशशताब्द्या नृपतिरासीदिति कृत्वालंकारिकोऽयं सप्तदशशताब्दीकः। ग्रन्थेऽस्मिन् काव्यशास्त्रस्य सर्वाणि तत्त्वानि व्याख्यातानि। अष्टविलासैः विभाजितो ग्रन्थोऽयम्। तत्र क्रमेण नायकगुणः, काव्यस्वरूपम्, संलक्ष्यक्रमव्यङ्ग्यः, असंलक्ष्यक्रमव्यङ्ग्यः, गुणीभूतव्यङ्ग्यः, शब्दालंकारः, अर्थालंकारः, गुणविवेचनञ्चेति विषया परिवेशिताः। द्वितीये ग्रन्थे केवलमलंकाराणां विषये सारगर्भं पर्यालोचनमास्ते। कृष्णकविनाम्नायं जगति प्रख्यातः।

२.३. मौनीकृष्णभट्टः

मौनीकृष्णभट्टस्य अलंकारग्रन्थो हि 'वृत्तिदीपिके'ति। ग्रन्थस्य परिशेषे तेन स्वयम् एवोदितम् – "इति श्रीमौनीतिलकायमानगोवनभट्टात्मजरघुनाथभट्टसुत-श्रीकृष्णभट्ट-विरचिता वृत्तिदीपिका समाप्तिमगमत्" इति। एतेन कृष्णभट्टस्य वंशपरिचयादिकं स्फुटं काशते स्म। वृत्तिदीपिकायामप्पयदीक्षितकृतवृत्तिवार्तिकस्य केषाञ्चिद्विषयानां पर्यालोचनं प्रस्तौति आलंकारिकोऽयम्। परं तेन पण्डितराजस्य नाममात्रस्य अप्युल्लेखो न कृतो वर्तते। अतः प्रतीयते यज्जगन्नाथो ह्यस्य समसामयिकः। ग्रन्थेऽस्मिन् शब्दवृत्त्यतिरिक्तवैयाकरणाभिमतकृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपात्मकवृत्ति-पञ्चतयं विचारितम्। गद्येन रचिते इह ग्रन्थे प्रसङ्गवशात्स्फोटादिविचारो निहितः।

२.४. हरिप्रसादमाथुरः

आचार्येण काव्यशास्त्रविषयकं ग्रन्थद्वितयं व्यरचि। ग्रन्थौ तावत् 'काव्यार्थगुम्फः' 'काव्यालोक'श्चे[११८]ति। प्रथमग्रन्थस्य रचनाकालः १७७५ ईशवीयाब्दः। सप्तप्रकाशैर्विभक्तः काव्यालोकः १७२८ ईशवीये वत्सरे लिखितोऽवर्तत। 'काव्यार्थगुम्फः' केनाप्यध्यायेन न विभक्तः। ग्रन्थद्वितयस्य विषयाः प्रायेण तुल्या वर्तन्ते। काव्यालोकस्य प्रतिप्रकाशं विषयास्तावत् काव्यलक्षणम्, ध्वनिनिरूपणम्, रसविकाशः, दोषविवेचनम्, गुणनिरूपणम्, शब्दालंकारविवेचनम्, अर्थालंकारनिरूपणञ्चेति। कारिकाकारेण सूत्रवृत्त्युदाहरणैः प्रपूरितोऽयं ग्रन्थः।

[११८]आ.स.का.शा. पृ. – ४७।

२.५. बलदेवविद्याभूषणः

अष्टादशशताब्दीकोऽयं वङ्गदेशीयः परमवैष्णवो ब्राह्मणकुलोद्भवः 'काव्यकौस्तुभम्', 'साहित्यकौमुदी'[११९] चेति ग्रन्थद्वितयं विरचितवान्। नवविभाभिः विरचिते 'काव्यकौस्तुभे' ग्रन्थे काव्यफल-शब्दार्थवृत्ति-रस-गुण-रीति-दोष-ध्वनिभेद-मध्यमकाव्यशब्दार्था-लंकारादिविषया पर्यालोचिता विलसन्ति। परं 'साहित्यकौमुदी' खलु काव्यप्रकाशस्य टीकेति। अत्र काव्यप्रकाशस्य कारिकाभागस्य व्याख्या कृता वर्तते। अस्य ग्रन्थस्य उल्लेख्यं वस्तु तावदत्र मम्मटस्य कारिका भरतसूत्रमिति नाम्ना व्यपदिष्टा। साहित्यकौमुदीमुपरि आचार्येण स्वयमेव कृष्णानन्दिनीति टिप्पणी रचिता। अस्यां टिप्पण्यां काव्यप्रकाश इव शब्दार्थालंकारात्मिका एकादश अध्यायाः वर्तन्ते। अन्तिमे अध्याये भाषासमक-बिन्दु-च्युतक-विकल्प-अनुगुण-प्रहर्षण-पूर्वरूप-विचित्राद्यर्थालंकारा निरूपिता भवन्ति। अनेन स्वरचितेषूदाहरणेषु श्रीकृष्णस्य स्तुतिर्विहिता।[१२०]

२.६. चन्द्रकान्ततर्कालंकारः

महामहोपाध्यायः चन्द्रकान्ततर्कालंकारः अलंकारसूत्राणि[१२१] इति काव्यशास्त्र-विषयकं ग्रन्थं रचितवान्। 'अलङ्कारशास्त्रे प्रवेशमिच्छतां बालानां न द्रागित्येव प्रवेशयोग्यौ तौ प्रबन्धौ साहित्यदर्पण-काव्यप्रकाशौ। अतस्तेषां सौकर्याय मया निर्मितोऽयं प्रबन्धः।'[१२२] सूत्रवृत्तिरूपेऽस्मिन् ग्रन्थे काव्यस्वरूप-शब्दार्थ-रस-काव्यभेद-गुण-शब्दालङ्कार-अर्थालङ्कार-दोषाख्याः अष्टौ परिच्छेदाः विलसन्ति।

२.७. छज्जुरामशास्त्री विद्यासागरः

विंशशताब्दीयालंकारिकेषु छज्जुरामशास्त्री महत्त्वपूर्णस्थानं लभमानोऽभूत्। तेन बहूनि मौलिककाव्यानि शास्त्रीयग्रन्थाश्च रचितानि। न केवलं काव्यशास्त्रे, चापि व्याकरणन्यायादिषु तस्य व्युत्पत्तिरपारा।

[११९]Edt. Siva Dutta & K.P. Paraba, Kāvyamālā Series, 1897 A.D.

[१२०]कारुण्याद् गजपतिराशु यस्य भेजे निर्धूताखिलवृजिनः परं प्रमोदम्।
चैतन्याकृतिमजितं जितं स्वभक्तैस्तं वन्दे मधुरिमसागरं मुरारिम्॥ इति। (साहित्यकौमुदी, पृ. – ३)।

[१२१]अलंकारसूत्राणि – प्रकाशकः, उपेन्द्रनाथचक्रवर्ती, कलकाता, आर्मांह स्ट्रीट्।

[१२२]काव्यालङ्कारसूत्रम्, पृ. – १।

'साहित्यबिन्दु'रलंकारशास्त्रविषयकग्रन्थो विद्यासागरस्य। बिन्दुपञ्चकैर्ग्रथितो ग्रन्थोऽयञ्चतुर्धा विभक्तः – कारिका, वृत्तिः, उदाहरणञ्चोदाहरणविवरणमिति। कारिकावृत्तिविवरणानि विद्यासागरेण स्वयमेव विरचितानि परमुदाहरणेषु प्रायेण सर्वाणि ग्रन्थकृतः, कानिचिच्चान्येषां कविवराणाम्। परम् अत्र इदम् उल्लेखार्हं यद् दोषप्रकरणस्य सर्वाणि उदाहरणानि श्रीहर्षरचितनैषधचरिताद् उद्धृतानि तेन। प्राचीनसाहित्यग्रन्थेषु उपस्थापितान्यश्लीलोदाहरणानि नोल्लिख्य शिक्षाप्रदैरुदाहरणैः भारतीयसभ्यतासंस्कृत्योर्बोधः पाठकानां सविधे पुरस्कृतः। प्रथमबिन्दौ काव्यलक्षण-फल-कारण-भेदाः, द्वितीयायां शब्दार्थयोः त्रैविध्यत्वं रसश्च, तृतीयायां दोषप्रकरणम्, चतुर्थबिन्दौ रीति-गुणौ, पञ्चमबिन्दौ अलंकारप्रकरणञ्च वर्णिताः।

२.८. ब्रह्मानन्दशर्मा

पाञ्जाबवास्तव्योऽयम् आलंकारिको मौलिककाव्यशास्त्रीयग्रन्थत्वेन 'काव्य-सत्यालोकं' रचितवान्। काव्यशास्त्रीयषड् ग्रन्थास्तेन विरचिताः – 'तत्त्वशतकम्', 'वस्त्वलंकारदर्शनम्', 'अभिनवरसमीमांसा', 'रसालोचन'ञ्चेति। 'Re-assessment of Rasa theory' इति शीर्षकोपेतं शोधनिबन्धं विरचय्य राजस्थान-विश्वविद्यालयतः प्रकाशितवान्। काव्यसत्यालोकाख्ये ग्रन्थ उद्योतपञ्चकं वर्तते। प्रथमे उद्योते सत्यनिरूपणम्, द्वितीये धर्मसूत्रताधानम्, तृतीये व्यापारयोगः, चतुर्थे भावयोगः, पञ्चमे काव्यलक्षणादिविवेचनम् आलोचितानि वर्तन्ते। संस्कृतकाव्यशास्त्रे जगन्नाथात्परं नूत्नैका सरणिस्तेन प्रस्तुता।

२.९. रहसबिहारीद्विवेदी

आचार्यश्री-सारस्वतसम्मानादिभिः सभाजितो रहसबिहारीद्विवेदी 'साहित्यविमर्श' इति ग्रन्थे काव्यशास्त्रीयतत्त्वानि विवेचितवान्। तस्य काव्यशास्त्रीयपर्यालोचनम् आधुनिकसंस्कृतकाव्यानां दृक्कोणतो भवति। तन्मते ये खलु इदानीन्तनीयाः काव्यज्ञाः मम्मटविश्वनाथाद्याचार्यानुसारं काव्यशास्त्राणि प्रीणयन्ति, ते न ह्यर्वाचीना भवितुम् अर्हन्ति। प्रतिकवि काव्यरचनापरिभाषा भिद्यते। अपि च, काव्यशास्त्रनिगडेन प्रत्येकं कवितानां निगडनं न ह्युचितम्। एतेन रसस्य उपलब्धिः न जायते। परं वाल्मीकि-कालिदास-भारवि-माघ-श्रीहर्ष-भवभूति-राजशेखरादीनां प्रभावेन

भावितः सन् काव्यविरचनं साम्प्रतम्। आधुनिककाव्यशैल्यां राग-विमान-दूत-लहरी-उपन्यास-बिम्बविधान-प्रतीक-नभोनाट्यादिकाव्यविधानाम् अन्तर्भूक्तिः कृता वर्तते।

२.१०. सीतानाथ-आचार्यशास्त्री

वङ्गप्रदेशस्य कश्चन प्रौढः काव्यतात्त्विकश्चालङ्कारिक इति कृत्वा तस्य प्रत्येकं धमण्यां सततं प्रवहति लोहितशोणितात्मककाव्यतत्त्वम्। तथाहि काव्यवैशिष्ट्यानि स्वत एव तद्धमणितो निर्गत्य सरलमनोभङ्ग्या 'कविते विश्ववन्दिते' इति मौलिककाव्यग्रन्थे रोचिष्णुतया पदं कुर्वन्ति। अत्र 'कविते'ति पदं काव्यपरम्। कवितायाः प्रशंसापरकेयम्। परमत्र उल्लेख्यं यत् कविना अलङ्कारग्रन्थविरचनचिकीर्षया काव्यमिदं न व्यरचि।

कविता कविमानसोत्थतीव्रानुभूतेः विशेषे क्षणे स्वसत्तां लभते। विश्वजनीनमानसे तस्याः चिरन्तनी सगौरवा स्थितिः राजते। वयसातिप्रवीणापि नवीना सा सदैव पाठकानां मनो रञ्जयन्ती विराजते। तस्यामलंकार-रीति-रस-भाव-वक्रोक्त्यौचित्यानां स्थितिर्विद्यते–

"प्रत्यङ्गमालिङ्ग्य विराजते ते
जन्मक्षणाद् विस्मयिता सखीव।
जगुप्सितञ्चेप्सितां प्रयाति
त्वदङ्गसङ्गं लभते यदीह"॥[१२३] इति।

देशस्य स्वाधीनतान्दोलने देशप्रेमिकान् प्रोत्साहयति कवितेयं – 'स्वतन्त्रतां देशगतां त आप्तुं / यच्छन्ति प्राणान् भवतीं स्मरन्तः॥' इति। ब्रह्मस्वरूपं यथा देवैरप्यज्ञातं तथैव मीमांसकानामनेकेषां प्राचीनकालादधुनापि प्रचेष्टा व्यर्थतां गता काव्यस्वरूपविषयिनी। प्रतिक्षणं सचेतोभिः काङ्क्ष्यामाणापि सा सङ्गतौ प्राप्तिसीमानमतिक्रम्य सरहस्यमवतिष्ठते। कविता मानवेन मानवान्तरस्य, जात्या जात्यन्तरस्य, अतीतेन भविष्यतः, देशेन देशान्तरस्य, कविना सहृदयस्य, अरण्यप्रकृत्या मानवप्रकृतेर्मेलनं साधयति। सा चाद्वैतवादिनोऽपि द्वैतमार्गे प्रेरयति–

"द्वैताद्वैतमते भिन्नस्वरूपेऽभिन्नरूपता।

[१२३]कविते विश्ववन्दिते (श्लोकः– १०)।

कदाचिदेवमायाति कविते तव शक्तितः"॥[१२४] इति।

कवितायाः नाट्यरूपस्य रामकृष्णादौ, भजनगीतिरूपायाः, शाक्तपदावली-रूपायाः, वैष्णवस्तोत्रात्मिकाया, अरविन्दकविताया, रोगविमुक्तये च प्रभावो विद्योततेतमाम्। कवितेयं पुरुषार्थसाधिका, कलाप्रावीण्यदात्री, कान्तासम्मितोपदेशदात्री, नियतिकृतनियमरहित्री, प्रतिक्षणं नवायमाना च। किञ्च, सा नरचित्तमूर्द्धं नयति, मानवानामानन्दतृष्णामपि। पाठकानानन्दमयसत्तायां स्थापयति, पङ्कजवत्तुच्छाल्लब्ध-जन्मापि सौन्दर्यं वितनोति, सर्वेषु लोकेषु तथा सर्वभाषासु च विचरति सा। वैज्ञानिकसत्याद्भिन्नं तावत् काव्यसत्यम्– "वैज्ञानिकाद् वास्तविकात् प्रभिन्ने सत्यात्तथा दर्शनदृष्टिसम्भवात्"॥ इति।

कवितायाः छन्दोवैचित्र्येण कविचित्तं मोमुद्यते, सौन्दर्य्येण पृथ्वी सुन्दरी, संगीतेन मानवचित्तमेकतानीभवति, समुद्रे तरङ्गा जायन्ते। कवितेयं निष्प्राणादौ प्राणसञ्चारादिकं करोति। जगति कवितायाः स्वरूपविषये वास्तवता-कल्पनाप्रभव-कल्पना-कलाकैवल्यादिविविधानि मतानि प्रादुरभवन्–

"एवमन्यान्यनेकानि मतानि विषये तव।
कविते परिदृश्यन्ते दुर्विज्ञेया तथाप्यसि"॥[१२५] इति।

परिशेषे संस्कृतकाव्यधारायाः क्रमविकाशः कविना दशश्लोकैर्विन्यस्तः।

[१२४] कविते विश्ववन्दिते, श्लोकः ३२।
[१२५] तत्रैव, श्लोकः ८५।

दिग्दर्शनन्यायेन आधुनिकानामालंकारिकाणां ग्रन्थ-प्रकाशनालययोः सूची

आलङ्कारिकाणां नामानि	ग्रन्थानां नामानि
१) राजचूडामणिदीक्षितः	१. अलङ्कारचूडामणिः[१२६] २. काव्यदर्पणम्[१२७]
२) भूदेवशुक्लः	रसविलासः[१२८]
३) वेणीदत्तशर्मन्	१. रसकौस्तुभम्[१२९] २. अलङ्कारमञ्जरी[१३०]
४) अच्युतरायशर्मन्	साहित्यसारः[१३१]
५) श्रीकृष्णकविः	मन्दारमरन्दचम्पूः[१३२]
६) अभिराजराजेन्द्रमिश्रः	अभिराजयशोभूषणम्[१३३]
७) राधावल्लभत्रिपाठी	अभिनवकाव्यालङ्कारसूत्रम्[१३४]
८) जगन्नाथपाठकः	सौन्दर्यकारिका[१३५]
९) रहसविहारीद्विवेदी	साहित्यविमर्शः[१३६]
१०) शिबाजी उपाध्यायः	साहित्यसन्दर्भः[१३७]

[१२६] History of Sanskrit Poetics, P.V. Kane, p–. 403-404.
[१२७] आ.सं.का.शा. पृ. – ७-८।
[१२८] पुना ओरियण्टल बुक हाउस, प्रेमलालशर्मा (सम्पा०), १९५२। (द्रष्टव्यम् – History of Sanskrit Poetics, P.V. Kane, Pg. 482).
[१२९] श्रीलेखनाथशर्मा (सम्पा०)।
[१३०] बदरीनाथझा (सम्पा०), मिथिलासंस्कृतविद्यापीठम्, मिथिला।
[१३१] N.C.C., P.– 59 (निर्णयसागरः, बोम्बे, १९०६)।
[१३२] केदारनाथ-वासुदेवलक्षणपणशीकरौ (सम्पादकौ), काव्यमाला (५५)।
[१३३] वैजयन्तप्रकाशनम्, एलाहबादः, २००७।
[१३४] सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २००५।
[१३५] आ.सं.का.शा., पृ. – ८०-८१।
[१३६] तदेव।
[१३७] तदेव।

११) रेवाप्रसादद्विवेदी	१) काव्यालङ्कारकारिका[१३८] २) नाट्यानुशासनम् ३) साहित्यशारीरकम्[१३९] ४) अलं ब्रह्म
१२) ब्रह्मानन्दशर्मा	१. वस्त्वलङ्कारदर्शनम् २. अभिनवरसमीमांसा[१४०] ३. काव्यसत्यालोकः
१३) रामानन्दठक्कुरः	रसतरङ्गिणी[१४१] (७ तरङ्गाणि)
१४) मथुरानाथदीक्षितः	कवितारहस्यम्[१४२]
१५) सामराजदीक्षितः	१. शृङ्गारामृतलहरी[१४३] २. रतिकल्लोलिनी[१४४] (१७१९)
१६) कामराजदीक्षितः	१. काव्येन्दुप्रकाशः[१४५] २. रसनिर्णयः[१४६]
१७) रामानन्दपतित्रिपाठी	१. रसिकजीवनम्[१४७] (७ तरङ्गाणि) २. काव्यप्रकाशप्राकृतार्थः[१४८]

[१३८]चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, १९७७ (Reprinted, कालिदाससंस्थानम्, २००९)।
[१३९]आ.सं.का.शा., पृ. – ७५-७७।
[१४०]तदेव (पृ. – ७३-७४)।
[१४१]बदरीनाथशर्मा (सम्पा०), मिथिलासंस्कृतविद्यापीठः, १९६१।
[१४२]आधुनिक संस्कृत साहित्य, डा० हीरालालशुक्ल, पृ. – १५०।
[१४३]Kāvyamālā, (History of Sanskrit Poetics, P.V. Kane, P. – 441).
[१४४]तत्रैव।
[१४५]चौखम्बासंस्कृतग्रन्थमाला, बाबुलालशुक्लः (सम्पा०), नाट्यशास्त्रीयो ग्रन्थः।
[१४६]अलङ्कारशास्त्रीयः।
[१४७]करुणापतित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९७८।
[१४८]काव्यप्रकाशटीका।

१८) हरिप्रसादमाथुरः	१. काव्यार्थगुम्फः[१४९] २. काव्यालोकः
१९) श्रीनिवासदीक्षितः	१. अलङ्कारकौस्तुभः २. काव्यदर्पणम् ३. काव्यसारसंग्रहः ४. साहित्यसूक्ष्मसरणिः[१५०]
२०) चन्द्रकान्ततर्कालङ्कारः	अलङ्कारसूत्राणि[१५१]
२१) कान्तिचन्द्रमुखोपाध्यायः	काव्यदीपिका[१५२] (८ शिखा) (ऊनविंशशताब्दी)
२२) हरिदाससिद्धान्तवागीशः	काव्यकौमुदी[१५३]
२३) शिवदत्तशर्मा	काव्यरसायनम्[१५४] (१९०३)
२४) जगन्नाथप्रसादशर्मा	भावनिदर्शिका[१५५] (१९०४)
२५) नरसिंह आचार्यः	पाश्चात्यकाव्यसारः[१५६] (१९०८)
२६) मणिशङ्करशर्मा	अलङ्कारमणिमाला[१५७] (१९०९)
२७) कालीपदतर्काचार्यः	काव्यचिन्ता[१५८]
२८) रामावतारशर्मा	साहित्यरत्नावली[१५९](१९१९)

[१४९]आ.सं.का.शा., पृ. – ४७।
[१५०]तत्रैव, पृ. – ५५।
[१५१]संस्कृत साहित्य का समीक्षात्मक इतिहास, डा० कपिलदेवद्विवेदी, पृ. – १३।
[१५२]आ.सं.का.शा., पृ. – ६२।
[१५३]भवेशचन्द्रभट्टाचार्यः (सम्पा०) कलकाता १३१६ (वङ्गाब्दे)।
[१५४]आधुनिक संस्कृत साहित्य, डा० हीरालालशुक्ल, पृ. – १४९।
[१५५]तत्रैव, पृ. – १४९।
[१५६]तत्रैव, पृ. – १५०।
[१५७]तत्रैव, पृ. – १५०।
[१५८]तत्रैव, पृ. – १५० (संस्कृतसाहित्यपरिशत्पत्रिका, २०१२)।
[१५९]तत्रैव, पृ. – १५०।

२९) यदुनाथझा	व्यञ्जनावादः[१६०]
३०) रामावतारमिश्रः	१. रसचन्द्रिका २. व्यञ्जनावृत्तिविचारः[१६१]
३१) छज्जुरामशास्त्री विद्यासागरः	१. साहित्यबिन्दुः[१६२] २. रसगङ्गाधरखण्डनम्[१६३]
३२) रमाशङ्करतिबारी	काव्यतत्त्वविवेकः[१६४]
३३) कौत्स-अप्पल्ल-सोमेश्वरशर्मा	साहित्यविमर्शः[१६५] (१९४५-४६)
३४) वनेश्वरपाठकः	काव्यसिद्धान्तकौमुदी[१६६]
३५) रामप्रतापवेदालङ्कारः	चमत्कारविचारचर्चा[१६७]
३६) रहसविहारीद्विवेदी	साहित्यविमर्शः[१६८]
३७) हरिश्चन्द्रदीक्षितः	१. काव्यात्मनिर्णयः २. काव्यशास्त्रनिबन्धावली[१६९]
३८) चन्द्रमौलिद्विवेदी	रसवसुमूर्तिः[१७०](२००३)
३९) शोभा मिश्रा	तृतीयशब्दशक्तिविमर्शः[१७१] (२००३)
४०) स्वामी करपात्री जी	भक्तिरसार्णवः[१७२] (११ अनुच्छेदाः)

[१६०] Proceeding, I.S.C, Vol.-I, p-I, 1975, Pg. 132-133.
[१६१] (सम्पा०) शिवशङ्करपण्डितः, रुक्मिणी प्रकाशन, राँची।
[१६२] (सम्पा०) मेहरचन्द्रलछमनदासः, देहली, १९६१ (४ भागः)।
[१६३] Proceeding, I.S.C, Vol.I, part-I, 1975, P.– 403, 1975.
[१६४] भारतीयविद्याप्रकाशनम्, वाराणसी, १९९६।
[१६५] वेङ्कटेश्वर ओरियण्टल इन्स्टिटिउट्।
[१६६] बागला प्रेस्, राँची।
[१६७] विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशियारपुरम्, २००४।
[१६८] आ.सं.का.शा., पृ. – ७८-७९।
[१६९] संस्कृतकाव्यशास्त्र का आलोचनात्मक इतिहास, सम्पा० रेवाप्रसाद द्विवेदी, पृ. – ४३६-४३८।
[१७०] तत्रैव, पृ. – ४३७-४३८।
[१७१] तत्रैव, पृ. – ४३८।
[१७२] तत्रैव, पृ. – ४५०।

३. टीकाकृदाचार्यवर्गः

संस्कृतकाव्यशास्त्रजगति नैके टीकाकृतो राराज्यन्ते, ये खलु स्वस्वभावयितृ-प्रतिभया काव्यशास्त्राणि विश्लेषितवन्तस्तेषां नामग्राहमुल्लेखो विधीयते–

टीकाकाराणां नामानि	**टीकानां नामानि**
१. गदाधरचक्रवर्तिभट्टाचार्यः (वङ्गीयः)	काव्यप्रकाशटीका
२. शुभविजयगणिः	मकरन्दः (काव्यकल्पलताया वृत्त्याः कविशिक्षायाः टीका)
३. प्रेमचन्द्रतर्कवागीशः (वङ्गीयः)	क. नैषधचरितस्य टीका ख. शब्दकल्पसारः ग. काव्यादर्शटीका (मालिन्यप्रोञ्छनी)
४. नागेशभट्टः	क. गुरुमर्मप्रकाशः (रसगङ्गाधरटीका) ख. उद्योतः (काव्यप्रकाशटीका) ग. प्रदीपः (काव्यप्रकाशटीका)
	घ. अलंकारसुधा (कुवलयानन्दटीका) ङ. प्रकाशः (रसमञ्जरीटीका) च. रसतरङ्गिनी टीका
५. जीवानन्दविद्यासागरः (वङ्गीयः)	विमला (साहित्यदर्पणस्य टीका)
६. वामनभट्टझालकीकरः	काव्यप्रकाशस्य बालबोधिनी टीका
७. महेश्वरन्यायालंकारः (वङ्गीयः)	विज्ञप्रिया (साहित्यदर्पणस्य टीका)
८. गोपीनाथः (वङ्गीयः)	क. सुमनोमनोहरकाव्यप्रकाशटीका ख. साहित्यदर्पणटीका प्रभा ग. रघुवंशटीका
९. नरसिंहठक्कुरः	नरसिंहमनीषा (काव्यप्रकाशस्य टीका)
१०. आनन्दराजानकः	क. निदर्शना (काव्यप्रकाशस्य टीका) ख. शितिकण्ठविबोधनम्

११. राजानकरत्नकण्ठः	क. सारसमुच्चयः (काव्यप्रकाशटीका) ख. स्तुतिकुसुमाञ्जलिटीका ग. युधिष्ठिरविजयकाव्यटीका घ. हरिविजयकाव्यटीका
१२. अतिरात्रयज्वन्	क. चित्रमीमांसाया दोषाद्धारः ख. चित्रमीमांसादोषधिक्कारः
१३. सिद्धिचन्द्रगणिः	क. बृहती ख. काव्यप्रकाशखण्डनम्
१४. रामचरणतर्कवागीशः (वङ्गीयः)	क. साहित्यदर्पणस्य टीका विवृतिः ख. कुवलयानन्दटीका
१५. विश्वनाथचक्रवर्ती (वङ्गीयः)	क. आनन्दचन्द्रिका किरणो वेति (उज्ज्वलनीलमणिटीका) ख. सारबोधिनी (अलंकारकौस्तुभटीका)
१६. वृन्दावनचक्रवर्ती	अलङ्कारकौस्तुभटीका (दीधितिः)
१७. जगदीशतर्कपञ्चानन-भट्टाचार्यः (वङ्गीयः)	काव्यप्रकाशस्य टीका रहस्यप्रकाशः
१८. जयरामन्यायपञ्चाननः (वङ्गीयः)	काव्यप्रकाशस्य तिलकटीका
१९. महेशचन्द्रन्यायारत्नः (वङ्गीयः)	काव्यप्रकाशस्य टीका मृच्छकटिकप्रणेतृनिर्णयः

एतानतिरिच्य बहवः टीकाकारा वरीवर्तन्तेऽर्वाचीनकाव्यशास्त्रमालञ्चे, ये खलु अध्यायस्य व्यापकत्ववशान्नोल्लिख्यन्ते। अर्वाचीनसाहित्यशास्त्रक्षेत्रे तु तेषां टीकाकृतामवदानं सर्वदा संस्मरणीयमिति निश्चप्रचमभिधातुमलम्। भवन्तः शोधपाठकाः एवं न चिन्तयेयुः यत्तेषां नोल्लेखात्ते न विशिष्टटीकाकाराः उत नास्ति तेषां विशिष्टावदानं सौन्दर्यतत्त्वपरिसरे।

४. अज्ञातालंकारिकवर्गः

अद्यतने काले केचित् काव्यशास्त्रीयग्रन्थाः परिप्राप्यन्ते येषां कर्तृत्वविषये विदुषां विप्रतिपत्तिर्विद्यते। तद्यथा–

क). काव्यलक्षणविचारः[१७३]

ग्रन्थस्यास्य कर्ता क इति नोपलभ्यते। अत्र रसगङ्गाधर-चित्रमीमांसयोः ग्रन्थयोः नामोल्लेखाद् ग्रन्थस्य रचनाकालः सप्तदशशताब्दीत्यनुमीयते।

ख). अलंकारमञ्जरी[१७४]

काव्यनाट्यतत्त्वादिविषयपूरितो दशाध्यायैः ग्रथितश्च ग्रन्थोऽयम् अष्टादशशताब्दीकः। ग्रन्थेऽस्मिन् निबद्धानि उदाहरणानि काकर्लपूरिवंशजस्य रामचन्द्रस्य प्रशंसामूलकानि। ग्रन्थस्यास्य कर्ताज्ञातः। प्रतापरुद्रीयग्रन्थस्य अनुकरणात्मकोऽयं ग्रन्थः।

ग). रसकौमुदी[१७५]

रसकौमुदीति काव्यशास्त्रीयग्रन्थस्यापि कर्तुः समुल्लेखो न कुत्रापि प्राप्यते। समालोचकस्य पी.के.गोडपादस्य मतानुसारमष्टादशशताब्द्या उत्तरार्धे रचितोऽयं ग्रन्थः। परं 'Post-Jagannātha Alaṅkāra-śāstra' इत्यस्मिन् ग्रन्थे घासीरामपण्डितः रसमौमुद्यां रचयितेति उल्लिखितम्।

घ). अलंकारदर्पणः[१७६]

असम्पूर्णपाण्डुलिप्याकारेण सम्प्राप्तो ग्रन्थोऽलंकारशास्त्रीयो यत्रोपमालंकारतो विरोधाभासान्तं यावदलंकारसमीक्षा विद्यते। अपि चालंकारदर्पणस्य लेखकः क इति विवादधूमावृतोऽद्यापि।

---

[१७३] Madras Govt. Oriental Manuscript Library, P.– 8716, 1717, No– 12979-(5B-1-5).
[१७४] तत्रैव, MS, No – R. 2152.
[१७५] तत्रैव, No – D. 12921.
[१७६] Oriental Research Institute, Mysore, No. P. 4039 & B. 748.

ङ). अलंकारप्रकाशिका[१७७]

शब्दालंकाराणां संग्रहात्मकस्यास्य ग्रन्थस्य रचयिता क इत्यत्रापि विद्वांसो विवदन्ते। अष्टादशशताब्द्या अन्तिमभागे ऊनविंशशताब्द्याश्चादिमे पर्याये रचना जातास्य ग्रन्थस्य इति अनुमन्यते।

च). रसविवेकः[१७८]

न जानन्ति स्म केचित् कोऽस्यालंकारग्रन्थस्य कर्तेति। परं लेखकस्तद्गुरुभ्रात्र्योः नामोल्लिखितवान्। अध्यायत्रितयात्मको ग्रन्थोऽयम्। अध्याया यथा रसविवेकः, रसाधिकरणम्, रसभेदश्चेति।

छ). रसिकरसायनम्[१७९]

ग्रन्थस्यासम्पूर्णा पाण्डुलिपिः वर्तते। अध्यायद्वितयात्मके प्रथमे यथाक्रमं दशरूपकाणि काव्यञ्च वर्णितानि। नायिकादिप्रकरणमिति तृतीयाध्यायस्य नाम। दशरूपकप्रतापरुद्रीयाभ्यां ग्रन्थाभ्यां प्रभावभावितमिदं रसिकरसायनम्।

ज). लक्षणमालिका[१८०]

लक्ष्यलक्षणमालिकेति ग्रन्थस्यास्य नामान्तरम्। काव्यशास्त्रस्य प्रथमाध्येतॄणां कृते रचितेयम्। नायक-काव्य-रस-अलंकार-नाटकपद्धतयो ग्रन्थस्य विषयत्वेनालोचिताः। ग्रन्थकर्तुर्नामानुल्लिखितमिह ग्रन्थे।

उपसंहृतिः

नित्यनूत्नकाव्यविषय-बिम्ब-प्रतीक-मिथ्-उक्ति-प्रत्युक्ति-अन्योक्ति-मुक्तकादि-काव्यशैलीनां विविधदेशिक-वैदेशिकच्छन्दसाम् अनुकरणेन लिखितानां प्राचीनाभिः सह नूतनाभिः काव्यविधाभिः विरचितानाम् असंख्यकाव्यबन्धानां समीक्षात एतदेव परिज्ञायते यद् एकविंशशतके नूतनकाव्यशास्त्रप्रणयनेन प्रयोजनमस्ति न वेति।

[१७७] Madras Govt. Oriental Manuscripts Library, No. D. 12791.
[१७८] Descriptive Cat. Madras, R.No– 589.
[१७९] Adyar Library, No. T.R. 397.
[१८०] D.C.O.L., Madras, P.– 8715, No– 12953 & 12978 (History os Sanskrit poetics, P.V. Kane, P. – 413).

काव्यशास्त्रीयपरम्परायाम् अस्माकं काव्यशास्त्रविरचनस्य मुख्यम् उद्देश्यम् आसीद् ग्रन्थग्रन्थिशिथिलीकरणम्, न तु परमतखण्डनम्। परं परम्परागतमार्गत्यागो नोचितः सर्वदा सर्वथा। तदुक्तममरनाथेन 'काव्यसिद्धान्तकारिका'याम्–

"परम्पराखण्डनदत्तचित्तै-
र्न बध्यते काव्यमुदात्तवस्तु।
अपार्थशब्दैः रचितं तु वृत्तं
क्लिश्नाति चेतो मृदु सत्कवीनाम्"॥ इति।

अभिराजराजेन्द्रमिश्रः स्वकीये 'अभिराजयशोभूषणे' कुन्तकादिप्राचाम् आचार्याणाम् उपरि नितरां खड्गहस्तो भूत्वा ब्रुते–

"किन्तु तद्विषये तूष्णीमुपाश्रित्य यथा निजम्।
मतं न्यस्यति साटोपं कुन्तकस्तन्न साम्प्रतम्॥
व्यङ्ग्यार्थविषये यद् यद्वाचिकं महिमान्वितम्।
प्रस्तौति ध्वनिकारोऽसाविदं प्रथमतां गतः॥
तत्तदेवानुवदति कुन्तकोऽपि च केवलम्।
अपसार्य ध्वनिं तावत्स्वीयवक्रोक्तिसंज्ञया"॥ इति।

यद्यपि साम्प्रतं पञ्चविंशतिप्रायाः संस्कृतकाव्यशास्त्रीयग्रन्थाः प्रणीताः सन्ति, किन्तु परम्परागतसंवादाभावात्तेषां समीक्षा प्रायेण न सञ्जाता। तथापि केवलमभिराजयशोभूषणम्, अभिनवकाव्यालंकारसूत्रञ्चातिरिच्य समकालीनकाव्य-शास्त्रीयग्रन्थानां खण्डनं मण्डनं नामोच्चारणमपि न भवतीति समालोचकानां नारायणदाशानामाशयः।

भरतादारभ्य जगन्नाथं यावद्यथा काव्यशास्त्रीयधारा अविच्छिन्नत्वेन प्रवाहिता वर्तते, तद्वत्पण्डितराजोत्तरवर्तिकाले संस्कृतकाव्यशास्त्रसन्तानः प्रवहन्नस्ति। नैके काव्यशास्त्रज्ञाः काव्यशास्त्रीयतत्त्वानां साङ्गोपाङ्गं विवेचनं कृतवन्तः। केचिच्च काव्यशास्त्रस्य किमप्यङ्गविशेषमुपजीव्य, केचिद्वा प्राचामर्वाचीनानां ग्रन्थानाञ्च टीकाश्च विरच्य काव्यशास्त्रपरम्पराया अभ्युन्नतिं साधितवन्तः।

किन्तु जगन्नाथोत्तरवर्तिकाव्यिकानां काव्यशास्त्रविरचनप्रवृत्तिः पूर्वापेक्षया

अधिका संदृश्यते। मन्ये अष्टादश-ऊनविंश-विंशैकविंशशतकेषु लक्षणग्रन्थविरचनं विद्वत्तायाः प्रसिद्धेश्च सूचकमिति। विना काव्यशास्त्रविरचनं प्रतिष्ठा न लभ्यते, न तु नूत्नकाव्यराद्धान्तस्थापनं लक्ष्यमिति कृत्वा औपचारिकतावशात् साम्प्रतं काव्यशास्त्रीयग्रन्था विरच्यन्ते यत्र तत्र पिष्टपेषणं पूर्वोक्तालंकारग्रन्थविश्लेषणादेव अभिधातुमलमिति–

प्रथमतः, अभिराजयशोभूषण-अभिनवकाव्यालंकारसूत्र-काव्यालंकार-कारिका-नव्यकाव्यतत्त्वमीमांसादिग्रन्थाः कियदंशेन आधुनिककाव्यशास्त्रीयप्रयोजनानि पूरयन्ति।

द्वितीयतः, प्रायेण सर्वैरर्वाचीनैरालंकारिकैः बालबोधाय ग्रन्थविरचनं कृतम्। यतः समीक्षात्मकशैल्याश्रयं न विधाय लक्षणलक्ष्ययोः सरलं स्वरूपमुपन्यस्तम्। सर्वेषां पुरातनलक्षणानां यथाशक्ति परिष्कारः स्यादिति उद्दश्यं वर्तते साम्प्रतम्। अलक्षितानां लक्षणनिर्माणं स्यात्।

परमद्यत्वे विश्वेश्वररचिते 'अलंकारकौस्तुभे' नव्यन्यायपरिभाषयालंकाराणां विवेचनं प्रस्तुतम्। रसगङ्गाधरे नैयायिकभाषाया यद्बीजारोपणं बभूव, विश्वेश्वरलेखन्या तस्यैव चरमोत्कर्षः संदृश्यते। परवर्तिकाले भट्टदेवशङ्करपुरोहितेन 'अलंकारमञ्जूषा'याम् अलंकारस्य निर्दुष्टं लक्षणं परिष्कृतम्– "इतराङ्गीभूत-रसभावभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठायाः समवायसम्बन्धावच्छिन्न-चमत्कृतिनिष्ठकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणतानिरूपितविषयता-सम्बन्धावच्छिन्नावच्छेदकता, तन्निरूपितस्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वं काव्यालंकारस्य लक्षणमिति"।

तृतीयतः, पण्डितराजस्य 'निर्माय नूतनमुदाहरणानुरूपमिति' प्रतिज्ञया परवर्तिनश्चाचार्याः प्रभाविता अभवन्। नरसिंह-विद्याराम-कृष्णादयः स्वरचितलक्षणैः समं स्वकरचितलक्ष्यरूपाण्युदाहरणानि प्रस्तुतवन्तः। एतेन तेषामाचार्याणां कारयितृप्रतिभायाः परिचयः समुपलभ्यते।

चतुर्थतः, साम्प्रतिककाव्यशास्त्रीयग्रन्थानां विशिष्टोल्लेखार्हा प्रवणतैषा वर्तते यदर्वाञ्च आचार्याः काव्यशास्त्रीयतत्त्वलक्षणानि विलिख्य स्वरचितोदाहरणेषु

निजाश्रयदातुर्गुणकीर्तनं कुर्वन्तः समासन्। केचिच्च ग्रन्थस्य नामकरणमपि विहितवन्त आश्रयदातुर्नामानुसारेण। उदाहरणानि तावत्–

१. नञ्जराजयशोभूषणम्

२. रामवर्मयशोभूषणम्

३. गोदवर्मयशोभूषणम्

४. रघुनाथभूपालीयश्चेति

पञ्चमतः, साम्प्रतिककाव्यशास्त्रग्रन्थेषु चन्द्रालोक-कुवलयानन्दग्रन्थयोः प्रभावः सर्वाधिकतया प्रपतितः।

षष्ठतः, केचिदाचार्याः महाकाव्यादिवाङ्माध्यमेन काव्यशास्त्रीयतत्त्वानां व्याख्यानं कृतवन्तः। यथा 'मन्दारमरन्दचम्पूः', 'रामोदयं महाकाव्यम्', रामसुन्दरमहाकाव्यञ्चेति।

सप्तमतः, दृश्यते जगन्नाथोत्तरवर्तियुगे अलंकारनाट्यशास्त्रयोः भिन्नधारयोः द्वयोः एकस्मिन्नेव ग्रन्थे समाकलनम्। कृष्णकवेः मन्दारमरन्दचम्पूरित्यलंकारग्रन्थेऽलंकारशास्त्रं नाट्यशास्त्रञ्चातिरिच्य छन्दःशास्त्रं कविशिक्षा च समीक्ष्येते।

अष्टमतः, काव्यमीमांसा-शृङ्गारप्रकाशादीनां शैल्या सरलभाषया कृत्स्नविषयम् आत्मसात्कृतवतः कस्यचित्प्रस्थानग्रन्थस्य ग्रन्थनं सङ्कलनं वा भवेदिति शिवम्।

चतुर्थोऽध्यायः
॥ अर्वाचीनसंस्कृतवाङ्मये छन्दसां वैचित्र्यम् ॥

१.१. भूमिका

सौभाग्यवशाद् अर्वाचीनं संस्कृतवाङ्मयं मानदृष्ट्या (Quality) परिमाणदृशा (Quantity) चापि परां काष्ठां भजते। किञ्च, भाषान्तरप्रयुक्ता वैदेशिकाश्चापि काव्यप्रकाराः सम्प्रति संस्कृतकविभिः यथायथं प्रस्तूयन्ते। अर्वाचीनरचनाकृत्सु ये सरस्वतीदत्तवरप्रसादाः प्रतिभापरिपाकं बिभ्रति संस्कृतकवितायाश्च प्राक्तनीं प्रभविष्णुं साधु पुष्णन्ति रक्षन्ति च, तेषु जानकीवल्लभ-श्रीनिवासरथ-परमानन्दशास्त्रि-भास्करवार्णेकर-जगन्नाथपाठक-भट्टमथुरानाथशास्त्रि-रेवाप्रसादद्विवेदि-रमाकान्त-राधावल्लभ-अभिराजराजेन्द्र-वच्चूलालावस्थि-सदृशाः सरसगीतिकाराः गलज्जलिका-शिल्पनिष्णाताः कोविदकवयो वरीवर्तन्ते। 'कः तां कात्स्न्येंन वक्ष्यति'। एभिः अङ्गुलिमेयैः कविभिर्विरचितेषु काव्यग्रन्थेषु यत्र यत्र छन्दसां वैचित्र्यं परिलक्ष्यते, तेषामीक्षणदृशा पर्यालोचनं ममाशयः।

वेदं पुरुषत्वेन कल्पयित्वा छन्दस्तस्य पादद्वयरूपेण कल्पितं पाणिनीयशिक्षायां– "छन्दः पादौ तु वेदस्य"[१८१] इति। वेदाध्ययने छन्दसामपि वर्तते उपयोगः। गायत्र्यादीनि सप्त छन्दांसि तत्र तत्र विहितानि। यास्केनोक्तं – 'छन्दांसि छादनात्' इति। न केवलं वैदिकच्छन्दांसि, बहूनि लौकिकच्छन्दांसि सन्ति। छन्दो वृत्तशब्दस्य पर्यायवाचकम्। वृत्तं त्रिधा विभक्तं छन्दोमञ्जर्यां–

"सममर्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्तूर्यो द्वितीयवद्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम्॥"[१८२] इति।

छन्दसामेतेषां प्रयोगो यथा दृश्यते लौकिकसाहित्ये, तथा अर्वाचीने सुरभाषा-

[१८१]छन्दोमञ्जरी (दामोदरमहतोसम्पादिता), पृ. – ४८।
[१८२]तत्रैव (पृ. – ३)।

साहित्ये। पुरातनतावादिनः काव्येषु मन्दाक्रान्ता-वंशस्थविल-वसन्ततिलकादीनि छन्दांसि अनिवार्यतया वाञ्छन्ति किन्तु अर्वाञ्चो नानिवार्यतया। ननु आधुनिककविवराणां कवितासु इन्द्रवज्रोपेन्द्रवज्रादिच्छन्दोव्यत्ययः, कुत्रचिद्वा कृत्स्नायां कवितायां वृत्तसमयाः पूर्णतया लङ्घिता इति कृत्वा एतत् किं संस्कृतस्यावहेलनमिति चेन्न। पुरातनदृष्ट्या आधुनिकं छन्दोरहितं काव्यं सर्वथारमणीयम्। परमेतन्न सत्यम्। यतो भाषान्तरेभ्यः छन्दःप्रभृत्युपादानानि समाकल्य अर्वाचीनसंस्कृतभाषा स्वककलेवरपुष्टिं वितनोति। किन्तु छन्दःशास्त्रं सर्वथानुश्रित्य काव्यानि विरचितानि चेत् कुत्रचित् तद्गतभावसाम्राज्यं न समुन्मीलति, तन्निष्ठसौरभञ्चापि किञ्चिद् व्याहतं भवति। अतः कतरो मार्गः स्वीकार्य इति भवन्तो विचारयन्तु।

युगरुच्यनुसारं कविताया आङ्गिकेषु परिवर्तनं छन्दःप्रयोगधारायामपि च जायते। परन्तु काव्यधारया साकं संलग्नमिदमभिन्नतया। छन्दसो यन्मोहजालेन कविता चिराद् रुद्धा। छन्दसां प्रकारभेदाः परिवेशभावावेगानुसारेण संयोज्यन्ते। आधुनिकः कविर्यथारुचि कवितां कौति, छन्दांसि तत्र नापेक्षते। सति अन्तर्वर्तिनि छन्दसि आधुनिकसामग्रीं यां स प्रयुङ्क्ते, तस्याः यः शब्दप्रवाहः, स च किमपि नवीनच्छन्दोनिर्माणं विदधातीति न दोषाय। नवीनच्छन्दसां प्रासङ्गिकत्वं स्वीकृत्य 'संप्लवाख्ये' कविताग्रन्थे उक्तम्–

"उन्मीलिता नवीना
मार्गा दृष्टनवीनपद्धतयः।
छन्दश्चलितं भूत्वा
पाथेयं दीर्घयात्रायाम्॥"[१८३] इति।

आधुनिककाले नव्यानि छन्दःशास्त्राणि च प्रणीयन्ते। अभिराजराजेन्द्रमिश्रस्य 'छन्दोऽभिराजीयम्', रामकिशोरमिश्रस्य 'छन्दस्कलावती', हरेकृष्णमेहेरस्य 'मेहेरीय-छन्दोमाला' चेत्यादयः आधुनिकच्छन्दःशास्त्रेषु नव्यनिर्माणस्य विशेषत्वं प्रदर्शयन्ति। अर्वाचीनसंस्कृते काव्यप्रणयनविषये साहित्यशास्त्रिणः अभिराजराजेन्द्र-मिश्रस्य मतं प्रणिधानयोग्यम्। वर्तमानयुगस्य संस्कृतकाव्यरचनाप्रसङ्गे रक्षणशीलतायाः शैथिल्यं विधाय राजेन्द्रमिश्रेण आधुनिकलेखकवर्गान् प्रति प्रोत्साहाः प्रदत्ताः।

[१८३]राधावल्लभत्रिपाठिनः संप्लवः (पृ. – ७)।

स्वीये 'अभिराजयशोभूषणम्' इति तेन सुष्ठूक्तम् –

"हाइकु-तानका-सीजो-सॉनेट-लीरिकादयः।
काव्यभेदा विजातीयाः प्रणीयन्तेऽधिसंस्कृतम्॥
आदानं च प्रदानं च सम्भवत्येव साम्प्रतम्।
नैकभाषा-नदीष्णेषु सत्सु संस्कृत-सूरिषु॥
कवयो नावरोद्धव्या एवंप्रणयिनस्ततः।
अभिनन्द्यस्तदुत्साह इत्यभिराजसम्मतम्॥"[१८४]

तस्यायमेवाशयो यत् साम्प्रतिके साहित्ये कतिपयाः वैदेशिकाः काव्यविधाः हाइकु-तानका-सीजो-सानेट्-लीरिक्-प्रभृतयो व्यवह्रियन्ते। वस्तुतः प्रवीणसाहित्य-शास्त्रिणः आधुनिकयुगचेतनया सह आधुनिकी दृष्टिभङ्गी कवीनां निमित्तम् आन्तरिकीं प्रेरणां प्रयच्छति।

१.२. अर्वाचीनसंस्कृतकाव्यपरिसरे मुक्तकच्छन्दसां वैचित्र्यम्

लौकिकसंस्कृते चाधुनिकसंस्कृते पारम्परिकदृष्ट्या प्रायः पिङ्गल-श्रुतबोध-छन्दोमञ्जरी-वृत्तरत्नाकरादिच्छन्दःशास्त्रेषु प्रतिपादितैः विविधैः आर्यादिमात्राछन्दोभिः अनुष्टुप्-वंशस्थ-स्रग्विनी-शिखरिणीप्रभृतिभिः वर्णच्छन्दोभिश्च प्रणीताः श्लोकरूपाः कविताः विलोक्यन्ते। आधुनिकसंस्कृतसाहित्यस्य विशेषत्वं तावन्मुक्तकच्छन्दसां प्रयोगः। वैदेशिक-प्रादेशिकसाहित्यानां प्रभावभावेन आधुनिकसंस्कृतसाहित्ये मुक्तक-च्छन्दसा रचिताः कविताः अवलोक्यन्ते। भरतमुनेः स्वीकृतिः इह प्रसङ्गे उल्लेखयोग्या–

"छन्दोहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम्।
तस्माभूभयसंयुक्ते नाट्यस्योद्योतके स्मृते॥"[१८५] इति।

नाट्यशास्त्रस्योक्तिमवलम्ब्य अभिराजराजेन्द्रमिश्रः स्वमतं पोषितवान् यत्पद्ये गद्येऽपि विद्यते छन्दोमयता। गद्यपद्ययोरुभयोः रसवत्ताभरितं छन्दोमुक्तं काव्यं भवति। छन्दोमुक्तं काव्यं वस्तुतो लयवाहि गद्यमेव। आङ्गलभाषायामेतद् 'Rhythmic Prose' इति कथ्यते।

[१८४] अभिराजयशोभूषणम् (प्रकीर्णतत्त्वोन्मेषः, कारिका १११-११३), पृ. – ३१७।
[१८५] नाट्यशास्त्रम्, १४।४०।

परिदृश्यन्ते अर्वाचीनकविभी रचितेषु काव्येषु कानिचित् प्राचीनशैलीम् अवलम्ब्य प्रसिद्धसंस्कृतच्छन्दसा ग्रथितानि, कानिचिच्च पुनर्नवीनशैलीमाश्रित्य मुक्तकच्छन्दसा विरचितानि। पश्चिमवङ्गस्य कविमूर्धन्यस्य सीतानाथाचार्यस्य 'भावविलसितम्' इति स्वरचितकवितासंग्रहे कानिचन पद्यानि मुक्तकच्छन्दसा ग्रथितानि सन्ति। 'सङ्कल्पः', 'संस्कृतेन चिन्तनम्' इति कविताद्वितये वृत्तनियमो न पूर्णतयानुसृतः। 'आत्मविलापः' इत्यनुवादात्मिकायां कवितायामनुवादसौकर्याय क्वचित् क्वचिद् अनुष्टुभः पादत्रयमवलम्ब्य एकैकः श्लोको विनिर्मितः। उदाहरणं यथा–

"क्षणप्रभा प्रभादानैस्तमो ध्वर्यतेतराम्।
पथिकानाकुलीकर्तुम्॥"[१८६] इति।

केषुचित् श्लोकेषु 'प्र' इति वर्णात् पूर्ववर्तिनः अक्षरस्य वैकल्पिकह्रस्वत्व-विधानमङ्गीकृतम्। 'नववर्षम्', 'रजनीगन्धे'ति कविताद्वये श्लोकमेकं विहाय वृत्तनियमः समुल्लङ्घितः। दिङ्मात्रमुदाहरणं तावत् 'रजनीगन्धे'ति कवितायाम् –

"अयि रजनीगन्धे! मधुरमृदुगन्धे!
धरणीतलपूतिगन्धापहरणे भव दृढबन्धा॥" इति।

विश्वेऽस्मिन् विश्वसाहित्ये साम्प्रतं कवितासु गद्यस्य प्राचुर्यं नेत्रातिथ्यं गतम्। संस्कृते गद्यकविताया निदर्शनरूपेण इमे परिगणयितुं शक्यन्ते। पश्चिमवङ्गे दीपकघोषनामकः कश्चनासीत् कविवरः, यो लौकिकच्छन्दोरीतिमतिक्रम्य व्यतिक्रमतया प्रयोगञ्चकार। तद्विरचितस्य 'राजनीतिलीलामृतम्' इति व्यङ्ग्यात्मककाव्यग्रन्थस्य कस्यचित् चरणचतुष्टयोपेतस्य पद्यस्य द्वादशाक्षरान्विता इन्द्रवज्रा प्रथमचरणे, एकादशाक्षरा वृत्तिः उपेन्द्रवज्रा द्वितीयचरणे, एकादशाक्षरा वृत्तिः इन्द्रवज्रा, तृतीयचरणे तथा चान्तिमे चरणे द्वादशाक्षरविशिष्टा इन्द्रवज्रा च दृश्यन्ते।

तद्यथा–

"निष्पापपुष्पोपमसुस्फुटाञ्शिशून् (१२ अक्षराणि- इन्द्रवज्रा- त-त-ज-र)
अनन्तपङ्क्त्या प्रचितानसुस्थान्। (११ अक्षराणि- उपेन्द्रवज्रा- ज-त-ज-ग-ग)
सुप्तांश्चिकित्सालयकुट्टिमेषु (११ अक्षराणि- इन्द्रवज्रा- त-त-ज-ग-ग)

[१८६] भावविलसितम्, पृ. – ७९।

घात्रीव संपश्यसि निर्ममक्रमम्॥"[१८७] (१२ अक्षराणि- इन्द्रवज्रा- त-त-ज-र)।

तेन तदीयायां 'विलापपञ्चिकायां' तूपजातिवृत्तविषयकं स्वमौलिकचिन्तनं परिशीलितम् उदाहरणैः। तदुदितम्–

"My another lyric 'विलापपञ्चिका' is also likewise repete with such innorative experiment on Sanskrit Upajāti Vṛtta Metre which is only to show that in modern Sanskrit poet's writings, this Metre can also be adopted as असमवृत्त Metre in one and same verse with metres of different number of syllables in each of four feet, and consequently …"[१८८] इति।

शास्त्रीयच्छन्दोधारामतिक्रम्य छन्दसोर्लक्षणं स्वरूपं चैकत्रीकृत्य नूतनमेकं छन्दो विनिर्मितं दीपकघोषमहाभागेन। यथा वसन्ततिलक-वंशस्थविलच्छन्दसोः ("ज्ञेयं वसन्ततिलकं तभजा जगौ गः", "वदन्ति वंशस्थविलं जतौ जरौ") लक्षणद्वयं सम्मिल्य पञ्चदशाक्षरान्वितं 'वसन्तस्थविल'मित्येकं नूतनं छन्दो दीपकेन प्रस्तुतम्। यल्लक्षणं तावत्– "ज्ञेयं वियुक्ततिलकं स्थविलन्तु रान्तिकम्"[१८९] इति। दिङ्मात्रमुदाहरणं यथा–

"मन्ये वसन्ततिलकं प्रतिभावतां कृते
बन्धो वसन्ततिलकं कृतिना कृतेऽपि च।
भाग्ये विदग्धविरसे स्थविरे वसन्ततो
मह्यं वियुक्ततिलकं विहितं हि वेधसा॥"[१९०](त-भ-ज-ज-र) इति।

किञ्च, मन्दाक्रान्ता + शार्दूलविक्रीडितम् = मन्दविक्रीडितम् (सप्तदशाक्षर-समन्वितम्)। लक्षणञ्चास्य– "मन्दाक्रान्तान्तिममयलगा मन्दं हि विक्रीडितम्।"[१९१] इति। उदाहरणं तावत् –

[१८७]राज.लीला. (श्लोकः – ६)।

[१८८]दीपकघोषः 'A few Experinents of classical Sanskrit Vṛtta meters', (Published in the Summaries of paper, AIOC (1978).

[१८९]तत्रैव।

[१९०]विलापपञ्चिका, पृ. – १८।

[१९१]दीपकघोषः, Summaries of Paper in AIOC (1978).

"कान्ता गेहे सततरुदिता / दारिद्र्यनिष्पेषिता।
हा हा स्वामिन् विफलपुरुषं / जीवनं यौवनञ्च॥
धिक् त्वां धिक् त्वां विफलपुरुषं / व्यर्थनामा पतिस्त्वम्।
भाग्यस्येदं परित इव मां / मन्दं हि विक्रीडितम्॥"[१९२]
(म-भ-न-म-य-ल-ग) इति।

गङ्गादासेन छन्दोमञ्जर्यां सुन्दरी वियोगिनी वा अर्धसमवृत्तात्मिका इत्युक्तम्। अस्या लक्षणं तावत्–

"अयुजो यदि सौ जगौ युजोः।
सभरा लगौ यदि सुन्दरी तदा॥" इति।

अर्थात् विषमपादे स-स-ज-गगणाश्चत्वारः तथा च समपादे स-भ-र-ल-गगणाः पञ्च सन्ति चेत्तत् सुन्दरीछन्दः। परम् अर्धसमवृत्ता वियोगिनी समवृत्तीकृताभवद् दीपकघोषस्य समीक्षायाम्। तस्मिन् छन्दसि प्रत्येकं पादचतुष्टये दशाक्षराणि विलसन्ति तथा च स-स-ज-गगणाः। दिङ्मात्रमुदाहरणं विलापपञ्चिकातः–

"अथ वर्षसमापने सति प्रभुशापविमोचितात्मकः।
अलकापुरि यक्षकः पुनः निजमालयमाययौ किल॥"[१९३]

(प्रत्येकं पादे दशाक्षराणि तथा च स-स-ज-गगणाः लसन्ति) इति।

एतेन प्रतीयते वृत्तप्रयोगे कविः स्वतन्त्रः स्यात्। अद्यापि कविभिः पारम्परिकच्छन्दसा लिखितानि इति दृश्यते। तेषां काव्यानि प्रासङ्गिकानि वर्तमानसमाजाश्रितानि। वच्चूलालावस्थि-राजेन्द्रमिश्रादयः पारम्परिकच्छन्दसापि काव्यानि रचयन्तः प्रथन्ते। अतः स एव कविः प्रशस्यो यः सरसं युगबोधच्छन्दो ब्रूते, न तु छन्दोमात्रनिर्भरम्।

मुक्तकच्छन्दोबद्धा कविता प्रायः उपधामिलनरहितेति दृश्यते। अस्याः प्रत्येकं पङ्क्तिः असमानवर्णसंख्यका भवति। व्यक्तीनामभिरुच्यनुसारं पुनः व्यवहितरूपेण अव्यवहितत्वेन च मित्राक्षरयुक्तो भवति मुक्तकच्छन्दसां व्यवहारः। उदाहृतपङ्क्तिषु

[१९२]विलापपञ्चिका, पृ. – ७।

[१९३]तत्रैव।

एवंभूता प्रयोगस्पष्टता अनुभूयते। कवेः अभिराजराजेन्द्रमिश्रस्य 'चर्चरी' कविता-सङ्ग्रहात् उद्ध्रियते एकमुदाहरणम् :

'अभिलषामि यद् राज्ञा पृष्टोऽहमपि / जाबालिश्राविता /
मदात्मकथां / समुपवर्णयेयं / शापमुक्तश्च भवेयम्।
म्रियेत शूद्रकः / जीवेच्चन्द्रापीडः / विलसेत् कादम्बरी /
म्रियेत शुक-शावको / जीवेद् वैशम्पायनो /
विलसेन् महाश्वेता / अभिलषामि।।'[१९४]

रेवाप्रसादद्विवेदिनः 'अहं स्वतन्त्रः' इति कवितायां मुक्तकच्छन्दसामनवद्य-प्रयोगशैली संलक्ष्यते। साम्प्रतिकसमाजे स्वाधीनतया प्रवर्त्तितस्वेच्छाचारविषये कविः सव्यङ्ग्यं कथयति :

"अहं स्वतन्त्रः / परं निन्दितुं / यदि वात्मानं स्तोतुम् /
मम मानसगृध्रं / पोषयितुं मम कायम् / धातुमात्रसंकायम्।।
अहं स्वतन्त्रः / परस्य कण्ठे करपत्रं चालयितुं / अर्थः सिध्यतु
न वा मदीयः / परस्य मार्गं रोद्धुं / जन-नेतृत्वं बोद्धुं /
बहुमतलब्ध्यै यथाकथञ्चित् /कूटगवीमपि दोग्धुम्।।[१९५]"

रात्रेः विविधस्वरूपवर्णने केशवचन्द्रदाशस्य 'ईशा' इति कवितासंकलने मुक्तच्छन्दसां प्रभावः प्रपतितः–

"रजनी विजनीभवति / एकाकिनी गृहिणीव / हेमन्तस्य
शिशिर-बिन्दवे / तारका करकायते / व्यथा कथामारभते /
अवितथं प्रथयितुम् / यथाकथञ्चित् / समाप्ति-सोपाने /
रेलस्थाने / जनसम्मर्दस्य उत्थाने पतने।।[१९६]"

पुनः, स्वीयजागतिकस्थितौ केशवचन्द्रस्य 'ईशा' इति कवितासङ्ग्रहादन्यदेकम् उदाहरणम् :

[१९४]अभिलाषः, कल्पवल्ली, पृ. – ३७१-३७२।
[१९५]अहं स्वतन्त्रः, कल्पवल्ली, पृ. – २४८।
[१९६]रजनी विजनीभवति।

"नाहं निक्षिप्तकन्दुकः/ प्रत्यागमिष्यामि / भूतलं संस्पृश्य /
परमेको मिमिलिषुः / आषाढस्य बिन्दुः।।"[१९७]

'कृषीबलः' कवितायां कृषकस्य सामाजिकदुर्दशां तस्य महनीयताञ्च निरीक्ष्य कविः हर्षदेवमाधवः हृदयस्पर्शिरूपेण वर्णयति –

"कृषीबलः स्वभाग्यं वपति / दुर्भाग्यं प्ररोहति।/
तस्य नत-कन्धरयोरस्ति / देशस्य श्वस्तन-सूर्योदयः /
यदा कृषीबलः पञ्चत्वं गमिष्यति / तदा भविष्यति सः /
जलद-भारनतं व्योम / सूर्यस्य मसृणातपः /
तिलपुष्प-सुरभिहरः पवनः / इक्षुदण्डानां रसः /
अपि च प्रथम-वर्षास्पर्श-पुलकिता / क्षेत्रमृत्तिका।।"[१९८]

उत्कलवास्तव्येन हरेकृष्णमेहेरेण 'जीवनालेख्यम्' इति काव्यस्य 'अन्धानुसन्धानम्' इति कवितायाम् आधुनिके कलुषिते समाजे नारीणां दुर्दशाया वर्णनेन सार्धं रामायणमहाभारतयोः खलचरित्राणामवतारणा कृतास्ति। साम्प्रतिकयुगेऽपि नारीणां मर्यादाहानिविषये कवेरभिव्यक्तिरीदृशी :

'अद्यापि भ्रमन्ति रावणाः / बहुवैदेही-हरण-प्रवणाः।
कुर्वन्ति द्रुतमुपद्रवं जयद्रथाः/ परदारापहरणार्थं समारूढरथाः।।
बाष्पपूर्णाश्चतुश्पद्यः / अद्यापि खिद्यन्ते समुपद्रुता द्रौपद्यः।
शरव्या दुःशासनानाम् / केशकर्षण-धर्षण-लालसानाम्।
भीष्मास्तु तूष्णीकृतवर्ष्माणो ह्यनुष्णाः /
अपेक्षन्ते कदा रक्षिष्यन्ति श्रीकृष्णाः।।'[१९९]

बनमालिबिश्वालस्य 'प्रियतमा' इति कवितासङ्कलनस्य कियदंशोऽत्र उल्लिख्यते। फाल्गुनमासे सायंकालस्य कवरीकुसुमस्य सौरभं चानुभूय मिलनसमया-गमनं सूच्यत इति कवेः कथनमेवं प्रकारकम् :

[१९७]ईशा।
[१९८]निष्क्रान्ताः सर्वे, पृ. – १३१-१३२।
[१९९]अन्धानुसन्धानम्/ संस्कृतमञ्जरी, एप्रैल् २००७।

"फाल्गुनस्य सन्ध्या यदा / नमेत क्वचिद् दूरे /
दिग्वलये / गन्धं घ्रात्वा कवरीपुष्पस्य / प्रियतमे!/
ज्ञातुं प्रभवामि / उपगता मिलनस्य वेला /
प्रस्फुरणं मदीये / दोलायिता च / मे प्रीतिदोला॥"[२००]

विविधैः रूपकैः मनस्तत्त्वविषये कवेः रवीन्द्रपण्डायाः वर्णनमित्थम् :

"मनः निदाघस्य मेघः।/ मनः चैत्रस्य पवनः। /
मनः श्रावणस्य वारिधारा।/ मनः वसन्तस्योपवनम्।/
मनः हेमन्तस्य हिमालयः। / मनः शीतस्य रजनी॥[२०१]"

१.३. लोकधर्मिच्छन्दसामभिनवत्वम्

अर्वाचीनसंस्कृतवाङ्मये आङ्गिकदृष्ट्या यद्वैप्लविकं परिवर्तनं समदृश्यत, तत्र छन्दसां बहुविचित्रितं प्रयोगकौशलमवेक्ष्य मनो मोदते। तथाहि लक्ष्यन्ते छन्दःशास्त्रीयरीतिमतिक्रम्य उल्लङ्घ्य च लोकधर्मिच्छन्दांसि। छन्दसामेतेषां विरचनस्य मूलं लक्ष्यं न हि परम्परागतस्य छन्दःशास्त्रस्योल्लङ्घनं चावहेलनं परं प्रत्येकं मानवेन समं संस्कृतस्य सायुज्यविधानम्। वस्तुतो यदा संस्कृतच्छन्दस्सु समकालीनसामाजिकभावानामभिव्यक्तिः सौरभञ्चोपलभ्येते, तदा मानवः स्वतः प्रचोदिततया स्वात्मना सह तं संयुनक्ति। सङ्गीतं यदा जनपद-ग्राम-कुलादिस्वजातीयपरम्परानुसारं कण्ठध्वनेर्वैशिष्ट्यानुसारेण च गीतं भवति, तदा तल्लोकगीतिनाम्ना परिचीयते। परन्तु केचिद्विद्वांसो मन्यन्ते – गजलादिर्न लोकधर्मिप्रयोगः। परमर्वाचीनसंस्कृतकाव्ये गजलस्य सुदीर्घा परम्परा विद्यत एव।

छन्दोबद्धकवितासु लोकगीतीनां प्रयोगावसरे कविभिरेतदेव भाव्यं यत् प्रत्येकं लोकगीतीनां स्वतन्त्रगायनरीति-माधुर्य-लय-झङ्कारा यथा सम्यक्तया रक्षिताः स्युः। प्रतिभाषं समुपलब्धानां छन्दसां स्वतन्त्रनियमान् पृथगुपादानानि चावलम्ब्य काव्यानि रचितव्यानि संस्कृतकविभिः। किन्तु तत्र संस्कृतच्छन्दःशास्त्रीयरीतिमाश्रयेत् केवलं कविः, नान्यच्चेत् काव्यं वा रचितं स्यात्तदुपहसनीयं भवेदिति मामकी मतिः।

२०० प्रियतमा।
२०१ नखदर्पणः, पृ. – ९५।

एतदपि कविभिश्चिन्तनीयं यत् संस्कृतकवितासु गीतीनां व्यवहाराद् यथा न कथमपि तद्रसापघातकं स्यात्। काव्यसर्जनाय तथा च तत्र भावाभिव्यक्त्योः सामञ्जस्यविधानाय सङ्गीतस्य प्रकृतस्वररक्षार्थञ्च यदि लघुगुर्वादिक्रमव्यत्ययो वा भवेत्तर्हि तन्न दोषपदवाच्यम्।

दशमशताब्द्यां प्रख्यातालङ्कारिकेण कुन्तकेन साहित्यस्य अन्यतमवैशिष्ट्यत्वेन सङ्गीतधर्मिताया उपरि गुरुत्वं समारोपितम्। पाश्चात्त्यसमालोचकैः कार्लाइलमहाभागैः 'The Hero as Poet' इति ग्रन्थे सुष्ठूक्तम् –

"……all speech, even the commonest speech, has something of song in it …Poetry therefore, we will call musical thought." इति।

अस्याः सङ्गीतधर्मितायाः प्रत्यक्षप्रभावः अद्यतनकालस्य काव्येषु समलक्षि। सिद्धेश्वरचट्टोपाध्यायस्य 'ननाविताडनाख्ये' रूपके नैपथ्यसङ्गीतः (Background Music) सम्प्रयुक्तः। दिङ्मात्रमुदाहरणं तावत्–

"शृणु शृणु समागत सर्वगुणिजने।
अधिकारिगीतेऽधुना दीयतां हि मनः॥
ननावृत्तं समालम्ब्य निवेद्यते मया
सरसकटुककथा हीनताललया॥" इति।

१.३.१. गजलगीतस्य प्रयोगः देववाण्याम्

ऊर्दू-गजल्-गीतप्रभावेण आधुनिकसंस्कृते गजल्-गीतिः स्वान्तमोहकरूपेण लभ्यते। मात्रा-संख्याभेदेन गजल्-गीतिः बहुप्रकारा। फारसीगजलस्य देववाण्यां प्रयोगः स्वातन्त्र्यावाप्तेः पूर्वमेव जातः। जयपुरीयो महाकविर्मथुरानाथशास्त्रिमहाभागः न केवलं पारसिकगजलसंविधानसंवलितां गजलसंहतिं रचयामास, अपि च भारतीयसङ्गीतशास्त्रे आकाशवाण्याः कृते ध्रुपदगीतानि ठुमरीदादराप्रभृतीनि विरचयामास। मथुरानाथशास्त्रिणा 'साहित्यवैभवमित्याख्ये' ग्रन्थे ऊनविंशति-संख्यकानि स्वनिर्मितानि गजलगीतानि प्रस्तुतानि।

मथुरानाथेन अनुप्राणिताः सन्तः गिरिधरशर्मन्-रामनाथ-वल्लभशास्त्रि-नवरत्नादिकवयो गजलगीतिमाश्रित्य युगरुच्यनुसारं काव्यानि विरचयन्तः प्रथन्ते।

वच्चूलालावस्थिमहाभागैः संस्कृतभाषायाः प्रौढत्वमादाय सुगन्धञ्च संयोज्य प्रेमप्रीति-विरहादिभ्यो विलक्षणभावात्मकगजलगीतं प्रस्तुतम्।

एकविंशशताब्द्या अन्तिमे चरणे जगन्नाथपाठको मिश्रोऽभिराजश्च श्रेष्ठगजलकाव्यकृत्सु अन्यतमत्वेन राजेते। जगन्नाथस्य गजलगीतिषु मनोवेदना-सूक्ष्मभावाभिव्यञ्जनादिकमनुस्यूतं वर्तते। 'कापि शायनी' 'मृद्वीका' चेति ग्रन्थद्वयेऽस्य लेखनी गजलरीतिमाश्रित्य नूतनभावजगदुन्मीलयति। कविरयं नव्यान् विधान् संस्कृतकाव्यभूमौ अवतारयति, अभिनवाश्च कल्पनाः पुरस्करोति। 'कापि शायनी'ति काव्यसंग्रहे कविना वैयक्तिकप्रेम्नः कादम्बरीं निपीय स्वभावाभिव्यक्तिः प्रकटीकृता–

"चषका इह जीवने मया परिपीता अपि चूर्णिता अपि।
मदेमेष बिभर्मि केवलं क्षणपीतस्य मधुस्मितस्य ते॥[२०२]" इति।

अर्वाचीनसंस्कृतक्षेत्रे मिश्रोऽभिराजराजेन्द्रः कवितासुवासवासितहृदयवान्, पारम्परिकाधुनिकज्ञाननिष्णातः राष्ट्रियकवित्वेन कीर्तिमान्। 'वाग्वधूटीकवितासंग्रहे' मिश्रेणोक्तं – 'गलन्ति जलानि नयनाश्रूणि यस्यां सा मर्मन्तुदागीतिः गलज्जलिका' इति। अयं काव्यकृद् गजलशब्दस्य संस्कृतोचितं नाम निश्चिनोति 'गलज्जलिका' इति। नाट्ये महाकाव्ये मुक्तकेषु गीतिषु गलज्जलिकासु कजरीप्रभृतिलोकगीतेषु कथासु चास्य दक्षा लेखनी अप्रतिहतमबाधं विपुलं नानाविधं साहित्यमसृजत्। तेन प्रणीतानां गीतीनां गलज्जलिकानाञ्चाभिनवा सङ्कलनात्मिका 'मधुपर्णीति'। तत्र २५ गीतानि, २६ गलज्जलिकाः, १८ मुक्तच्छन्दांसि वर्तन्ते।

त्रिवेणीकवेः अभिराजराजेन्द्रमिश्रस्य 'मत्तवारणी'ति गजल्-काव्यसङ्कलनस्य कियदंशः प्रस्तूयते। साधारणमानवस्य परोपकारितादिसमुदात्ताया भावनायाः सामाजिक-समुपादेयत्वप्रसङ्गे कवेः षोडश-मात्रिका गलज्जलिका प्रणिधेया –

"नाहमस्मि सूर्यो, दीपोऽहम्, मनोराज्यधरणीपोऽहम्।
सिन्धोरिव न च मे विस्तारः, सर्वसुलभमृदुजल-कूपोऽहम्॥
चन्दनवनसुरतरुरपि नाहम्, घनच्छाय-जनपथ-नीपोऽहम्।

[२०२]कापि शायनी।

अलमिह मम निष्ठा परीक्षया, तनुमपि दास्यामि दिलीपोऽहम्"[२०३]॥

कवयित्र्याः दीक्षित-पुष्पायाः 'लोकोऽयम्' इत्यत्र गजल्-गीतेः प्रयोगो दृश्यते। सामाजिकव्यापारे प्रेमिजनं प्रति उदासीनता, साधुजनं प्रति मूर्खस्य शत्रुताचरणं चेत्यादिविषयाणां प्रसङ्गे तस्याः गीतोक्तिरेवंविधा :

"जने प्रेमप्लुते ताटस्थ्यमाबध्नाति लोकोऽयम्।
तटस्थे प्रीतिमाधातुं सयत्नो भाति लोकोऽयम्॥
अवैरे सज्जने निष्कारणे वैरायते मूढः,
जने दुर्दान्तदौरात्म्ये कुलीनो भाति लोकोऽयम्॥"[२०४]

कवेः इच्छारामद्विवेदिनः 'धनुस्ते कीदृशम्' इति प्रणयपरकायाः गजल्-गीतेः काश्चित् पङ्क्तयः समास्वादनीयाः। शरसन्धानं विनापि प्रेमासक्तं हृदयं कीदृशं क्षताक्तं भवति, तत्कवेरभिव्यक्तितो ज्ञायते। उदाहरणस्वरूपम् :

"धनुस्ते कीदृशं कियदद्भुतं बन्धो! कथं जाने?
विना नाराच-सन्धानं व्रणं कुरुते कथं जाने?
मया शास्त्रे श्रुतं मन्दस्मितैर्नन्दन्ति सत्पुरुषाः,
मनो न दूयते ते सुस्मितैर्बन्धो! कथं जाने?"[२०५]

कविः बच्चूलालावस्थ्यपि गजल्-गीतेः नान्दनिकप्रयोगे सिद्धहस्तः। साम्प्रतिके समाजे मानवस्य वचनाचरणयोश्च कीदृशी भिन्नता दृश्यते, कविकृतौ सा प्रतिफलिता इत्थम् :

"अर्जितानां समर्जनं भूयः। नार्जवं किन्तु कर्जनं भूयः॥
अद्य केयं दशास्ति मेघानां, वर्षणं नैव गर्जनं भूयः॥
भस्मसाद् भावयन्ति का हानिः, भर्जितस्यैव भर्जनं भूयः॥
व्याकुलोऽर्थः क्व याति क्व चिन्ता, शब्दजालस्य सर्जनं भूयः॥"[२०६]

[२०३]मत्तवारणी।
[२०४]लोकोऽयम्, कल्पवल्ली, पृ. – ३९५।
[२०५]धनुस्ते कीदृशम्, कल्पवल्ली, पृ. – ५७०।
[२०६]अभिराजयशोभूषणम्, पृ. – २९३।

१.३.२. संस्कृतच्छन्दःसु चैत्रकगीतस्य प्रयोगः

उत्तरप्रदेशस्य ग्राम्यप्रदेशेषु चैत्रमासि पतिविरहात् प्रिया दुःखदग्धजीवनस्य मनोव्याथामनुभूय गायति चैत्रकगीतम्। तद्भावनया भावितः सन् अभिराजो वर्णयति–

"विधुमभिसरति कुमुदिनी रे मातः किमु करवाणि
प्रोषितपतिका विरहिणी रे मातः किमु करवाणि
पवनो वहति मलयगिरि सूतः
रेवातटगतवञ्चुलपूतः..."[२०७] इति।

'वाग्वधूटी'काव्यविरचनावसरे अभिराजेन दुःखभाराक्रान्तविरहिण्या भावं स्फुटीकर्तुं यावान् प्रयत्नः कृतः, न तथा छन्दःशास्त्रीयनियमान् अनुसर्तुं प्रयोक्तुञ्च। अस्मिन् गीते मृत्तिकायाः सौगन्धो यथा लसति तथाभिव्यनक्ति साधारणजनमानसस्य सङ्कल्पमपि।

१.३.३. लोरीगीतम्

लोरीगीतस्य गायनरीतौ बालसुलभप्रयत्नानां चन्द्राकाशाप्सराणाञ्च सामूहिकं वर्णनं प्रतिफलितमास्ते। अस्मिन् लोरीगीतिप्रयोगे न केवलमभिराजोऽपि च राधावल्लभो विशिष्टस्थानमधिकुरुते। स 'लोरीगीतमि'ति शीर्षके वैयक्तिकसंवेदनायाः समतालमेव सामाजिकप्रतिष्ठामपि अभिव्यनक्ति। सप्रसङ्गं 'सन्धानमि'ति पद्ये कवेः कल्पनाया उदारता लक्षणीया–

"भद्रे भद्रे धीरे तीरे त्वमवतर मानससरसि नः
शोकविमुद्रे मीलय नयनयुगदलमलं जनस्य
अवतर भगवति निद्रे सुखं मया त्वत्कृते च समास्तृतः...॥"[२०८]

१.३.४. कव्वालीगीतस्य व्यवहारः संस्कृतच्छन्दसि

उर्दुफरासीभाषाभ्यां समुत्पन्ना कव्वालीगीतिः संस्कृतकाव्यकृद्भिः परिवर्धिता। अस्मिन् साहित्यकर्मणि अभिराजः खलु सिद्धहस्तो यः 'मृद्वीका' इति काव्यसंग्रहे संस्कृतभाषया परिपोषयति कव्वालीगीतिम् –

[२०७]वाग्वधूटी, पृ. – ६१।
[२०८]सन्धानम्, पृ. – १०१।

"प्रीतिरास्वाद्यते प्राणैः
गीतिरास्वाद्यते कर्णैः
शक्तिरास्वाद्यते देहैः
भक्तिरास्वाद्यते स्नेहैः..."[२०९] इति।

१.३.५. रागाणां प्रयोगः

साहित्य-सङ्गीत-कलासु मूर्तिमान् विग्रहस्वरूपस्तावत् श्रीधरभास्कर-वार्णेकरः अर्वाचीनसंस्कृतकाव्येषु नैकेषां रागाणां प्रयोगं विधाय स्वसङ्गीतज्ञानस्य परिचयं प्रादात्। शोभावरी-आसावरी-भैरवी-पुरियाधना-श्रीरागाणां माधुर्यौ-जोभ्यामभिव्यक्तिः परिस्फुटा भास्करवार्णेकरस्य कारयितृप्रतिभया।

१.३.६. घनाक्षरीछन्दसः प्रयोगोऽर्वाचीनसंस्कृतवाङ्मये

हिन्दीभाषायाः प्रसिद्धच्छन्दः 'घनाक्षरी'ति अभिराजेन स्वमनसो माधुरीं मेलयित्वा सम्यग्भव्यतया च प्रस्तुतं सहृदयसामाजिकानां सविधे। अस्मिन् वृत्तप्रयोगे यतिः सम्पूर्णतयाक्षता वर्तते, कुत्रापि गतिभङ्गदोषः पान्थायते नो न नयनपथे। यथा 'मृद्वीकायाम्' –

"हृदये समुपैति पदं वर्धते शरीरे यत्
नयनाभ्यां नितरां चकास्ति चारुचरणम्।
अधरे बिम्बप्रतिमे स्मितकैस्तनुते सुषमां
पदयोर्विदधाति मन्दमन्दं गजगमनम्॥[२१०]" इति।

बिन्धेश्वरप्रसादमिश्रः छन्दसोऽस्य प्रयोगे सिद्धहस्तः। प्रौढतया सह अनेन सम्यक् चित्रणेन आलङ्कारिकाणां गतियत्योः सामञ्जस्यं विधाय छन्दसानेन काव्यं रचितम्।

१.३.७. चतुष्पदीच्छन्दः

यच्छन्दो लोकधर्मितया लोकप्रियतां गतमपि संस्कृतभाषा तदात्मीकृत्य गीर्वाणवाण्यां काव्यात्मकवाङ्गाध्यमेन प्रकाशयति। फलतो युगरुच्यनुसारं विविध-भाषाणां वैशिष्ट्यानि समाकल्य कविः काव्यानि कौति। चतुष्पदीच्छन्दः कविना

[२०९]मृद्वीका, पृ. – ७४।
[२१०]तत्रैव, पृ. – ७६।

मञ्जुनाथेनान्यभाषातश्चानीय तदनुसृत्य काव्यानि ग्रथितानि–

"महितमहाकविमौलिविनिहता
जयति कालिदासाऽतुलकविता।
दिव्यशक्तिशंसिनि सुविलासे
माद्यति रसिकमनो यदुपासे॥"[२११] इति।

१.३.८. संस्कृतच्छन्दोबद्धकवितायां बाउलगीतेर्व्यवहारः

ईश्वरं प्रति भक्तिभावं समर्पयितुं श्रद्धाञ्च प्रकाशयितुं साधकाः साधारणतया बाउलं गायन्ति वङ्गप्रदेशे। तद्भावराशिमात्मीकृत्य अभिराजेन 'मृगया'ख्यकवितायाम् अस्य गीतस्योदाहरणं प्रस्तुतं –

"चन्दनं वन्दनं नोऽधिकं रोचते
तापितं शापितं मे मनः क्षोभते।
वेष्टितं चन्दनं क्रूरकाकोदरैः
दुर्विषं गन्धवाहे क्व यामो वयम्?"[२१२] इति।

हर्षदेवमाधवः बनमालीबिश्वालश्चापि तदीयगीतिषु नाट्यप्रगीतकविताः बाहुल्येन प्रयुक्तवन्तौ।

यद्यपि एतेषां लोकधर्मिच्छन्दसां प्रयोगबाहुल्यं न लक्ष्यते तथापि सत्यमेतद् यत् संस्कृतभाषा नाधुना सीमायिता, सा क्रमेण प्रादेशिकभाषाभ्यो वैशिष्ट्यानि भावप्रवाहान् रीतीश्च समाकल्य आत्मनः कलेवरपुष्टिं वैचित्र्यं च सम्पादयन्ती प्रथते।

१.३.८. लहरीगीतम्

भरतेन तदीये 'नाट्यशास्त्रे' भणितं –

"त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।"[२१३] इति।

लहरीकाव्यं खण्डकाव्यस्यान्तर्गतम्। रागकाव्यमस्य अर्थान्तरम्। लहरीशब्देन सम्पृक्तं काव्यं सर्वदा समुद्रलहर्या अथवा नौकया सार्धं न सम्बद्धं स्यादिति।

[२११]अ.सं.का.प., पृ. – २६०।
[२१२]मधुपर्णी, पृ. – ३७।
[२१३]ना.शा., प्रथमोऽध्यायः, श्लोकः – १२७।

गायनयोग्यत्वाद् गीतिकाव्येऽपि द्वयोरेतयोरन्तर्भवनं समीचीनम्। अभिराजराजेन्द्रमिश्रो मतं पोषयति अभिराजयशोभूषणमिति अलंकारग्रन्थे यल्लहरीकाव्यस्य प्रतिपाद्यं लहरीवद्भवति। लहरीकाव्ये भक्तिशृङ्गारादिविषयाः अन्यप्रवृत्तयश्च परस्परं भिन्नत्वेऽपि मूलभावं परिपोषयन्ति।

लौकिकसंस्कृतकाव्येषु आदिशङ्कराचार्यस्य 'सौन्दर्यलहरी', जगन्नाथस्य 'गङ्गालहरी', 'करुणालहरी' 'लक्ष्मीलहरी' चेति विख्याताः। आधुनिकसंस्कृतेऽपि क्षमारावकृतं 'मीरालहरी'ति काव्यम् उल्लेखार्हम्, यत्र कृष्णोपासिकायाः मीरायाः जीवनगाथोपवर्णिता।

विमानयात्रायां नभसः उपरिभागान्निम्नस्थितां पृथिवीं विलोक्य कविना राधावल्लभेन स्वानुभूतिः प्रकाशिता 'लहरीदशक'मिति काव्यसंकलनस्य 'धरित्रीदर्शन-लहर्याम्'। प्रसङ्गेऽस्मिन् मन्दाक्रान्ताच्छन्दोबद्धं पद्यमेकम् उद्ध्रियते –

"गत्वा चोर्ध्वं वियति विपुलेऽसौ विमानो ललम्बे
निःस्तब्धत्वं गत इव यथा विस्मृत-श्वास आसीत्।
नो संसर्पन् नियतगमनः पृष्ठतश्चाग्रतो वा
विश्वामित्र-प्रतिहतरयः संपतन् वा त्रिशङ्कुः॥[२१४]"

अत्रेदमुल्लेख्यं यत् 'लहरीदशक'मिति काव्यसंग्रहे विलसन्ति वसन्तलहरी, निदाघलहरी, प्रावृभ्लहरी, धरित्रीदर्शनलहरी, जनतालहरी, रोटिकालहरी, नर्मदालहरी, मृत्तिकालहरी, अद्यापि, लहरी तथा च प्रस्थानलहरी चेति। लहरीकाव्यं खलु व्यञ्जनाधर्मि। तत्र वसन्ततिलकच्छन्दसा रचितायां वसन्तलहर्यां स्वदेशप्रेम प्रकृतिं प्रति औदासीन्यञ्चाभिव्यङ्क्तः। संस्कृतेतरसाहित्येषु नदी-समुद्र-नौका-नाविकादि-विषयान् अवलम्ब्य नैकानि गीतानि दृक्पथमायान्ति। आधुनिकसंस्कृतेऽपि तादृशानि विचित्रगीतान्यवलोक्यन्ते। राधावल्लभत्रिपाठिनः काव्यात् पङ्क्तिरेका प्रस्तूयते :

"लहरीषु मया गीति-र्लिखिता, रचिता नूतन-शब्दतरी।
छन्दःसु मया जगती रचिता, कलिता नूतन-भाव-झरी॥[२१५]"

[२१४]धरित्रीदर्शनलहरी।
[२१५]गीतधीवरम्।

कवयितुः हरिरामाचार्यस्य 'मधुच्छन्दे'ति कवितासङ्ग्रहात् 'कैवर्तकगीतम्' इत्यस्य कियदंशः प्रस्तूयते। जीवनं समुद्रस्य जलधारारूपेण वर्णयता कविना नाविकमुखेन प्रकाशितम् :

"जीवनमस्माकं रे, सागर-जलधारा।
स्पन्दनमस्माकं रे, सागर-जलधारा॥
वरुणालय-गमनं नो - हैया हो हैया,
नौकानामयनं नो - हैया हो हैया,
अशनं नो वसनं नो, रात्रौ सुख-शयनं नो,
धरतीयं धात्रीव सागर-जलधारा॥[२१६]"

तथाहि परीक्षितशर्मणा 'ललितगीतालहरी'ति लहरीश्रेणीयं काव्यं रचितम्। राधावल्लभेन 'धरित्रीदर्शनलहरी', 'निदाघलहरी', 'प्राञ्चलहरी', 'जनतालहरी' चेत्यादिलहरीकविताजातमेकत्रीकृत्य 'लहरीलीलायितम्' इति काव्यखण्डमेकं प्रस्तुतम्। संस्कृतकाव्येषु नाविकानां गीतमाधुनिकडिस्को-गीतादिकं विलिख्य उत्तरोत्तराधुनिककाव्यधारा प्रारब्धा अर्वाचीनकाव्यकृद्भिः। राधावल्लभेन 'गीतधीवरमि'ति काव्यग्रन्थे प्रथममध्यमोत्तमपुरुषाणां त्रयाणां स्वरूपेण धीवरचरितमालिखितम्।

१.४. हिन्दीच्छन्दसां संस्कृते प्रयोगः

"प्रसिद्धेः परां काष्ठामुपगतानां केषाञ्चित् हिन्दीछन्दसां देववाण्यां पुनरावर्तनं विधीयते। भट्टमथुरानाथशास्त्रिणः परं प्रायेण अप्रयुक्तान्येव अतिष्ठन् वृत्तान्येतानि। तत्र सवैया-घनाक्षरी-दोहा-सोरठा-बरवै-छप्पय-कुण्डलियाशब्दाः अभिराजराजेन्द्रमिश्रेण संस्कृतसपादिका-घनाक्षरिका-दोधक-सौराष्ट्रक-वरवृत्त(क)-षट्पदिका-कुण्डलिकाशब्दैः समीकृताः भाषाशास्त्रदृष्ट्या"[२१७] इति राजेन्द्रमिश्रः। राजेन्द्रेण बरवैशब्दाय वरवृत्तं वरवृकं वेति शब्दः परिकल्पितः। संस्कृतप्रतिभायाः पञ्चषष्ठितमे उन्मेषे 'सप्तवेणी'ति काव्यं सप्तलोकरागरचितकवितानां समुच्चयः स्थानं लभते। अस्मिन्

[२१६]कल्पवल्ली, पृ. – २६२-२६३ / दृक् २४-२५ अङ्कः, पृ. – १०२।
[२१७]संस्कृतप्रतिभा, उन्मेषः – ६५, पृ. – ११।

काव्ये सपादिकच्छन्दसा 'कलिसपादिका', घनाक्षरीछन्दसा 'आञ्जनेयस्तवनम्', दोधकवृत्तेन 'अनुभवपञ्चदशी', सौराष्ट्रकमिति छन्दसा 'वसन्तागमनम्', 'अयि मम भारतदेश!' वरवृत्तच्छन्दसा 'जननीवरवृत्तकम्', षट्पदिकेति छन्दसा 'गङ्गावतरणं' तथा च कुण्डलिकाछन्दसा 'अभिराजकुण्डलिकाः' कविताः स्थानिता वर्तन्ते। वस्तुतः 'शोकरागाः संस्कृतं लोकस्य निकटतरीकर्वन्त्यवश्यम्' इति भागीरथिनन्दः। राजेन्द्रमिश्रेणापि 'Modern Sanskrit Poetry' इति प्रबन्धे समवधायि – " Some poets of the day have successfully brought the modern Sanskrit poetry nearer to the folk songs of their provinces. Skandhaharijam (कहरवा), Chaitrakam (चैता), Naktakam (नकटा), Sutagrham (सैंहर), प्रचरणम् (पचरा) Tangalikam (लाङ्गुटिया), Rasikam (रसिया), Phalgunikam (फगुवा) and Kajari (कजरी) composed and presented by Abhiraja Dr. Rajendra Mishra have not only popularised the modern Sanskrit poetry, but also gained the favour of Sanskrit loving people also. The Urdu Gajala, under disguise of गलज्जलिका has cultivated a new taste among the Sanskrit listeners".[२१८]

परन्तु एकं काव्यवस्तु छन्दोवैचित्र्येण कविभ्याञ्च कथं मिथः पृथग्रूपतां धत्ते। दिङ्मात्रमुदाहरणेन विषयोऽयं स्पष्टीक्रियते –

राजेन्द्रमिश्रेण षट्पदिकाच्छन्दसा 'गङ्गावतरण'मिति कविता विरचिता परं प्रभुनाथद्विवेदिवर्यैरनुष्टुप्छन्दसा 'गङ्गावतरणशतक'मिति शतककाव्यं व्यरचि। उभयोः काव्ययोः भङ्गिभणितिस्तथा सौन्दर्यच्छटा च स्वतन्त्ररूपत्वमवगाहेते। राजेन्द्रमिश्रस्य 'गङ्गावतरण'मिति काव्यादुद्ध्रियते –

"द्रुहिणकमण्डलुमोचितजललवधृतसंहनना।
विबुधनदी प्रचकार तुहिनसितलहरिवितरणा।
तरणिकुलजवरनृपतिभगीरथरथमनुयान्ती
गङ्गा सपदि चचाल कुतुकमतिशयं सृजन्ती

[२१८]M.S.L. (1), P. – 126.

ऋषिमुनिकिन्नरसुरदनुजनागयक्षनिवहैः स्तुता।
हरिपदनिर्णेजनजला भुवमवतीर्णा गिरिसुता"[२१९]॥

प्रभुनाथद्विवेदिनः 'श्रीगङ्गावतरणशतक'मिति काव्यादुद्ध्रियते श्लोकद्वयम् –

"विष्णोः पदनखं नौमि वन्दे ब्रह्मकमण्डलुम्।
कपर्दं शङ्करस्यापि हिमवन्तं नगेश्वरम्॥
भगीरथं ततो नौमि तपोनिष्ठं नगेश्वरम्।
इक्ष्वाकुवंशसञ्जातं धीरं वीरमनुत्तमम्"[२२०]॥ (१-२)

१.५. वीरेन्द्रकुमारभट्टाचार्यस्य छन्दोविधानम्

वीरेन्द्रकुमारभट्टाचार्यस्य काव्यशैल्या अन्यतममाकर्षणं छन्दोवैचित्र्यम्। छन्दःशास्त्रमाधारीकृत्य काव्येषु तेषां छन्दसां प्रयोगांश्च दृष्ट्वा अनुमन्यते तेन गवेषणा विहिता। देशीय-वैदेशिकच्छन्दःसु तथा च राग-रागिणीनां सफलतया प्रयोगे सिद्धहस्तोऽयं कविः संस्कृतसाहित्यस्य प्रथमः सनेट्श्रेणीयकाव्यनिर्माता। पेष्ट्रार्क-सेक्सपीयाराभ्यां प्रतिष्ठितायाः सनेट्परम्परायाः परमाश्चर्यसमन्वयस्तावदियं कलापिकेति। वीरेन्द्रेण सनेट् इति शब्दबन्धाय कलापिका संस्तवकञ्चेति स्वतन्त्रं नामकरणं विहितम्।

तैः व्यवहृतच्छन्दःसु कानिचित् परिचितानि इतराणि च प्रायेण नूतनानि। कविना स्वयमेव सोनेट्-छन्दसा ग्रथितायां कलापिकायां मञ्जुध्वनि(६)-कम्बुनाद(२-५)-तूर्यमन्द्रा(७)-मेघमन्द्रा(९)-सुमङ्गला(११)-तड़िल्लता(२४)-व्याघ्रविभ्रम(२७)-मत्तमातङ्ग(३०)-जयन्तिका(३४)-शम्पाहास(३५)-लज्जावती(३८)-सोमलता(३९)-अनुराधा(४४)-नृत्तपदादि(४५)-वृत्तानि निर्माय काव्यमालिकायाञ्च तद्व्यवहृत्य सहृदयहृदयेभ्यस्तदुपायनीकृतम्। सिद्धार्थचरिताख्ये रूपके प्रायेण सप्ततिसंख्यकानां नूतनच्छन्दसां प्रयोगो लक्ष्यते। नूतन-प्रत्नच्छन्दसां ज्ञानाय छन्दोनिर्घण्टुर्योजितस्तेन। परमत्रेदमुल्लेख्यं यन्नूतनच्छन्दसां लक्षणं दीयते चेत् सौविध्यं स्यात्। छन्दसामेतेषां प्रयोगवैचित्र्येण काव्यमिदं सहृदयावर्जकमभवत्।

[२१९] संस्कृतप्रतिभा, उन्मेषः – ६५, पृ. – १९।
[२२०] तत्रैव (पृ. – ४१)।

१.६. कालीपदतर्काचार्यस्य छन्दोवैचित्र्यम्

न केनापि मूलगीताञ्जलेः संस्कृतानुवादः सम्पूर्णतया संसाधितः ऋते कालीपदतर्कचार्यात्। जीवनसायाह्नमुपागतेन कालीपदेन विविधकर्मसु व्यापृतेनापि कविगुरुवर्यस्य पद्यानि विशेषेण गीताञ्जलिकाव्यसंग्रहस्य पद्यानि गीर्वाणवाण्यामनूद्य न केवलं वङ्गीयानामपि चावङ्गीयानां संस्कृतसेविनां रवीन्द्रसाहित्यावबोधनाय सौकर्यमनेन संसाधितम्।

वङ्गीयमहाकविना मम.कालीपदतर्काचार्येणापि छन्दःप्रयोगे वैचित्र्यं समारोपितम्। गीताञ्जलिप्रतिच्छायेति अनुवादकाव्ये संस्कृतच्छन्दोनियमान् परित्यज्य अनुवादकः मुक्तकच्छन्दसा अनुवदति। स्वोद्देश्यं प्रत्यपादि तेन –

"तथापि तत्काव्यरसं कथञ्चिद् वङ्गीयभाषामविदत्सु दित्सुः।
यथावबोधं विदधेऽनुवादं वैश्वेन वृन्दारकवाङ्मयेन॥"

अनेन अनुवादकेन गीतायास्तथा श्रीश्रीचण्ड्याश्च वङ्गभाषया Blank Verse इति छन्दसा अनुवादो विहितः। अर्थात् कालीपदतर्काचार्यस्यापि छन्दसां प्रयोगे स्वकीयत्वं विद्यते नाम।

१.७. राधावल्लभीया सोनेट्शैली

'स्वनितम्' इति नामाङ्गलकवितायां प्रचलितस्य सोनेट् इति छन्दसः कृते राधावल्लभेन प्रयुक्तम्। वीरेन्द्रकुमारभट्टाचार्येण 'कलापिके'ति संज्ञा सोनेट्-कृते प्रादायि, अन्यैः कविभिः 'चतुर्दशपदी', मराठीकविभिश्च 'सुनीत'मिति नामैतस्य छन्दसः कृते प्रयुज्यते। राधावल्लभस्य षोडश सोनेट् इति पाश्चात्यविधानुसृत्यकाव्यानां समाहारस्तावत् 'स्वनितषोडशी'ति। वीरेन्द्रभट्टाचार्य-आनन्दरामबरुयप्रमुखैर्द्वित्रैरेव पूर्वं विधानमिदं संस्कृते स्वल्पमात्रया प्रयोज्यम्। "राधावल्लभेन युगपदेव षोडशस्वनितानि स्वलेखन्या स्वनितानीति अयमस्य काव्यभेदस्य प्रस्थापकत्वेन प्रथेत। स्वनितकाव्ये अल्पैरेव पदैरायतार्थप्रकाशनं भवतीति क्वचित् शायरीति प्रभेदस्य च्छायापि प्रत्यक्षीकर्तुं शक्यते। इमानि स्वनितानि राधावल्लभस्य गभीरात्मचिन्तनस्य फलमिति प्रत्येतुं युक्तम्। एतैर्मनोवैज्ञानिक-मृदुपीडाविवलितात्मोक्तिपरकाव्यार्थे अवश्यमेव पाठकाः सहृदयाः उन्मुखीभवेयु"रिति प्रत्याशा भागीरथिनन्दवर्याणाम्। आस्वादयन्तु राधावल्लभस्य

सोनेट्छन्दसा ग्रथितां कविताम् –

"अनुनादमयी सेयं तनुवीणा निनादिता।
मदीयाथ स्वैरैरेषा त्वदीयैरेव गुञ्जिता ॥
अनुवादमयं भद्रे जीवनं मम चाखिलम्।
मूलं त्वदीयमेवास्ते मदीयं निखिलं खिलम् ॥
चतुर्दशपदीं ब्रूहि स्वनितयं वाप्यथोच्यताम्।
नाम्नि किन्नु विवादेन तत्त्वमत्र गवेष्यताम् ॥
स्वनिते स्वनिते शब्दा ध्वनिता मम ते ततः।
अन्तर्गूहानिगूढा ये त्वतिष्ठंश्चिरकालतः॥
कामं कायस्तु वार्धक्ये मदीयो जरठायते।
अयि भद्रे तवालोकपथस्तु विशदायते।
अवश्यमेव भद्रे मामभिसरिष्यसि स्वयम्।
कदाचिदिति विश्वासो वर्तते हन्त मे दृढम्॥
अमृता त्वं कलां जाने स्वनिते मे प्रतिष्ठिताम्।
अक्षरामक्षरेष्वेषु नित्यमेव विभूषिताम्"[२२१]॥

१.८. अर्वाचीनसंस्कृतसाहित्ये वैदेशिकच्छन्दसां प्रयोगः

सनेट्-हाइकु-तान्का-सीजो-मोनो-इमेज् इत्यादयो वैदेशिक्यो विधा अर्वाचीनसंस्कृतसाहित्ये परिदृश्यन्ते। पाश्चात्त्यसाहित्येन सह गहनपरिचयवशात् साम्प्रतं संस्कृतसाहित्ये वैदेशिकच्छन्दसां प्रयोगो दरीदृश्यते।

१.८.१. सनेट्-छन्दसा ग्रथितं संस्कृतसाहित्यम्

सनेट्-छन्दः माइकेलमधुसूदनदत्तेन वङ्गसाहित्ये उपन्यस्तं, रवीन्द्रनाथेन च परिबृंहितमासीत्। अन्येऽपि बहवः कवय आधुनिकाः पारम्परिकच्छन्दोभिः मुक्तक-च्छन्दोभिश्च स्वैरं सनेट् प्रणयन्ति। सनेट्-वृत्तानुसारं प्रथमे तृतीये च चरणे अन्त्यानुप्रासस्य तथा च द्वितीये चतुर्थे च पादे अन्त्यानुप्रासस्य प्रयोगः करणीयः। संस्कृतसाहित्ये पूर्णतया

[२२१]संस्कृतप्रतिभा, उन्मेषः – ६५, पृ. – ३०-४०।

सनेट्-लक्षणलक्षितस्य सनेट्-प्रणयनस्य प्रथमश्रेयः वीरेन्द्रभट्टाचार्याय एव गच्छति। अनेन 'कलापिका' इति स्वकीये सनेट्-संग्रहात्मके ग्रन्थे पाश्चात्त्यभावधारां चानुवर्त्य परं भारतीयमनोभावमात्मीकृत्य सनेट्-छन्दसा बहवः (पञ्चाशत्) श्लोका विरचिताः। वीरेन्द्रकुमारेण सनेट्-छन्दसः संस्कृतायितं नामकरणं विहितम्। तच्च 'संस्तवकम्' इति।

इह कपालिकायां ५० संस्तवकाः शेक्सपीयारीयशैल्यनुप्राणिताः तस्यैव भावभाविताः, क्वचिद् वङ्गीयकाव्यानुवादरूपाः संस्कृतच्छन्दोबद्धाः क्वचित् कविनिर्मितनूतनच्छन्दोनिबद्धाः सततं कोमलभावोद्दीपकाः सरस्वत्याः सौन्दर्य-संस्तवकाः सन्ति। हास्याश्रुचितं चित्रगीतिमाल्यं क्वचित् स्वधर्मत्वेन क्वचित् सौन्दर्यपूजारूपेण वा अतन्द्रं कलयति कविरयम्–

"काव्यं हि धर्मो मम न द्वितीयः कालञ्च काव्यैः कलयाम्यतन्द्रम्।
छन्दो विचित्रं तथर्षिर्लक्ष्मीः कलायाः खलु दैवतैका॥" (निवेदनम्) इति।
"सौन्दर्यपूजा दिश्यते तु येन प्रेम्णा स हि मृत्युञ्जयः।
तद्वन्दनार्थं चित्रगीतिमाल्यं हास्याश्रुचितं निर्मलम्॥" (माङ्गलिकी) चेति।

हर्षदेवमाधवेन सनेट्-छन्दसा काव्यं विरच्य संस्कृतसाहित्यस्य विश्वचेतनाबोधः प्रकटीकृतः पाठकानां सकाशे। उदाहरणं यथा 'निष्क्रान्ताः सर्वे' इति कवितातः–

"गता सा तन्वङ्गी तरुणी द्रुतगम्या स्मितवती
इतो विद्युत्तुल्या करगृहीतपद्मा श्रीरथवा।
इदानीं हा विद्युतः क्षणिकस्फुरणादूर्ध्वमिव तु
मनोघटध्वान्तं पुनरपि रुणद्धि जलदवत्॥" इति।

१.८.२. हाइकुकाव्यम्

भारतीयसाहित्ये विधेयं सूर्योदयस्य देशतः समानीता। क्रमशः पञ्च, सप्त, पञ्च इति अक्षरान्वितं सप्तदशाक्षरं त्रिपङ्क्तिकाव्यं शिशुहृदयस्य आडम्बररहितसारल्येन, प्रणयिमनसः मर्मस्पर्शिभावाभिव्यञ्जनया, प्रौढचिन्तकस्य अर्थगाम्भीर्येण च सकल-हृदयमनोग्राहिताम् अवलम्बते। 'हाइकु' इत्यपरपर्यायस्यास्य 'सत्तरी', 'सत्तराक्षरी', 'त्रिदलम्' इति नामान्तराणि। हर्षदेवमाधवः काव्यप्रकारस्यास्य बिल्वपत्रमिवान्वर्धकं नाम कल्पयति।

गीर्वाणवाण्यां हर्षदेवः हाइकुकवित्वेन प्रख्यातः। 'लावारसन्दिग्धाः स्वप्नमयाः पर्वताः' इति काव्यसंग्रहस्तु कवेः हाइकुकाव्यरचनाकौशलस्य उदाहरणमेकम्। छन्दसोऽस्य प्रधानं वैशिष्ट्यं तावत् प्रकृतेर्निसर्गरूपचित्रणं यदनुभूतिप्रसूताद् विराट्सत्यं प्रति अङ्गुलिनिर्देशं करोति। दिङ्मात्रमुदाहरणं –

"पाण्डुरसूर्यः,
शु
ष्क
प
र्ण
प
त
न
म्
तिमिरमथ॥"[२२२] इति।

कविसहृदयस्य गहनतमानुभूतेरभिव्यञ्जनं पाठकस्य मनश्चक्षुःसमुन्मीलनं काव्यस्यास्य द्वितीयं वैशिष्ट्यम्। यथा हर्षदेवस्य 'लावारसन्दिग्धाः स्वप्नमयाः पर्वताः' इति काव्यसंग्रहे –

"पारिजातकम्...
यापितास्त्वत्या सार्धं
काश्चिद् यामिन्यः।"[२२३] इति।

संयमः खलु हाइकुकाव्यस्य प्राणाधायको धर्मः। कविवरेण रवीन्द्रनाथेन 'जापानयात्री' प्रबन्धे यदुक्तं तस्य संस्कृतायितरूपं तावत् – "आसु कवितासु न केवलं वाक्संयमोऽपि तु भावसंयमो दृश्यते। ...जापानपाठकस्य मनस्तु चक्षुषि पूर्णमेव चित्रं कथं मनसि आलेख्यं तं प्रति कवेरिङ्गितमात्रम्...।" इति।

[२२२]लावारसन्दिग्धाः स्वप्नमयाः पर्वताः, पृ. – ५।
[२२३]तदेव, पृ. – २६।

ऋतुसङ्केतः हाइकुकाव्यस्यापरमेकं वैशिष्ट्यम्। उदाहरणं यथा –

"वृक्षाग्रे पश्य
शुष्के, विकचनव-
शशिकुड्मलम्॥" इति।

हाइकुकविभिः मृत्युगीतमपि लिखितं, यस्य 'मृत्युशतकम्'[२२४] इति नामधेयम् –

"मृत्युः
निकषग्रावा
जीवानां कृते॥" इति।

गाणितिकसंज्ञाभिर्भावव्यञ्जकमेकं हाइकुकाव्यम् –

"अफिस - चिन्ता
* गृहिणी + उपनेत्रम्
/ क्षयः = जीवितम् " इति।

हर्षदेवमाधवः न केवलं छन्दःशास्त्रीयरीतिमुल्लङ्घ्य हाइकुकाव्यं रचितवान्, चापि शिखरिणी-शार्दूलविक्रीडित-स्रग्धरा-वसन्ततिलकादिच्छन्दोभिः हाइकुकाव्यं ग्रथितवान्। दिङ्मात्रमुदाहरणं तावत् 'ऋषेः क्षुब्धे चेतसि' इति काव्यसंग्रहतः-

"वृष्टेः समाप्ति-
रथ दर्दुरनाद
एव...
शिष्टोऽत्र॥"[२२५] इति।

विशेषत उल्लेख्यं यत् श्लोकोऽयं वसन्ततिलकादिच्छन्दोबद्धः।

साम्प्रतं नारायणदाशंन हाइकु-कविता उपस्थाप्यते–

"अन्तर्जलके / प्रीति-मेल-पत्रकम् / ईहे मूष्करा।"[२२६]

[२२४]चारुसंस्कृतपरिषद्, गुजराट्, १९९९।
[२२५]'ऋषेः क्षुब्धे चेतसि', पृ. – ५६।
[२२६]पद्यबन्धा, अङ्कः – २-३, पृ. – १०३।

१.८.३. सिजोकाव्यम्

'सिजो' इत्याख्यः काव्यप्रकारो माधवेन दक्षिणकोरियादेशादानीतः। अस्मिन् काव्यप्रकारे कोरियादेशस्य सौरभं, जनानामावेगः, राष्ट्रचिन्ता, परम्पराप्राप्तं गौरवञ्चेत्यादिकं सर्वं कविभिः प्रकटीकृतम्। अस्य काव्यप्रकारस्य लक्षणानि यथा–

१) त्रिपङ्क्तिमयमिदं काव्यस्वरूपम्।

२) अत्र पञ्चचत्वारिंशत्संख्यकाः निश्चिताः कृताः।

३) प्रत्येकं सिजोकाव्यं स्वयं सम्पूर्णमस्ति।

४) अत्र त्रयश्चत्वारो वा वर्णसमूहाः सन्ति।

५) प्रथमपङ्क्तौ वस्तुनिरूपणप्रारम्भः, द्वितीयपङ्क्तौ कथावस्तुविकासः, तृतीयपङ्क्तौ कथितव्यवक्रता चमत्कृतिपूर्णा च समाप्तिः केन्द्रस्थाने वर्तन्ते।

६) अस्मिन् काव्यप्रकारे कविः स्वमनोभावान् चारुरूपेण स्फुटीकरोति।

गजलसङ्गीतस्यावर्तनेन प्रयुक्तस्य सिजोकाव्यस्योदाहरणं तावत्–

"काकभ्रातः! गच्छ दूरं
गच्छ दूरं मे गृहात्।
कोऽपि वीरो यो गतोऽस्ति
नैव निवृतो रणात्॥"[२२७] इति।

अपरतो द्वितीयविश्वयुद्धस्य भयङ्करतां कविना स्वमनोभङ्ग्या पश्यता उक्तं–

"हिरोशिमायां दग्धोऽस्मि
नष्टोऽस्मि गोलिकया
वियेतनामे हतः, मे
शब्दः 'Quit India'…।[२२८] इति।

सम्भोगशृङ्गारमयं प्रणयचित्रमपि अङ्कितं हर्षदेवस्य कारयितृप्रतिभया–

"लज्जा पलायिता दूरं
नीवीबन्धः शिथिलः।

[२२७]ऋषेः क्षुब्धेः चेतसि, पृ. – ७५।४१।
[२२८]तत्रैव।

पुष्पैः सह विकीर्णोऽस्मि
केशपाशः कुटिलः॥" इति।

स्वस्य जागतिकीं स्थितिं कल्पयता हर्षदेवेन लिखितम् –

"इयं नौका किं नेष्यति / मां गाढ़-जलपारम्?/
विचिन्तयामि मनसा / इत्थं किं वारं वारम्?/
कदा पर्यन्तं स्थास्यामि/ पश्यन् मां निराधारम्?[२२९]"

ऐतिह्याधुनिकयोः समन्वयमधिकृत्य हरेकृष्णेन सिजोकवितया प्रपञ्चितम् –

"आधुनिकताप्रसूनम् / परम्परावल्लर्याः / भित्तिवारि-संवर्धिता/
अभिनवा प्रसूतिः / मौलिकतासुरभिना /युगरुचि-स्फुरिता॥"[२३०]

१.८.४. तान्काकाव्यम्

अस्मत्सुरभाषासाहित्ये जापानदेशादागतमिदं छन्दः। छन्दस्यस्मिन् चरण-पञ्चकम्, एकत्रिंशदक्षराणि (३१) च सन्ति। प्राच्यकाव्यतात्त्विकैः वीरुभाइ-पारीख-पादैरुक्तम् –

१) मानवीयभावानां सरलसंस्कृतभाषयाभिव्यक्तिर्भवति तान्काछन्दसि।

२) कवेरभिव्यक्तौ नास्ति कापि वक्रोक्तिः।

३) प्रकृतिचित्रणेन सङ्केतान् प्रदाय भावाभिव्यक्तिसाधने छन्दसोऽस्य कुशलता वर्तते।

४) तान्काछन्दसि गूढतरा शक्तिरस्ति यया मानवचित्तस्थभावाः कवेर्वाङ्माध्यमेन सहृदयानां सकाशे प्रकटीभवन्ति।

५) प्रकृतेर्निसर्गरूपवर्णनमपि कविः तान्काछन्दसा चित्रयति स्वकपोलकल्पनया।

६) सरलसुरगिरा स्पष्टभावकथनं तान्काछन्दसः अपरमेकं वैशिष्ट्यम्।

७) मधुकोठारीनामकसाहित्यसमालोचकानां मतानुसारम् अस्य छन्दसः लक्षणत्रयं वर्तते – कल्पनातत्त्वं, संघटीकरणं, सूचनञ्चेति।

८) छन्दसोऽस्य प्रथमे चरणे अक्षरपञ्चकं, द्वितीये अक्षरसप्तकं, तृतीये

[२२९]ऋषेः क्षुब्धेः चेतसि, पृ. – ७४।
[२३०]हासितास्या वयस्याः।

अक्षरपञ्चकं, चतुर्थे पञ्चमे च चरणे अक्षरसप्तकं विराजते।

हर्षदेवमाधवाः तान्काछन्दसः प्रयोगे धुरिणः सन्ति। तथाहि 'ऋषेः क्षुब्धे चेतसि' इति काव्यसंग्रहतः दृष्टान्तमेकं प्रददामि –

"गवाक्षे मुखम्
गवाक्षेऽस्ति वसन्तः
गवाक्षे चन्द्रः...." इति।

तान्का-कविताया उदाहरणमेकम् उद्ध्रियते हरेकृष्णमेहरस्य 'हासितास्या वयस्या' इति काव्यात् –

"कर्गजपुष्पं / मध्येमार्गं मञ्जुलं / निर्गन्धं भाति।
आधुनिकी सभ्यता / उभयोग्यदर्शना"॥[२३१]

किञ्च, आधुनिके विज्ञानपरिस्फूर्तिके युगे दूरभाषिकाया अनिवार्यता प्रतिपदं परिलसति। स्वाधीनभर्तृका नायिका यथा स्वमोहिनीशक्त्या स्वामिनं स्ववशं नयति, तथैव चलदूरभाषिकापि साम्प्रतं सर्वं ग्रहीतारं वशीकरोति। कविना हरेकृष्णमहेरेण चलदूरभाषिकाया अपरिहार्यत्वमिदम् इत्थं प्रस्तूयते –

"जगन्मोहिनी / वशीकरोति विश्वं / प्रकामं काम्या /
भ्राम्य-दूरभाषिका / स्वाधीनभर्तृकेव"॥[२३२]

उपसंहृतौ वक्तुमलं यद् देववाणी सम्प्रति न केवलं भारते सीमिता। आमेरिका-युरोपादिमहाद्वीपानां प्रायः सर्वेषु शिक्षाप्रतिष्ठानेषु संस्कृतविभागो विद्यते। एवं सति संस्कृते हाइकु-तान्का-सिजो-सनेट्-प्रभृतीनि वैदेशिकच्छन्दांसि प्रयुज्यन्ते चेत् का हानिः। वैदेशिकच्छन्दसां लोकधर्मिच्छन्दसाञ्च प्रयोगे सति मालिन्याः शिखरिण्या वा सौन्दर्यं नापचीयते। अत एव विकासदृष्ट्या भूषणमिदं न तु दूषणम्।

[२३१] हासितास्या वयस्या।
[२३२] तत्रैव।

पञ्चमोऽध्यायः

॥ भारतवर्षे अर्वाचीनसंस्कृतवाङ्मये कवयितारः ॥

०. भूमिका

आयाससाध्यं कर्मेदं समकालिकसंस्कृतसाहित्यकारयितॄणां सुस्पष्टपरिचय-विज्ञापनम्। तैर्विरचितानाम् ऊनविंश-विंश-एकविंशशतकानां गीर्वाणवाणीसाहित्यं गुणपरिमाणयोर्दृष्ट्या समृद्ध्याः शीर्षमारोहितम्। अपि च, तैर्विरचितानि काव्यानि रूपवैचित्र्येण भावसम्पत्त्या च यस्यां कस्यामपि पूर्ववर्तिशताब्द्यां रचितकाव्यान्यधरीकर्तुं प्रतिस्पर्धितुञ्चार्हन्ति। अतः संस्कृतसाहित्यस्याद्यत्वे अप्रतिहताया गत्याः कारणं सर्वथा केवलं तत्सृष्टिकर्तेत्यत्र नास्ति संशयलवः। येषां साहित्यरचयितॄणां कारयितृप्रतिभाबलादेव संस्कृतसाहित्यप्रपञ्चः अधुना विश्वस्य निधिरूपं सुरभारतीसमुपासकानां तेषामीक्षणदिशात्मपरिचयादिप्रकाशनं ह्याशयो मम। किन्तु एतदादौ नम्रशिरसा स्वीकरोमि यदेतान् कविमुख्याननतिरिच्य राराज्यन्ते सहस्रशः काव्यकर्तारो येऽधुनापि प्रचारालोकाद्बहिरास्थिताः सन्त उपांशु संस्कृतमातरं सेवमाना वर्तन्ते "आत्मश्लाघा परगर्हामिव वर्जयेत्" इति आश्वलायनश्रौतसूत्रप्रवचनमाप्तवाक्यमिति धिया। अध्यायेऽस्मिन्नहं प्रदेशानुसारमर्वाचीनसंस्कृतसाहित्यिकानां सूक्ष्मेक्षिकया तथ्यं प्रदास्यामि।

विषयानुप्रवेशात्प्राक् साम्प्रतं भारतभूमौ संस्कृतचर्चाया व्याप्तिः कियतीति तथ्यपुरस्सरं प्रदर्श्यते –

ऊनविंशतिसंख्यकैः राज्यैः नव केन्द्रशासिताञ्चलैस्तथा चतुश्चत्वारिंशदधिक-षट्शतं मण्डलैः प्रविभक्तं तावद्भारतवर्षम्। भारतभूमावस्यां नास्ति किमपि स्थानं मण्डलं वा, यत्र संस्कृतस्य केनाप्याकारेण चर्चा न प्रचलति। भारतीयसंविधाने समुल्लिखितासु द्वाविंशतिभाषासु संस्कृतमेकतमम्। अपि च, भारतस्य दशसहस्रमहाविद्यालयेषु द्वादशाधिकशतं विश्वविद्यालयानां स्नातकोत्तरस्तरे तथा च गवेषणायां संस्कृतविभागो वर्तते। किञ्च, आसमुद्रे भारते षोडशसंख्यकविश्वविद्यालयेषु केवलं संस्कृतस्य पठनपाठनादिकमधुना चलति। प्रचलति कासुचित् पाठशालास्वपि टोलपद्धत्यां

संस्कृतस्य चर्चा। इह देशे संस्कृतस्य प्रचयगमनार्थं राष्ट्रियसंस्कृतसंस्थानस्य तथा च संस्कृतभारत्या भूमिका सत्यमेवाविस्मरणीया। संस्थानस्यास्य विवरणानुसारं (२०१२) मध्यप्रदेशे ६४४, छत्रिसगडे ३२, उत्तरप्रदेशे १३४७, उत्तराखण्डे ११५, कर्णाटके २९०, उडिष्यायां ४३३, पाञ्जावे ८, राजस्थाने १६९८, सिकिमे ३६, तामिलनाडुप्रदेशे ५५, हिमाचलप्रदेशे १२९, अन्ध्रप्रदेशे ५०९, आसामे ८३, विहारे ७१७, गोयायां ४, गुजराट्प्रदेशे ६३, हरियाणायां ७४, जम्मु-काश्मीरराज्ये ४३, झाडखण्डे ३, केरालायां ३१, महाराष्ट्रे ६३, मणिपुरे ८ संख्यकाः संस्कृतपाठशालाः सन्ति। राष्ट्रियसंस्कृतसंस्थानस्याधीनस्था विंशतिसंस्कृतादर्शविद्यालया वर्तन्ते चापि विहारसंस्कृतशिक्षासंस्थानाधीने सहस्रं विद्यालयाः। उपर्युक्ततथ्यैरेतत्प्रमाणीभवति यद्भारतभूमौ साम्प्रतिककालीनसंस्कृतसाहित्यस्यावस्था कियती समृद्धिं समवाप्नोति। एतदपि सत्यं यद्भारतदेशश्चिराय संस्कृतकाव्यरचयितॄणां कृते उर्वरक्षेत्रमिति। तथाहि अभ्युन्नतिमार्गं गतायामस्यामवस्थायां संस्कृतस्य प्रतिप्रदेशं सहस्रशः कवयितारः अनुदिनं काव्यानि कुर्वन्ति। अतः 'संस्कृतं नाम मृतभाषेति' दुर्वचने ये खलु विश्वसन्ति तेषां कृते मदुपदेशः–

'न मृता, न म्रियते, न मरिष्यति वे'ति। अक्षयोऽयं निधिः सर्वथा सर्वदाध्येयः सम्मान्यो विकासनीयश्च।

भारतवर्षस्य अर्वाचीनसंस्कृतसाहित्यम्
(विंशतिप्रदेशानां परिसंख्यानानुसारम्)

भारतवर्षस्य उत्तर-दक्षिण-पूर्व-पश्चिमभेदेन विंशतिराज्यानाम् आधुनिक-संस्कृतसाहित्यस्यावस्था कियती समृद्धतरेति विचार्यते –

(१) उत्तरभारतस्यार्वाचीनसंस्कृतसाहित्यम्

भारतस्य उत्तरदिशो राज्येषु जम्मुकाश्मीर-पाञ्जाव-हरियाणा-दिल्ली-हिमाचलप्रदेश-उत्तरप्रदेश-उत्तराखण्डानामाधुनिकसंस्कृतसाहित्यं सुपुष्टं वर्तते ऊनविंश-विंशैकविंशशताब्दीष्वपि।

१.१. जम्मु-काश्मीरराज्ययोरर्वाचीनसंस्कृतसाहित्यम्

जम्मुप्रदेशे केचित् विश्रूताः संस्कृतकवयः साम्प्रतं साहित्यं विरचयन्ति। ते च यथा –

कवयितारः	सारस्वतकृतयः	काव्यभेदः
१. सुखदेवशास्त्री (१८९२-१९८२)	दुर्गास्तुतिः[२३३]	काव्यम्
	श्रीजितमलचरितम्	चरितकाव्यम्
	श्रीनेहेरुचरितम्	चरितकाव्यम्
	श्रीहैममरनाथकथा	कथाकाव्यम्
	भारतसहस्रनाममहास्तोत्रम्	स्तोत्रकाव्यम्
२. केदारनाथशास्त्री (१८९२-१९८०)	तौसीशतकम्[२३४]	शतसङ्ख्येयश्लोकपरिमित-'तौषीशता'भिधः पद्यमयो निबन्धस्तौषीस्तुत्यात्मकः
	भारतविजयमहाकाव्यम्	महाकाव्यम् (भारतपाकिस्तानयोः युद्धपरिप्रेक्षितम्)
३. कविराजभोलानाथः (१९०५-१९७८)	राजतरङ्गिनीपरिशिष्टम्	काव्यम्
४. श्रीरामकृष्णशास्त्री	ताराचरितम्	चरितकाव्यम्
	विद्यानुरागी रणवीरः	काव्यम्
	इन्दिराशतकम्[२३५]	शतककाव्यम्
	शेखशतकम्	शतककाव्यम्
	नेहेरुशतकम्	काव्यम्
	चण्डदेवचरितम्	चरितकाव्यम्

[२३३] त्रयोदशसर्गसम्पूर्णं काव्यम्, यत्र जम्मुप्रदेशस्येतिवृत्तं वर्णितम्।
[२३४] तौसीशतकम् – धर्मार्थट्रष्ट-रिसार्-व-पब्लिकेशन ब्राञ्च, जम्मूः, १९९६।
[२३५] इन्दिराशतकम् – श्रीरामप्रकाशनम्, जम्मूः, १९९४।

	स्वतन्त्रोत्तरभारतम्	गद्यकाव्यम्
	अभिनवदुर्गादर्शनम्	–
	सुप्रभातम्	मासिकपत्रिका
	राजदुहिता	कथा
	दुग्गरोद्धारः	कथा
	कादम्बरीकथासारः[२३६]	गद्यकाव्यम्
५. गङ्गादत्तविनोदः	व्यङ्ग्योक्तयः	श्लेषधर्मिकवितासंग्रहः
६. विहारीलालशास्त्री	परशुरामायणम्	सप्तशतं श्लोकानां संग्रहः
७. नहेद-अविदिः (१९६१)	देवालयस्य दीपः[२३७]	'चिरागे देर' इत्यस्य ग्रन्थस्य संस्कृतानुवादः

काश्मीरप्रदेशेऽपि नैके कवयो राराज्यन्ते, ये खलु निजकारयितृप्रतिभावशादेव काव्यानि नाटकानि कथाश्च विरचयामासुः। तेषु –

१. वल्जिनाथपण्डितः

दार्शनिकरूपेण 'स्वातन्त्र्यदर्पणमिति' काश्मीरशैवदर्शनोपरि शास्त्रीयग्रन्थं विरचितवान्।

२. बदरीनाथकाल्ला

१९३१ खृष्टाब्दे जनिं लब्ध्वा छात्रसंसदि लब्धकीर्तिः अभूत्। तेन 'विश्लेषणात्मकं काश्मीरि-संस्कृतभाषयोस्तुलनात्मकमध्ययनमिति' ग्रन्थो विरचितः। तथा च, तेन 'काश्मीरक्रन्दनम्[२३८]' (खण्डकाव्यम्), 'काश्मीरसौरभ'मिति काव्यद्वयमपि ग्रथितम्।

३. विश्वनाथरेओपादः

१८९० ईशवीयाब्दे लब्धजन्मायम्। स हि ४५९ मितश्लोकात्मकं 'श्रद्धानन्दचरित'मिति चरितकाव्यं विरचितवान्। तथा च, 'विश्वेश्वरस्मृति'रिति

[२३६]कादम्बरीकथासारः – दक्षिणभारतमुद्रणालयः, हैदराबादः, १९७४।

[२३७]देवालयस्य दीपः – राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, २००८।

[२३८]काश्मीरक्रन्दनम् – प्रभाकररामरत्नशास्त्री (प्रकाशकः), बाजार-भुलियान, दिल्ली, १९९८।

धर्मशास्त्रमुपरि ग्रन्थमपि लिलेख।

४. नेलकान्तगुर्टूः

काश्मीरशैवदर्शनस्यानुवादकः 'साम्बपञ्चाशिका', 'स्पन्दकारिके'ति द्वयं तथा च 'श्रीहर्षेश्वरमाहात्म्यम्', 'अमरनाथमाहात्म्य'मिति चरितात्मककविताद्वितयं विरचितवान्।

१.२. पाञ्जावराज्ये आधुनिकसंस्कृतसाहित्यम्

१. अमिरचन्द्रशास्त्री

१९१८ खृष्टाब्दे पाञ्जावराज्यमलंञ्चकार स्वजनुषा शास्त्रिपादः। ऋषिकुलहरिद्वारस्य घूटरझा तद्गुरुः। छात्रजीवनस्यादावेव संस्कृते स काव्यानि ग्रथितुं प्रारभत तथा च गुरुणा स 'बालकवि'रित्युपाधिना भूषितः। श्रीलालबाहादुरशास्त्रिसंस्कृतविद्यापीठे सोऽध्यापनां कुर्वन्नासीत्।

'गीतिकादम्बरी' हि शास्त्रिमहाभागस्य निर्वाचितानां गीतानां संकलनम्। १९२७खृष्टाब्दतः १९४०तमवर्षं यावत् संस्कृतहिन्दीभाषाभ्यां स बह्व्यः कविताः विरचयामास। तस्य 'नेहेरुचरितमहाकाव्य'[२३९]मिति १९९० ईशवीये वर्षे दिल्लीतः प्रकाशितमभूद्, यत्र पण्डितनेहेरोः आत्मजीवनं वर्णितम्। १९६९ खृष्टाब्दे दिल्लीतः प्रकाशितो गीतिकादम्बरीति काव्यग्रन्थः खलु कवेरस्य प्रथमं साहित्यकर्म। तत्र द्वादश अध्यायाः विलसन्ति– १. गीतिकादम्बरी २. रसकल्पतरुः ३. हितकल्पतरुः ४. संगीतवृन्दावनम् ५. स्तुतिकादम्बरी ६. चरितकादम्बरी ७. व्याख्यानकादम्बरी ८. प्रशस्तिकादम्बरी ९. पूर्तिकादम्बरी चेति। गीतिकादम्बर्यां शब्दार्थ-भाव-कल्पनानामनन्यसम्बन्धः समभिद्योतितः। तथाहि राधावल्लभेनोक्तम् –

"They revive the diction of *Śankarācāryays Capra-pañjarikā* and *Mohamudgara*, adopt the pattern of *Jayadeva's Aṣṭapadīs* and yet come nearer to the Padas of medieval Hindi poets like *Suradāsa*."[२४०] इति। तेन गद्यकाव्यानामप्यनुवादः कृतः।

[२३९]नेहेरूचरितमहाकाव्यम् – लालबाहादुरशास्त्रिसंस्कृतविद्यापीठः, नईदिल्ली, १९९०।

[२४०]A Bibliography of Modern Sanskrit Writings, p. 44.

नेहेरुमहाभागस्य मृत्योरुत्तरं तैः बहवः शोधप्रबन्धाः कृतयश्च रचिताः तज्जीवनमुपरि। तस्य चानूदिताः ग्रन्थास्तावत्– 'भारतीयसंस्कृतेर्मूलं संस्कृतम्', 'आधुनिकयुगस्य निर्माता पण्डितनेहेरुः', 'श्रद्धाञ्जलि'श्चेति। अनेन 'परशुरामविजयशतक'मिति काव्यं कानपुरस्थशिक्षकप्रकाशनतः १९९१ ईशवीयाब्दे प्रकाशि। भारतीयसंविधानस्य संस्कृतानुवादोऽपि तेन विहितः। अर्वाचीनसंस्कृतसाहित्ये तस्यानवद्यं योगदानं सर्वदा सर्वैर्नम्रशिरसाङ्गीकृतम्।

२. सुदर्शनकुमारशर्मा

सुदर्शनकुमारः पाञ्जावराज्यस्य सर्वकारीयमहाविद्यालये प्रवाचकत्वेन अध्यापनाञ्चकार। ऐतिहासिकसांस्कृतिकविषयान् अवलम्ब्य तेन सारस्वतकर्माणि कृतानि। तद्यथा– 'श्रीगुरुनानकचरितम्', 'बृहद्रथपुष्यमित्रम्', 'शरभावधम्', 'सुमित्रमित्रदेवञ्चे'ति एकाङ्कनाटकत्रितयं तथा च उच्छ्वासचतुष्टयोपेतं 'वीरवैरागिचरितम्'[२४१] इति गद्यकाव्यम्।

१.३. हरियाणाप्रदेशस्यार्वाचीनसंस्कृतसाहित्यम्

पाञ्जावस्यैकांशं पृथक्कृत्य १९६६ ईशवीयाब्दे हरियाणाप्रदेशस्य जन्माभूत्। द्वादशशताब्द्याः पूर्वं यावदस्य प्रदेशस्य भौगोलिकावस्थानं नाज्ञातमासीत्। आजमीर-मिउसियाम्-इत्यस्य अरनोरजचौहानेन (Arnoraj Chauhan) वर्णितम् – 'Carrying arms into Haritanaka (Haryana)'। हिरियाणाशब्दस्यार्थो भूमिर्या हरिद्वर्णीयशस्यैः पूर्णेति। धर्मीय-सांस्कृतिक-राजनैतिक-सामाजिक-साहित्यादिप्रेक्षापटे भारतवर्षे हरियाणाराज्यमेकं गुरुत्वपूर्णं केन्द्रमित्यत्र नास्ति संशयः। प्राचीनकालत एव राज्यस्यास्य विद्वद्वराः पण्डिताः संस्कृतसाहित्यप्रपञ्चं स्वकसृष्टिधर्मितया गवेषणाकार्यैश्च क्रमेणैव समलञ्चक्रुः। वैदिकयुगोत्तरसमये मनुः, वेदव्यासः, हर्षवर्धनश्चेति संस्कृतधुरन्धराः पण्डिताः प्रदेशेऽस्मिन् उषित्वा तेषां सारस्वतकार्यं साफल्येन चक्रुः। अपि च, केचन जैनमुनयोऽपि विशिष्टाः कवयितारः कानिचित् संस्कृतकाव्यानि ग्रथितवन्तः षष्ठशताब्द्याः पूर्वे युगे। हरियाणाराज्यस्य सा धारा निरवच्छिन्नत्वेन तौयधावद्यापि

[२४१] वीरवैरागिचरितम् – पर्वानुस्थलीयः, १९९५।

प्रवाहिता वर्तते। विशेषेणाधुना तस्याः धारायाः गतिः क्रमेणैव विवर्धिता।

स्वाधीनतोत्तरकाले आधुनिकाः संस्कृतकवयितारः स्वस्वकारयितृप्रतिभया आधुनिकसंस्कृतसाहित्यं पल्लवितवन्तः। वर्तमाने काले उत्तरभारतस्य प्रदेशस्थाः कवयः मौलिकं विश्लेषणात्मकञ्च साहित्यं रचयन्ति। न केवलं संख्यागतदिशा, परं मानगतदृष्ट्या मौलिकसंस्कृतसाहित्यविरचनं ध्रुवमेवाशाव्यञ्जकम्। भारतस्य उत्तरपूर्वभागयोः संस्कृतसाहित्यं त्रेधा विभजयितुमलम् – मौलिकसंस्कृतसाहित्यम्, प्रभावपुष्टसंस्कृतसाहित्यम्, अनुवादसाहित्यञ्चेति। तत्र प्रभावपुष्टे साहित्यवर्गे व्याख्यानमूलकप्रबन्धाः, गवेषणाकार्यम्, टीकाश्चान्तर्भवन्ति। न केवलं प्रादेशिकभाषाभ्यः, वैदेशिकभाषाभ्यश्चोपादानानि संगृह्य भारतस्यास्य भागस्य कवयितारोऽनुवादमूलकानि काव्यानि कुर्वन्ति। एतानि काव्यानि प्रादेशिकभाषाणां येन केनचित्साहित्येन समं प्रतिस्पर्धितुमर्हन्ति। अध्यायस्यास्यांशेऽहम् उत्तरभारतस्य हरियाणाप्रदेशस्यार्वाचीनसंस्कृतसाहित्यकाराणां सूक्ष्मेक्षिकया विवरणं प्रदास्यामि –

१. स्वामी हीरादासः

स्वामिनो रामरत्नस्य शिष्यत्वेन जगति प्रसिद्धः हरिदासः ऊनविंशशताब्द्याः संस्कृतकविष्वेकतमो बभूव। स 'दादूरामोदयाख्यं' महाकाव्यमेकं प्रणीतवान्। काव्यमिदं मुम्बाइप्रदेशात्प्रकाशितमभूत् १८९० ईशवीयेऽब्दे। सत्यव्रतशास्त्रिणा तस्य 'हरियाणा के आधुनिक संस्कृत साहित्यकारा' नामके प्रबन्धे कवेरस्योल्लेखः कृतः। कविरयं १९०३ खृष्टाब्दे पञ्चत्वं गतः।

२. पण्डितसीतारामशास्त्री

राजस्थानराज्ये १८६४तमे वर्षे जनिं लब्ध्वापि परवर्तिनि काले हरियाणायाम् उवास सीतारामशास्त्री। स हि श्रीसनातन-धर्म-संस्कृत-महाविद्यालयस्य तथा च हरियाणा-ब्रह्मचर्याश्रमस्य प्रतिष्ठातृरूपेण प्रसिद्धोऽभूत्। स यास्काचार्यस्य 'निरुक्तं' तथा च 'श्रीमद्भगवद्गीता'ञ्चोपरि हिन्दीभाषया टीकाद्वयं, संस्कृतभाषया 'साहित्योद्देशः' (१९१३) हिन्दीगिरा 'साहित्यसिद्धान्त'श्चेति साहित्यसमालोचनात्मकग्रन्थद्वयं विरचितवान्। कविस्तथा चायं समालोचकः १९३७ ईशवीयाब्दे परलोकं गतः।

३. विद्याधरः

हरियाणाया यिन्दमण्डले लब्धजन्मायं वैदिकपण्डितः वाराणसीस्थ-हिन्दु-विश्वविद्यालयस्य वेदविभागस्य प्रधानाध्यापकपदमलंकुर्वाणः 'देवयाज्ञिकपद्धतिः', 'श्राद्धसारः', 'उपनयनपद्धतिः', 'वास्तुशान्तिपद्धति'रिति बहून् वैदिकग्रन्थान् विरचितवान्।

४. पण्डितहरदत्तशास्त्री

षड्विंशतिसर्गोपेतस्य 'मस्तनाथचरित'स्य महाकाव्यस्य विरचनं कृतं हरदत्तशर्मणा। १९७० खृष्टाब्दे काव्यस्यास्य प्रकाशनमभूत्। ग्रन्थेऽस्मिन् महाकाव्यमुपरि योगीशङ्करनाथफलेग्राहिकृता संस्कृतटीका सन्निविष्टा।

५. छज्जुरामविद्यासागरः

१८८५तमे वर्षे कुरुक्षेत्रनगरे जनिं लब्ध्वापि हरियाणाया यिन्दजिल्लायां स्थानं परिवर्त्य स्थायिभावेन साहित्यकर्मारब्धवान् छज्जुरामविद्यासागरशास्त्री। तस्य सारस्वतकृतयो निम्ने कालप्रकाशनालययोरुल्लेखपूर्वकं प्रस्तूयन्ते–

सारस्वतकृतयः	प्रकाशस्थानम्	कालः
१. सुलतानचरितम् (चित्तोरस्य महीपालस्य इतिहासवर्णनपरकम्)	देहरादुनः	१९५०
२. दुर्गाभ्युदयम् (सप्ताङ्कविशिष्टनाटके महिषासुरेण सह युद्धे दुर्गाया विजय इति विषयमुपजीव्य रचितम्)	दिल्ली (सुमेर-ब्रदर्स)	१९३४
३. छज्जुरामायणम् (नाटकम्)	अप्रकाशितम्	–
४. साहित्यबिन्दुः (काव्यतत्त्वविषयकः)	दिल्ली	१९६१
५. कुरुक्षेत्रमाहात्म्यम्	–	–
६. शिवकथामृतम् (महाकाव्यमेकाशीत्यधिकनवशतश्लोकयुतम्)	दिल्ली (बगीची माधोदासः)	१९७४
७. परशुरामदिग्विजयम् (द्वादशसर्गविशिष्टं महाकाव्यम्)	मेरुटः, दिल्ली	१९६९
८. विबुधरत्नावली	दिल्ली	१९६४
९. विद्यासागरी (काव्यप्रकाशमुपरि टीका)	–	–

महाकविरयं पृथ्वीं परित्यज्यामृतालोकं गतः १९७८ तमे वर्षे।

६. पण्डितशिवरामशीशरामः

हरियाणाप्रदेशस्य वेरलाग्रामे १९११ खृष्टाब्दे जनिं लेभे शिवरामशीशरामः। स जीवद्दशायां महाकाव्यद्वितयं – 'गान्धिचरितकाव्यम्' तथा च 'नेहेरुवंशमहाकाव्य'ञ्चेति विरचितवान्। 'हरियाणावैभव'मिति कविता रचिता तेन। कवितेयं प्रचरद्रूपतां गता १९७२ तमे खृष्टाब्दे।

७. वनमालिदासशास्त्री

१९०८ खृष्टाब्दे हरियाणाप्रदेशस्य हिसारग्रामे लब्धजन्मायं वनमालिदासशास्त्री कानिचित् विशिष्टानि काव्यानि विरचितवान्। तानि यथा– 'श्रीकृष्णानन्दमहाकाव्यम्'[२४२], 'हरिप्रेष्ठमहाकाव्यम्' (१९७६, वृन्दावनः), 'श्रीसख्यसुधाकारः' (१९७५, वृन्दावनः), 'श्रीराधारमणशतकम्', 'श्रीवनमालिप्रार्थनाशतकम्' (वृन्दावनः, १९७५,), 'श्रीभक्तनाममालिका' तथा च 'माधवसिद्धान्तकणिका'।

८. सत्यदेववशिष्ठः

१९१२ खृष्टाब्दे पञ्जावे जनिं लब्ध्वापि हरियाणाप्रदेशस्य भवानीनामके स्थाने स्थायिरूपेण उवास। स सृष्टिधर्मिप्रतिभया आधुनिकसंस्कृतसाहित्यं विभूषयति स्म। 'सत्याग्रहनीतिकाव्यम्', (१९५८, मन्त्री-रामलाल-कपूर-ट्रष्ट्, सोनीपतः, वहाल्गरः), 'नारीतत्त्वदर्शनञ्चे'ति (१९६८, भवानी) मौलिकग्रन्थौ सत्यदेववाशिष्ठेन विरचितौ।

[२४२] कृष्णानन्दमहाकाव्यम् – कृष्णानन्दस्वर्गाश्रमः, वृन्दावनः, १९७४।

अपि च, विष्णुसहस्रनामोपरि 'सत्यभाष्यमि'ति टीका व्यरचि तेन।

९. हजारिलालशर्मा

१९१२ तमे वर्षे लब्धजन्मायं कविः स्वकारयितृप्रतिभया व्यलिखद् बहूनि काव्यानि। तानि च यथा–

१. सद्दर्शन-सिद्धान्तप्रक्रियाद्वैतवादश्च (संस्कृतश्लोकाः)

२. शिवप्रतापविरुदावली (द्वादशाधिकशतं श्लोकैर्निर्मितं खण्डकाव्यम्, रोहतक्, १९७३)

३. संस्कृतमहाकविदिव्योपाख्यानम् (वि.श.– २०२८)

४. इन्दिराविजयवैजयन्ती[२४३] (शतककाव्यम्)

५. हकीकतरायनाटकम्[२४४] (एकाङ्करूपकम्)

६. कादम्बरीशतकम् (रोहतक, १९७४)

७. महर्षिदयानन्दप्रशस्तिशतकम् (वि.श. – २०१५)

८. सगुणब्रह्मस्तुतिशतकम् (रोहतक, १९७५)

९. चारुचरितामृतबिन्दुः

१०. पञ्चीकरणम् (शङ्कराचार्यकृतस्य पञ्चीकरणसिद्धान्तस्य संस्कृतटीका)

११. मदनमोहनमहिम्नस्तोत्रम्

१२. देवेन्द्रविरुधावली (असम्पूर्णम्)

१३. शिवशतकम् (शिवभक्तिविषयाश्रितं काव्यम्)

१४. इन्दिराविजयप्रशस्तिशतकम् (रोहतक, १९८१)

१५. परशुरामविजयवैजयन्ती (रोहतक, १९८२)

१६. रामह्रदतीर्थमाहात्म्यम् (वि.श.– २०३४)

१७. इन्दिराप्रशस्तितिलकम्[२४५]

[२४३] इन्दिराविजयवैजयन्ती – सोनीपतः, हरियाणा, १९७६।

[२४४] हकीकतरायनाटकम् – यिन्दः, हरियाणा (समयः अनङ्कितः)।

[२४५] इन्दिराप्रशस्तितिलकम् – सोनीपतः, हरिणाया, १९७४।

१८. देवीशतकम् (जगदम्बीदेवीवर्णनपरम्, पाण्डुलिपिरूपं परमसम्पूर्णम्)

१९. काव्यप्रकाशतत्त्वसुधा (असम्पूर्णा काव्यप्रकाशटीका)

१०. आचार्यविद्यानिधिः

विद्यानिधिः पानिपत्-मण्डले १९११ ईशवीयाब्दे समजायत। स तस्य कारयितृप्रतिभया बहूनि काव्यानि विरच्य संस्कृतसाहित्यप्रपञ्चमलंकृतवान्। तदीयाः मौलिकाः ग्रन्था यथा–

१) दयानन्दचरितम् (रोहतकः, १९७३)

२) संक्षिप्ते रामायणमहाभारते (रोहतकः, १९७०)

३) श्रीगान्धीचरितम् महाकाव्यम् (अप्रकाशितम्)

४) गुरुब्रह्मानन्दस्तोत्रम् (कुरुक्षेत्रम्, १९८६)

५) विश्वकर्माचरितम् (असम्पूर्णम्)

६) भक्तफूलसिंहचरितम् (अप्रकाशितम्)

११. श्रीसत्यदेववर्मा

१९१८ खृष्टाब्दे कुरुक्षेत्रमण्डले जन्म जग्राह श्रीसत्यदेववर्मा। अर्वाचीनसंस्कृत-साहित्ये तस्य योगहदानं प्रमाणयन्ति तत्कृतमौलिककाव्यानि –

क) शिवसमाधिरूपकम् (१९५८)

ख) शिवशेखरकम् (१९६८)

ग) इन्द्रशेखरकम् (१९६३)

घ) संस्कृतं कुराणम् (१९८४, दिल्ली)

ङ) कलमा-अजान-रोजादयः (१९७६)

च) श्रीकेशवचरितम्

छ) संस्कृतमुकुरणम्

१२. चन्द्रभानुशास्त्री

१९१८ ईशवीयाब्दे लब्धाजन्मायं कविः 'गाङ्गेयमहाकाव्य'मिति १९८६ तमे वर्षे सोनीपतस्थानतः प्रकाशितवान्।

१३. पण्डितभिक्षारमशास्त्री

कुरुक्षेत्रवास्तव्योऽयं कविः नैकानि चरितकाव्यानि रचयामास। तानि च यथा –

क) जवहरजीवनचरितम्

ख) गान्धीचरितम्

ग) भृगुकाव्यम्

घ) मदनमोहनजीवनचरितम्

ङ) पटेलचरितम्

१४. हरणमदत्तशास्त्री (१८४३-१९१५)

वैयाकरणोऽयं स्वकारयितृप्रतिभाबलादेव षोडशसर्गोपेतं 'हरणमामृत'मिति महाकाव्यं ग्रथितवान्। काव्यमिदं हरणमदत्तस्य पितामहस्य आध्यात्मिकजीवनपूरितम्।

हरियाणाराज्ये एतान् कविवरानतिरिच्य नैके अल्पख्याताः कवयः सन्ति, ये स्वप्रतिभया काव्यानि कृतवन्तः कुर्वन्ति च। तेषां कवीनां नामानि सारस्वतकृतयश्चोल्लिख्यन्ते–

कवीनां नामानि	सारस्वतकृतयः	कालः स्थानञ्च
१. विद्याधरधस्माना (१९११)	मुक्तकमञ्जरम् पञ्चजन्यम् संसारहासः	अम्बाला, १९८१ तत्रैव, १९७५ अप्रकाशितः
२. सुधीकान्तभरद्वाजः	अर्पणम् विरहस्तुतिमाल्यम् निदर्शनम् (एकाङ्कनाटकम्) अङ्गीकरणम् (एकाङ्कनाटकम्)	रोहतकः[२४६], १९८५ तत्रैव, १९८६ –

[२४६]संक्रान्तिप्रकाशनम्।

३. निगमबोधतीर्थः	हरियाणावैभवम् श्रीशङ्कराचार्यचरितम्	– चरितकाव्यम्
४. लक्ष्मणसिंह-आग्रवालः	१. कालरात्रिः २. विज्ञानगीतम् (खण्डकाव्यम्) ३. पद्यपुष्पवाटिकः ४. रामरसायनम् (भक्तिकाव्यम्) ५. अभिनववीणा (काव्यसंग्रहः) ६. ऋतम्भरा (काव्यम्) ७. कुटुम्बिनी (लघुकाव्यम्)	बल्लभगढः, १९७७ फरिदावादः, १९८३ – बल्लभगढः, १९८९ तत्रैव, १९८९ तत्रैव, १९९० तत्रैव, १९८७
५. शान्तिदेवी रथी[२४७] (कवयित्री)	इन्दिराप्रशस्तिशतयकम्	हरियाणासाहित्य-अकादेमी, १९९२
६. रामेश्वरदत्तशर्मा	दिव्यदृष्टिः (पद्यकाव्यम्) हरियाणासंस्कृतवृत्तम् (समीक्षात्मकग्रन्थः) अनुभूतिः (काव्यसंग्रहः) ब्राह्मणसमाजः	हरियाणासंस्कृतसम्मेलनम्, भिवाणी, १९८८ तत्रैव, १९८२ आर्यप्रकाशनम्, भिवानी, १९७४ –
७. रामनाथशास्त्री	हर्शिकोद्गारः	१९४८

[२४७]सप्तमाध्याये कवयित्रीणां सारस्वतप्रतिभाविषये विस्तरेण चर्चा विद्यते।

	भामिनीमानभङ्गम्	१९४९
	प्रहेलिकाशतकम् (शतककाव्यम्)	१९८४
	शिक्षाशुद्धा	१९८५
	गोविन्दशतकम् (शतककाव्यम्)	–
	बुद्धलीलाविलासम् (विलासकाव्यम्)	–
	विकटकविकाव्यम्	–
८. श्रीमदनलालभर्मा	विचारवीथी (षोडशगद्यबन्धसंग्रहः)	रोहतकः, १९८३
	रूपारूपे	तत्रैव, १९८८
	गिरिकर्णिका	तत्रैव, १९८९
	उच्छवासानां प्रतिच्छाया	दिल्ली, १९९६
९. रामप्रसादशास्त्री	त्रिवेणी (कवितासंग्रहः)	–

१.४. दिल्लीस्थमर्वाचीनसंस्कृतसाहित्यम्

भारतवर्षस्य राजधान्यां दिल्ल्यां साम्प्रतिककालस्यार्वाचीनसंस्कृतसाहित्यं काव्यनाटकादिरूपैः पुष्पपल्लवैः पल्लवितम्। किन्तु भारतस्यान्यराज्येभ्यः संस्कृतपण्डिताः कवयश्च दिल्लीं समागत्य सारस्वतसाधनां कुर्वन्तः आसन् कुर्वन्ति च। फलतो परिमाणदृष्ट्या च मानगतदिशेतरराज्यापेक्षया दिल्लीप्रदेशस्यार्वाचीनसंस्कृतपृष्ठभूमिः सर्वापेक्षया प्रशस्ता प्रशस्या च। निम्नोक्तसूच्या दिल्लीवास्तव्यानां कविवराणां नामानि तेषाञ्च सारस्वतकृतयः प्रस्तूयन्ते –

कवयः	**सारस्वतकृतयः**
१. लक्ष्मीधरकल्ला (१८९१-१९९३)	गुरुशिष्यसंवादः यं शैवा समुपासते

	भगवतो यीसस्य पार्वतीशिक्षा
२. प्रभुदत्तशास्त्री (१८९२)	भारतभूमिचरितम्[२४८] गणपतिसम्भवम्[२४९] (महाकाव्यम्) श्रीरामकीर्तिकौस्तुभम् महिम्नस्तोत्रम् राष्ट्रभव्यामृतम् (खण्डकाव्यम्) धन्वन्तरिजन्मामृतम् गान्धिनान्दीश्राद्धामृतम् चर्खावन्दनामृतम् संस्कृतवाग्विजयम्[२५०] (रूपकम्) संस्कृतवाक्सौन्दर्यामृतम् राष्ट्रध्वजामृतम् झाँसीश्वरीशौर्यसम्भवम् पूर्वभारतम्[२५१] (महाकाव्यम्) राष्ट्रकाव्यामृतम्[२५२]
३. चारुदेवशास्त्री (१८९६-१९८७)	श्रीगान्धीचरितम्[२५३]
४. माधवाचार्यशास्त्री (१८८७-१९७९)	कवीरचरितम् दृष्टान्तदिग्दर्शनम्
५. परमानन्दपाण्डेयः (१९००)	गणराज्यचम्पूः महावीरतीर्थङ्करचम्पूः

[२४८] भारतभूमिचरितम् – भारतोदयपत्रिका, १९६७।
[२४९] गणपतिसम्भवम् – दिल्ली, १९६८।
[२५०] संस्कृतवाग्विजयम् – इम्पीरियाल-बैकँ कलोनी, दिल्ली, १९४२।
[२५१] पूर्वभारतम् – मानसरोवर मेरठ, १९७४।
[२५२] राष्ट्रकाव्यामृतम् – चाँदनी चौक, दिल्ली, १९५६।
[२५३] श्रीगान्धीचरितम् (गद्यप्रबन्धः) – देववाणीपरिषद्, दिल्ली, १९८९।

	दासगुरुचम्पूः
६. कृष्णदत्तभरद्वाजः (१९०८)	नेहेरुसूत्राणि पद्यपुष्पाञ्जलिः विष्णुसूत्रम्
७. रमेशचन्द्रशुक्लः (१९०९-१९९५)	गान्धीगौरवम्[२५४] (काव्यम्) लालबाहादुरशास्त्रिचरितम् गीतमहावीरम्[२५५] सुगमरामायणम्[२५६] चारुचरितचर्चा[२५७]
८. सत्यभूषणयोगी	लेलिनकाव्यम्
९. टि.वी.परमेश्वर-अय्यरः (१९१५)	आभाणकमञ्जरी[२५८] सत्कथामञ्जरी सदाशयसमुच्चयः[२५९] (आङ्गलसूक्तीनां पद्यानुवादः) साहित्यकौतुकम्[२६०] (काव्यसंग्रहः) पञ्चरत्नमणिमालिका श्रीमद्भगवद्गीतापादस्तभः
१०. भवानीशङ्करत्रिवेदी (१९२०-)	कर्मकाण्डप्रकाशः शङ्करप्रकाशः

[२५४]गान्धीगौरवम् – संस्कृतपरिषद्, आलीगढ, १९६९।
[२५५]गीतमहावीरम् (खण्डकाव्यम्) – शारदासदनम्, मुज्जफ्फरनगरम्, १९७५।
[२५६]सुगमरामायणम् (महाकाव्यम्) – देववाणी परिषद्, दिल्ली, १९७८।
[२५७]चारुचरितचर्चा (जीवनपरिचयः) – सुधाकमलग्रन्थालयः, मुज्जफ्फरनगरम्, १९७७।
[२५८]आभाणकमञ्जरी – देववाणीपरिषद्, नई दिल्ली, १९८०।
[२५९]सदाशयसमुच्चयः – तत्रैव, १९८१।
[२६०]साहित्यकौतुकम् – तत्रैव, १९८३।

	मोक्षमूलवैदुष्यम्[२६१] (नाटकम्)
११. विद्यानिधिपाण्डेयः (१९२५)	दृष्टः स्वतन्त्रतासंग्रामः[२६२] (गद्यम्)
१२. शङ्करदेवः अवतारे (१९२१)	नारीगीतम्[२६३] जीवनमुक्तकम्[२६४]
१३. सत्यदेवचौधुरी (१९२०-)	सरला वासन्ती वानरिका मुक्तमालिका
१४. रामकरणशर्मा (१९२७-२०१८)	सन्ध्या[२६५] (काव्यसंग्रहः) कविता[२६६] (काव्यसंग्रहः) शिवशुकीयम्[२६७] पाथेयशतकम्[२६८] वीणा[२६९] शेमुषी[२७०] शिवसहस्रनामशतकम् दीपिका[२७१]

[२६१]मोक्षमूलवैदुष्यम् – आर्यभारती, दिल्ली, १९८१।
[२६२]दृष्टः स्वतन्त्रतासंग्रामः – राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, १९६१।
[२६३]नारीगीतम् – साहित्यप्रकाशनम्, दिल्ली, १९८५।
[२६४]जीवनमुक्तकम् – साहित्यसहकारः, दिल्ली, १९८९।
[२६५]सन्ध्या – नागप्रकाशकः, दिल्ली, १९८७।
[२६६]कविता – प्रतिभाप्रकाशनम्, दिल्ली, २००५।
[२६७]शिवशुकीयम् – नागप्रकाशनम्, दिल्ली, १९८७।
[२६८]पाथेयशतकम् – तत्रैव, १९८८।
[२६९]वीणा – तत्रैव, १९९०।
[२७०]शेमुषी – प्रतिभाप्रकाशनम्, दिल्ली, २००९।
[२७१]दीपिका – शारदा पावलिकेशन हाउस, दिल्ली, १९९२।

	मानसी[२७२] सर्वंसहा[२७३] करुणा[२७४] सर्वमङ्गला[२७५] गगनवाणी[२७६] सीमा[२७७] रायीशः
१५. सत्यव्रतशास्त्री[२७८]	श्रीरामाकीर्तिमहाकाव्यम्[२७९] विश्वमहाकाव्यम् थाइदेशविलासम्[२८०] श्रीबोधिसत्वचरितम्[२८१] (काव्यम्) श्रीगुरुगोविन्दसिंहचरितम्[२८२] बृहत्तरं भारतम्[२८३] (काव्यम्) इन्दिरागान्धीचरितम्[२८४] स्थर्मण्यदेशः सुतरां विभाति[२८५]

[२७२]मानसी –प्रतिभाप्रकाशनम्, दिल्ली, २००२।
[२७३]सर्वंसहा – तत्रैव, २०१०।
[२७४]करुणा – तत्रैव, २००७।
[२७५]सर्वमङ्गला – नागप्रकाशनम्, दिल्ली, १९९६।
[२७६]गगनवाणी – प्रतिभाप्रकाशनम्, दिल्ली, १९९८।
[२७७]सीमा रयीशश्च – नाग पावलिसार्स, दिल्ली, १९८७, १९९४।
[२७८]१९३० खृष्टाब्दस्य सेप्टेम्बरमासस्य ऊनत्रिंशद्दिनाङ्के लब्धजन्मायम् साहित्य-अकाडेमी-ज्ञानपीठ-पद्मश्रीप्रभृतिभिः सम्मानैः भूषितः जीवत्किंवदन्तीरूपः संस्कृतजगतीतले अयं कविवरः।
[२७९]श्रीरामकीर्तिमहाकाव्यम् – व्यांकक, १९९०।
[२८०]थाइदेशविलासम् – इष्टार्न बुक् लिंकार्स, दिल्ली, १९७५।
[२८१]श्रीबोधिसत्वचरितम् – दिल्ली, १९६०।
[२८२]श्रीगुरुगोविन्दसिंहचरितम् – गुरुगोविन्दसिंह-फाउण्डेशन्, पातियाला, १९६७।
[२८३]बृहत्तरं भारतम् – सरस्वतीसुषमापत्रिका, वि.स. – २०१४।
[२८४]इन्दिरागान्धीचरितम् – भारतीयविद्याप्रकाशनम्, दिल्ली, १९७६।
[२८५]स्थर्मण्यदेशः सुतरां विभाति –अखिलभारतीयसंस्कृतपरिषद्, लक्ष्णौ, १९७६।

	सुक्तिसाहस्री पत्रकाव्यम्[२८६] (भागद्वयोपेतम्)
१६. श्रीकृष्णसेमओयालः	पीयूषः[२८७] (काव्यम्) इन्दिराकीर्तिशतकम्[२८८] हिमाद्रिपुत्राभिनन्दनकाव्यम्[२८९] (शतककाव्यम्) महाप्रयाणम् सर्वमङ्गलाशतकम्[२९०] भीमशतकम्[२९१] भक्तिरसामृतम्[२९२] भाग्वैभवम्[२९३] हनुमत्सुप्रभातम्[२९४] बुद्धशतकम् श्रीकृष्णकाव्यामृतम्[२९५] श्रीरवीन्द्रकाव्यकुसुमाञ्जलिः[२९६] संस्कृतलघुनाटकसंग्रहः[२९७]

[२८६]पत्रकाव्यम् – इष्टार्न-बुक्-लिंकार्स, दिल्ली, १९७४।
[२८७]पीयूषः – तत्रैव, १९८२।
[२८८]इन्दिराकीर्तिशतकम्-भारतीयभाषासङ्गमः, दिल्ली, १९७६।
[२८९]हिमाद्रिपुत्राभिनन्दनशतकम्-श्रीहेमवतीनन्दनबहुगुणाजन्मदिवससमारोहसमितिः, दिल्ली, १९८०।
[२९०]सर्वसमङ्गलाशतकम्- कालीशिलाप्रकाशनम्, दिल्ली, १९८७।
[२९१]भीमशतकम् – संस्कृत-अकाडेमी, दिल्ली, १९८१।
[२९२]स्तोत्रकाव्यम् (१९९६)।
[२९३]भाग्वैभवम् – राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, १९९८।
[२९४]हनुमत्सुप्रभातम् – कालीशिलाप्रकाशनम्, दिल्ली, १९९०।
[२९५]काव्यम्, दिल्ली, २००२।
[२९६]श्रीरवीन्द्रकाव्यकुसुमाञ्जलिः – दिल्ली-संस्कृत-अकाडेमी, दिल्ली।
[२९७]संस्कृतलघुनाटकसंग्रहः – दिल्लीसंस्कृत-अकाडेमी, नई दिल्ली, २००२।

	बिन्सरमहेदेवस्तोत्ररत्नावली[२९८] दयानन्दशतकम्
१७. आत्मरामफोन्दरी (१९४४-२०००)	दागरेश्वरं प्रति सूक्तिसंग्रहः खटमलस्याक्रमणम् कलियुगदेवीपूजनम् विगता राष्ट्रदेवता सूक्तिसंग्रहः
१८. नोदनाथमिश्रः (१९४४)	नवमालती[२९९] (लघुनाटिकाचतुष्टयसंग्रहः) आमन्त्रितदुःखम् कुर्यास्तदा मङ्गलम्
१९. कृष्णनारायणपाण्डेयः (१९५०)	मानवताविजयम्[३००] गोस्वामी[३०१] (उपन्यासः)
२०. आशुतोषदयालमाथुरः (१९५२)	राजा प्रकृतिरञ्जनात् कृषिमित्कृषिस्व उत्तरसीताचरितम् कथारोचनम्
२१. रुद्रदेवत्रिपाठी	नेहेरुचरितम् राजेन्द्रचन्द्रोदयचम्पूः[३०२] इन्दिराकीर्तिकौमुदी श्रीचतुर्वेदचरितचम्पूः

[२९८]स्तोत्रावली, (२००२)।
[२९९]नवमालती – नागप्रकाशन, दिल्ली, १९९७।
[३००]मानवताविजयम् – प्रज्ञा प्रकाशन, लक्ष्णौ।
[३०१]गोस्वामी – प्रज्ञाप्रकाशन, लक्ष्णौ, समयोऽनङ्कितः।
[३०२]चम्पूकाव्यम्, (१९६५)।

	(चम्पूकाव्यम्)
२२. गुरुदयालशर्मा	मुक्तककाव्यम् काव्यामृतधारा[३०३]
२३. आनन्दवर्धनरामचन्द्ररत्नपारखी	कुसुमलक्ष्मीः[३०४] सम्बादमाला (एकादशकथोपकथनानि)
२४. महेन्द्रकुमारशास्त्री	पितृशतकम् गुरुकुलमहत्त्वशतकम्
२५. श्रीमधुरशास्त्री	बालिकाविंशतिः (कथासंग्रहः)
२६. कविरत्नश्रीऔमप्रकाशठक्कुरः	गीतमञ्जरी[३०५] अमृतपाषाणम्[३०६] (काव्यम्) इन्द्रधनुः[३०७] (मुक्तककाव्यम्) नीतिकथामकरन्दः[३०८] (ललितकथासंग्रहः) ईषत्कथानिकुञ्जम्[३०९] (कथासंग्रहः) प्रेरणापारिजातम्[३१०] कथामन्दाकिनी[३११] काव्यविलासः (२००८)

[३०३]काव्यामृतधारा – पञ्जावी बाग्, दिल्ली, १९७२।
[३०४]उपन्यासः, (१९६१)।
[३०५]गीतमञ्जरी – देववाणीपरिषत्, दिल्ली, १९९२।
[३०६]अमृतपाषाणम् – दुर्वा (अङ्कः – २, १९९९)।
[३०७]इन्द्रधनुः – सुरभिप्रकाशनम्, दिल्ली, १९९३।
[३०८]नीतिकथामकरन्दः – अनिलप्रकाशनम्, दिल्ली, १९९५।
[३०९]ईषत्कथानिकुञ्जम् – सुरभिप्रकाशनम्, दिल्ली, २००७।
[३१०]प्रेरणापारिजातम् – तत्रैव, दिल्ली, १९९८।
[३११]कथामन्दाकिनी – उत्तरप्रदेशसंस्कृतसंस्थानम्, लक्ष्णौ, १९९८।

	गर्भभञ्जनम् (अप्रकाशितम्)
२७. आचार्यवेदानन्दझा	त्रिपथगाकाव्यम्[३१२]
२८. मेधाव्रतशास्त्री	ब्रह्मचर्यमहत्त्वम्[३१३] (काव्यम्) ब्रह्मचर्यशतकम्[३१४] (शतककाव्यम्) ब्रह्मर्षिविरजानन्दचरितम्[३१५] (काव्यम्) लालबाहादुरशास्त्रिप्रशस्तिः

१.५. संस्कृतसाहित्ये हिमाचलप्रदेशस्य योगदानम्

१. दिवाकरदत्तशर्मा

भारतीयज्योतिषशास्त्रे प्रौढः पण्डितोऽयं कविरूपेणापि ख्यातिमगात्। अयञ्च राष्ट्रपतिपुरस्कारेण सम्मानितः। 'दिव्यज्योति'रिति संस्कृतगवेषणापत्रिकाप्रकाशनेनायं प्रसिद्धः। तेन विरचिताः प्रबन्धाः 'विचारमृतमिति' ग्रन्थे प्रकाशिता वर्तन्ते।

२. दुर्गादत्तजी

कवयिता दुर्गादत्तः १९१७ खृष्टाब्दे नलटिग्रामवास्तव्यः हिमाचलप्रदेशस्य। तेन 'रक्षा संस्कृतव्याकरणमिति' महाकाव्यम् (१९७२), 'वत्सले'ति काव्यशास्त्रीयनाटकम् (१९७५), 'राष्ट्रपथप्रदर्शनम्'(कृष्ण ब्रदर्स्, कांगड़ा, १९६७), 'त्रिञ्जक्तमिति' नाटकम् (१९८२), 'वियोगवल्लरीति' गद्यम् (१९८७), 'बृहत्सप्तपदी'ति सप्तकथानां संग्रहः (१९९१), 'तर्यणी' (१९७०), मधुवर्षणम् (१९७२, मन्दाक्रान्ताच्छन्दोबद्धम्) विरचितानि। एतेन प्रमीयते कविरयं स्वकारयितृप्रतिभया ख्यातोऽभूत्।

[३१२]त्रिपथगाकाव्यम् – नागप्रकाशनम्, दिल्ली, १९९७।
[३१३]ब्रह्मचर्यमहत्त्वम् – विश्वम्भरवैदिकपुस्तकालयः, झजर, २०१२ (वि.)।
[३१४]ब्रह्मचर्यशतकम् – वैदिकसाहित्यसंसद्, दिल्ली, २०१० (वि.)।
[३१५]ब्रह्मर्षिविरजानन्दचरितम् – विश्वम्भरवैदिकप्रकाशनम्, भुवनेश्वरम्, १९७४।

३. आचार्यशालिग्रामशर्मा

शालिग्रामशर्मा १९१८ खृष्टाब्दे दैहिकेदराग्रामे जातजन्मा। धर्मशास्त्र-न्यायादिशास्त्राध्ययनेन सममयं काव्यमौलिकग्रन्थान् विरच्य प्रख्यातोऽभूत्।

एतान् व्यतिरिच्य साम्प्रतं काव्यकृत्सु ड. केशवशर्मा, आचार्यकेशवशर्मा, ओम्प्रकाशसारस्वतः, सुरेशकुमारशर्मा चेति कवयितारः प्रमुख्याः।

१.६. संस्कृतसाहित्ये उत्तरप्रदेशीयानां योगदानम्

कवीनां नामानि	सारस्वतकृतयः	काव्यभेदः
१. सत्यदेवशास्त्री (१९०३-१९८४)	आञ्जनेयचरितम् (वाराणसी, १९६४)	चरितकाव्यम् विषयः – हनूमान्
२. ब्रह्मानन्दशुक्ला (१९०१-१९७०)	नेहेरुचरितमहाकाव्यम्	अष्टादशसर्गोपेतं महाकाव्यम्
३. सुधाकरशुक्लः (१९१३-१९८५)	१.भारतीस्वयंवरम् २. गान्धीसौगन्धिकम् ३. स्वामिचरितचिन्तामणिः[३१६]	द्वादशसर्गविशिष्टं महाकाव्यम् एकविंशतिसर्गोपेतं महाकाव्यम् षोडशसर्गसम्पूर्णं महाकाव्यम्
४. रामजी उपाध्यायः (१९२०-)	१. द्वा सुपर्णा[३१७] २. सीताभ्युदयम्[३१८] ३. सत्यहरश्चन्द्रोदयः[३१९]	उपन्यासः नाटकम् उपन्यासः

[३१६]स्वामिचरितचिन्तामणिः – कविकुलायः, दतिया, मध्यप्रदेशः, १९८८।
[३१७]द्वा सुपर्णा – सागरविश्वविद्यालयः, सागरः, मध्यप्रदेशः, १९६२ (देवभारतीप्रकाशनम्, एलाहवादः, वि.स. २०२०)।
[३१८]सीताभ्युदयम् – भारतीयसंस्कृतिसंस्थानम्, वाराणसी, १९९८।
[३१९]सत्यहरश्चन्द्रोदयः – भारतीयसंस्कृतिसंस्थानम्, वाराणसी, १९८२।

	४. कैकेकीविजयम्[३२०]	नाटकम्
	५. अशोकविजयम्[३२१]	नाटकम्
५. उमाशंकरशर्मात्रिपाठी (१९२२-१९८२)	१. ओमरखय्यामभारती[३२२]	अनुवादकाव्यम्
	२. सूक्तामृतम्	गान्धिजीवनाश्रितं महाकाव्यम्
	३. क्षत्रपतिचरितम्[३२३]	शिवाजिजीवनाश्रितं महाकाव्यम्
	४. अहं राष्ट्री	देशीयनायकानां वन्दनात्मककाव्यम्
	५. भारतीगीतम्	गीतानां संग्रहः
	६. रसभारती	श्लेषात्मकरचनासंग्रहः
	७. कवीरस्य धर्मतत्त्वानुवादः	अनुवादमूलकम्
६. पद्मशास्त्री (१९३९)	१. स्वराज्यम्[३२४]	१. पञ्चसर्गयुतं खण्डकाव्यम्
	२. विश्वकथाशतकम्	२. शतककाव्यम्
	३. पद्यपञ्चतन्त्रम्	३. पद्यकाव्यम्
	४. लेलिनामृतम्[३२५]	४. लेलिनजीवनाश्रितं महाकाव्यम्
	५. संस्कृतकथाशतकम्[३२६]	५. कथासंग्रहः
८. भास्कराचार्यत्रिपाठी	१. लक्ष्मीस्वयंवरम्	१. नाटकम्

[३२०]कैकेकीविजयम् – तत्रैव, १९९९।
[३२१]प्रकाशनकालः – वि.स. २०५७।
[३२२]महात्मागान्धिनः पञ्चशतोक्तीनां संस्कृतानुवादः।
[३२३]क्षत्रपतिचरितम् – काशिविद्यापीठः, वाराणसी, १९७२।
[३२४]स्वराज्यम् – गोपालपुरारोड, जयपुरम्, १९९३।
[३२५]लेलिनामृतम् – विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशियारपुर, १९७३।
[३२६]संस्कृतकथाशतकम् – रचनाप्रकाशनम्, जयपुरम्, २००५।

(१९४२)	२. अजाशती[३२७]	२. खण्डकाव्यम्
	३. मत्युकम्[३२८]	३. शतककाव्यम्
	४. निर्झरिणी[३२९]	४. कवितासंग्रहः
	५. निलिम्पकाव्यम्	५. कवितासंग्रहः
	६. स्नेहसौविरम्[३३०]	६. नाटकम्
९. प्रभुदत्तस्वामी (१९१४)	१. पूर्वभारतम्[३३१]	एकविंशतिसर्गोपेतं महाकाव्यम्
	२. मौर्यचन्द्रोदयम्	विंशतिसर्गसम्पूर्णं महाकाव्यम्
१०. शिवाजीउपाध्यायः	१. शतकत्रयम्[३३२]	शतककाव्यम्
	२. सौन्दर्यकारिका[३३३]	अलंकारग्रन्थः
	३. नाट्यपञ्चरत्नम्[३३४]	एकाङ्कसंग्रहः
	४. राष्ट्रगौरवम्[३३५]	रूपकम्
	५. संस्कृतकथाकुञ्जम्[३३६]	कथासंग्रहः
११. मनुदेवभट्टाचार्यः[३३७]	१. श्रीविशुद्धवैभवम्	महाकाव्यम्
	२. श्रीकवीरवैभवम्	महाकाव्यम्
	३. श्रीरामकृष्णचरितामृतम्	महाकाव्यम्

[३२७]अजाशती – नाग पाब्लिसार्स्, दिल्ली, २००२।
[३२८]काव्यमिदं विरच्य साहित्य-अकाडेमीपुरस्कारेण सभाजितः भास्कराचार्यत्रिपाठी।
[३२९]निर्झरिणी – नागप्रकाशकः, दिल्ली, १९९७।
[३३०]स्नेहसौविरम् – नागप्रकाशकः, दिल्ली, १९९७।
[३३१]पूर्वभारतम् – मेरठः, १९७४।
[३३२]शतकत्रयम् – श्रीलालबाहादुरशास्त्रिसंस्कृतविद्यापीठम्, दिल्ली, १९९७।
[३३३]सौन्दर्यकारिका – वाराणसेयसंस्कृतसंस्थानम्, १९९९
[३३४]नाट्यपञ्चरत्नम् – सारदासंस्कृतसंस्थानम्, वाराणसी, २००६।
[३३५]राष्ट्रगौरवम् – सूर्योदयः – ८, १९९१।
[३३६]संस्कृतकथाकुञ्जम् – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९९।
[३३७]मनुदेवभट्टाचार्याः कृष्णयजुर्वेदीयास्तैत्तिरीयशाखीयास्त्रिप्रवरीयाः आपस्तम्बसूत्रीयाः मूलतः दाक्षिणात्येषु पञ्चद्राविडेषु विशिष्टाः सन्तोऽपि साम्प्रतं पञ्चगौडान्तर्गता वङ्गीयब्राह्मणाः सन्ति।

	४. स्थानिवत्काव्यम्	व्याकरणकाव्यम्
	५. अर्थवत्काव्यम्	व्याकरणकाव्यम्
	६. आदिरन्त्येन सहेताकाव्यम्	व्याकरणकाव्यम्
	७. विदेशवैभवम्	खण्डकाव्यम्
	८. शृङ्गारशृङ्गाटकम्	खण्डकाव्यम्
	९. पातिव्रत्यविजयम्	खण्डकाव्यम्
	१०. आर्यमर्यादम्	रूपकम्
	११. वैयाकरणविनोदम्	रूपकम्
	१२. उदात्तवलिराजम्	रूपकम्

१२. अभिराजराजेन्द्रमिश्रः

"अभिराजो राजेन्द्रः जौनपुरजनपदस्थे द्रोणीपुरग्रामे २००० विक्रमाब्दे पौषशुक्लपञ्चम्यां जनिमलभत। शैशव एव दिवङ्गते पितरि नानाकष्टततिं साहं साहं विविधसङ्घर्षसमवायसङ्कुलं जीवनमेतस्य समजनि।१९६४ ईशवीयाब्दे प्रयागविश्वविद्यालयात्प्रथमश्रेण्यां समस्तसङ्काये सर्वप्रथमं स्थानमधिगम्य संस्कृतेन स्नातकोत्तरपरीक्षामयमुदतरत्। तत्रैव स प्रवाचकपदं समलंकृतवान्। वर्षद्वयमयम् अयम् इण्डोने देशे यवद्वीपे उदयनविश्वविद्यालये अतिथिप्राध्यापकत्वेनोवास। संस्कृतसाहित्यमस्य अष्टादशकाव्यप्रबन्धाः प्रकाशितचरा विभूषयन्ति, येषु नव पुरस्कृताः। 'जानकीजीवनम्, 'नाट्यपञ्चगव्यम्, 'चतुष्पाठीयम्', 'नाट्यपञ्चामृतम्', 'छिन्नमस्ता' (नाटकानां संग्रहः), कथासंग्रहः तस्य मौलिककाव्यत्वेन परिगण्यन्ते। विशेषेणोल्लेखार्हं यत् 'एकं सद्विप्रा बहुधा वदन्ती'ति नाटके तेन स्मृतिदृश्यविधिः (Flash Back) संप्रयुक्तः। हिन्द्यां भोजपुर्यामपि प्रचुरमयं वाङ्मयं पुरश्चकार। नाट्ये महाकाव्ये मुक्तकेषु गीतिषु गलज्जलिकासु कजरीप्रभृतिलोकगीतेषु कथासु चास्य दक्षा लेखनी अप्रतिहतमबाधं विपुलं नानाविधं साहित्यमसृजत्। यवद्वीपस्य रामायणं कविरयं देवनागरीलिप्यन्तरपुरस्सरमनुवादं विहितवान्। थाईभाषायां संस्कृतसाहित्येतिहासः

नैकेऽन्ये च ग्रन्था वैपश्चितीमप्यस्य प्रमाणयन्ति"[३३८]। निम्ने अभिराजस्य काव्य-नाटकादीनां सूची प्रस्तूयते –

१। अकिञ्चनकाञ्चनम् – (एकाङ्कनाटकम्) वैजयन्तप्रकाशनम्, एलाहवादः, १९७४।

२। अभिराजदण्डकम् – (दण्डकसंग्रहः) तत्रैव, २०१०।

३। अभिराजयशोभूषणम् (काव्यशास्त्रम्) – तत्रैव, प्रथमसंस्करणम्, २००६।

४। अभिराजसप्तशती (मुक्तकम्) – तत्रैव, १९८७।

५। अभिराजसहस्रकम् (काव्यसंग्रहः) – तत्रैव, २००१।

६। अरण्यानी (नाटकम्) – (मूलनाटककर्तुः मनोरञ्जनदासस्य ओडियारूपकस्य "अरण्य पसल" इत्यस्य संस्कृतानुवादरूपम्) तत्रैव, १९९९।

७। अरण्यकोक्तिशतकम् (काव्यम्) – तत्रैव, १९७५।

८। आरण्यानी (काव्यसंग्रहः) – तत्रैव, १९९९।

९। आर्यान्योक्तिशतकम् (काव्यम्)– तत्रैव, १९८३।

१०। इक्षुगन्धा (कथासंग्रहः[३३९]) – तत्रैव, १९८६।

११। कनीनिका[३४०] – तत्रैव, २००८।

१२। कस्मै देवाय हविषा विधेम (काव्यसंग्रहः) – तत्रैव, १९९६।

१३। कान्तारकथा (वन्यपशुपक्षीकथा) – तत्रैव,२००९।

१४। कौमारम् (शिशुकाव्यम्) राष्ट्रियसंस्कृतसंस्थानम्, निउ दिल्ली, २००८।

१५। चतुर्थीशतकम् (काव्यम्) – तत्रैव, १९७५।

१६। चतुष्पथीयम् (प्रहसनसंग्रहः) – तत्रैव, १९८३।

१७। चन्द्रशेखरचम्पूः (चम्पूकाव्यम्) – तत्रैव, १९९३।

१८। चर्चरी (काव्यसंग्रहः) – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००४।

---

[३३८]आयतिः, पृ. – ५३।

[३३९]जिजीविषा, सुखशयितपृच्छिका, अनामिका, एकहायनी, शतपर्विका, ताम्बुलकरङ्कवाहिनी, इक्षुगन्धा, भग्नपञ्जरः चेति कथाः।

[३४०]वाग्वधूटी, मृद्वीका, श्रुतिम्भरा, मधुपर्णी इति काव्यानां संग्रहः।

१९। चित्रपर्णी (लघुकथासंग्रहः) – तत्रैव, २००१।

२०। छन्दोऽभिराजीयम् (छन्दःशास्त्रम्) – तत्रैव, १९९९।

२१। छिन्नमस्ता (कथासंग्रहः) – तत्रैव, २०१०।

२२। जानकीजीवनम् (महाकाव्यम्) –, तत्रैव, १९८८।

२३। तीर्थराजचम्पूः (चम्पूकाव्यम्) – तत्रैव, १९८७।

२४। देहलीपरिदेवनम् (एकाङ्करूपकम्) – संस्कृतमञ्जरी, दिल्ली, १९९१।

२५। नाट्यनवग्रहम् (एकाङ्कनाटकसंग्रह) – वैजयन्तप्रकाशनम्, एलाहवादः, २००७।

२६। नाट्यनवरत्नम् (एकाङ्कसंग्रहः) – तत्रैव, २००७।

२७। नाट्यनवार्णवम् (एकङ्कसंग्रहः) – तत्रैव, २०१०।

२८। नाट्यपञ्चगव्यम् – तत्रैव, १९७२।

२९। नाट्यपञ्चामृतम् (एकाङ्कसंग्रहः)– अक्षयवटप्रकाशनम्, एलाहवादः, १९७७।

३०। नाट्यसप्तपदम् (एकाङ्कसंग्रहः)– इष्टर्न वुक लिंकर्स्, दिल्ली, १९९६।

३१। पञ्चकूल्ला (खण्डकाव्यम्) – तत्रैव, १९९५।

३२। पत्रसन्देशचम्पूः (चम्पूकाव्यम्) – तत्रैव, १९८४।

३३। पराम्वाशतकम् (काव्यम्) – एलाहवादः, १९८१।

३४। पुनर्नवा (कथासंग्रहः) – तत्रैव, २००८।

३५। प्रशान्तराघवम् (नाटकम्) – तत्रैव, २००८।

३६। फण्टुसचरितभाणः (नाट्यपञ्चगव्यान्तर्गतः) – एलाहवादः, १९७२।

३७। वालिप्रत्यभिज्ञानशतकम् (काव्यम्) – तत्रैव, १९७५।

३८। वालिविलापम् (काव्यम्) – तत्रैव, १९७५।

३९। वालिद्वीपे भारतीयसंस्कृतिः – तत्रैव, १९९९

४०। मण्डूकप्रहसनम् – तत्रैव, २०००।

४५। मत्तवारणी (गजलसंगहः) – तत्रैव, २००१।

४६। मधुपर्णी (काव्यसंग्रहः) – तत्रैव, २०००।

४७। महालक्ष्मीमुक्तिसंवादः – मूलम् (मराठीरचनाकारः डाः प्रदीपवाद्यः, संस्कृतेन पद्यरूपान्तरम्) – पुणे, २०१०।

४८। मृगगेन्द्रान्योक्तिशतकम् (काव्यम्) – श्रीभद्रं करोदय शिक्षण ट्रस्ट, गोधरा, २००८।

४९। मृद्वीका (काव्यसंग्रहः) – वैजयन्तप्रकाशनम्, एलाहवादः, १९८५।

५०। राङ्गदा (कथासंग्रहः[३४१]) – तत्रैव, १९९२।

५१। रूपरुद्रीयम् (एकाङ्कसंग्रहः) – तत्रैव, १९७७।

५२। वाद्वधूटी (काव्यसंग्रहः) – अक्षयवटप्रकाशनम्, एलाहवादः, १९७८।

५३। वामनावतरणम् (महाकाव्यम्) – तत्रैव, १९९४।

५४। विजयपर्व – संस्कृतभारती, मातामन्दिर गलि झण्डेवालान, निउ दिल्ली, २०११।

५५। विद्योत्तमा (नाटिका) – इस्टर्न वुक लिंकर्स, ५८२५ न्यु चन्द्रावल, जवाहनगर, दिल्ली, १९९२।

५६। वैतरणी (काव्यसंग्रहः) – तत्रैव, २०१०।

५७। शालभञ्जिका (गजलसंग्रहः) – तत्रैव, २००७।

५८। शास्त्रालोचनम् (शास्त्रम्) – अक्षयवटप्रकाशनम्, एलाहवादः, १९९५।

५९। श्रुतिम्भरा (काव्यसंग्रहः) – वैजयन्तप्रकाशनम्, एलाहवादः, १९८९।

६०। संस्कृतशतकम् – तत्रैव, १९९९।

६१। हविर्धानी (गजलसंग्रहः) – तत्रैव, २००९।

१३. हरिदत्तशर्मा

लहरीशङ्करशर्मणः सुयोग्यपुत्रोऽयं हरिदत्तः १९४८ ईशवीयवर्षस्य सेप्टेम्बरमासस्य सप्तविंशतिदिनाङ्के उत्तरप्रदेशस्य हथरस्नामकं स्थानं व्यभूषयत्स्वजनुषा। स एलाहवादविश्वविद्यालये भूतपूर्वप्रधानाध्यापकपदमलंकृत्य संस्कृताध्यापकपदमलंकरोति स्म। कविरयं राष्ट्रपतिपुरस्कारेण सभाजितः।

[३४१] कुलदीपकः, अधमर्णः, कुक्की, काञ्चा, महानगरी, एकचक्रः, पोतविहगौ, सिंहसारिः, राङ्गदा चेति कथानां संग्रहः।

'गीतकन्दलिके'[३४२]ति तथा च 'उत्कलिके'[३४३]ति स्वरचितगीतीनां संग्रहः, 'त्रिपथगा'[३४४], 'आक्रन्दन'[३४५]मिति च नाटकानां संग्रहद्वयं, 'बालगीताली'[३४६]ति शिशुगीतसंग्रहः, 'लसल्लतिके'[३४७]ति नाम्ना कवितासंग्रहश्चापि तस्य सारस्वतकृतित्वेन परिगण्यन्ते। कविरयं दिल्ली-संस्कृत-साहित्य-अकाडेमीपुरस्कारेण सभाजितः लसल्लटिकाग्रन्थार्थम्। 'त्रिपथगे'ति एकाङ्किनाट्यसंग्रहस्य प्रकाशनं १९८७ ईशवीयाब्दे अभवत्। १९९८ तमे वर्षे तस्य रेडिओ-रूपकम् आक्रन्दनम् प्रकाशितमभूद् यत्र 'पञ्चनदपीडनम्', 'एकमेव रक्तम्', 'वृकविक्रोशनम्', 'अबलाबलम्' चेति शीर्षकाङ्कितानि चत्वारि रेडिओ-रूपकाणि संगृहीतानि सन्ति। तत्रत्यानि सर्वाणि रूपकाणि सामाजिकानि सन्ति। त्रिपथगायां 'साक्षात्कार्यम्', 'वधूदहनम्', 'देशदंशनञ्चे'ति नाटकत्रितयं लसति। 'निबन्ध-निकुञ्जमि'ति प्रबन्धसंग्रहस्तेन विरचितः। तेन संस्कृतकाव्यशास्त्रीयभावानां मनोवैज्ञानिकमध्ययनं कृतम्। अत्रेदमुल्लेखार्हं यत् तेन पञ्चाशदधिकानि शोधपत्राणि, दश ग्रन्थाः विरचिताः। आधुनिकलघुकाव्येतिहासे हरिदत्तशर्मा प्रौढः कथाकृद् इत्यत्र नास्ति संशयलवः कश्चित्। काव्यचतुष्टयार्थं कविरयम् उत्तरप्रदेश-संस्कृत-अकाडेमीतः पुरस्कारं प्राप्तवान्।

१४. अवस्थीबच्चूलालः

"ज्ञानोपाह्वः अवस्थीबच्चूलालः १९१८ ईशवीयवर्षे अगस्तमासस्य अष्टमे दिने भुवमवततार। साहित्य-व्याकरणाचार्यत्वेन दर्शन-व्याकरणशास्त्रित्वेन प्रथमश्रेण्याम् अलङ्कृतोऽयं संस्कृतविद्यालयेषु पञ्चवर्षाणि अध्यापयामास। १९४९ ईशवीयवर्षात् १९६७ ईशवीयवर्षं यावत् महाविद्यालयसेवायां हिन्दीप्राध्यापकपदमलञ्चकार। हिन्दीसंस्कृताभ्याम् एम.ए.इत्युपाधिद्वयमपि सम्प्राप्य १९६३ ईशवीये पी.एच्डीत्युपाधिं १९७५ ईशवीयेचाब्दे डी.लिट्.पदवीं महताध्यवसायेन पाण्डित्येन चावाप। विंशतिप्रायः

[३४२]गीतकन्दलिका – गङ्गानाथझा-केन्द्रियसंस्कृतविद्यापीठम्, एलाहवादः, १९८३।
[३४३]उत्कलिके – एलाहवादविश्वविद्यालयः, एलाहवादः, १९८९।
[३४४]त्रिपथगा – तत्रैव, १९८६।
[३४५]आक्रन्दनम् – तत्रैव, १९९८।
[३४६]बालगीताली – तत्रैव, १९९१।
[३४७]लसल्लतिका – राकाप्रकाशनम्, एलाहवादः, २००४।

शोधच्छात्रा अस्य निर्देशे पी.एच्डीत्युपाधिमधिगतवन्तः। कैशोर्यादेव काव्यरचनायां रुचिमसौ प्रकटीचकार।

प्रकाशितेषु ग्रन्थेषु 'काव्य में रहस्यवाद', 'ध्वनिसिद्धान्त तथा तुलनीयसाहित्यचिन्तन', 'भारतीयकाव्यसमीक्षा में ध्वनिसिद्धान्त' इत्यादयो गवेषणापूर्णाः प्रबन्धाः, अप्रकाशितेषु च 'हिन्दीव्युत्पत्तिकोषः', 'तुलसीकोषः', दशसहस्रपृष्ठात्मकश्च 'भारतीयदर्शनशास्त्रबृहत्कोशः' अस्य अगाधप्रतिमपाण्डित्य-पाथोनिधेः मानदण्डाः। 'अर्वाचीनसंस्कृतसाहित्यम्', 'संस्कृतप्रतिभा' 'दूर्वा' चेत्यादिपत्रिकासु संस्कृतकाव्यान्यस्य प्रकाशितानि। 'प्रतीनिनीति' काव्यसंग्रहोऽस्य साहित्याकादेमीपुरस्कारेण सम्मानितः। 'योषासप्ततिरि'ति खण्डकाव्यमप्यस्य कवित्व-पराकाष्ठां प्रमाणयति। अयं कालिदासाकादम्यामुज्जयिनीस्थायामधिष्ठातृपदे कार्यमपि कृतवान्। उज्जयिन्यामेव निवसन् ४।०३।२००५दिनाङ्के महाप्रयाणमकरोत्।"[३४८]

१५. वटुकानाथशास्त्रीखिस्ते

"खिस्तेमहोदयः १९१८ ईशवीयवर्षे नभेम्बरमासस्य त्रिंशत्तारिकायां जनिमलभत। अस्य पितृचरणा नारायणशास्त्रिणः काश्यां पण्डतमण्डले मूर्धायमाना आसन्। म०म०दामोदरलालगोस्वामिभालचन्द्रशास्त्रिप्रभृतिविपश्चिद्वर्याणामयं सुयोग्यः अन्तेवासी खिस्तेमहोदयश्चिरं वाराणसेयसंस्कृतविश्वविद्यालये साहित्यविभागे अध्यापनदायित्वं निर्वहति स्म। दैवपरिणामात् २९।०१।२०००तमे ख्रिष्टाब्दे कविः कीर्तिशेषः संवृत्तः। सूर्योदयपत्रिकास्वस्य रचना भूयसा प्राकाश्यमागताः।"[३४९] अनेन १९८७ ईशवीयाब्दे वाराणस्यां शारदाप्रकाशनसंस्थानतः 'कल्लोलिनी'ति काव्यसंग्रहः प्रकाशितः।

१६. रतिनाथझा

"कविरयं १९२२ ईशवीयाब्दे अगस्तमासस्य पञ्चदशतारिकायां बस्तीजनपदस्य तलपुरवाग्रामं स्वजनुषा अलञ्चकार। काश्यां चिरम् अयम् उवास, तत्रैव व्याकरणार्थ-वेदान्तकेशरीसाहित्यरत्न-साहित्याचार्य-एमए-प्रभृतिपरीक्षा उदतरत्काशीपण्डितपरिषदा

[३४८]आयतिः, पृ. – ३८।
[३४९]तत्रैव, पृ. – २०।

च पण्डितराजोपाधिना सम्मानितः। हिन्दूविश्वविद्यालयस्य प्राच्यविद्यासङ्कायेऽयं पुराणविभागस्य आचार्यत्वेनाध्यापयामास। 'अरविन्दशतकम्', 'मालवीयप्रशस्तिः', 'गान्धीशतकम्', 'महावीराभ्युदयमहाकाव्यम्' असङ्ख्यस्फुटरचनाश्चास्य कवित्वशक्तिं प्रथयन्ति। परमेव यसिकविरुत्तरप्रदेशस्य बस्तीति स्थाने न्यवसत्।"[३५०]

पुनश्च उत्तरप्रदेशस्य अन्ये केचन ख्यातिं भ्रजमानाः कोविदकवयः विलसन्ति, ये स्वकसहजकारयितृप्रतिभया संस्कृतसाहित्यमालापञ्चकं समलङ्कृतवन्तः। अधस्तात् स्थालीपुलाकन्यायेन तेषां सारस्वतकृतीनां तथ्यादिकं प्रस्तूयते –

कवयितारः	**सारस्वतकृतयः**	**काव्यभेदः**
१७. बलभद्रप्रसादशास्त्री (१९२५)	१. नेहेरुयशःसौरभम्[३५१]	द्वादशसर्गसम्पूर्णं महाकाव्यम्
	२. दूताञ्जनेयम्[३५२]	चतुर्दशसर्गोपेतं महाकाव्यम्
	३. सिन्धुराजवधम्[३५३]	पञ्चदशसर्गसम्पूर्णे महाकाव्ये अर्जुनद्वारा जयद्रथवधः वर्णितः।
	४. सैरन्ध्रीनाटकम्[३५४]	नाटकम्
	५. चक्रव्यूहम्[३५५]	चीनयुद्धविषयकं खण्डकाव्यम्
	६. ज्योतिष्मती[३५६]	काव्यम्

[३५०]आयतिः, पृ. – २६।
[३५१]नेहेरुयशःसौरभम् – गोस्वामीप्रकाशनम्, दरदोइ।
[३५२]दूताञ्जनेयम् – वाग्देवताप्रकाशनम्, बरेली।
[३५३]सिन्धुराजवधम् – बालदेवताप्रकाशनम्, बरेली, १९९५।
[३५४]सैरन्ध्रीनाटकम् – नैनीतालमार्गः, बरेली, समयोऽनङ्कितः।
[३५५]चक्रव्यूहम् – गोस्वामीप्रकाशनम्, १९७३।
[३५६]ज्योतिष्मती – अशोकनगरः, बरेली, २००९।

	७. कर्णाभिजात्यम्[३५७]	अष्टाङ्कं नाटकम्
१८. गङ्गाप्रसाद-उपाध्यायः (१८१८)	आर्योदयकाव्यम्[३५८]	एकविंशतिसर्गोपेतं महाकाव्यम्
१९. रक्रिपलुद्विवेदी (१९११)	नलदमयन्तीयम् मयूरदूतम् शिवसम्मोहनम् लोकायनम्	नाटकम् खण्डकाव्यम् खण्डकाव्यम् लोकगीतिसंग्रहः
२०. सुबोधचन्द्रपन्तः (१९३५)	झाँसीश्वरीचरितम्[३५९]	द्वाविंशतिसर्गोपेतम् महाकाव्यम्

एतान् कविवरान् व्यतिरिच्य त्रिपुरारीशरणपाण्डेयः (१९२८), नारायणशुक्ला (१९०८-१९९५), कपिलदेवद्विवेदी, रघुनन्दनशर्मा (१९९२), ओङ्कारनाथत्रिपाठी, व्योमशेखरः (१९३७), ओम्प्रकाशशास्त्री (१९५९), जनार्दनप्रसाद-पाण्डे (१९६२) चेति प्रख्याताः कवयः स्वस्वकारयित्र्या प्रतिभया काव्यानि कुवन्ति अस्मिन् प्रदेशे।

(२) पूर्वभारतीयराज्येष्ववाचीनसंस्कृतसाहित्यम्

२.१. विहारस्याधुनिकसंस्कृतसाहित्ये योगदानम्

क. जानकीवल्लभशास्त्री

"कवितल्लजोऽयं विहारप्रदेशस्य गयाजनपदान्तर्वर्तिनि मैगारग्रामे ५-१-१९१६ दिनाङ्के जनिमलभत। अस्य पितृचरणा रामानुजग्रहशर्मणो विपश्चिदपश्चिमाः स्वयमेनं बाल्ये पाठयामासुः। अष्टादशवर्षीयोऽयं साहित्याचार्यपरीक्षामुदतरत्, काश्यां हिन्दूविश्वविद्यालये चाध्यगीष्ट। आचार्यपरीक्षायामयं विहारोत्कलप्रान्तयोः सर्वप्रथमं

[३५७]कर्णाभिजात्यम् – गोस्वामीप्रकाशनम्, हरदोइ, १९८९।
[३५८]आर्योदयकाव्यम् – कलाप्रेस्, एलाहवादः, १९९५।
[३५९]झाँसीश्वरीचरितम् – गङ्गानाथझा-केन्द्रियसंस्कृतविद्यापीठम्, एलाहवादः, १९७९।

स्थानं लेभे। द्वादशवर्षदेशीयस्यैवास्य संस्कृतकाव्यरचनावल्लरी अङ्कुरिता पल्लविता च।

१९३५ ईशवीयवर्षे 'काकली'[३६०] इति संस्कृतकाव्यसंकलनं प्राकाश्यमानीयायं संस्कृतकाव्यसर्जनाया नूतनां दिशं समुन्मीलयामास। अस्य रचनासु गेयधर्मित्वं, लयः, प्रवाहः, जयदेवादीनामिव सरसमधुरकोमलकान्तपदावली, नवीना अर्थच्छटा, युगबोधः, हिन्दी-काव्यधारायाश्छायावादस्य स्वच्छन्दतावादस्य च विच्छित्तिरिति भूयांसोऽनन्यसामान्यगुणाः स्फुरन्ति। हिन्द्यामपि विपुलं साहित्यमनेन विरचय्य वाग्देव्या अपूर्वमाराधनमकारि। संस्कृते प्रभूतमस्य साहित्यमप्रकाशितं विद्यते।" [३६१]

अनेन कविवरेण मन्दाक्रान्ताच्छन्दसा स्वातन्त्र्यसंग्राममवलम्ब्य 'वन्दीजीवनम्' इति खण्डकाव्यं व्यरचि।

ख. जगन्नाथपाठकः

"सुकविः श्रीजगन्नाथपाठकः फेब्रूयारीमासस्य द्वितीयदिवसे १९३४ ईशवीयवर्षे बिहारप्रान्तस्य सहस्रामग्रामं स्वजनुषा व्यभूषयत्। वाराणस्यां विद्यार्जनाय समागतस्यास्य तत्रैव काव्यप्रतिभा विकाशमाप। छात्रजीवन एवायम् उत्तमखय्यामस्य पारसीकमुक्तकानुप्रेरितैः काव्यबन्धैः कामपि ख्यातिं गतः।

१९८० ईशवीयवर्षे अस्य प्रथमकाव्यसङ्ग्रहः "कापि शायनी"[३६२]ति (संस्कृतगजलसंग्रहः) प्रकाश्यतां गतः, साहित्य-अकाडेमीपुरस्कारेण च गौरवान्वितः। "मृद्वीका"[३६३] (संस्कृतगजलसंग्रहः), "पिपासा"[३६४] (गीतिकाव्यसंग्रहः) इति सङ्ग्रहद्वयेऽस्य लेखनी नूतनभावजगत्समुन्मीलयति; नव्या विधाः संस्कृतकाव्यभूमावतारयति, अभिनवाश्च कल्पनाः पुरस्करोति। हिन्दीभाषायामपि तैस्तैः पाण्डित्यमण्डितैः प्रबन्धैः ललितरम्यरचनाभिश्च पाठकमहाभागः प्रथते। सम्प्रति

[३६०]काकली – संस्कृतनिकुञ्जम्, गया, १९३५।
[३६१]आयतिः, पृ. – ४८।
[३६२]कापि शायनी – गङ्गानाथ-झा-केन्द्रियसंसंस्कृतविद्यापीठम्, एलाहवादः, १९८०।
[३६३]मृद्वीका – वैजयन्तप्रकाशनम्, एलाहवादः, १९८५।
[३६४]पिपासा – गङ्गानाथ-झा-केन्द्रियसंसंस्कृतविद्यापीठम्, एलाहवादः, १९८७।

राष्ट्रियसंस्कृतसंस्थानस्य प्राचार्यपदात्सेवानिवृत्तः प्रयागे निवसति।"[३६५]

अस्य कारयितृप्रतिभाया निदर्शनत्वेन वक्तुकामोऽहं कांश्चित् काव्यग्रन्थान्। ते च यथा – विच्छित्तिवातायनी[३६६] (कवितासंग्रहः), आर्यसहस्रारामम्[३६७] (कवितासंग्रहः), विकीर्णपत्रलेखम् (रूपकम्), जगन्नाथसुभाषितावली (२०११), किरातार्जुनीयम् (महाकाव्यम् अष्टादशसर्गसम्पूर्णम्)।

जानकीवल्लभ-जगन्नाथपाठकान् अतिरिच्य ये केचित् प्रसिद्धाः संस्कृतकवयितारो विहारप्रदेशं स्वरचनाभिः समृद्धवन्तस्तेषां काव्यकर्मणां स्थालीपुलाकन्यायाद् विवरणं प्रस्तूयते –

कवीनां नामानि	सारस्वतकृतयः	काव्यविभागः
ग) रामनाथ-पाठकः	राष्ट्रवाणी[३६८]	देशप्रेमोपजीव्यो गीतिसंग्रहः
घ) भवानीदत्तशर्मा	भारतचरितम् सौमित्रीसुन्दरीचरितम्[३६९]	महाकाव्यम् महाकाव्यम्
ङ) दीनेशप्रसादपाण्डेयः	भारतायनम् मित्रदूतम्	दूतकाव्यम् काव्यम्
च) काशीनाथमिश्रः	१. विद्यापतिशतकम्[३७०] २. कर्णाटराज्यतरङ्गिनी[३७१]	आर्याच्छन्दसा ग्रथितो मौलिककाव्यानुवादः अनुष्टुप्छन्दोबद्धं तरङ्ग-अष्टकविशिष्टम् ऐतिहासिकं काव्यम्

[३६५]आयतिः, पृ. – ४८।
[३६६]विच्छित्तिवातायनी – सासारामः, विहारः, १९९१।
[३६७]आर्यसहस्रारामम् – गङ्गानाथ-झा-केन्द्रियसंसंस्कृतविद्यापीठम्, एलाहवादः, १९९५।
[३६८]राष्ट्रवाणी – आरा, १९५१।
[३६९]सौमित्रीसुन्दरीचरितम् – मुजफरपुरम्, विहारः, १९५८।
[३७०]विद्यापतिशतकम् – जानकीप्रकाशनम्, पाटना, १९९२।
[३७१]कर्णाटराज्यतरङ्गिनी – जर्नल-बुक-एजेन्सी, पाटना, १९९४।

	३. हर्षचरितमञ्जरी[३७२]	हर्षचरितस्य पद्यरूपम्
छ) जयमन्तमिश्रः[३७३]	आर्यपञ्चशतिः काव्यतत्त्वमीमांसा महामानवचम्पूः	मुक्तककाव्यम् काव्यतत्त्वसम्बन्धिनी चरितचम्पूकाव्यम्
ज) महेशझा	सपर्या आर्या	भक्तिगीतिकवितावली चम्पूकाव्यम्
झ) रामशीषपाण्डेयः	इन्दिराशतकम्[३७४] कर्णार्जुनीयम्[३७५] काव्यकादम्बकम्[३७६] प्रहेलिकाशतकम्[३७७] मयूखदूतम्[३७८] शिखावन्दनम्[३७९]	काव्यसंग्रहः नाटकम् काव्यसंग्रहः शतककाव्यम् दूतकाव्यम् नाटकम्
ञ) प्रमोदभारतीयः	सहपाठिनी[३८०]	काव्यसंग्रहः
ट) नोदनाथमिश्रः	नवमालती[३८१]	लघुसंस्कृतनाटिकासंग्रहः

२.२. उत्कलप्रदेशे अर्वाचीनसंस्कृतसाहित्यचर्चा

संस्कृतसाहित्यस्य चर्चा परम्परा वा उत्कलप्रेदेशे बहुप्राचीनकालादेव प्रशंसनीयत्वेन प्रतिष्ठितासीत्। लौकिकसंस्कृतरचनाविषये तत्र प्राप्ताः शिलालेखादय

[३७२]साहित्य-अकाडेमीपुरस्कारेण प्रशंसितो ग्रन्थोऽयम्।
[३७३]जयमन्तमिश्रः विहारप्रदेशान्तःपातिनि हरिपुराख्ये ग्रामे लब्धजन्मा।
[३७४]इन्दिराशतकम् – प्रबोधसंस्कृतप्रकाशनम्, हरमू, राँची, १९८६।
[३७५]कर्णार्जुनीयम् – तत्रैव, १९८९।
[३७६]काव्यकादम्बकम् – तत्रैव, १९९३।
[३७७]प्रहेलिकाशतकम् – तत्रैव, १९९१।
[३७८]मयूखदूतम् – श्यामप्रकाशनम्, राँची, १९७४।
[३७९]शिखावन्दनम् – प्रबोधसंस्कृतप्रकाशनम्, हरमू, राँची, १९८२।
[३८०]सहपाठिनी – मानिकप्रकाशनम्, हरियाणा, १९९९।
[३८१]नवमालती – नागप्रकाशनम्, दिल्ली, १९९७।

एव प्रमाणभूताः। ख्रीष्टजन्मनः सप्तशतवर्षात्परं शिलालेखसम्पर्कीतं परसंख्यानमेकं प्रकाशितमभवत् उत्कलप्रदेशे। तत्राधिका एव गीर्वाणवाण्याम्। वस्तुतः एतदर्थमेव मध्ययुगीयोत्कलशासकवर्गा राजसभायां संस्कृतपण्डितान् नियोजयन्ति। तैः लिखिता रचना एव परवर्तिनि काले संस्कृतस्य सम्यग्रूपेण विविच्यन्ते।

ओडिष्याप्रदेशस्याधुनिकमहाकाव्यानि

उत्कलप्रदेशे महाकाव्यचर्चायाः प्रारम्भो जयदेवश्रीहर्षसमयादेव जातः। प्रायशो द्वादशशताब्द्याम्। महाकविः जयदेवो वैष्णवधर्मं तथा जगन्नाथसंस्कृतिमेव गृहीतवान्, यत् खलु गीतगोविन्दमहाकाव्यरचनायाः पृष्टभूमिरूपेण साहाय्यं कृतवत्। एवं श्रीहर्षकृतनैषधचरितस्यापि प्रभाव उत्कलप्रदेशस्य महाकाव्येषु आपतितः।

जयदेवश्रीहर्षाभ्यां परं त्रयोदशशताब्द्यामाविर्भूतः कृष्णानन्दो नाम कश्चन। स तु नलजीवनमवलम्ब्य 'सहृदयानन्दमहाकाव्यं' विरचितवान्।

चतुर्दशशताब्द्यामुत्कलप्रदेशे महाकविषु अग्रणीः आसीद् दर्पणकारो विश्वनाथकविराजः। साहित्यदर्पणस्य षष्ठपरिच्छेदे महाकाव्यस्य लक्षणव्याख्याप्रसङ्गे स्वयमेव प्रोक्तम्–

"यथा रघुवंश-शिशुपालवधनैषधादयः।
यथा वा मम राघवविलासादिः॥" इति।

दर्पणकारस्य महाकाव्यद्वयं हि 'राघवविलासम्' 'नरसिंहविजयमहाकाव्य'ञ्च। एवम्प्रकारेण उत्कलप्रदेशे महाकाव्यचर्चा प्रचलन्ती एवासीत्।

पञ्चदशशताब्द्यां कविचन्द्र-राय-दिवाकरमिश्रस्याविर्भावो महाकविरूपेण। तस्य काव्यद्वयं हि 'भारतामृतम्' (२३ काण्डात्मकम्), 'अभिनवगीतगोविन्दम्' (१० काण्डात्मकम्)।

षोडशशताब्द्यां प्रसिद्धेषु महाकाव्येषु नारायण-देवभञ्जस्य 'परिणयमहाकाव्यम्' (६ काण्डात्मकम्, कृष्णरुक्मिण्योः प्रेमवृत्तम्) तथा च मार्कण्डेयमिश्रस्य 'दशग्रीवमहाकाव्यम्' (२० सर्गात्मकम्) प्रसिद्धम्।

सप्तदशशतके हलधरमिश्रस्याविर्भावो जातः। तस्य काव्यं नाम 'वसन्तोत्सवमहाकाव्यम्' (२२ सर्गात्मकम्)। अत्र विज्ञानस्य काव्यिकोपस्थापनं

दृश्यते (A poetic presentation of science)। परन्तु अस्य मूले भगवतो जगन्नाथदेवस्य धर्मभावनासीत्। समयस्यास्यापरो महाकविः ज्योतीन्द्ररघूत्तमः। तस्य काव्यं हि 'मुकुन्दविलासमहाकाव्यम्' (१२ सर्गात्मकम्)। अत्र श्रीकृष्णस्य तथा गोपिनीनां प्रेमलीलावर्णनप्रसङ्गे अद्वैतदर्शनस्य भावः परिलक्ष्यते।

अन्यो हि पण्डितनित्यानन्दः। तेन दशसर्गात्मकं 'शिवलीलामृतमहाकाव्यं' तथा 'श्रीकृष्णलीलामृतमहाकाव्यं' विरचितम्। शिवलीलामृते भुवनेश्वरस्य कीर्तिगाथा वर्णितास्ति।

शीतिकण्ठमहाभागस्य 'गीतसीतावल्लभमहाकाव्यम्' अष्टादशशतकीयं काव्यम्। वस्तुतो राज्ञो जनार्दनदेवस्यानुरोधेन काव्यमिदं रचितम्। अत्रायोध्यायां रामचन्द्रस्य राज्याभिषेकवृत्तान्तः कीर्तितोऽस्ति। एवं गोविन्दमिश्रस्य 'प्रद्युम्नसम्भवम्' हि अपरं महाकाव्यम्।

उत्कलप्रदेशस्य राज्ञो मुकुन्ददेवस्य सिंहासनच्युतिर्यदाभवत्, तत्प्रभृति संस्कृतमहाकाव्यधारा उत्कलप्रदेशे मन्दगतिं समवाप। परन्तु विंशशताब्द्यां पुनस्तस्य जागरणं दरीदृश्यते। वस्तुत समयेऽस्मिन् उत्कलप्रदेशस्य संस्कृतचर्चाया नवजागरणमेव। समयेऽस्मिन् धाराद्वयेन महाकाव्यस्त्रोतस्विनी प्रवाहिता –

१. मूलसंस्कृतमहाकाव्यम्

२. अनुवादसाहित्यम् (उत्कलभाषातः संस्कृते अनुवादकार्यम्)

१. मूलसंस्कृतमहाकाव्यम्

'निबद्धमाला'ग्रन्थे अनन्तत्रिपाठिमहोदयस्य प्रबन्ध एकः प्राप्यते। यस्य नाम 'विंशतिशताब्द्यामुत्कलस्य संस्कृतसाहित्यावदानम्' इति। अत्र महाभागेन स्वातन्त्र्योत्तर-संस्कृतमहाकवीनामालोचना कृता। तत्रैव प्राप्यते सदाशिवसंस्कृतविद्यापीठस्य भूतपूर्वशिक्षकेण विश्वनाथमहापात्रेण 'काञ्चीविजयमहाकाव्यं' विरचितम्। काञ्चीविजयमहाकाव्यविषये डा० शर्मणोक्तम्–

'अस्य रचना कविकुलगुरोः कालिदासस्य रचनेव निसर्गसरसा भावप्रवणा वैदर्भीरीतिभासुरा सहृदयमनांस्यर्जयितुक्षमा इति'।

एवं रामनाथनन्दविद्याभूषणः ऐतिहासिकं महाकाव्यमेकं प्रणिनाय। तद्धि 'जयपुरवंशचरितम्'। कविरयं 'शतार्थपद्यं' नाम खण्डकाव्यलेखनेन विख्यातो जातः। एवं गणेश्वरतर्कवाचस्पतिना विरचितं 'पुरुषोत्तमदेवविजयम्'।

अपि च, सरस्वतीश्रीदामोदरशर्मासीत् पण्डितमूर्धन्यः। तस्य सरस्वतीति उपाधिः कनिकाया राज्ञा प्रदत्तः। राज्ञः मते स आसीत् देवीसरस्वत्याः पुरुषरूपः। अस्य कृतिषु नैषधसारः अन्यतमः। ग्रन्थः खलु नैषधचरितस्य सारसंक्षेपः। किञ्च, कनिकाराज्यस्य इतिहासमवलम्ब्य 'कनकवर्षचरितं' नाम महाकाव्यमपि तेन व्यरचि।

गणेश्वररथमहाभागेन (१८९७-१९८५) 'लिङ्गराजायनम्' इति खण्डकाव्यं 'श्रीपुरुषोत्तमचरित'मिति च महाकाव्यं विरच्य ओड़िया-साहित्य-अकाडेमीतः १९७० ईशवीयाब्दे प्रकाशिते। तत्र 'लिङ्गराजायन'मिति काव्ये खण्डद्वयं वर्तते ज्ञानकाण्डस्तथा च विज्ञानकाण्डः। उभयोः खण्डयोः श्लोकास्तावत् द्विशतमिति। 'श्रीपुरुषोत्तमचरित'मिति द्वादशसर्गोपेते महाकाव्येऽस्मिन् गणपतिराजस्य पुरुषोत्तमदेवस्य चरितकथा वर्णिता। ओडिष्याप्रदेशस्य शैव-वैष्णवसंस्कृत्याः प्रभावभावितेन कविना साफल्येन काव्यद्वयं व्यरचि।

पण्डितयतिराजाचार्यः (१९००-१९७९) स्वाधीनतोत्तरभारतवर्षस्य प्रतिभासम्पन्नः कविरासीत्। अनेन सहजया कारयितृप्रतिभया बहूनि काव्य-नाटकादीनि विरचितानि। तद्यथा – 'कलाकरविलासः' (भाणः), 'कंसनिसूदनम्' (व्यायोगः), 'स्यमन्तकाभ्युदयम्' (नाटकम्), 'भगवत्-स्मृति-शतकम्' (स्तोत्रकाव्यम्) चेति। 'भगवत्स्मृतिविलास'[३८२]मिति (१९३२) स्तोत्रकाव्ये विष्णोः माहात्म्यम् विभागाष्टकेन वर्णितम्। 'माधवविलास'मिति पञ्चदशसर्गविशिष्टे महाकाव्ये भक्तिरसेन कृष्णस्य जन्मतः कंसवधपर्यन्तं वृत्तान्ताः भिन्नाङ्गिकेन उपन्यस्ताः। अत्र यथा भक्तिरसस्य प्राधान्यं दृश्यते, तथैव यमकानुप्रासयोरप्यपूर्वप्रयोगो दृश्यते। तथाह्युक्तम् –

"रस-प्रसङ्ग-प्रसर-प्रसन्नतोन्नतोक्ति-काव्य-ग्रथनार्णवनवम्।
हयाननोदार-पदारविन्दयोः समेत्य सेवातराणं तराम्यहम्"॥ इति।

काव्येऽस्मिन् श्रीकृष्णस्य निर्भीकता, रासलीला प्रभृतयश्चित्रिताः सन्ति। मन्ये कविना जयदेव-श्रीहर्षाभ्यां कविभ्यां प्रभाविताः सन्तः काव्यमिदं ग्रथितम्।

[३८२] श्रीभगवत्स्मृतिशतकम् – सारदाप्रेस्, वेरहमपुरम्, ओड़िष्या, १९३२।

विश्वनाथकविराजस्य ‘राघवविलासमहाकाव्य’मिदं माधवविलासस्य नामकरणस्य मूलमिति अरुणरञ्जनमिश्रेण स्वकीये ‘Contemporary Sanskrit Writings in Orissa’[३८३] इति ग्रन्थे उक्तम्।

उत्तर-ओड़िष्याप्रदेशस्य महान् शिक्षकः विद्वान् रामनाथशर्मा (१९०४-१९८१) कवेः ऐतिहासिकं नाटकं पञ्चाङ्कात्मकं ‘चाणक्यविजय’मिति रचितम्। तच्च रामनाथस्य श्रेष्टं साहित्यमेति।

‘दामद्वय’[३८४]मिति (१९७१) कवेरस्य ‘त्रयी’ तथा च ‘मित्रोक्ति’रिति ग्रन्थद्वयस्य समाहारः। तत्र त्रय्यां विभागत्रितयम् – कर्म, ज्ञानम्, भक्तिश्चेति। बुद्ध-शङ्कर-चैतन्यानां जीवनचरितमभिव्यक्तमत्र। अपरतः, ‘मित्रोक्ति’रित्यत्र षष्ठषष्ठिश्लोकबद्धे दूतकाव्ये वृद्धामुद्दिश्य कस्यचिद्वृद्धस्य मानसिकोक्तयो दूतत्वेन कोकिलमुखेन वर्णिताः। कवयितुरस्य चतुश्चत्वारिंशत् श्लोकैः ग्रथितम् आध्यात्मिकं गीतिकाव्यम् ‘आत्मबोधिनीति’[३८५] पारम्परिकसंस्कृतगीतिमूलकम्। तेन विरचितं नाटकपञ्चकमद्यापि अप्रकाशितम् – ‘बाजि राउतः’, ‘प्रायश्चित्तः’, ‘श्रीरामविजयम्’, ‘वेणीसंहारम्’ तथा च ‘हरिश्चन्द्रः’। संस्कृतेन श्लोकबद्धाः चत्वारः कवितासंग्रहाः विरचिताः – ‘महिमस्तवः’, ‘श्रीगान्धी’, ‘प्रणतिः’, ‘पुरातनबालेश्वरम्’ चेति।

पुण्डरीकाक्षमिश्रस्य (१९१८-१९८७) कृतिपञ्चकम् – ‘सुभद्राहरणम्’ (नाटकम्), ‘वाणहरणम्’ (एकाङ्कनाटकम्), ‘समाधानम्’ (एकाङ्कनाटकम्), ‘चेतना’ (एकाङ्कनाटिका) तथा च ‘सुदामाचरितम्’[३८६] (पञ्चसर्गात्मकं काव्यम्)।

स्वाधीनतायाः परवर्तिकाले ओड़िष्याप्रदेशे कश्चन महाकविरागतो, यस्य नाम पण्डितप्रकाण्डः नारायणरथः (१९३१)। अस्य कारयित्री प्रतिभा नियतं स्पन्दनशीला चकास्ति। अनेन रूपकनवतयमलेखि, यद्यथा –

[३८३]अरुणरञ्जनमिश्रः, प्रतिभाप्रकाशनम्, २००६, पृ. – २४।

[३८४]दामद्वयम् – श्रीजगन्नाथप्रेस्, बालेश्वर, १९७१।

[३८५]आत्मबोधिनी – टाउनप्रेस्, बालेश्वरः।

[३८६]सुदामाचरितम् – लोकभाषाप्रचारसमितिः, पुरी।

‘श्रीशङ्कराचार्यः’, ‘भगवान् वादरायणः’[३८७], ‘अत्याश्रमः विश्वप्रणवः’[३८८], ‘निष्ठुरमारीषः’, ‘रत्नाकरवाल्मीकीयम्’[३८९], ‘अतिबड़ी जगन्नाथदाशः’[३९०], ‘कालिदासः’, ‘महात्मा तैलङ्गस्वामी’, ‘एकाङ्किकासञ्चयनम्’ चेति। अपि तेन प्राकाशि काव्यदशकम् – ‘कपोतदूतम्’, ‘नष्टविलासम्’, ‘तीर्थविलासम्’, ‘प्रद्युम्नसम्भवम्’, ‘अभिनवकवितावलिः’ (खण्डत्रयोपेतः), ‘काव्यकवितामञ्जरी’[३९१], ‘विजयानन्दस्यादर्शने’, ‘अवसरविलासम्’, ‘प्रपत्तिशतकम्’, ‘ऋतुभावना’, ‘पद्यत्रयी’[३९२] चेति। कविरयं ‘यत्नपञ्चकम्’, ‘अपूर्णगाथा’[३९३], ‘कौतुकसंग्रहः’ तथा च ‘विविधप्रबन्ध’मिति गद्यकाव्यान्यपि विरचयति स्म।

२. संस्कृते अनुवादमहाकाव्यम्

संस्कृतमहाकाव्यरचनाया अपरा धारा ह्यनुवादः। उत्कलसाहित्यतः संस्कृतसाहित्ये अनुवादो जातो नैकेषां महाकाव्यानाम्। येन संस्कृतमहाकाव्यप्रपञ्चं समृद्धं जातम्। एवमुपेन्द्रवज्रस्य अन्यद् उत्कलमहाकाव्यं ‘वैदेहीशविलासम्’ संस्कृते अनूदितं भागवतप्रसाददेशेन। वस्तुतो महाकाव्यस्य संस्कृतानुवादेन सह काव्यमिदं दुरूहं जातम्। तदर्थमनुवादकेन स्वयं प्रत्येकस्य श्लोकस्य व्याख्या कृता। काव्यस्यास्यापरं वैशिष्ट्यं खलु प्रत्येकस्य चरणस्यादिमो वर्णो वकारः। एवमनुवादकोऽपि संस्कृतानुवादसमये यथायथमेव नैपुण्येन तद्रूपमेव रक्षितम्।

स्वातन्त्र्योत्तरकविषु अपरो हि पण्डिताग्रगण्यो जयकृष्णमिश्रमहाभागः। तस्य चम्पूमहाकाव्यं हि ‘मातृमुक्तिमुक्तावली’[३९४]ति। अत्र भारतमातुः सामाजिक-राजनैतिक-

[३८७]भगवान् वादरायणः, लोकभाषाप्रचारसमितिः, पुरी, १९८८।

[३८८]नारायणरथस्य धार्मिकगुरोः अत्याश्रमविश्वप्रणवस्य जीवनाधारितमङ्कपञ्चकविशिष्टम्।

[३८९]अङ्कचतुष्टयोपेतं रूपकम्, अत्र वाल्मीकिजीवनं वर्णितम्।

[३९०]इह रूपके त्रीण्यङ्कानि तथा च ऊनविंशतिदृश्यानि वर्तन्ते।

[३९१]उपेन्द्रभञ्जस्य वैदेहीशविलास-महाकाव्यान्तर्गतस्य सीताविवाहस्य संस्कृतानुवादः।

[३९२]राधानाथरे-महाभागस्य ‘महायात्रा’, ‘चिलिका’, ‘दरवार’ इति ओडियामूलककाव्यत्रयस्य संस्कृतानुवादः।

[३९३]नारायणानन्दावधूतस्वामिनः रुद्रसुधानिधि इति पद्यस्यानुवादः संस्कृतभाषया।

[३९४]मातृमुक्तावली – ओडियासाहित्य-अकाडेमी, पुरी, २००१।

नैतिकस्वाधीनताः उपवर्णिताः[३९५]।

उत्कलप्रदेशस्यानुवादसाहित्यं सर्वोत्तमं प्रतिभाति स्वाधीनतोत्तरकाले। तत्रोत्कलीया प्रतिभा चिरं प्रगल्भा चकास्ति। तस्मिन्ननुवादक्षेत्रे पण्डित-अनन्त-त्रिपाठीशर्मणो (१९०४-१९८८) भूमिकोल्लेखयोग्या। अथर्ववेदसंहिता-चरकसंहिता-उपनिषत्संग्रह-वात्सायनकामसूत्र-अर्थसंग्रह-वैशेषिकसूत्राणि व्याख्यया पुस्तकाकारेण संकलितान्यनेन। तेन 'संस्कृतीया-प्रशासन-शब्दावली'ति कश्चन दुर्मूल्यो ग्रन्थः प्रकाशितः। तेन शेक्सपीयारस्य नाटकान्यनूदितानि। तद्यथा – 'द्वादशी रात्रिः' (Twelve Night), 'बह्वारम्भे लघुक्रिया' (Much Ado About Nothing), 'वेणीशसार्थवाहः' (The Merchant of Venice), 'यथा ते रोचते' (As you like it), 'हेमलातः' (Hamlet) चेति। प्रसङ्गतः समुल्लेखार्हं यदनेन रचितं मौलिकं खण्डकाव्यं तावद्भगवतो जगन्नाथदेवस्य माहात्म्योपेतं 'नीलाद्रिनाथशतकम्'। कविसम्राजः उपेन्द्रभञ्जस्य 'लीलावती'ति मध्ययुगीयं महाकाव्यम् संस्कृतेन 'लावण्यवती'ति नाम्ना अनूदितम्। अनुवादकर्मेदम् अनन्तत्रिपाठिनः श्रेष्ठम्।

उत्कलस्यापरः प्रख्यातोऽनुवादकस्तावत् उमाकान्तपण्डा (१९३२) राधानाथरे-महाभागस्य 'महायात्रा'[३९६]महाकाव्यस्यालंकारिकदृष्ट्या सार्थकं संस्कृतानुवादञ्चकार। अपि च, स ओड़िष्याराज्यस्य स्वभावकवेः गङ्गाधरमेहेरस्य 'तपस्विनी'[३९७]महाकाव्यस्य संस्कृतानुवादं विहितवान्।

एवं सम्प्रत्यपि केचन उत्कलीयाः कवयस्तेषां साहित्यनैपुण्येन संस्कृतसाहित्य-धारामग्रे प्रसरन्ति। तेषां सारस्वतोपहारेण संस्कृतसाहित्यभाण्डारं समृद्धमभवत् भवति भविष्यत्यपि।

साम्प्रतिककालस्य प्रख्यातेषु कविवरेषु ये खलु मूर्ध्नि राजन्ते, तेषां नामग्राहं सारस्वतकृतीनां समुल्लेखो विधीयते –

[३९५] 'प्रेमोदेभूताश्रुचयरुचिरोन्मुक्तमुक्तावलीयम्।
क्षेमोच्छ्वासैर्भवतु वसुधामुक्तिमुक्तावलीयम्'॥ (२।४।१६)।

[३९६] महायात्रामहाकाव्यम् (संस्कृतव्याख्यायुतम्) – उमाकान्तपण्डा, प्रकाशकः – मन्मथकुमारदाशः, श्यामसुन्दरसंस्कृतमहाविद्यालयः, बालेश्वरः (समयो नोल्लिखितः)।

[३९७] तपस्विनीमहाकाव्यम् (संस्कृतानुवादात्मकम्) – प्रकाशकः लिङ्गराजचौधरी, वेरहमपुरम्, १९९३।

क). केशवचन्द्रदाशः–

उपन्यायविरचनदक्षतायां जगन्नाथसंस्कृतविश्वविद्यालयस्याध्यापकः केशवचन्द्रदाशः (१९५५) आधुनिकसंस्कृतजगति मूर्ध्नि राजते। अयञ्च प्रौढः कविः बहुभिः पुरस्कारैः सभाजितोऽवर्तत। 'प्रणयप्रदीपम्' (१९८०), 'हृदयेश्वरी' (१९८१), 'महातीर्थम्' (१९८३), 'अलका' (१९८६), 'ईशा' (१९९२, पुरस्कृतम्), 'भिन्न-पुलिनम्' (१९९५), 'अन्धस्रोतः' (२००४) चेति केशवचन्द्रस्य श्रेष्ठानि काव्यानि। कथास्वन्यतमास्तावत् 'दिशा विदिशा' (१९८८), 'ऊर्मिचूडा' (१९९५, पुरस्कृतम्), 'शून्यनाभिः' (२०००), 'निम्नपृथिवी' (२००१) चेति। बालकथाद्वयं हि 'महान्' (१९९१), 'एकदा' (१९९१)।

उपन्यासरचनासु तस्य दाक्ष्यं सर्वजनविदितम्। तस्योपन्यासान् उपरि अपि बहवः शोधबन्धा अपि रचिताः समालोचकैः। तस्योपन्यासेषु सामाजिक-सांस्कृतिक-अर्थनैतिक-मनस्तात्त्विकविषयाः प्राधान्यं लभन्ते। तस्य प्रख्याता उपन्यासाः खलु 'पताका' (१९९०), 'तिलोत्तमा' (१९८०), 'शीतलतृष्णा' (१९८३ & २००६), 'प्रतिपदम्' (१९८४), 'आवर्त्तम्' (१९८५), 'अरुणा' (१९८५), 'निकषा' (१९८६), 'ऋतम्' (१९८८, पुरस्कृतम्), 'मधुयानम्' (१९९०), 'अञ्जलिः' (१९९०), 'विसर्गः' (१९९२), 'शिखा' (१९९४), 'शशिरेखा' (१९९४), 'ॐ शान्तिः' (१९९७ , पुरस्कृतम्) चेति।

ख). क्षिरोदचन्द्रदाशः (१९५४)

ओड़िष्यास्थितस्य कटकमण्डले १९५४ खृष्टाब्दे लब्धजन्मायं कविः प्रकृति-जीवनयोः यौवनप्रेमादिविषयानाधारीकृत्य द्व्यधिकशतश्लोकमितं 'तारुण्यशतकमि'ति (१९९१) लिखित्वा ओडिष्यासाहित्य-अकाडेमीपुरस्कारेण सभाजितः। अपि च, राधानाथरथस्य 'चिलिके'ति नाट्यस्य ओडियाभाषातः संस्कृतरूपान्तरणं विद्याप्रकाशनालयतः १९९१ खृष्टाब्दे प्रकाशितम्। किञ्च, कवेः द्वितीयमनुवादात्मकं नाटकं तावत् 'अरण्यशस्यम्' (२०००), यच्च प्रख्यातोत्कलीयनाट्यकर्तुः मनोरञ्जनदासस्य उद्घटनाटकस्य संस्कृतरूपान्तरणम्। अस्मिन् अनुवादात्मके रूपके वर्णितं कस्मिंश्चिदरण्यगृहे प्रेमिक-प्रेमिकाणां मध्ये कथोपकथनम्। क्षिरोदचन्द्रदासस्य

तृतीयमनुवादं खलु ‘रमाकान्तकवितासञ्चयनम्’ (२००१, साहित्य-अकाडेमीतः प्रकाशितम्)। अत्र रमाकान्तरथमहाभागस्य त्रयोविंशतिसंख्यकानाम् ओड़ियाकवितानां संस्कृतानुवादो वर्तते। मौलिककाव्यविरचनापेक्षया अनुवाददक्षतायां तस्य कारयितृप्रतिभायाः उत्कृष्टत्वं ज्ञाप्यते।

ग). प्रफुल्लकुमारमिश्रः

प्रफुल्लकुमारमिश्रः प्रायेण त्रयोदशसंस्कृतकविताग्रन्थान् विरच्य अन्यान् ग्रन्थांश्च सम्पाद्य आधुनिकसंस्कृतपरिसरे स्पर्धितमेकं नाम। कविरयं पुरीनगर्यां १९५४ ईशवीयाब्दे जनिं लब्धवान्। तस्मिन् सहजा कारयित्री प्रतिभा विद्योततेतमाम्। ‘चित्रकुरङ्गी’[३९८] (संस्कृतकवितासंग्रहः), ‘तव निलये’ (षट्चत्वारिंशत्कवितासंग्रहः, १९९८), ‘ब्रह्मनाभिः’[३९९] (विंशतिकवितानां संग्रहः), ‘कोणार्के’[४००] (कोणार्कस्वर्णमन्दिरचित्राणि उपजीव्य कवितासंग्रहः), ‘चित्रङ्गदा’ (महाभारतकथाश्रिता कविता, २००७), ‘चत्वारि शृङ्गाः’[४०१] (उत्तराधुनिककवितासंग्रहः), ‘मनोजङ्गमे’[४०२] (कवितासंग्रहः), ‘तथापि सत्यस्य मुखम्’[४०३], ‘धर्मपदीयं महाकाव्यम्’[४०४] (द्वादशसर्गोपेतं सूर्यमन्दिरकथाश्रितम्), ‘गोधूलिः’[४०५], ‘पत्रप्रिया’[४०६] (पत्रकाव्यम्), ‘चैत्ररजनी’[४०७] (षट्चत्वारिंशत्कवितासंग्रहः) चेति काव्यसंग्रहास्तेषां महाकवित्वं प्रतिष्ठापयन्ति। ‘काव्यमहोदधिः’ (ओडियासंस्कृतसाहित्य-अकाडेमी, कटकम्), ‘कुशभद्रामहाकाव्यम्’ (मान्यताप्रकाशनम्, दिल्ली), ‘खारवेलचरितम्’ (पुरी) चेति

---

[३९८] चित्रकुरङ्गी – भुवनेश्वरम्, १९९५।

[३९९] ब्रह्मनाभिः – स्वर्णप्रकाशनम्, भुवनेश्वरम्, २०००।

[४००] कोणार्के – परिसर-वैविध्य-प्रोत्साहनम्, उत्कलविश्वविद्यालयः, भुवनेश्वरम्, १९९८।

[४०१] चत्वारि शृङ्गाः – प्रतिभाप्रकाशनम्, दिल्ली, २००९।

[४०२] मनोजङ्गमे – उत्कलसंस्कृतगवेषणासमाजः, पुरी, २०१०।

[४०३] तथापि सत्यस्य मुखम् – आर्षविद्याविकाशकेन्द्रम्, भुवनेश्वरम्, २०११।

[४०४] धर्मपदीयम् – (प्रकाशकः) स्वामिनी आत्मप्रज्ञानन्दा, सरस्वती आर्षविद्या विकास केन्द्र, भुवनेश्वरम्, २०१०।

[४०५] गोधूलिः – आर्षविद्याविकाशकेन्द्रम्, भुवनेश्वरम्, २०१२।

[४०६] पत्रप्रिया – पक्षीघर प्रकाशनी, गौरीनगरः, भुनेश्वरम्, २०१३।

[४०७] चैत्ररजनी – हिमालय-पावलिसिं-हाउस, मुम्बाइ, २०१६।

काव्यानि यन्त्रस्थानि वर्तन्ते।

उत्तराधुनिककाव्यरचनाशैल्यां तेषां नाम प्रख्यातम्। तस्य कवितासु मानवीयान्तश्चेतनायाः कलात्मकपल्लवनं प्रतिपदं पाठकान् विमोहयति। स न केवलं संस्कृतकाव्यक्षेत्रे, चापि आङ्गल-ओड़िया-हिन्दीभाषासु स्वकाव्यविरचनदक्षतां दर्शितवान्। तस्यातीन्द्रियकाव्यानि संस्कृतकाव्यजगति आधुनिककवेर्मार्गमेकं संसृजन्ति।

घ). अरुणरञ्जनमिश्रः

उत्कलेषु खोर्द्धाजनपदे भगवान्पुरे १९५९ खृष्टाब्दे लब्धजन्मायं कविः। साम्प्रतं विश्वभारतीविश्वविद्यालये प्रधानाचार्यत्वेनाध्यापनां कुर्वन् आसीत्। बहुविधाः कथाकविताः तेन विरचिताः। तद्रचितकथाः विविधासु पत्रिकासु प्रकाशिता वर्तन्ते। तासु उल्लेखयोग्यास्तावत् ‘पुटककारस्य कथा’(उशती), ‘अज्ञातवनवैश्वानरः’, ‘सा विदिशा सा काञ्चिः’, ‘अस्ताचलस्य चन्द्रिका’, ‘ग्रामस्य नाम घटग्राम’श्चेति। कवितास्वन्यतमास्तावत् ‘सुखिनः’, ‘त्वदनन्तरम्’, ‘अगम्यस्थानम्’, ‘आकाशात् पश्यति चेत्’, ‘रक्तधारा’, ‘गुञ्जाफलसमाकारा’श्चेति। साम्प्रतं कविरयम् ओडियाभाषया कविताग्रन्थान्, अनुगल्पानि, अनुवादात्मककाव्यानि विरचितवान्। अयञ्च ओडिआभाषातोऽनुवादकर्मणि विशेषनिपुणो वर्तते। २०१८ ईशवीयाब्दे ‘तव जवाधरमृन्मयरेखासु’ इति काव्यं गद्यच्छन्दसा प्रेमोपजीव्यानां पञ्चषष्ठिसंख्यकानाम् उत्तराधुनिककवितानां संङ्कलनात्मकं प्राकाशि अनेन कविवरेण।

ङ). बनमालीबिश्वालः (१९६१)

नैकेषां काव्य-कथा-उपन्यास-नाटकानां तथा शोधग्रन्थानाञ्च पत्रिकाणां च सम्पादकोऽयं बनमालीबिश्वालः साम्प्रतिकेषु संस्कृतसाहित्यकारेषु तादृशो कश्चन उत्कलप्रदेशीयो विशिष्टो रचनाकारो यः साहित्ये आधुनिकभाव-बोधसम्प्रेषणे सर्वथा सफलः प्रतीयते। एलाहवादस्थितस्य गङ्गानाथ-झा-राष्ट्रियसंस्कृत-विद्यापीठस्य साहित्याचार्यपदमलंकृतवान्। भगवतो जगन्नाथस्य पारम्परिक-उत्कलाध्यात्मिक-गीतान्यनूद्य धार्मिकानां मानवानाम् आध्यात्मिकभावराजिं चोपायनीकरोति ‘दारुब्रह्म’नामके (२००१) कवितासंग्रहे काव्यात्मकशैल्या रोचिष्णुतया च। समसामयिकसामाजिकविषयानवलम्ब्य बनमालीबिश्वालेन कथाः विरचिताः।

'सङ्गमेनाभिरामा'[४०८], 'व्यथा'[४०९], 'ऋतुपर्णा'[४१०], 'प्रियतमा'[४११], 'वालेन्टाइन-डे-सन्देशः'[४१२], 'यात्रा'[४१३], 'क्वास्ति मे भारतम्' (अप्रकाशितः), 'कश्चित् कान्ता तथा अन्याः कविताः' (अप्रकाशितः), 'बालकवितासंग्रहः' (अप्रकाशितः) चेति मुक्तकशैल्या ग्रथितानि। 'नीरवःस्वनः'[४१४], 'बुभूक्षा'[४१५], 'जिजीविषा'[४१६], 'जगन्नाथचरितम्', 'ईशानः' (अप्रकाशितः), 'दारुभूतो मुरारिः' (अप्रकाशितः), 'गङ्गाष्टकम्' (२०१६) चेति कथासंग्रहे साधारणमानवानां जीवं मनस्तात्त्विक-आर्थिक-सांस्कृतिक-सामाजिकादिविषयत्वेनोपस्थापितम्।

अनुवादसाहित्ये तस्य दाक्ष्यं सत्यमेव संस्मरणीयम्। तेन 'तारा अरुन्धुती' (२००१, गुजराती-हिन्दी-आङ्गलभाषाणां संस्कृतानुवादः), 'पत्रालयः' (२००५, रवीन्द्रनाथस्य कथानुवादः), 'जन्मान्धस्य स्वप्नः' (२०१५, ओड़ियाकथानाम् संस्कृतानुवादः), 'विवेकलहरी' (विवेकानन्दस्य आङ्गल-हिन्दी-वङ्गकवितानाम् अनुवादः) चेति विरच्यन्त।

च). मनमोहन-आचार्यः

उत्कलप्रदेशस्य गीतिकाव्यकृद्रूपेण मनमोहनः प्रसिद्धः। 'पल्लीपञ्चशिके'ति गीतिकाव्ये साधारणग्राम्यजीवनं वर्णितम्। तस्य देशप्रेममूलकानां गीतानां संग्रहः प्रकाशितः 'गीतभारतमि'ति नाम्ना। 'गीतमोहनम्' तथा च 'गीतमिलिन्दमि'ति गीतिकाव्यद्वितयमपि तेन व्यरचि। अपि च, तेन 'शिवानन्दलहरी', 'यतिगीतिशतकञ्चे'ति काव्यद्वितयमध्ये आदिमे ग्रन्थे स्वजीवनेतिहासस्तथा द्वितीये च विंशतिसन्न्यासिनां कथा विनिवेदिताः। सुभाषचन्द्रस्य जीवनमाश्रित्य

[४०८]सङ्गमेनाभिरामा – पद्मजाप्रकाशनम्, एलाहवादः, उत्तरप्रदेशः, १९९६।
[४०९]व्यथा – पद्मजाप्रकाशनम्, एलाहवादः, उत्तरप्रदेशः, १९९७।
[४१०]तत्रैव (१९९९)।
[४११]तत्रैव (१९९९)।
[४१२]सन्देशः – पद्मजाप्रकाशनम्, एलाहवादः, उत्तरप्रदेशः (२०००)।
[४१३]तत्रैव (२०००)।
[४१४]तत्रैव (१९९८)।
[४१५]तत्रैव (२००१)।
[४१६]तत्रैव (२००६)।

'सुभाषचरितमहाकाव्यं' लिखितवान् आचार्यः।

छ). नारायणदाशः (१९७२)

२००९ ईशवीयसंवत्सरे भारतस्य राष्ट्रपतिना महर्षिबादरायणव्याससम्मानेन, २००९ ईशवीयसंवत्सरे लक्षनउस्थ-भाक्तरावदेवरससेवान्यासेन पण्डितप्रतापनारायण-मिश्रस्मृतियुवसाहित्यकारसम्मानेन, २०१४ ईशवीयसंवत्सरे केन्द्रसाहित्येकादम्याः अनुवादप्रशस्त्या, विविधसंस्कृताकादेमीनां विविधानां संस्थानाञ्च विविधसम्मानैः सभाजितस्य डा० नारायणदाशस्य जन्म १९७२ संवत्सरे जुनमासस्य पञ्चविंशतिदिनाङ्के उत्कलप्रदेशस्य गञ्जामजनपदे चाढियापल्लीग्रामे अभवत्। मातुर्नाम श्रीमती मञ्जुलादाशः। पितुर्नाम श्रीमङ्गुलचरणदाशः। आधुनिकसंस्कृतसाहित्ये रुचिमतोऽस्य कवेस्तथा कथाकारस्य समीक्षकस्य सम्पादकस्य च संस्कृतक्षेत्रे महद्योगदानं वर्तते। कथाकारत्वेन डा० नारायणदाशस्य विशिष्टमभिज्ञानं वर्तते। तथाहि कलानाथशास्त्रिणोक्तम् – "तदीयकथासु नूतना शैली, सहजा सरला प्रसन्ना च भाषा संक्षिप्तं वस्तुप्रस्तुतेः कौशलम्, औत्सुक्यविस्मयादियोजनाप्रावीण्यम्, सर्वमिदं संस्कृतसर्जनस्य स्वागतार्हं नवोन्मेषं प्रतिनिदधातीति विलोक्य कः खलु न परितुष्यते। ...संक्षेपः प्रतिभाप्रमाणं मन्यते, न विस्तरः। लाघवमभिनन्द्यते न गौरवम्। तदिदं लाघवं सारगर्भत्वं च डा० नारायणदाशकथानां समुल्लेखनीयो गुणः इति स्पष्टं स्यात् पाठकानाम्" (प्रस्तावना, हत्याकारी कः, पृ. – ४।)।

तेन 'गङ्गे च यमुने चैव'[४१७], 'त्रिरङ्गपताकातले'[४१८], 'कारगिल्-लहरी'[४१९] चेति त्रीणि मौलिककाव्यानि विरचितानि। तत्र 'गङ्गे च यमुने चैव' इति लघुकथासंग्रहे 'वाल्मीकिः', 'चिन्नामायाः छुरिका', 'कविप्रतिभा', 'गङ्गे च यमुने चैव', 'चण्डालबालः', 'प्रतिज्ञा', 'आवश्यकता', 'गतस्तु पुत्रो न पुनः समागतः', 'स्वाधीनतायाः सुवर्णजयन्ती', 'निर्वाणमुत जीवनम्', 'अभिशापः शतरूपायाः' चेति कथा विलसन्ति। 'त्रिरङ्गपताकातले' इति खण्डकाव्ये भारतीयसभ्यतायाः

[४१७]गङ्गे च यमुने चैव – लोकभाषाप्रचारसमितिः, पुरी, २००१।
[४१८]त्रिरङ्गपताकातले – पुरुषोत्तमपुरम्, ओडिष्या, २००१।
[४१९]कारगिल्-लहरी – लोकशुश्रीः, पुरी, २००१।

उन्नयनावनत्यादिविषयानामुपरि पञ्चविंशतिः कविताः वर्तन्ते। अस्य काव्यग्रन्थस्य श्रेष्ठकवितास्तावत् 'संस्कृतिः', 'वर्षाः', 'दुर्भिक्षम्', 'न्यु-अयोध्या', 'महात्मानं शेषमपिहितं पत्र'ञ्चेति। काव्यसंग्रहेऽस्मिन् क्वचिन्मुक्तकवृत्तैः छन्दोभिश्च कविताः ग्रथिताः। 'कारगिल्-लहरी' इति खण्डकाव्ये नाम लहरीकाव्ये पञ्चाशत् श्लोकाः विलसन्ति, यत्र कारगिल्-युद्धपरिप्रेक्षे काश्मीरप्रदेशस्थमानवानां दुर्दशा उपजातिच्छन्दसा वर्णिता। साम्प्रतं 'नरेन्द्रपुरीयं रेलस्थान'मिति (२०१६) स्पशकथानकं नाम रहस्यवृत्तोपेतं कथानकं प्रकाशितमनेन। 'जय जगदीश हरे' (२०१७, संस्कृतकथासंग्रहः) इति साम्प्रतं प्रकाशितः कथासंग्रहः, तत्रापि तस्य कथाविरचने दाक्ष्यं प्रकटितं भवति। अतिसाम्प्रतं संस्कृतसाहित्याकाडेम्या अर्थानुकूल्येन 'आषाढस्य प्रथमे दिवसे' इति कथासंग्रहः प्रकाशपदवीमेति।

'वह्निवलय'[४२०] इति उपन्यासे कुन्त्याः करुणाघनजीवितं वर्णितमास्ते। कुन्ती-कृष्णयोः साक्षात्कथोपकथनं काव्यायितं वर्तते। उपन्यासस्य नामकरणं युक्तम्, यतः उपन्यासस्य प्रथमवाक्यं तावत् 'अस्मिन् असमये चतुर्दिक्षु वह्निवलयः प्रज्वलति'। महाभारतस्य वृत्तस्य किञ्चित्परिवर्तनं विधाय उपन्यासकृता नारायणदासेन ग्रथितोऽयमुपन्यासः।

अर्वाचीनकाले भारतवर्षस्य सर्वेभ्यो भाषाभ्यः देवभाषायामनुवादोऽभूद्भवति च। साम्प्रतिके काले अनूदितसाहित्ये सर्वभारतीयपरिप्रेक्षे दाशनारायणस्य विशेषयोगदानं वर्तते। अस्याष्टावनूदितग्रन्थेषु द्वे काव्ये 'वाजिराउतम्' (अनूदित-ओडिया-काव्यम, २००६), 'वेदुइनगीतम्' (अनूदित-ओडिया-कविता-संग्रहः) इति, षट् कथासंग्रहाः– 'सृष्टिः' (अनूदित-ओडिया-कथासंग्रहः, २००५), 'वात्यासारः' (अनूदित-ओडियाकथासंग्रहः, २०११), 'सप्तपदी' (अनूदित-मैथिलीकथासंग्रहः, २०११), 'सप्ताहेर सात दिन', 'कवीन्द्रकथाकल्लोलिनी' (अनूदितरवीन्द्रकथासंग्रहः, २०११), 'लिपिका' (अनूदितवरीन्द्रकथासंग्रहः, २०१३), 'ऊर्मिला' (अनूदित-ओडिया-उपन्यासः) चेति वर्तन्ते। अयञ्च ओडिआभाषातोऽनुवादकर्मणि विशेषनिपुणो वर्तते।

[४२०]वह्निवलयः - पुरुषोत्तमपुरम्, ओडिष्या, २००२।

ज). रवीन्द्रकुमारपण्डा (१९६३)

नव्यन्यायस्य सफलाध्येतापि, आधुनिकसंस्कृतसाहित्ये तस्य योगदानं सत्यमेवाविस्मरणीयम्। तेन पञ्च कवितासंग्रहाः विरचिताः – ते च यथा – 'प्रतिध्वनिः' (१९९६), 'वनवल्ली' (१९९६), 'नीरवझरः' (१९९९), 'उर्वी' (१९९९) तथा च 'शतदलम्' (२००२)। तत्र 'शतदलं' नाम काव्यं शतकाष्टकसंग्रहः ('शारदाशतकम्', 'स्वतन्त्रताशतकम्', 'प्रियाशतकम्', 'उत्कलशतकम्', 'संस्कृतशतकम्', 'जीवनशतकम्', 'भारतशतकम्', 'अद्वैतशतक'ञ्चेति)। किञ्च, 'अनुकूललहरी'ति लहरीकाव्यं तथा च 'चक्रवातः' नाम काव्यं रचिते। तस्य काव्येषु आत्मचेतना, भगवतोऽनुभूतिः,जीवनप्रीतिः, प्रेमानुभूतिः, प्रेमदर्शनम्, जीवनदर्शनम्, शङ्गारितभावना चेति विषयाः प्रतिध्वन्यन्ते। अनेन जीवनस्य सुख-दुःखात्मकत्वं काव्यरूपवाङ्गमाध्यमेनोपायनीकृतम् –

"जीवनं पादपस्य पर्णम्
पवनेन दोलायते
यस्मिन् कस्मिन् क्षणे भवेत्तस्य पतनम्"[४२१]॥

तस्य कवितासु समयचेतना सुष्ठुतयाभिव्यक्ता। सर्वत्रैव कालस्य प्रभुत्वम् – 'समयः सत्यम् / सर्वस्य भक्षकः / सर्वस्य रक्षकश्चेति / कथनं यथार्थम्'[४२२]॥

स्वाधीनतोत्तरकालात् प्रायेण साम्प्रतिककालपर्यन्तम् उत्कलप्रदेशीयकवीनां सारस्वककर्माणि उल्लिख्यन्ते –

कवीनां नामानि	कृतयः	विभागः
१. भागीरथीनन्दशर्मा (१९३५)	क). ब्रजेन्दुविलासचम्पूः (१९८५)	चम्पूकाव्यम् (राधाकृष्णयोः विरहाश्रयिकाव्यम्।)
	ख). वायसदूतम् (१९८८)	दूतकाव्यस्य नायिका रेवा वायसं

[४२१]यशोधरा, नीरवझरः – दिल्ली, पृ. – ६४।
[४२२]क्रीड़ा, उर्वी – दिल्ली, पृ. – २८।

		दूतत्वेन नियोज्य दिल्लीस्थं स्वभर्तारम् उद्दिश्य वार्तां प्रेषयतीति विषयः।[४२३]
	ग). जगन्नाथमाहात्म्यम् (भद्रक्, १९९२)	खण्डकाव्येऽस्मिन् सप्ततिः श्लोकाः लसन्ति, यत्र जगन्नाथमन्दिरस्य तथ्य-रीत्यादिविषयाः काव्यिक-शब्दार्था-लंकाररसभावादिभिः अलंकृत्य वर्णिताः।
	घ). भारतीयगणतन्त्रम् (भद्रक्, २००१)	खण्डकाव्येऽस्मिन् भारतीयजीवन-राजनीतिप्रशासनादि-विषयाः काव्योचित-भङ्ग्या परिलसन्ति।
२. गौरीकुमारब्रह्मा	१) जगन्नाथताण्डवस्तोत्रम् (१९९१)	स्तोत्रम्
	२) आन्ध्रप्रदेशपर्यत्तनम् (१९९१)	भ्रमणवृत्तान्तः
	३) तिरुपतिनक्षत्रमाला	स्तोत्रम्

[४२३]'दूराकाशे विहरणपटुः स्वाभिमानी क्व पक्षी।
नर्काभाभू विचरणपरा क्वाप्यहं मन्दयोषित्।
एतद्दृष्ट्वातनुशरवशा वायसं प्रार्थिता सा
कार्पण्या हि व्यथितविरहापात्रपात्रेषु सम्यक्'॥ (वायसदूतम्, श्लोकः – ५)।

	(१९९७)	
	४) शिशुगीतिका (१९९२)	बालानां कृते १८सरलकविताः
	५) जवाहरनक्षत्रमाला (१९९२)	व्यक्तिजीवनवन्दनम्
३. वनमाली-आचार्यः (१९०६-९१)	सामन्तचन्द्रशेखरप्रशस्तिः (१९९१)	खण्डकाव्यम्, एकाधिकशत-श्लोकविशिष्टम्
४. व्रजसुन्दरमिश्रः	शोणितस्वाक्षरम् (१९९१)	वर्णनाकाव्यम्
५. सूर्यमणिरथः	शृङ्गेरीशतकम् (१९९१)	शतककाव्यम्
६. करुणाकरदाशः	श्रीश्रीजगन्नाथक्षत्रमाला (१९९४)	स्तोत्रम्
७. हरेकृष्णमेहेरः	क. मातृगीतिकाञ्जलिः (१९९७)	गीतिकविता
	ख. तपस्विनीकाव्यम्	ऊषसो मनोज्ञं वर्णनपरं काव्यम्
८. गोविन्दचन्द्रमिश्रः (१९३५)	क) श्रीरामलीलामृतम्[४२४] (१९८६)	रामचन्द्रजीवनाश्रितं दशाधिकशतं श्लोक-युतं शतककाव्यम्।
	ख). वदनचन्द्रपञ्चाशिका[४२५] (१९९९)	स्तोत्रकाव्येऽस्मिन् बालकृष्णवर्णन-पूरिताः एकपञ्चाशत्

[४२४]श्रीरामलीलामृतम् – राष्ट्रभाषा, कटकः, १९९६।
[४२५]वन्दनचन्द्रपञ्चाशिका – प्रकाशकः – श्रीकान्तमिश्रः, जगत्सिंहपुरम्, १९९९।

		श्लोका वर्तन्ते। प्रत्येकं श्लोकस्य अन्तिमचरणम् – 'गोविन्द ते वदन-चन्द्रमहं स्मरामि'।
	ग) वैजयन्तीशतकम्[४२६] (२००३)	जगन्नाथमन्दिरस्य पवित्रपताकामाहात्म्य-युतं शतककाव्यम्
	घ). मुरलिध्वनिसप्तप्तिः[४२७] (२००३)	विष्णोर्वंशध्वनि-गुरुत्वम् उपजीव्य सप्ततिश्लोकयुतं स्तोत्रकाव्यम्। प्रतिश्लोकमन्तिम-चरणम् – 'वहति गोप-शिशोर्मुरलिध्वनिः'।
	ङ). वनविलासमहाकाव्यम्[४२८]	महाकाव्यम्
	च). प्रसेनविजयचम्पूः[४२९]	चम्पूकाव्यम्
	छ). सदुक्तिकुसुमाञ्जलिः[४३०]	श्लोकावली
	ज). श्रीकृष्णशतकद्वयम्[४३१]	शतककाव्यम्
	झ). हनुमत्-शतकम्[४३२]	शतककाव्यम्

[४२६]वैजयन्तीशतकम् – जगत्सिंहपुरम्, २००३।
[४२७]मुरलिध्वनिसप्तप्तिः – जगत्सिंहपुरम्, २००३।
[४२८]अप्रकाशितम्।
[४२९]तदेव।
[४३०]तदेव।
[४३१]तदेव।
[४३२]तदेव।

	ञ). शारदासप्तप्तिः[४३३]	स्तोत्रकाव्यम्
९. दिगम्बरमहापात्रः (१९२८)	१. रङ्गरुचिरम् (१९८३)	बालकवितासंग्रहः
	२. सुरेन्द्रचरितमहाकाव्यम् (१९८८)	स्वाधीनतासंग्रामिनः सुरेन्द्रदेवस्य जीवनसंग्रामाश्रयि
	३. मानसन्देशम् (१९८८)	दूतकाव्यम्
	४. व्यस्तरागम् (१९९१)	विविधविषयोपेतं काव्यसञ्चयनम्
	५. भवते रोचते यथा (१९९६)	सामाजिकविषय-केन्द्रिकः काव्यसंग्रहः
	६. सुवर्णवङ्गम् (१९९७)	मुजिवुर-रहमानस्य स्वाधीनतानिमित्तं वीरत्वमत्र महाकाव्ये ध्वनितम्[४३४]।
	७. ऋतुचक्रम् (१९९९)	खण्डकाव्यम्
	८. दुर्नीतिपुराणम् (२०००)	व्यङ्ग्यकवितासंग्रहः
	९. ललितलवङ्गम् (२००१)	बालकवितासंग्रहः

[४३३]अप्रकाशितम्।
[४३४]स्वप्नेऽपि नैव च पुरा मम भारताम्बा।
तां मोक्ष्यतीति जठरान्न ममर्श चित्ते।
दैवादपावृतपदा यदि सा भवेद्वा
गाङ्गेयवङ्गजननी न तु नो हृदोऽन्या॥ (सुवर्णवङ्गम्, श्लोकः – १।७, पृ. – २)।

	१०. जनतन्त्रविमर्शः (२००२) ११. पाश्चात्यसंस्कृतम् (२००३) १२. रूषियाशतकम्	भारतीयगणतन्त्र-राजनीतिशिक्षाधर्म-संस्कृत्यादिविषय-परकः कवितासंग्रहः हल्याण्ड-राशियादेश-भ्रमणवृत्तान्तः राशियादेशस्य समाजजीवनसम्पृक्तं शतककाव्यम्
१०. प्रमोदचन्द्रमिश्रः (१९५६)	1) उत्कलगौरवम्[४३५] (१९९०) 2) श्रीमन्दिरेशशतकम् 3) माया 4) राजकवि-पण्डित-मिश्र-गदाधरपद्यावली 5) चन्द्रदूतम् (२००९) 6) विमलालहरी 7) अन्योक्तिपञ्चाशिका (२००९)	खण्डकाव्यम् शतककाव्यम् पौराणिकं नाटकम् कवितासंग्रहः दूतकाव्यम् लहरीकाव्यम् श्लोकसंग्रहः
११. लक्ष्मीधरद्विवेदी (१९४२)	क) कवितावितानम्[४३६] (१९९२) ख). बालबोधः ग) समलेश्वरी	कवितासंग्रहः बालकविता स्तोत्रम्

[४३५]पञ्चपञ्चाशदधिकं शतं श्लोकाः विलसन्त्यत्र।

[४३६]कनकलक्ष्मीं प्रति, विजयलक्ष्मीं प्रति, राजलक्ष्मीं प्रति, वनलक्ष्मीं प्रति, वसन्तलक्ष्मीं प्रति, अलक्ष्मीं प्रति इति षण्णां कवितानां संग्रहः।

	ख). शारलास्तोत्रम् (२००२) ग) जगन्नाथाष्टकम् (२००२)	कविता स्तोत्रकाव्यम्
१२. विप्रचरणपाठी	१) विवेकोदयम् (२००२) २) विप्रविलसितम् (२००४)	काव्यम् (त्रिसर्गात्मकम्) काव्यम् (अष्टसर्गात्मकम्)
१३. भुवनेश्वरकरः	अ) चयनम् (२००४) आ) उपदेशद्विशती (२००५)	काव्यम् काव्यम्
१४. प्रमोदकुमारनायकः (१९६५)	१. उवाच कण्डुकल्याणः[४३७] (१९९८) २. गर्त्तः[४३८] (१९९८) ग). कथासप्ततिः (२००३)	व्यङ्गविधकथासंग्रहः काव्यसंग्रहः (मानवात्मनः अधोगतेः काव्यिकरूपायणम्) सामाजिकसमस्या-श्रितकथासंग्रहः

[४३७]उवाच कण्डुकल्याणः – लोकभाषाप्रतारसमितिः, पुरी, १९९८।

[४३८]गर्त्तः – लोकभाषाप्रतारसमितिः, पुरी, १९९८।

२.३. आसामराज्यपरिप्रेक्षे

सांस्कृतिकपरिमण्डलम्

उत्तरपूर्वभारतयोः प्रदेशत्वेन सुपरचितास्तावद् अरुणाचलप्रदेश-आसाम-मेघालय-मणिपुर-मिजोराम-नागाल्याण्ड-त्रिपुराप्रदेशाः। एकदा मेघालयः मिजोरामः नागाल्याण्डश्चेति राज्यानि आसामस्यैवाङ्गभूतान्यासन्। साम्प्रतिके काले सिकिमराज्यमपि उत्तरपूर्वभारतस्थराज्यरूपेण परिगण्यते। भारतस्यास्य भूभागस्य राज्येषु आसामराज्यमेव सुप्रतिष्ठितमासीत्सामाजिक-सांस्कृतिकक्षेत्रयोः।

संस्कृतसाहित्यस्याभ्रंलिहाग्रे भव्ये राजप्रासादे ये खलु समसामयिकाः कवयितारः प्रतिभापरिपाकं बिभ्रति संस्कृतकवितायाश्च प्राक्तनीं शैलीं साधु पुष्णन्ति रक्षन्ति च, तेषु आसामप्रदेशीयकविवराः मनोरञ्जनशास्त्रि-वैकुण्ठनाथचक्रवर्ति-मुकुन्दमाधवशर्मा-भवदेवभागवती-विश्वनारायणशास्त्रि-विपिनचन्द्रगोस्वामि-कामिनीकुमाराधिकारि-जीवेश्वरगोस्वामिप्रभृतयः राराज्यन्ते। “कस्तान् कार्त्स्न्येन वक्ष्यति”। उत्तरपूर्वभारतयोः आसामप्रदेशस्यार्वाचीनसंस्कृतसाहित्यकाराणामेषां सूक्ष्मेक्षिकया विवरणं प्रदास्याम्यत्र–

१. भवदेवभागवती (१९०२-१९८८)

शास्त्रेषु प्रवीणोऽयं ‘सतीजयमतिकाव्य’मिति सर्गत्रयात्मकं खण्डकाव्यं विरचितवान् मध्ययुगीयासामस्यैतिहासिकवृत्तान्तमुपजीव्य, यत्र स्वामिहितये जयमतेरत्याचारेण साधारणमानवानां सकरुणं जीवितं समुपवर्णितम्। १९३३ ईशवीये वर्षे ग्रन्थोऽयं प्रचरद्रूपतां गतः।

तस्यैव स्वरचितश्लोकसंग्रहः ‘श्लोकमाला’नाम्ना १९५२ ईशवीये वर्षे प्रकाशितो यत्र ऊनत्रिंशदुत्तरद्विशतमिताः श्लोकाः लसन्ति। श्लोकेषु एषु गान्धि-नेहेरु-राधाकृष्णन्-प्रभृतीनां महात्मनां प्रशंसापरकाणि वचनानि विद्यन्ते। ग्रन्थस्यास्योल्लेख्यविषयस्तावत् केषाञ्चिद् व्याकरणनियमानां व्याख्यातुकामेन भवदेवेन काव्यसंकलनात्मको ग्रन्थो रचितः। किञ्च, स ‘नूतनं नाटक’मिति श्लेषात्मकं नाटकं व्यरचयत्। नाटकस्यास्य विषयस्तावत् समाजस्यावक्षयकुकर्मादीनां व्यङ्ग्यमुखेनोपस्थापनम्।

२. मनोरञ्जनशास्त्री (१९११-८८)

न्यायमीमांसा-वेदान्त-व्याकरण-काव्यादिषु सुपण्डितोऽपि मनोरञ्जनशास्त्री काव्यादिरचनकौशलेनाद्वितीयकवित्वेन भुवि यशो लेभे। स काव्यशौल्यां भारतस्य जातीयपताकाया दार्शनिकगुरुत्वं मर्यादाञ्चावलम्ब्य ‘पताकाम्नाय’ इति शास्त्रकाव्यं ग्रथितवान् १९६६ ईशवीयाब्दे। पूर्वार्धोत्तरार्धभेदात्काव्यमिदं द्विधा विभक्तम्। पूर्वार्धे जातीयपताकायां विलसतोऽशोकस्तम्भस्यार्थः तात्पर्यञ्चोपवर्णिते। अनेनैव १९९० खृष्टाब्दे कामरूपस्य विजयनीतिं तथा च ऐतिहासिकवृत्तमाश्रित्य नवोच्छवासैः ‘प्रकामकामरूप’मि[४३९]ति महाकाव्यं व्यरचि। वस्तुतः साम्प्रतमुत्तरपूर्वभारतयोःरितरराज्यापेक्षया कामरूपस्य श्रेष्ठत्वं प्रतिपादितमत्र। किञ्च, कवेरस्य संक्षिप्ता नाटकीया सृष्टिर्हि ‘उत्तणकभक्ष्य’मिति १९३३ ईशवीयाब्दे प्राकाश्यं गता। असमीयकवेः श्रीमतो रघुनाथचतुर्धुरिणः ‘केतकी’ति काव्यस्य संस्कृतानुवादरूपं तावत् मनोरञ्जनशास्त्रिणः ‘केतकीकाव्य’मिति।

३. विश्वनारायणशास्त्री (१८१८-२००२)

विश्वनारायणशास्त्री लोकसभायाः भूतपूर्वः सम्मान्यः सदस्यस्तथा प्रख्यातः कारयितृप्रतिभाधरः कवयिता। कविरयं विविधभाषाणामितिहास-संस्कृति-साहित्यादिविद्यासु ज्ञानगर्भं सूक्ष्मं तथ्यपूरितं विश्लेषणात्मकं प्रबन्धादिकं व्यरचयत्।

विश्वनारायणशास्त्रिणः ‘अविनाशी’[४४०]ति ऐतिहासिकोपन्यासः सप्तमशतकस्य ऐतिहासिकवृत्तान्तमाश्रित्य रचितः। परं काव्यमिदं लौकिकसंस्कृतकविताधारेण विरचितम्। भास्करवर्म-देवदास्योः प्रणयवृत्तं मुख्यत्वेन तथा च भास्करवर्म-हर्षवर्धनयोः सन्धिरूपगौणवृत्तान्तमुपजीव्यैवोपन्यासो ग्रथितः १८८६ ईशवीयाब्दे। आधुनिकोपन्यासरीत्या इव चारित्रिकगुणा मनस्तात्त्विको द्वन्द्वस्तेजश्चेति दृश्यन्तेऽत्र। साधारणतया वैशिष्ट्यानामेषां प्रभावो दृक्पथमायाति समसामयिकभाषाया उपन्यासेषु। उपन्यासोऽयं साहित्य-अकाडेमी-भाषापरिषत्-उत्तरप्रदेशसंस्कृत-अकाडेमीप्रभृतिभिः प्रतिष्ठानैः सभाजितः प्रशंसितश्च। १९८९तमे वर्षे कथाप्रबन्धात्मकः ‘हृदयसंवादाख्यो’

[४३९] प्रकामकामरूपम् – असमसंस्कृतपरिषद्, गुवाहाटी, १९९०।
[४४०] अविनाशिः – मञ्जुश्रीप्रकाशनम्, रेड-क्रास-रोड, गुवाहाटी, १९८६।

ग्रन्थो विरचितोऽनेनैव। अर्थात् स खलु कारयितृ-भावयितृप्रतिभयोर्विरलाराधारविशिष्टः।

४. वैकुण्ठनाथचक्रवर्ती (१९००-७६)

आसामप्रदेशस्य कविवर्येषु वैकुण्ठनाथचक्रवर्ती अन्यतमत्वं भजते। काव्य-न्याय-ज्योतिष-पुराण-व्याकरणादिशास्त्राणां दृढभित्तिभूमौ तस्य ज्ञानं प्रोथितम्। तस्य कारयितृप्रतिभा ध्रुवमेव नियतं स्पन्दनशीला वरीवर्तते। तस्य कारयितृप्रतिभाया निदर्शनत्वेन भगवतः श्रीकृष्णस्योपरि 'श्रीकृष्णलीला' समुल्लेखार्हा। काव्यमिदं केवलेन तोटकच्छन्दसा ग्रथितं नवप्रवाहसम्पूर्णम्। अत्रेदमुल्लेखार्हं यत्सर्गशब्दं परिवर्त्य प्रवाहशब्दो व्यवहृतः कविवरेण। १९६१तमे वर्षे काव्यमिदं प्रकाशितमभूत्।

५. मुकुन्दमाधवशर्मा(१९३४-२००९)

न केवलमासामराज्ये, चापि सम्पूर्णे भारतवर्षेऽङ्गुलिमेयेषु शास्त्रधुरन्धरेषु मुकुन्दमाधवशर्मा मूर्ध्नि राजते। स हि भावयितृप्रतिभाबलादध्यायषट्केन विभाजितं 'व्यञ्जनप्रपञ्चसमीक्षे'ति गवेषणानिबन्धं १९७९ तमे वर्षे विरच्य D.Litt. इत्युपाधिमर्जितवान्। गवेषणाकर्मण्यस्मिन् काव्यतत्त्वानां साहित्यस्य च निरवच्छिन्नशक्तिस्तुलनामूलकप्रतीकधर्मिता च विलसतः। स न हि केवलं शास्त्रज्ञश्चापि संस्कृतकविः। तस्य 'स्तुतिप्रशस्तिमञ्जरी'ति संस्कृतकवितासंग्रहे साकल्येन ५३८ मितश्लोकाः सन्ति। विख्यातानां देवदेवीनाञ्च प्रशंसापरकाणि श्रद्धाभावपूरितानि वचांसि विलसन्तीह ग्रन्थे।

६. जीवेश्वरगोस्वामी

आसामवास्तव्यस्य जीवेश्वरगोस्वामिनो 'भक्तिविवेकाख्यटीका' तावद् वैकुण्ठनाथभट्टाचार्यस्य भक्तिशास्त्रमुपरि विरचिता।

प्रादेशिकभारतीयभाषाभ्यः संस्कृतानुवादक्षेत्रेऽसमीयकवीनां काव्यकारयितॄणां वा दानमपरिसीमम्। कामिनीकुमाराधिकारी 'गीताञ्जलिसंस्कृतमि'[४४१]त्यनुवादात्मके ग्रन्थे निर्दिष्टानां रवीन्द्रसंगीतानामनुवादं विधाय ख्योतोऽभूत्। ग्रन्थोऽयं १९६१ ईशवीये वर्षे प्रकाशितोऽभवत्।

[४४१]गीताञ्जलिसंस्कृतम् – रवीन्द्रशतवार्षिकीसमितिः, शिलचरः, १९६१।

गौरीदत्तशर्मा कश्चन विरलोऽनुवादकः सप्तपञ्चाशदुत्तरं शतं रवीन्द्रसंगीतानामनुवादं विहितवान् २००२वर्षे। अनेनैव भवेन्द्रनाथशैकिमहाभागस्य पुरष्कृतोपन्यासस्य 'अन्तरीपस्य' अनुवादो विहितः। आसामप्रदेशस्य अनुवादकर्मणि यः सर्वापेक्षया धुरी, स हि विपिनचन्द्रगोस्वामी (१९०९-८७)। तस्य 'नवमल्लिके'ति ग्रन्थः रघुनाथचक्रवर्तिनोऽसमीयकथाकविताया अनुवादात्मकः। ग्रन्थोऽयञ्च १९६४ खृष्टीयाब्दे प्रचरद्रूपतां गतः।

इह राज्ये न केवलं असमीयाभाषातः संस्कृतस्यानुवादो भवति परं संस्कृतग्रन्थानामपि असमीयाभाषयानुवादो जातः। प्रभातचन्द्रशर्मणा 'पञ्चतन्त्रं' (१९६६) तथा 'कादम्बरी' (२०००) चेति असमीयाभाषया अनूदिते। कादम्बर्या अनुवादाय प्रभातचन्द्रः साहित्य-अकाडेमीसम्मानेनालंकृतः। अपि च, मालिनीगोस्वामी असमीयाभाषायां हर्षचरितस्यानुवादं विधाय साहित्य-अकाडेमीपुरष्कारेण भूषितः।

२.४. नागाल्याण्ड-मिजोरामयोः संस्कृतचर्चा

उत्तर-पूर्वभारतयोः प्रदेशेषु नागाल्याण्डस्तथा मिजोरामश्चेति पूर्वासामराज्यस्य आसीत् स्वतन्त्रमण्डलद्वयम्। परमधुना राज्यद्वयं पृथग्-राज्यत्वेन परिचीयते। नागाल्याण्डस्य विश्वविद्यालयेषु संस्कृतविभागो नास्ति स्नातके स्नातकोत्तरे च। केवलं राष्ट्रियविद्यालयेषु स्वल्परूपेण वर्तते संस्कृतचर्चा प्रचलन्ती। किञ्च, मिजोरामस्य "North- East Hill University" इति शिक्षाकेन्द्रे अद्यापि संस्कृतगवेषणा न भवति। परं "The Lady Keane Girls College" इत्यत्र स्नातके संस्कृतविभागोऽस्ति। शङ्करदेवमहाविद्यालये शिलम्-महाविद्यालये च साधारणविभागे (Pass Category) विद्यार्थिनः संस्कृतं गृह्णन्ति। बौद्धमन्दिरे पालि-बौद्धसाहित्ययोश्चर्चा भवति टोलपद्धत्याम्। अरुणाचलप्रदेशे केन्द्रियविद्यालयान् विहाय कुत्रापि संस्कृतस्य प्रसारो नाद्यापि व्याप्तः। साम्प्रतिककाले रामकृष्णमिशन्-इत्यस्योद्योगेन साधारणानां मनःसु संस्कृतस्य प्रभावो वर्तत इति सत्यं परं स्वाभाविकभावेनार्वाचीनसंस्कृतसाहित्यस्य चर्चा उत्तर-पूर्वभारतस्थराज्येषु अद्यापि न प्रारभ्यते। काव्यनाटकादीनि न रचितानि स्वाभाविकतया भवन्तीत्यपि शक्यवचम्।

२.५. त्रिपुराराज्येऽर्वाचीनसंस्कृतसाहित्यम्

त्रिपुराराज्ये अर्वाचीनसंस्कृतसाहित्यस्य बीजमुर्वरभित्तिभूमौ प्रोथितमासीत्। तथाहि तत्र बहवः कवयितारः काव्यानि विरचितवन्तो रचयन्ति च। त्रिपुराराज्यगतानां विशिष्टानां कवीनां नामानि तेषां सारस्वतकृतयश्चोल्लिख्यन्ते –

१. महामहोपाध्याय-राधागोविन्द-सार्वभौमः (१८२५-१८८९)

राधागोविन्देन विरचिता नैके मौलिका ग्रन्थाः। ते ग्रन्थास्तावत् – 'राजप्रशस्तिः', 'तरणिनिर्वाणवादः', 'निवरिकः', 'शारदोदयः', 'वेदवादः', 'दौपदीस्तोत्रम्', 'सूर्यङ्कदूतञ्चे'ति। किन्तु ते ग्रन्था अद्य नोपलभ्यन्ते। परमेतन्निर्भरयोग्यं तथ्यं यत् स राज्ञो वीरचन्द्रमाणिक्यवाहादुरस्य (१८६२-१८९६) राजत्वकाले तस्यैव अर्थानुकूल्येन काव्यजातं लिलेख।

२. पण्डितचन्द्रोदय-विद्याविनोदः (१८५८-१९४५)

महाराजमाणिक्यबाहादुरस्यार्थानुकूल्येन चन्द्रोदय-विद्याविनोदमहाभागः सारस्वतकार्येषु आसीद् व्यापृतः। स हि १९०४ तमे वर्षे सवङ्गानुवादं शिलालिपिसंग्रहं प्रस्तुतवान्। ततः 'बृहन्नारदीयपुराण'मिति तेन व्याख्यापूर्वकं प्राकाशि।

३. पण्डितकैलासचन्द्रस्मृतितीर्थः (१८९३-१९७७)

अयञ्च त्रिपुरावास्तव्यो विख्यातसंस्कृतपण्डितस्तथा च लेखकः। स 'रहस्यत्रयी', 'स्तुतिमालिका', 'उपनयनञ्चे'ति ग्रन्थान् रचितवान्।

४. सुधीरकुमारकाव्यरत्नः (१९१०-९४)

संस्कृतभाषया काव्यानि विरच्य त्रिपुराराज्यस्याधुनिककाव्यपरम्परायाः उन्नतिं विदधाति स्म सुधीरकुमारः। तद्रचिताः कविताः विविधासु पत्रिकासु प्रकाशिता अभवन्। तस्य सौन्दर्यतत्त्वस्य निदर्शनत्वेन कासाञ्चित्कवितानां समुल्लेखः क्रियते- 'स्वरूपानन्दते नमः', 'स्वाधीनताप्रशस्तिः', 'अरविन्दप्रशस्ति'श्च।

५. रवीन्द्रनाथदासशास्त्री (१९३७)

रवीन्द्रनाथशास्त्री संस्कृतभाषया कतिचन प्रबन्धान् तथा च कविताः विरचितवान्। तासु कवितासु अन्यतमाः यथा- 'संस्कृतसोपानम्', 'वनदेवीनाटकम्', 'श्रीचैतन्ययशोमाल्यम्', 'काठियाबावाश्रीश्रीधनञ्जयचरितम्', 'श्रीश्रीभोलानन्दगिरिगौरवञ्चे'ति।

एतान् कविवरान् अतिरिच्य केचन विद्वांसो विलसन्ति, ये स्वल्पमात्रया सारस्वतसाधनां कृतवन्तः कुर्वन्ति च। तेषां नामग्रहमुल्लेखः क्रियते- सरस्वतीठाकुरः, सीतानाथ-दे, कृष्ण-तर्कतीर्थः, महिम-चन्द-शिरोमणिः, कैलासचन्द्रस्मृतितीर्थः, सुरेशचन्द्रभट्टाचार्यः, भारतकुमाररायश्चेति।

२.६. झाडखण्डराज्ये आधुनिकसंस्कृतसाहित्यम्

कवयितारः	सारस्वतकृतयः	विषयः
क. अयोध्याप्रसादसिंहः	नीडनिर्माणम्	नाटकीयतत्त्वानां यथाविधि प्रयोगः, निम्नमध्यवर्ति-परिजनानां पुत्रकन्यादीन् प्रति व्यवहारः, सुतीव्रं मनस्तात्त्विकभावविन्यासः, सांस्कृतिकावक्षयश्चेति विषयैः एकाङ्कनाटकमिदं रसोत्तीर्णमभूत्।
ख. दिनेशप्रसादपाण्डेयः	स्वतन्त्रतान्दोलनम्	स्वाधीनतायुद्धाश्रयिकाव्ये स्वाधीनतायुद्धाय जीवनम् उत्सर्गीकृतां विवेकानन्द-गान्धि-गोखेलादीनाम् आन्दोलनं वर्णितम्।
	भारतायनम्	वैदिकयुगात् हर्षवर्धनस्य साम्राज्यं यावत् भारतवर्षस्यैतिहासिकवृत्तं काव्यायितं वर्तते

	मित्रदूतम्	ऐतिहासिककाव्येऽस्मिन्। खण्डकाव्येऽस्मिन् मन्दाक्रान्ताछन्दसा प्रेममयजीवितस्य नायकस्य चित्रमङ्कितं वर्तते।
ग. चन्द्रकान्तशुक्ला	मुद्राराक्षसस्य शास्त्रीयमध्ययनम् कविताः	विश्लेषणात्मकगवेषणाग्रन्थः नैकाः कवितास्तेन विरच्य पत्रिकासु प्रकाशिताः।
घ. विनेश्वरपाठकः	क. कालीदासीयम् ख. प्लवङ्गदूतम्[४४२] ग. रक्तदानम् घ. हीरोचरितम्[४४३] ङ. यीशुचरितम् च. विक्रान्तकर्णम्[४४४] छ. विक्रान्तवर्णनम्[४४५]	एकाङ्कनाटकम् मेघदूतस्यानुरूपं दूतकाव्यम् अङ्कद्वयात्मकं यौतुक-प्रथासम्बन्धि रूपकम् श्लेषधर्मिखण्डकाव्यं पाश्चात्यकुप्रभावाश्रितम् चरितकाव्यम् अङ्कचतुष्टयात्मकं रेडिओ-रूपकम् काव्यम्

[४४२]प्लवङ्गदूतम्- सुबोधग्रन्थमाला, राँची, १९७५।

[४४३]हीरोचरितम्- ज्योतिः, पाटना, १९८२।

[४४४]विक्रान्तकर्णम् - अमर-प्रिण्टर्स, राँची, १९९२।

[४४५]विक्रान्तवर्णनम्- संस्कृसदनम्, इर्गू रोड, राँची, १९९०।

(३) पश्चिमभारतीयराज्येष्वाधुनिकसंस्कृतसाहित्यचर्चा

३.१. राजस्थानप्रदेशेऽर्वाचीनसंस्कृतसाहित्यम्

राजस्थानस्य संस्कृतविद्याचर्चायाः समुन्नतिः कथङ्कारमजायत, तस्या एव प्रमाणं राजस्थानस्य अर्वाचीनकवीनां साहित्यकृतयः। प्रादेशिकराज्यानामिव राजस्थाने संस्कृतकवीनां सहजा प्रतिभा चिरं प्रग्लभा चकास्ति। महाकाव्य-नाटक-पद्य-गद्य-कथा-रेडिओरूपकाणां कर्तृत्वेन प्रमुख्यानां कवीनां सारस्वतकृतयः विहङ्गमदिशा प्रस्तूयन्ते–

• ऐतिहासिककाव्यानां परिसंख्यानम्

ऊनविंशशताब्द्यामर्वाचीनसंस्कृतसाहित्ये राजस्थानराज्ये ऐतिहासिक-महाकाव्यानां संख्या न भूयसी। १८९२ खृष्टाब्दे सीतारामपर्वणिकरो 'जयवंशमहाकाव्यं'[४४६] विरचर्च। तथा च, 'कच्छवंशमहाकाव्यं'[४४७] कृष्णरामभट्टेन तस्मिन् समये रचितम्। अजमेरस्य (अजयमेरुपुरस्य) पृथ्वीराजचौहानस्य वर्णानुक्रमिकघटनाजातं समुपजीव्य कृष्णरामस्य समसामयिकेन जयनायकेन 'पृथ्वीराजविजयमि'ति महाकाव्यं ग्रथितम्। तथैव मेवारस्य जीवनवृत्तमवलम्ब्य जीवन्धरकृतोऽ'मरसारः', सदाशिवरचितं 'राजरत्नाकरकाव्यम्', विहारीकृतं 'संग्राममहोदयकाव्यं', नागाजीरामग्रथितं 'वीरवंशवर्णनञ्चे'ति महाकाव्यानि राजस्थाने शताब्दीद्वितयं यावद्विरचितानि। योधपुरस्येतिहासो वर्णितो 'अवजीतोदयः' 'अभयोदयश्चे'ति महाकाव्यद्वितये भट्टजग्जीवनेन। हरिद्विजकृते 'दुर्गाविजयकाव्ये'ऽपि योधपुरस्य वृत्तं वर्णितमास्ते। साम्प्रतिककाले ऐतिहासिकवृत्तमाश्रित्य कृष्णरामभट्टेन 'जयपुरविलासकाव्यं'[४४८] तथा च, विंशशताब्द्यां मथुरानाथशास्त्रिणा 'जयपुरवैभवमि'[४४९]ति काव्यं विरचिते। शिवाजीचरितमवलम्ब्य अम्बिकादत्तव्यासेन

[४४६]जयवंशमहाकाव्यम् – राजपुतानाविश्वविद्यालयः, जयपुरम्, १९७२।

[४४७]कच्छवंशमहाकाव्यम् – सम्पा. रमाकान्तपाण्डेयः, राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, २०११।

[४४८]जयपुरविलासः – व्यासबालावक्षशोधसंस्थानम्, जयपुरम्, १९९४।

[४४९]जयपुरवैभवम् – भट्टमथुरानाथशास्त्री, देवर्षिकलानाथशास्त्री (सम्पा०), राष्ट्रियसंस्कृतसाहित्य-केन्द्रम्, जयपुरम्, २००७।

'शिवराजविजयमि'ति उपन्यासो विरचितः। प्रसङ्गतः समुल्लेखार्हं यत् 'शिवराजविजयम्' इति संस्कृतसाहित्यस्य प्रथम उपन्यासः।

• नाटकानां परिसंख्यानम्

प्रादेशिकराज्यानामिव राजस्थानेऽपि कवयितारः नाटकानि विरचितवन्तः। यथा विश्वनाथराणाडेपादस्य 'शृङ्गारवापिके'ति नाटकं प्रख्यातम् (१९७६ ईशवीयाब्दे)। विश्वनाथं व्यतिरिच्य अन्ये नाट्यकर्तारः सन्ति राजस्थाने येषां ग्रथितनाटकानि संस्कृतनाट्यपरम्परां विभूषयन्ति।

गीर्वाणवाण्यां गद्य-कथयोरुच्चमार्गीयसाहित्यं राजस्थानप्रदेशस्य साहित्यकाराः रचयन्ति साम्प्रतिककाले। मथुरानाथशास्त्रिणा 'आदर्शरमणी'[४५०]ति उपन्यासस्तथा च बह्व्यः कथाः (शतम्) रचिताः। तासु कथासु ऐतिहासिक-सामाजिकवृत्तीनां समाकलनं वर्तते।

राजस्थानस्योपन्यासकृतां संख्या सत्यमेव स्वल्पा। तेष्वन्यतमाः गणेश-राम-शर्मा, नारायणकाङ्करः, कलानाथशास्त्री, लक्ष्मीनारायणपुरोहितः, हरिकृष्णगोस्वामी चेति। 'ललितकथाकल्पलते'[४५१]ति नाम्ना कथासंग्रहे हरिकृष्णयोः कथाः वर्तन्ते। जयपुरस्य गोविन्दप्रसाददधीचेन तथा च अजयमेरुपुरस्य सत्यनारायणेन संस्कृतनाटकानि विरचितानि। 'All India Radio' इति संस्थानेन मौलिकसंस्कृतनाटकानां संग्रहः १९५६ खृष्टाब्दतः १९६२ ईशवीयाब्दं यावत् प्रचारितः।

रेडिओनाटकेषु विशेषतः सामाजिक-राजनैतिक-ऐतिहासिकविषयानां प्राबल्यं दरीदृश्यते। तेषूल्लेखयोग्यास्तावत् मथुरानाथभट्टस्य 'मञ्जुला', हरिराम-आचार्यस्य 'भर्तृहरिश्चे'ति। कलानाथशास्त्रिणः संस्कृतनाटकानां संग्रहः 'संस्कृतनाट्यवल्लरी'[४५२]ति ग्रन्थे विलसति। 'आख्यानवल्लरी'[४५३]ति नाम्ना ग्रन्थे कलानाथशास्त्रिणः गल्प-उपन्यास-प्रबन्धानां संग्रहः प्रकाशितोऽवर्वत। तस्यैव कथानां संग्रहः प्रकाशितः

[४५०]आदर्शरमणी – राघवेन्द्रमुद्रणालयः, इलाहवादः, १९०५।

[४५१]ललितकथाकल्पलता – आमेदावादः, १९७६।

[४५२]संस्कृतनाट्यवल्लरी – हंसाप्रकाशनम्, जयपुरम्, १९९७।

[४५३]आख्यानवल्लरी – राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, २००२।

राजस्थान-संस्कृत-अकाडेमीमाध्यमेन 'कथानकवल्ली'[४५४]ति ग्रन्थे। नारायण-काङ्करेण विरचितानामेकाङ्कनाटकानां समावेशः संस्कृतसाहित्य-अकाडेमीमाध्यमेन प्रकाशितः। मोहममेदनवेल्लेपादैः जगन्नाथस्य विख्यातप्रेमकाहिनीमवलम्ब्य 'लवङ्गी'ति रचितनाटकं 'All India Radio' इति संस्थया प्रचारितम्। शिवसागरत्रिपाठिनः 'कथाकल्पः' (२००१), गङ्गाधरभट्टस्य 'कथाकौतुकम्', प्रभुनाथद्विवेदिनः 'कथाकौमुदी' (१९८८) कथासंग्रहत्वेनोल्लेखयोग्याः।

• काव्यसंग्रहः

नाट्यकृतां समतालमेव राजस्थानवास्तव्येषु संस्कृतकाव्यकाराः रत्नमिव काव्यानि कुवन्ति स्म। श्रीकृष्णभट्टस्य 'पद्यमुक्तावली', 'वैराग्यशतकञ्चे'ति (अष्टादशशताब्द्याम्) विशेषतयोल्लेखनीये आस्ताम्। काव्यमिदं काव्यमालायां प्रकाशितमभूत्। अष्टादशशताब्द्याः सीतारामपर्वणीकरस्य, ऊनविंशशताब्द्याः कृष्णरामभट्ट-हरिवल्लभभट्टयोः काव्यानि निर्णयसागरप्रकाशनालयतः प्रचरद्रूपतां गच्छन्ति स्म। रमानाथशास्त्री, मनिलालभट्टः, गिरिधरशर्मानवरत्नः, गिरिधारीशास्त्री, मणिशङ्करशास्त्री, सत्यनारायणशास्त्री, विद्याधरशास्त्री, मथुरानाथभट्टः, हरिशास्त्री, नवलकिशोरकङ्करः, दीननाथत्रिवेदी, रामगोपालशास्त्री, मधुकरशास्त्री, लक्ष्मीनारायणपुरोहितः, गिरिधरलालशास्त्री स्वस्वकारयितृप्रतिभया कविताः विरचयन्ति स्म। एतान् व्यतिरिच्यापि आधुनिकसंस्कृतकाव्यवीथिकायां कलानाथशास्त्री, प्रभुदत्तशास्त्री, गिरिधरशर्माचतुर्वेदी, मोहनलालशर्मा, चक्रधरशर्मा, सीतारामविद्या-मार्तण्डः, गोविन्दप्रसाददधीचः, गोपीनाथदधीचः, कृष्णरामः, सम्पूर्णदत्तमिश्रः, हरिराम-आचार्यः, रामदेवसाहुश्चेति कवयो नूतनप्रजन्मनः प्रतिनिधित्वेन राराज्यन्ते। 'कस्तान् कार्त्स्न्येन वक्ष्यति'। युवसम्प्रदायस्य प्रतिनिधिरूपेण जयपुरस्य पद्मशास्त्री, राधाकृष्णशास्त्री, गिरिजाप्रसादश्चेति विविधासु पत्रिकासु गीर्वाणवाण्यां काव्यानि प्रकाशयन्ति। ऊनविंशशतकस्य कृष्णरामभट्टः 'पलेन्दुराजविजया'ख्यां सुदीर्घकवितां कलयति। कवितायामस्यां कविना शस्यसाम्राज्ये पलेन्दोः सर्वाधिनायकत्वं व्याख्यातम्। 'फेनकाष्टकमि'ति लघुधर्मि कवितायां फेनस्य स्तुतिर्वर्णिता कलानाथशास्त्रिणा।

[४५४]कथानकवल्ली – हंसाप्रकाशनम्, जयपुरम्, २००२।

साम्प्रतिककालस्य राजस्थानप्रदेशस्य संस्कृतकवयः प्रदेशस्य राष्ट्रस्य च समसामयिक-सामाजिक-राजनैतिकादिविषयान् आश्रित्य काव्यानि रचितवन्तः। दिङ्मात्रमुदाहरणं यथा – पद्मशास्त्रिणा विरचितं 'लेलिनामृतम्'[४५५] इति महाकाव्यं लेलिनस्य जीवितमुपजीव्य। तथा च, 'पत्रदूतं'[४५६] नाम खण्डकाव्ये जयपुरस्य मोहन-लाल-पाण्डेयहाभागेन इराक-देशवास्तव्यस्य साद्दाम-होसेनस्य विरसाप्लुतं युद्धविग्रहादिकं वर्णितम्। मध्ययुगे राजपुतस्य भित्तिभूमिमुपजीव्य ऐतिहासिकोपन्यासः 'पद्मिनी'[४५७]ति तेनैव रचितः। मधुकरशास्त्रिणा यथा संस्कृतश्लोकैः गान्धिजीवनमवलम्ब्य तथैव कैश्चित्काव्यकृद्भी राजस्थानस्य नेहेरुजीवितमुपाश्रित्य च कवितानाटकादिकं व्यरचि।

• अनुवादसाहित्यम्

अनुवादसाहित्येऽपि राजस्थानस्यानुवादकानां प्रतिभा ध्रुवमेव आतलस्पर्शिनी। अनुवादसाहित्यस्यैतिह्यं निरवच्छिन्नत्वेन प्रदेशस्यास्यानुवादकाः पालितवन्तः। तथाहि शिवकुमारशुक्लेन तुलसीदासस्य 'रामचरितमानसस्य संस्कृतानुवादः कृतः। संस्कृतभाषया पवित्रकोराण्-इत्यस्यानुवादो विहितः कोटानगर्याः मधुकरशास्त्रिणा। हरिकृष्णशास्त्रिणा हिन्दी-वङ्गोपन्यासानामनुवादः साधितः। विश्वेश्वरनाथेन हिन्दु-नियमस्य (Hindu Law) अनुवादः कृतः संस्कृतश्लोकरीत्या 'आर्यविधान'मिति ग्रन्थे। व्रजभाषाया विख्यातस्य कवेः विहारीवर्यस्य 'सतसयी'ति ग्रन्थस्य संस्कृतानुवादो विहितः मथुरानाथभट्टेन। एतानतिरिच्य बहून्यनुवादकर्माणि संस्कृतभाषायां राजस्थानकविभिरनुवादकैश्च कृतानि।

• भट्टमथुरानाथशास्त्रिणः योगदानम् अर्वाचीनसंस्कृतकाव्यसृष्टौ

भट्टमथुरानाथशास्त्रिणः पूर्वपुरुषबाबाजीदीक्षितवर्या मोघलकाले आन्ध्रप्रदेशाद् उत्तरभारतं प्राप्ताः। 'देवर्षि' इत्यवटङ्कधरस्तेषां परिवारः काश्यां, प्रयागे, रोवानगरे, अनूपशहरेणोषित्वा बूँदीपुरीमाजगाम। बूँदीपतेर्बुधसिंहस्य राजसभारत्नं देवर्षिः

[४५५]लेलिनामृतम् – विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशियारपुरम्, १९७३।
[४५६]पत्रदूतम् – पाण्डेयप्रकाशनम्, जयपुरम्, २००३।
[४५७]पद्मिनी – तत्रैव, १९९१।

श्रीकृष्णभट्टः 'कविकलानिधिः' शास्त्रिणः पूर्वजेषु वैदुष्यात् कवित्वेन चातितरां प्रथितः। संस्कृते ब्रजभाषायां च समं कवयन् विंशतिप्रायाणां प्रबन्धानां प्रणेता श्रीकृष्णभट्टः जयपुरराजसभामपि १६७५ ईशवीयवर्षात् १७६१ ईशवीयवर्षपर्यन्तमलञ्चकार। अस्यान्ववाये जयपुरराजवंशेन विशिष्य सम्मानितः कविरभून्मण्डनभट्टः। तस्यैव कुले लक्ष्मीनाथभट्टसुतस्य द्वारकानाथभट्टस्य भार्या जानकीदेवी मथुरानाथं १८८९ ईशवीयाब्दे प्रासौत्। व्याकरणोपाध्यायपरीक्षां च १९०३ ईशवीयाब्दे समुदतरन्मथुरानाथः। १९०६ ईशवीयाब्दे पञ्चाम्बुविश्वविद्यालयस्य शास्त्रिपरीक्षायां सर्वप्रथमः १९०९ ईशवीयवर्षे साहित्याचार्य-परीक्षायां साफल्यमभजत्। अनन्तरमयं जयपुरस्थमहाराजसंस्कृतविश्वविद्यालये प्राध्यापकपदं समलङ्करोति स्म, संस्कृतपाठशालानिरीक्षकपदेऽपि वर्षत्रयं कार्यमकरोत्। पञ्चसप्ततिवर्षीयोऽयं १९६४ ईशवीयवर्षे दिवङ्गतः।

संस्कृत-हिन्दी-ब्रज-भाषासु समं रचनायां ससार अस्य लेखनी। भारतीयसङ्गीतशास्त्रेऽप्ययमबाह्यः आकाशवाण्याः कृते ध्रुवपदगीतानि ठुमरीदादरादीनि च विरचितवान्। उर्दू-वङ्ग-गुर्जरादिभाषाणामपि साहित्यमधीतवान्। घनाक्षरी-कवित्त-सवैयादिब्रजकाव्यचलितानां छन्दसां माधुर्यमनेन संस्कृते इदम्प्रथमतयावतारितम्, गजलगीतेर्मसृणताबन्धश्च सम्यगभ्यस्तः। 'साहित्यवैभवम्'[४५८], 'जयपुरवैभवम्'[४५९], 'गोविन्दवैभवम्'[४६०] चास्य बृहत्कायानि संस्कृतकाव्यसङ्कलनानि प्रत्यग्रोन्मेषमनोहरां प्रतिभां प्रमाणयन्ति। संस्कृते आधुनिकलघुकथासाहित्यमसौ विपुलं ससर्ज। आकाशवाणीरूपकप्रणयनेन, संस्कृतरत्नाकर-भारत्यादिपात्राणां काव्यमालाशृङ्खलायाश्च सम्पादकत्वेन, रसगङ्गाधरप्रभृतिग्रन्थानां टीकाकर्तृत्वेन, पाण्डुग्रन्थानामुद्धरणेन, नाट्यनैपुण्येन, गद्यबन्धैश्चाप्रतिमां कृतित्वततिं ततान। शताधिकाः संस्कृतलघुकथाः, दशाधिका उपन्यासाः, नैके ललितप्रबन्धाः व्यङ्ग्यलेखा, यात्रावृत्तानि चास्य नूतनविधासु प्रवृत्तिं बहुमुखीं प्रतिभां च प्रमाणयन्ति"[४६१]

[४५८]साहित्यवैभवम् – निर्णयसागरप्रेस्, बम्बइ, १९३०।
[४५९]'जयपुरवैभवम्' – सं. देवर्षिकलानाथशास्त्री, राष्ट्रीयसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, २००७।
[४६०]'गोविन्दवैभवम्' – गीताप्रेस्, गोरखपुरम्, १९५७।
[४६१]आयतिः।

• श्रीधरभास्कवर्णेकरस्य योगदानं राजस्थानस्य संस्कृतसाहित्ये

१९१८ ईशवीयाब्दे महाराष्ट्रस्य साताराख्ये जनपदे श्रीधरभास्करवर्णेकरो जनिं लेभे। परवर्तिनि काले स नागपुरमागत्य यौवने पारम्परिकशिक्षापद्धतिं प्रत्यत्याग्रहवशात् पण्डितहनूमन्तशास्त्रिणः सविधे शास्त्राण्यधीतवान्।

आसीत् स राष्ट्रवादी संस्कृतकविः। तस्य श्रेष्टकृतित्वेनोल्लिख्यते 'श्रीशिवराज्योदय'[४६२]मिति अष्टाधिकषष्ठिसर्गोपेतं महाकाव्यम्।

अस्मिन् महाकाव्ये छत्रपतेः शिवाजेः वीररसोज्ज्वलञ्चरित्रं परमोज्ज्वलत्वेन आधारितमवर्तत। तत्र प्रथमसर्गे सह्यमहाराष्ट्रीयम्, द्वितीये साधुवर्यद्वयसंवादः, तृतीये वसन्तमांगल्यम्, चतुर्थे शिवजन्म, पञ्चमे शिवशिक्षणम्, षष्ठे दम्पतीविवादः, सप्तमे सर्गे राजधानीप्रवासः, अष्टमसर्गे पारतन्त्रजुगुप्सा, नवमे स्वातन्त्रप्रतिज्ञा, दशमे स्वातन्त्रदिनोदयः, एकादशे विजययात्रा, द्वादशे सर्गे शत्रुव्यथा, त्रयोदशे विपत्तिद्वयाघातः, चतुर्दशे सर्गे पितृमोचनम्, पञ्चदशे यवनराजकौटिल्यम्, षोडशे सर्गे स्वराज्यस्य सुधारणा, सप्तदशे बिजापुरेशस्य विमातुः प्रकोपवेदनावर्णनम्, अष्टादशे अफझुल्लप्रतिज्ञा, ऊनविंशतितमे सर्गे अफझुल्लसेनाक्रमणम्, विंशतितमे सर्गे कान्होजिवीरस्य निश्चयः, २१तमे सर्गे संग्रामप्रोत्साहनम्, २२तमे आपदाघाताः, २३तमे सर्गे रिपुदूतागमनम्, चतुर्विंशतितमे सर्गे शिवदूतप्रयणम्, पञ्चविंशतितमे अफजुल्लव्यामोहः,२६तमे व्यूहरचना, २७तमे शिवप्रणायम्,२८तमे सर्गे सभामण्डपनिर्माणम्, २९तमे अफझुल्लवधः, त्रिंशत्तमे सर्गे मातृसंतोषः, क्रमेण ४३तमे शाहाजिनिधनम्, ४४तमे सर्गे खवासखानमर्दनम्, ततश्च छत्रसालप्रबोधनम्, षष्ठितमे सर्गे पर्णालविजयः, ६१तमे प्रतापरावहौतात्म्यम्, ६२तमे सर्गे गागाभट्टसंकल्पः, ६४तमे सर्गे राज्याभिषेकारम्भः, ततश्च शान्तिप्रयोगः, चान्तिमं सर्गत्रितयं यावत् राज्याभिषेकस्य प्रारम्भवर्णनं श्रीधरभास्करेण उपायनीकृतनि।

'श्रीशिवपराज्योदय'मिति महाकाव्यं विरच्य १९७४ ईशवीयाब्दे साहित्य-अकाडेमीसम्मानेन भूषितो वर्णेकरमहाभागः। राष्ट्रपतिपुरस्कारेणापि कविरयं सभाजितः इति परमगौरवास्पदं वर्तते। तस्यान्ये प्रख्याताः साहित्यकृतयस्तावत् – क.

[४६२]श्रीशिवराज्योदयम् – शारदाप्रकाशनम्, पुणे, १९७२।

शिवराज्योदयम् ख. शिवराजाभिषेकम्[४६३] (नाटकम्) ग. कथावल्लरी[४६४]।

• कलानाथशास्त्रिणः योगदानमर्वाचीनसंस्कृतसाहित्ये

भट्टमथुरानाथशास्त्रिणः सुयोग्यपुत्रस्य कलानाथशास्त्रिणः योगदानं न हि नूनमर्वाचीनसंस्कृतकाव्यसर्जने। १९३६खृष्टाब्दस्य जुनमानस्य पञ्चदशतमदिनाङ्के राजस्थानस्य जयपुरे जनिं लेभे कलानाथः। अध्ययनं समाप्य स किल राजस्थानसर्वकारस्य भाषाविभागे प्रधानत्वेन नियुक्तोऽभूत्। तस्य विख्याताः साहित्यकृतयस्तावत् १). जीवनस्य पृष्ठाद्वयम्[४६५] (उपन्यासः) २). सुधीजनवृत्तम्[४६६] (जीवनचरितम्) ३). कथानकवल्ली[४६७] (उपन्याससंग्रहः), ४). आख्यानवल्लरी' (कथा-संग्रहः), ५). नाट्यवल्लरी (नाटकम्), ६). कवितावल्लरी (काव्यसंग्रहः), ७). विद्वज्जनचरितामृतम्' (जीवनीसंग्रहः, नई दिल्ली, १९८२), ९). 'जीवनस्य पाथेयम्' (उपन्यास, २००३), १०). 'ललितकथा कल्पवल्ली' (२०१२), ११). 'भारतीयसाहित्यनिर्माता (श्रृंखला): भट्टमथुरानाथशास्त्री 'मञ्जुनाथः'[४६८] चेति। तस्मिन् संग्रहे पञ्च उपन्यासाः सन्ति। ते च यथा 'दिग्विरामः', 'अस्पृश्यताया रहस्यम्', 'शत्रू वा मित्रे वा', 'दम्भज्वरः' तथा च 'मर्यादे'ति।

३.२. मध्यप्रदेशस्य आधुनिकसंस्कृतसाहित्यम्

३.२.१. रेवाप्रसादद्विवेदी

अर्वाचीनकाले संस्कृतविद्वद्वर्येषु मूर्धन्यस्थानीयाः वरिष्ठाः कोविदकवयस्तथा विद्वांसस्तावद् महामहोपाध्याया रेवाप्रसादद्विवेदिनः। कविरयं १९३५ ईशवीयाब्दस्य आगष्टमासस्य द्वाविंशतितमे दिनाङ्के पण्डितनर्मदाप्रसादद्विवेदि-लक्ष्मीदेव्योः

[४६३]शिवराजाभिषेकम्- शारदागौरवग्रन्थमाला, व्यासपुस्तकालयः, पुणे, १९३५।
[४६४]कथावल्लरी – संस्कृतभाषाप्रचारिणी सभा, नागपुरम्, १९९३।
[४६५]जीवनस्य पृष्ठाद्वयम् – भारती, संस्कृतमासिकः, १९६६।
[४६६]सुधीजनवृत्तम् – रचनाप्रकाशनम्, जयपुरम्, १९९९।
[४६७]कथानकवल्ली- हंसाप्रकाशनम्, जयपुरम्, २००२।
[४६८]'भारतीयसाहित्यनिर्माता' (श्रृंखला): भट्टमथुरानाथशास्त्री 'मञ्जुनाथः' – साहित्य-अकादमी, नई दिल्ली, २०१३।

सुयोग्यपुत्रत्वेन मध्यप्रदेशस्य नर्मदातटवर्तिनदनेरस्थानं स्वजन्मना व्यभूषयत्। पाठं समाप्य वनारसहिन्दुविश्वविद्यालयस्य प्रख्याता अध्यापका आसन् रेवाप्रसादद्विवेदिवर्य्याः। संस्कृतसाहित्य-शास्त्रेषु महतेऽवदानाय १९७८ ईशवीयेऽब्दे राष्ट्रपतिसम्मानेन सभाजितोऽभूदयम्। परं 'स्वतन्त्रसम्भव'मिति महाकाव्यं विरच्य १९९१ ईशवीयाब्दे साहित्य-अकाडेमीपुरस्कारेण सभाजितोऽभूत् कविवरोऽयम्।

काव्य-नाट्य-व्याकरणादिशास्त्रेषु प्रवीणोऽयं कविवरोऽर्वाचीनसंस्कृतसाहित्य-प्रपञ्चं प्रतिपदमेव समलञ्चकार स्वकारयितृप्रतिभाबलादेव। स त्रीणि महाकाव्यानि, बहूनि रूपकाणि, बह्व्यश्च कथाः, काव्यशास्त्राणि च ससर्ज। निम्नोक्तसूच्या तस्य कारयितृप्रतिभायाः परिचयः प्रस्तूयते –

क। अयि नीलनदि! (काव्यम्) – कालिदाससंस्थानम्, वाराणसी, २००९।

ख। अलं ब्रह्म (साहित्यशास्त्रग्रन्थः) - तत्रैव, २००५।

ग। उत्तरसीताचरितम्[४६९] (महाकाव्यम्) – तत्रैव, १९९०।

घ। काव्यालंकारकारिका (अभिनवकाव्यशास्त्रम्) – तत्रैव, १९७७।

ङ। कुमारविजयम् (महाकाव्यम्) – तत्रैव, २००२।

च। जयेन्द्रसरस्वतीपादावदानम् (काव्यम्) – तत्रैव, २०११।

छ। नाट्यानुशासनम् (नाट्यत्त्वम्) – तत्रैव, २००१।

ज। प्रमथः (काव्यसंग्रहः) – तत्रैव, १९९८।

झ। मतान्तरम् (काव्यम्) – तत्रैव, २००१।

ञ। यूथिका[४७०] (संस्कृतानुवादमूला नाटिका) – संस्कृतप्रकाशनम्, १९७६।

ट। रसभोगः (शास्त्रम्) – तत्रैव, १९९८।

ठ। रामपरिसंख्या (खण्डकाव्यम्) – तत्रैव, २००८।

ड। रेवाभद्रपीठम्[४७१] (कविता) – तत्रैव, १९८८।

[४६९]रामायणाश्रिते अस्मिन् महाकाव्ये देवीसीताया उत्तरकालिकं जीवनं समसामयिककालपरिप्रेक्षे चित्रितम्। अत्र सीताचरित्रे कविना स्वदेशप्रेम तथा राजनीतिश्च संयोजिते।

[४७०]रोमिओ-जुलियेट्नाटकस्य संस्कृतानुवादात्मकञ्चतुर्थाङ्कविशिष्टं रूपकम्।

[४७१]रेवानद्याः प्रशंसापरकश्लोकसमन्वितमिदं काव्यम्।

ढ। शतपत्रम्[४७२] (शतककाव्यम्) – तत्रैव, १९८७।

ण। संस्कृतिहीरम् (काव्यम्) – बनारस-हिन्दू-विश्वविद्यालयः, वाराणसी, १९८८।

त। सप्तर्षिकांग्रेसम् (दशाङ्कनाटकम्) – तत्रैव, २०००।

थ। समर्थः स्वामी रामदासः (मूलमराठीकाव्यकर्ता – प्र.ग.सहस्रबुद्धे, अनुवादमूलम् चरितकाव्यम्) – संस्कृतभारती, नई दिल्ली, २००९।

द। साहित्यशारीरकम् (काव्यतत्त्वम्) – १९९८।

ध। सीताचरितम्[४७३] (महाकाव्यम्) – मनीषाप्रकाशनम्, वाराणसी, १९५३।

न। सुगतो ब्रवीति[४७४] (काव्यम्) – कालिदासप्रकाशनम्, वाराणसी, २००२।

प। स्वातन्त्र्यसम्भवम्[४७५] (महाकाव्यम्) – तत्रैव, १९९०।

अपि च, तेन श्यामदास-तुकारामयोर्जीवनेतिवृत्तं गीर्वाणवाण्यामालिखितम्।

२. राधावल्लभत्रिपाठी

प्रतिभानामकस्य शक्तिविशेषस्य विचित्ररूपैः जगदिदम् आस्वाद्यमानतया प्रतिभाति। अस्या प्रतिभाया अभिनवोन्मेषेण कवेः काव्यं प्रचरद्रूपतामेति। तथाहि प्रतिभामिमां जगत्कल्याणमयीं प्रणमति ध्वन्यालोककृदानन्दवर्धनाचार्यः। अपि च, प्रतिभाप्रसादात् सहृदयो महाकविपदवीमप्युपालभते। संस्कारजन्यया प्रतिभया शिशूनां

[४७२]काव्यस्य गुण-स्वभावादिप्रशंसापरककवितेयम्।

[४७३]अस्मिन् महाकाव्ये रामस्य राज्यारोहरणात् सीतायाः पातालप्रवेशपर्यन्तं कथानकानि वर्णितानि दृश्यन्ते। अस्मिन् महाकाव्ये १० सर्गाः तथा च ६९४संख्यकाः श्लोकाः सन्ति। तत्र प्रथमे सर्गे राष्ट्रपतिनिर्वाचनम्, द्वितीये जानकीकौलीनम्, तृतीये जानकीपरित्यागः, चतुर्थे सर्गे साकेतपरित्यागः, पञ्चमे कुमारप्रसवः,षष्ठे सर्गे जानकीमुनिवृत्तिः, सप्तमे विद्याधिगमः,अष्टमे सर्गे कुमारायोधनम्, नवमे मातृप्रत्यभिज्ञानम्, चान्तेम सर्गे समधिमाङ्गल्यमिति विषयाः निरूपिताः। ग्रन्थाय कविरयं १९९१ खृष्टाब्दे साहित्य-अकाडेमीपुरस्कारेण सत्कृतः।

[४७४]अर्वाचीनसंस्कृतग्रन्थे प्राथम्येन २००० ईशवीयाब्दे प्रकाशितं ततः शरशय्याख्ये ग्रन्थे संकलितम्।

[४७५]झाँसीराणी-लक्ष्मीवाई इत्यस्याः समयात् प्रभृति स्वाधीनतोत्तरकालं यावत् भारतभूमेः स्वाधीनतासंग्रामवृत्तमत्र समायोजितम्। महाकाव्यमिदं विरच्य रेवाप्रसादः साहित्य-अकाडेमीपुरस्कारेण भारतीयभाषापरिषदः 'कल्पवल्ली'सम्मानेन (१९९३), 'वाचस्पति'पुरस्कारेण (१९९७) तथा च (१९९९) 'श्रीवेणी'सम्मानेनालंकृतः।

जन्मान्धानाम[४७६]पि कवित्वशक्तिरुन्मीलति, तर्हि का कथा राधावल्लभस्य।

राधावल्लभस्तादृशः प्रतिभाविशिष्टः कश्चन कवयिता भावकश्च वर्तते, यः साम्प्रतिककालस्य साहित्यग्रथनदृष्ट्या ध्वन्यालोककृन्मतानुसारमङ्गुलिमेयेषु[४७७] महाकविवरेष्वन्यतमः। अयञ्च कविः सहृदयश्च साम्प्रतिककालस्य संस्कृतनभस्यर्जुन इव राराज्यते। संस्कृतसाहित्यस्य वर्तमानकालः राधावल्लभस्य नाम्नैव व्यपदेष्टुमलम्। तस्मिन् कारयितृ-भावयितृरूपयोः प्रतिभयोः प्रविरलसमन्ययो लक्ष्यतेऽस्माभिः। अपि चास्य कवेः सारस्वतजीवनं धाराद्वितयेन विभाजयितुं शक्यते – एका तावत् सृष्टिधर्मिणी चापरा धाराग्रन्थप्रबन्धादिसम्पादनात्मिका। अतो राधावल्लभः कविः, कलाजीवी, आचार्यश्चिन्तको वेत्यत्र नास्ति संशयलवो विदुषाम्।

राधावल्लभः फेब्रूयारीमासस्य पञ्चदशदिनाङ्के १९४९ ईशवीयाब्दे मध्यप्रदेशेषु राजगढजनपदे जनिं लेभे। श्रीमद्राधावल्लभः सुरभारत्याः सर्वतोदिक् संरक्षणाय दिल्लीस्थ-राष्ट्रिय-संस्कृत-संस्थानमानित-विश्वविद्यालयीय-कुलपतिपदमधितिष्ठति स्म। विशेषेण नाट्यशास्त्र-साहित्यशास्त्रयोस्तस्य महद् योगदानं संस्मरणीयम्। तेन प्रकाशितानि द्विशतसंख्यकानि संस्कृतपुस्तकानि, द्विशतं गवेषणापत्रिकाः, तथा च प्रादेशिकवैदेशिकभाषाभ्यः त्रिंशत्संख्यका अनूदितानि काव्यानाटकादीनि। विशेषेण संस्कृत-हिन्द्याङ्गलभाषासु नवोत्तरशतं ग्रन्था अस्य प्रकाशिता येषु काव्यशास्त्र-नाट्यशास्त्र-संस्कृतकाव्यादिविषयानधिकृत्य विमर्शपूर्वं विरचिताः केचन प्रबन्धाः, कविताः, मौलिकनाटकानि, कथाः, कथासङ्ग्रहत्रयी, उपन्यासः, पञ्चसंस्कृतकाव्यसङ्कलनानि च परिगण्यन्ते। सारस्वतकृतये तेन साहित्य-अकाडेमीपुरस्कारेण, राष्ट्रपतिपुरष्कारेण, पण्डितराजसम्मानेन च सम्मानितोऽभूत्। तस्य श्रेष्टत्वस्य मानकरूपेण अधस्तादुल्लिख्यन्ते तदीयाः कारयितृप्रतिभाजाः सारस्वतकृतयः–

- अन्यच्च – (उपन्यासः) संस्कृतभारती, नई दिल्ली, २०११।

[४७६]'मेधाविरुद्रकुमारदासादयो जात्यन्धाः कवयः श्रूयन्ते...' (काव्यमीमांसा, प्रथमाधिकरणस्य चतुर्थोऽध्यायः)।

[४७७]'अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्रा पञ्चषा वा महाकवय इति गण्यन्ते।' (ध्वन्यालोकः, प्रथम उद्योतः, कारिका – ६)।

- अनुभववीथिः – तत्रैव, २०११।
- अभिनवकाव्यालङ्कारसूत्रम्[४७८] (काव्यशास्त्रग्रन्थः) – सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, २००५।
- अभिनवशुकसारिका[४७९] (कथा, भागद्वयम्) – सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, २००४।
- आत्मना आत्मनम् – (दैनन्दिनी), संस्कृतभारती, नई दिल्ली, २०११।
- आधुनिकसंस्कृतसाहित्यश्रीः[४८०], प्रतिभाप्रकाशनम्, दिल्ली, २००१।
- आयतिः[४८१](काव्यसंग्रहः) – संस्कृतपरिषत्, सागरविश्वविद्यालयः, सागरः, १९७८।
- उपाख्यानमालिका (कथा) – प्रतिभाप्रकाशनम्, नई दिल्ली, १९९९।
- कविद्वादशी – संस्कृतपरिषद्, हरिसिंहगौड़विश्वविद्यालयः, सागरः, २००६।
- गीतधीवरम् – संस्कृतपरिषद्, सागरः, १९९५।
- तण्डुलप्रस्थीयम् (रूपकम्) – प्रतिभाप्रकाशनम्, नई दिल्ली, १९९९।
- ताण्डवम् – (उपन्यासः) – तत्रैव, २०१३।
- थाईदेशस्य इतिहासः संस्कृतिश्च – तत्रैव, २००५।
- नवस्पन्दः (काव्यसंग्रहः) – हिन्दी-ग्रन्थ-अकाडेमी, भोपाल, १९८८।
- पञ्चवटी[४८२] – संस्कृतपरिषद्, सागरः, १९९८।
- प्रेक्षणसप्तकम् (एकांकीप्रेक्षणकसंग्रहः) – प्रतिभाप्रकाशनम्, नई दिल्ली, १९९७।
- प्रेमपीयूषम् (नाटकम्) – संस्कृतपरिषद्, सागरः, १९७१।
- रुमीपञ्चदशी (अनुवादः) – संस्कृतभारती, नई दिल्ली, २०११।

[४७८]पुनः संस्करणम्, हिन्दीव्याख्यया सह, व्याख्याकारः – रमाकान्तपाण्डेयः, जगदीशसंस्कृत-पुस्तकालयः, जयपुरम्, २०१०।

[४७९]पुनः संस्करणम्, संस्कृतभारती, दिल्ली, २०११।

[४८०]रामजी-उपाध्यायस्य अभिनन्दनग्रन्थः।

[४८१]पुनः मुद्रणम् – राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, २००८।

[४८२]मैथिलीशरणगुप्तप्रणीतस्य पञ्चवटीकाव्यानुवादः।

- रुमीरहस्यम् (अनुवादः) – तत्रैव, २०११।
- विक्रमचरितम् (आख्यानम्) – प्रतिभाप्रकाशनम्, नई दिल्ली, २०००।
- षोडशी (काव्यसंकलनम्) – साहित्य-अकाडेमी, दिल्ली, १९९२।
- संक्षिप्तनाट्यशास्त्रम् – वाणीप्रकाशन, नई दिल्ली, २००६।
- सन्धानम् (काव्यसंग्रहः) – संस्कृतपरिषद्, सागरः, १९८८।
- समष्टिः (काव्यसंग्रहः) – देववाणीपरिषद्, नई दिल्ली, २०१४।
- सम्प्लवः (काव्यसंग्रहः) – प्रतिभाप्रकाशनम्, नई दिल्ली, २०००।
- सुशीला (प्रेक्षणकम्) – तत्रैव, २००२।
- स्मितरेखा (कथासंग्रहः) – संस्कृतभारती, नई दिल्ली, २०११।
- लहरीदशकम्[४८३] (लहरीकाव्यम्) – प्रतिभाप्रकाशनम्, दिल्ली, २००३।
- भारतीयरङ्गसमुन्मेषः – संस्कृतपरिषद्, सागरः, १९८१।
- नाट्यमण्डपम् – तत्रैव, १९८०।
- आदिकविर्वाल्मीकिः – तत्रैव, १९७९।
- संस्कृतनिबन्धकलिका – भारती-विद्या-प्रकाशन, वाराणसी, १९१६।
- महाकविः कण्टकः – संस्कृतपरिषद्, सागरः, १९७१।

३. मूलचन्द्रशास्त्री

मूलचन्द्रशास्त्री १९०३ ईशवीयाब्दे जनिं लेभे मध्यप्रदेशस्य मालथुन-भ्यालीस्थाने। आसीत्स ह्यर्वाचीनसंस्कृतसाहित्यस्य कविवर्येषु एकतमः। तेन मेघदूतस्य समस्यापूर्तिमुपलक्ष्य 'वचनदूतमि'[४८४]ति खण्डकाव्यं व्यरचि। तथा च महावीरस्वामिनः पवित्रजीवितमुपजीव्य 'वर्द्धमानचम्पूरि'ति स्तवकाष्टकोपेतं चम्पूकाव्यमपि ग्रथितम्। १९६३ ईशवीयाब्दे इहलोकं परित्यज्य स्वर्गं गतः।

४. राजेन्द्रप्रसादमिश्रः

राजेन्द्रप्रसादमिश्रः १९५७ ईशवीयाब्दे मध्यप्रदेशप्रान्तं स्वजनुषालंकृतवान्। स हि आधुनिकसंस्कृतस्यान्यतमः कविवरः। तेन 'शृङ्गारकेयूरकमिति' खण्डकाव्यं,

[४८३]प्रथमसंस्करणम् संस्कृतपरिषद्, सागरः, १९९२।

[४८४]वचनदूतम् – जैनविद्यासंस्थानम्, श्रीमहावीरजी (राजस्थानम्), १९७५।

'गोपीविरहवचनमिति' पञ्चाशदधिकशतं श्लोकानां संग्रहः, कृष्णविरहे राधाया भावमूलकं 'विरहिता'काव्यं , 'आशासन्देशसौरभमिति' दूतकाव्यम्, राधाकृष्णयोः प्रेमोपजीव्यं 'संयोगिनीति' खण्डकाव्यञ्च विरचितानि।

५. श्रीपादशास्त्री

श्रीपादशास्त्री १८८२ तमे वर्षे स्वजनुषा मध्यप्रदेशमलंकृत्य जीवद्दशायां काव्यत्रितयं विरच्य अपि संस्कृतसाहित्यमपि व्यभूषयत् – १). भारतरत्नमाला (देशनायकानां जीवनाश्रिता), २) द्वादशदर्शनसोपानावलिः (द्वादशदर्शनपरिचयग्रन्थः) ३. श्रीशिवाजीमहाराजचरितम्[४८५] (गद्यम्)।

३.३. महाराष्ट्रस्य संस्कृतसाहित्ये योगदानम्

महाराष्ट्रे निवसन्तः कवयितारः स्वस्वकारयित्र्या प्रतिभया काव्यानि, नाटकानि, महाकाव्यानि, कविता माराठीभाषातः संस्कृतानूदितानि काव्यानि च विरचितवन्तः। न केवलं संख्यागतदिशा, मानगतदृष्ट्या च महाराष्ट्रस्यार्वाचीनसंस्कृतवाङ्मयं सत्यमेव प्रशंसार्हम्।

साम्प्रतिके काले प्राप्यन्ते महाराष्ट्रे नव (क्षमारावस्य त्रीणि महाकाव्यानि सप्तमेऽध्याये आलोच्यन्ते) महाकाव्यानि। तेषां महाकाव्यानां विषयास्तावत् तुकाराम-ज्ञानेश्वर-शिवाजी-रामप्रताप-सावारकार-गान्धि-वावासाहेव-आम्बेदकर-तिलकानां महापुरुषाणां देशप्रेमिकानाञ्च जीवनचरितानि। तानि महाकाव्यानि यथा –

कवीनां नामानि	सारस्वतकृतयः
१) श्रीमाधवः अणे	श्रीतिलकयशोऽर्णवः[४८६]

[४८५]श्रीशिवाजीमहाराजचरितम् – मालवा, इन्दौरः (प्रकाशनकालः नोल्लिखितः)।

[४८६]महाकाव्यस्यास्य कथावस्तु इत्थम् भारतीयस्वातन्त्र्यान्दोलनस्य महतः सेनापतेः लोकमान्यस्य श्रीमतो बालगंगाधरतिलकस्य भूमिका कृत्स्ने जीवने आधारिता। भारतीयस्वातन्त्र्यसंग्रामाय जीवनस्यान्तिमदिनं यावत् तस्य महत्या भूमिकायाः विधिवत् काव्यात्मिका अभिव्यक्तिश्चित्रिता वर्तते अस्मिन् महाकाव्ये। इह महाकाव्ये १२००० पद्यानि तथा च ८५ तरङ्गानि लसन्ति। इदं महाकाव्यं सर्वापेक्षया विशालकायमित्यत्र नास्ति संशयः। अस्य प्रकाशनं खण्डत्रयेष्वभूत्। तत्र प्रथमखण्डे प्रथमतः पञ्चविंशतितरङ्गानि, द्वितीये २६-तः ४१-तरङ्गं यावत् चान्तिमे ४२ तः ८५तमतरङ्गानि समाविष्टानि।

२) जि.वि.पळसूले	वैनायकम्[४८७]
३) एम्.पेन्नः	कविकण्ठरमणीयम्
४) प्रभाकरशङ्करः जोशी	भीमायनम्[४८८]
५) प्रभुदत्तशास्त्री	गणपतिसम्भवम्[४८९] (१९६८)
६) विश्वनाथच्छेत्रे	श्रीसुभाषचरितम्[४९०] स्वातन्त्र्योदयम्[४९१]
७) केदारगङ्गाधरविष्णु-ठेकेदरः	महात्मायनम्[४९२] विवेकानन्दचरितम्[४९३]

समसामयिकवृत्तान्युपजीव्य काव्यशास्त्रीयनियमान् अनुसृत्य च काव्यकर्माणि महाराष्ट्रीयकविभिर्विरचितानि। प्रादेशिकसाहित्यानां प्रभाववशादेव नूतनशब्दान् प्रवादवाक्यानि च महाकाव्येषु प्रयुञ्जन्ति स्म कवयः। कवयो नवीनाङ्गिकेन रोचिष्णुतया प्रभविष्णुतया च महाकाव्येषु पुरातत्त्व-ऐतिहासिकवृत्तान्तान् प्रयुक्तवन्तः।

[४८७]वैनायकम् – शारदागौरवग्रन्थमाला, पुणे, १९९८।

[४८८]भीमायनम् – पं. वसन्त-अनन्त-गढगीलः, शारदागौरवग्रन्थमाला, पुणे, २०१०।

[४८९]अस्मिन् महाकाव्ये मूलकथा तु सैवास्ति या गणेशविषये पुराणेषु उपलभ्यते। परञ्च अस्मिन् महाकाव्ये मूलकथां स्वीकृत्य तां कथामेव राष्ट्रीयचेतनायाः धारायां समरसं प्रयुनक्ति स्म कविः। अस्य महाकाव्यस्य कथावस्तु नव सर्गेषु विभक्तम्। तत्र दशमसर्गे कवेः परिचयो वर्णितः। तत्र प्रथमसर्गे हिमगिरिपरिचयः, द्वितीयसर्गे गिरीशगिरिजापरिणयः, तृतीये योगशक्तिचमत्कृतिः, चतुर्थे शस्त्रार्थशस्त्रीभावः, पञ्चमे सर्गे गजमनुजयोजनम्, षष्ठे तान्तैकदन्तप्रसङ्गः, सप्तमे सर्गे महाभारतलेखाख्यानम्, अष्टमे देवमोदकोपहारः, नवमे गणशासनोत्कर्षः, दशमे सर्गे काव्यान्तरं पुष्पार्पणममुपायनीकृतानि कवयित्रा।

[४९०]श्रीसुभाषचरितम् – कल्याणम्, १९६३। (अस्मिन् महाकाव्ये १० सर्गाः सन्ति। अत्र प्रखरतमस्वतन्त्रतासंग्रामसेनानेः नेतुः श्रीसुभाषचन्द्रबोसस्य जीवनचरितम् वर्णितमस्ति। तत्र प्रथमे उदयः, द्वितीये सद्गुरुमार्गणम्, तृतीये तेजोदर्शनम्, चतुर्थे अतुल्यत्यागः, पञ्चमे देशसेवारम्भः,षष्ठे उत्कर्षः, सप्तमे अन्तर्धानम्, अष्टमे नेतृत्वलाभः, नवमे सर्गे स्वातन्त्र्यसमरः, चान्तिमे आत्मसमर्पणम् वर्णितम्)।

[४९१]स्वातन्त्रोदयम् – जयपुरम्, १९६३।

[४९२]महात्मायनम् – जयदीपप्रकाशनम्, पुणे, १९९२।

[४९३]विवेकानन्दचरितम् – भारती-संस्कृतमासिक-पत्रिका, जयपुरम्, १९८२।

महाराष्ट्रे साम्प्रतिके काले काश्चन मौलिकरचनाः प्रकाशिताः, याः संस्कृतसाहित्यश्रेण्याः कस्मिन्नपि वर्गे अन्तर्भावयितुं न शक्नुमः। तद्यथा- पि. एन. एस्. नव्रेमहाभागस्य 'अभिनवसुभाषितविलासः', भौमदेवपतङ्करस्य 'विदग्धकाव्यकेशी', कण्टकार्जुनस्य 'कण्टकाञ्जलिः' चेति।

ठाणे-मण्डलवास्तव्यो विश्वनाथकेशवछत्रे महाकविस्तथा प्रसिद्धो नाट्यकृत्। महाकाव्यं विहायास्य बहुविधाः रचनाः संस्कृतेन मराठीभाषया च प्रकाशिता दृश्यन्ते। तस्य नाटकेष्वन्यतमानि तावत् – 'प्रतापशक्तम्', 'सिद्धार्थप्रव्रजनम्'[४९४], 'शिक्षणम्'[४९५], 'नन्दिनीवरप्रदानम्'[४९६], 'जवाहर-स्वर्गारोहणम्'[४९७], 'कीचक-हननम्'[४९८], 'अन्वर्थको लालबाहादुरोऽभूत्', 'अपूर्वः शान्तिसंग्रामः'[४९९] चेति।

महाराष्ट्रे संस्कृतानुवादसाहित्यम्

अपरतः अनुवादसाहित्ये महाराष्ट्रीयकवीनां योगदानानि नास्वीकरणीयानि। तत्र सन्न्यासिनो रामदासस्य 'दासबोध' इति धर्मीयग्रन्थमनूदितवान् आर. एन्. ओलपुरेमहाभागः 'संस्कृतदासबोध' इति नाम्ना। तुकारामस्य कानिचित् अभङ्गान्यनूदितानि गजानन-बालकृष्ण-पळसुलेभागैः 'तुका वक्ति' इति शिरोनाम्ना। रामचरितमानसस्य अनुवादो कृतो वर्तते नलिनीसधलेमहाभागैः 'तुलसीमानसनलीनमिति'[५००] शीर्षकेण। जोशीमहाभागैः माराठीनाटकस्य 'सारदा' इत्यस्य 'संगीतशारदमिति' अनुवादो विहितः। तेनैव शेक्सपीयरपादस्य 'हेमलेट' इति नाटकस्यानुवादः कृतः। संस्कृतनाटकस्यास्य मञ्चस्थोऽपि अभूत् 'रायसेनः दुर्गादेशस्य युवराजः' इति शिरोनाम्ना। किञ्च सुधामूर्त्याः – 'The Wish and otherwise' इत्यस्य संस्कृतनाटकस्य संस्कृतभाषयानुवादं कृतवन्तः 'उताहो अज्ञाः' इति शीर्षकेण

[४९४]सिद्धार्थप्रव्रजनम् – अमृतमाला, पुणे, १९६४।

[४९५]शिक्षणम् – तत्रैव, १९६५।

[४९६]नन्दिनीवरप्रदानम् – तत्रैव, १९६६।

[४९७]जवाहर-स्वर्गारोहणम् – तत्रैव, १९६७।

[४९८]कीचक-हननम् – तत्रैव, १९६६।

[४९९]अपूर्वः शान्तिसंग्रामः – तत्रैव, १९७२।

[५००]तुलसीमानसनलीनम् – शारदागौरवग्रन्थमाला, पुणे, १९७८।

आशागूर्जरमहाभागाः। अर्थात् अनुवादसाहित्येऽपि महाराष्ट्रस्य प्रतिभा चिरं प्रग्लभा चकास्ति। संस्कृते गजलसंगीतस्य व्यवहारस्य नूतनः प्रयासः प्राथम्येन अत्रैव दृश्यते। वासुदेवपटङ्करमहाभागस्य 'विदग्धकाव्यकेलि'रिति गजलसंगीतसंग्रहः प्रकाशितो ग्रन्थाकारेण अनुपमादोङ्गरेमहाभागेया।

क. अर्वाचीनसंस्कृतसाहित्ये श्रीरामवेलंकरस्य योगदानम्

१९१९ खृष्टाब्दे श्रीरामवेलङ्करो नामधेयः प्रौढः कवयिता स्वजनुषा सृष्टिधर्मिक्षमतया च महाराष्ट्रप्रदेशमलंकृतवान्। तेन बहूनि काव्यानि नाटकानि च विरचितानि। तद्यथा–

1. एकताया भारतीया नृत्यसाह्याविष्कृता (काव्यम्) – देववाणीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९८५।
2. कथासारः (कथासंग्रहः) – देववानीमन्दिरम्, इन्दिरानिवासः, वम्बे,१९८३।
3. कालिदासचरितम् (नाटकम्) – तत्रैव, १९६१।
4. कालिदासचरितसुधा (पत्रसंग्रहः) – तत्रैव, १९६१।
5. कालिन्दी (नाटकम्) – तत्रैव, १९६४।
6. कौटिलीयार्थनाट्यम् (रूपकम्) – तत्रैव, १९४४।
7. छत्रपतिश्रीशिवाजीराजः (नाटकम्) – तत्रैव, १९७४।
8. जन्मरामायणस्य (रूपकम्) – तत्रैव, १९७२।
9. जवाहरचिन्तनम् (लघुकाव्यसंग्रहः) – सुरभारतीप्रकाशनम्, भोपालः, १९६६।
10. जवाहरजीवनम् (खण्डकाव्यम्) – भारतीयविद्याभवनम्, मुम्बइ, १९८९।
11. तत्त्वमसि (रूपकम्) – देववानीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९७२।
12. तनयो राजा भवति कथं मे (रूपकम्) – तत्रैव, १९७२।
13. प्राणाहुती (नाटकम्) – गीर्वाणसुधाप्रकाशनम्, मुम्बइ, १९६५।
14. प्रीतिपथे (नाटकम्) – इन्दिरानिवासः, मुम्बइ, १९८३।
15. भक्तिगीतानि – संस्कृतसुधानिधिः, मुम्बइ, १९९२।
16. मेघदूतान्वितम् (रूपकम्) – देववाणीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९९९।
17. मेघदूतोत्तरम् (रूपकम्) – तत्रैव, १९६७।
18. रणश्रीरङ्गः (नाटकम्) – गीर्वाण-सुधा-प्रकाशनम्, मुम्बइ, १९६४।
19. राजा भवति कथं मे ? (रूपकम्) – देववाणीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९७२।
20. राज्ञी दुर्गावती (नाटकम्) – गीर्वाण-सुधा-प्रकाशनम्, मुम्बइ, १९६४।
21. लोकमान्यस्मृतिः (रूपकम्) – देववाणी-मन्दिरम्, इन्दिरानिवासः, बम्बइ, १९७७।
22. वालककथाकुञ्जः (कथासंग्रहः) – रामसांस्कृतिकसुधानिधिः, मुम्बइ, १९८९।
23. बालगीतम् – रामसुधा-सांस्कृतिक-निधिः, गिरगाँवः, मुम्बइ, १९७७।
24. विरहरङ्गम् (काव्यम्) – देववाणीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९९१।
25. विरहलहरी – तत्रैव, १९६७।
26. श्रीरामनाट्यसृष्टिः (गद्यम्) – तत्रैव, १९८६।
27. श्रीरामसुक्तिसुधा (काव्यम्) – रामसुधासांस्कृतिकनिधिः मुम्बइ, १९८९।
28. संसारसौरभम् (काव्यम्) – देववाणीमन्दिरम्, इन्दिरा-निवासः, मुम्बइ, १९९१।
29. संस्कृतनाट्यगीतम् – तत्रैव, १९८६।
30. संस्कृतसङ्गीतकालिन्दी (नाटकम्) – तत्रैव, १९७६।
31. सङ्गीतसौरभम् (आपेरा-रूपकम्) – तत्रैव, १९८१।
32. स्वच्छन्दम् (काव्यम्) – रामसुधासांस्कृतिकनिधिः, मुम्बइ, १९८८।
33. स्वातन्त्र्यमणिः (रूपकम्) – तत्रैव, १९६७।
34. स्वातन्त्र्यचिन्ता (रूपकम्) – तत्रैव, १९६७।
35. स्वातन्त्र्यलक्ष्मी – तत्रैव, १९६४।
36. स्वैरविहारः (काव्यसंग्रहः) – रामसुधासांस्कृतिकनिधिः, मुम्बइ, १९८७।

37. हवनहविः (रूपकम्) – देववाणीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९८१।

38. हुतात्मा दधीचिः (नाटकम्) – गीर्वाण-सुधा-प्रकाशनम्, मुम्बइ, १९६८।

ख. महाराष्ट्रस्य संस्कृतसाहित्ये विनायकबोकिलस्य योगदानम्

महाराष्ट्रराज्ये १८९० ईशवीये वर्षे विनायकपाण्डुरङ्ग-बोकीलः जातजन्मा अभूत्। तेन 'शिववैभवम्'[५०१], 'श्रीकृष्णरुक्मिणीयम्'[५०२], 'रमामाधव'ञ्चेति काव्यानि विरचितानि। समसामयिकपरिस्थितिमाश्रित्य महाराष्ट्रवास्तव्याः कवयो नाट्यकाराश्च नाटकानि गीतिकाव्यानि च विरचितवन्तः। गद्यसाहित्यमुपजीव्य साम्प्रतिके काले पञ्चदशपुस्तकानि कविभिः ग्रथितानि। तेषु केचित् आत्मजीवनीमूलकाः, केचन च कथात्मिकाः ग्रन्थाः।

ग. गजानन-बालकृष्ण-पळसुले-महाभागस्य योगदानम् अर्वाचीन-संस्कृतसाहित्ये

महाराष्ट्रस्य साताराख्ये जनपदे ईशवीये १९२१ संवत्सरे नभेम्बरमासस्य प्रथमे दिनाङ्के जनिं लेभे गजाननः। अयं छात्रजीवने नैकेषां विबुधानां सकाशाच्छास्त्रादिज्ञानमुपलभ्य लब्धकीर्तिरभूत्। अस्य शब्दार्थशासनज्ञानं विदग्धसाहित्यपाण्डित्यञ्च संस्कृतज्ञानां संसदि सर्वत्र सुविदितम्। १९४३तमे खृष्टाब्दे स्नातकपरीक्षायामुत्तीर्णो भूत्वा १९४८तमे वर्षे पुणेविश्वविद्यालयस्य स्नातकोत्तरपरीक्षामुत्तीर्णेनानेन १९५७ संवत्सरे संस्कृतधातुपाठानधिकृत्य शोधप्रबन्धनिर्मित्या पी.एच्.डीति उपाधिरधिगतः।

ई.१९४९-वर्षात् १९५६-तमवर्षं यावत् भाण्डारकारप्राच्यविद्यासंशोधनमन्दिरे संशोधनसहायकत्वेन, १९५६-६४तमवर्षं यावत् डेकानमहाविद्यालयसंस्कृतकोश-विभागे उपसंपादकरूपेण, १९६५-७५-तमपर्यन्तं पुणे-विद्यापीठे संस्कृतप्रगताध्ययनकेन्द्रे प्रपाठकत्वेन साफल्येन कार्यं कुर्वन् पळसुलेमहाभागस्तत्रैव प्राध्यापकपदमलंकृत्य देशमातृकां सेवितवान्। तत्रैव प्राध्यापकरूपेण १९८२ ईशवीयवर्षं यावत् कार्यं कृतवान्।

[५०१]शिववैभवम् – पुणे, १९६९।

[५०२]श्रीकृष्णरुक्मिणीयम् – सदाशिवपेठः, पुणा, १९६५।

ततः स पञ्च वर्षाणि भाण्डारकर-प्राच्यविद्या-संशोधनमन्दिरे स्नातकोत्तरविभागेषु साफल्येन पाठितवान्। ततः १९९०-तमवर्षपर्यन्तं तत्रैवातिथि-प्राध्यापकपदमलंकृतवान्। १९९१तः तत्रैव प्राकृतकोशविभागे सम्पादकसहायकपदासीनः समासीत्। १९९३तः-१९९७तमवर्षं यावत् साहित्य-अकादम्या उपदेष्टृमण्डलस्याभवत् सदस्यः। स कश्चन वैयाकरणो योऽशुद्धिसंशोधने तैलपूरितदक्षः। आधुनिकवैयाकरणेषु लब्धप्रतिष्ठोऽयं व्याकरणमर्मविद् "Sechzig Upaniṣad's des Veda" इत्याख्यस्य डायसनकृतस्य जर्मन्ग्रन्थस्याङ्गलभाषानुवादमकरोत्। एवमाङ्गल-जर्मन्-भाषाकोविदोऽयं वैयाकरणः, संस्कृतनवसाहित्यनिर्माणे च यथावसरं दत्तचित्तोऽभूत्।

स्वजीवद्दशायां वैदुष्याय सम्मानं लब्ध्वा लब्धकीर्तिरभूत्। भारतसर्वकारपक्षतः सर्वोत्कृष्टनाटकलेखनार्थं 'समानमस्तु वो मनः' इति नाटकं विरच्य १९६३ ईशवीये वर्षे पुरस्कारः प्राप्तस्तेन। १९९१तमवर्षे पुणेतः श्रीमन्त-नानासाहेब-पेशवे-धार्मिक-आणि-आध्यात्मिकाख्य-पुरस्कारः प्राप्तः। १९९५ ईशवीये संवंसरे राष्ट्रिय-संस्कृत-पण्डितत्वेन राष्ट्रपतिपुरस्कारेण स सम्मानितः।

गजाननस्य सारस्वतकृतिर्विभज्यते द्विधा – शास्त्रीया, इतरा चेति।

क) शास्त्रीयाः ग्रन्थाः

तस्य शास्त्रीया ग्रन्थाः केवलं व्याकरणवेदादिशास्त्राण्यवलम्ब्य रचिताः। ते यथा–

१) SANSKRIT DHĀTUPĀTHAS : A CRITICAL STUDY

२) A CONCORDANCE OF THE SANSKRIT DHĀTUPĀTHAS

३) कविकल्पद्रुमः(बोपदेवीयो धातुपाठः)

४) VERBAL FORMS IN THE RGVEDA (MAṆḌALA – 6)

५) 'युभातः संस्कृतं प्रति' (संस्कृतस्य तुलनात्मकैतिहासिकपरिचयः)

६) SIXTY UPANIṢADS OF THE VEDA[५०३]

७)' संस्कृतचा इतिहास आणि पूर्वेतिहास' (मराठीव्याख्यानमाला)

[५०३]डायसनकृत-जर्मन्-ग्रन्थस्यानुवादः।

८) 'संस्कृत-भाषेच्या काही समस्यांवर आधुनिक भाषाशास्त्राने टाकलेला प्रकाश' (मराठीव्याख्यानमाला)

९) 'वैदिक भाषेच्या जडणघडणीचे काही पैलू' (मराठीव्याख्यानमाला)

१०) 'महाभाष्यदीपिकायाः कतिपयखण्डानाञ्चिकित्सकसम्पादनम्'

तान् ग्रन्थान् व्यतिरिच्यान्ये च परःशताः संशोधनलेखाः सन्ति विदुषोऽस्य।

ख) इतराः (साहित्यकृतयः)

- **अनुवादाः**

अ) त्रीणि काव्यानि (सावरकरमूलानि) –

1. अग्निजा
2. कमला
3. तुका व्यक्ति[५०४]

आ) नाटकानि –

क) भ्रातृकलहः

ख) अथातो ज्ञानदेवोऽभूत्

ग) धन्येयं गायनी कला

घ) यदा रायदुर्गा जागर्ति

ङ) अत्र मृत्युर्विलज्जितः

च) अन्धं युगम्

- **मौलिक्यः**

नाटकानि –

क) समानमस्तु वो मनः

ख) धन्योऽहं धन्योऽहम्

ग) भासोऽहासः

घ) उत्तिष्ठ, कौन्तेय!

[५०४]शारदायां पत्रिकायां प्रकाशितं 'तुका व्यक्ति' इति काव्यम्।

चरितम् –

क) विनायक-वीरगाथा

ख) विवेकानन्दचरितम्।

महाकाव्यम् –

वैनायकम्।

३.४. गुजरात्-प्रदेशशस्य समसामयिकसंस्कृतवाङ्मयम्

कवीनां नामानि	सारस्वतकृतयः	विषयः
१. मूलशङ्करयाज्ञिकः	१. छत्रोपतिसाम्राज्यम्[५०५]	१. दशाङ्कविशिष्टे अस्मिन् नाटके शिवाजी-इत्यस्य शासनकालस्य ऐतिहासिकवृत्तानि वर्णितानि।
	२. संयोगितास्वयंवरम्[५०६]	२. सप्ताङ्कविशिष्टे अस्मिन् नाटके पृथ्वीराजचौहानस्य राजत्वकाले ऐतिहासिकवृत्तान्ताः कविना अत्र वर्णिताः। अत्र पृथ्वीराजस्य नायकोचितवर्णनं चित्रितमास्ते।

[५०५]छत्रोपतिसाम्राज्यम् (नाटकम्) – देवभाषाप्रकाशनम्, इलाहवादः, १९७५।

[५०६]संयोगितास्वयंवरम् (नाटकम्) – कौशाम्बिप्रकाशनम्, प्रयागः, १९९६।

	३. प्रतापविजयम्[५०७]	३. अत्र राणाप्रतापस्य विजयः वर्णितः।
२. मानिकपटेलः	कन्यादानम्	एकाङ्कनाटकेऽस्मिन् राजपुतमहाराज्ञ्याः कृष्णकुमारीदेव्याः चरितमुट्टङ्कितं वरीवर्ति। तस्याः कार्यं प्रति महान् उत्साहोऽत्र वर्णितः।

३. हर्षदेवमाधवः

साम्प्रतिककालस्य कविषु हर्षदेवो व्यतिक्रमतया ख्यातो वर्तते संस्कृतसाहित्यवीथिकायाम्। स हि संस्कृतगुजरातीभाषयोः कविस्तथा समीक्षकः। यद्यपि गुजराटस्य भावनगरजिल्यान्तःपातिनि वर्तेजस्थाने १९५४खृष्टाब्दस्य अक्टोवरमासस्य विंशतितमे दिनाङ्के जनिं लब्धवान्। तस्य पारिवारिकं नाम हर्षवदनमनसुखलालजानीति। गुजराट्-विश्वविद्यालयतः १९९० ईशवीयाब्दे Ph.D इत्युपाधिपदम् अधीतम्। स जापानदेशस्य हाइकु-तान्काछन्दसोस्तथा च कोरियादेशस्य सिजोछन्दसः प्रथमं गीर्वाणवाण्यां प्रयोगं कृतवान्। समालोचकः समीरकुमारदासो मन्यते हर्षदेवो वैप्लविककविः। तथाहि तेनोक्तम् –

"Harshadev Madhav is modern poet in true sense of the term. He thinks that poetry should appeal first to intellect and to emotion. In the eternal controversy between intellectuality and emotionalism. …Harshdeva happens to be one of the most profound modern Sanskrit Poets. He betrays the great influence exerted on him by modern Vernacular poetry and some of the images carved out by

[५०७]प्रतापविजयम् (नाटकम्), मूलशङ्करयाज्ञिकः, वरौदा, १९३१।

modern vernacular poet."[५०८] इति। आङ्गलभाषया लिखितम् 'Modern Sanskrit Poetry of Gujrat upto the end of 20 Century in contribution of Gujrat to Sanskrit letarature' इति पुस्तकं प्रसिद्धं वर्तते। तेन विरचिताः सारस्वतकृतयः अधस्तात् समुल्लिख्यन्ते –

क। अलकानन्दः (काव्यसंग्रहः) – पार्श्वप्रकाशनमा, अमदावादः, १९९०।

ख। मृगया (काव्यसंग्रहः) – तत्रैव, १९९४।

ग। लावारसन्दिग्धाः स्वप्नमयाः पर्वताः (काव्यसंग्रहः) – संस्कृतसेवासमितिः, अहमदावादः, १९९६।

घ। आसीच्च मे मनसि (काव्यसंग्रहः) – १९९६।

ङ। निष्क्रान्ताः सर्वे (काव्यसंग्रहः) – संस्कृतसाहित्य-अकाडेमी, गान्धीनगरम्, १९९७।

च। मृत्युरयं कस्तूरीमृगोऽस्ति (रूपकम्) – पार्श्वप्रकाशनम्, अहमदावादः, १९९८।

छ। बुद्धस्य भिक्षापात्रे (कवितासंग्रहः) – परिमलप्रकाशनम्, दिल्ली, २००९।

ज। भावस्थिराणि जननान्तरसौहृदानि (काव्यसंग्रहः) – पार्श्वपाबलिकेशन्, अहमदावादः, २०००।

झ। कण्णक्याक्षिप्तम्माणिक्यनूपुरम् (काव्यसंग्रहः) – श्रीवाणी-अकाडेमी, अहमदावादः, २०००।

ञ। भाति मे भारतम् (संस्कृतप्रतिकाव्यम्) – चढियापल्ली, औडिशा, २००७।

ट। मृत्युशतकम् (शतककाव्यम्) – चारुतरसंस्कृतपरिषद्, आनन्दः, १९९९।

ठ। बृहण्णला (खण्डकाव्यम्) – पार्श्वपाबलिकेशन्, अहमदावाद, १९९५।

ड। मनसो नैमिषारण्यम् (काव्यसंग्रहः) – गञ्जामः, २००३।

ढ। शब्दानां निर्मक्षिकेषु ध्वंसावशेषेषु (काव्यसंग्रहः) – रीमा एपार्टमेण्ट, वासणा बेरेज रोड, अहमदावादः, १९९३।

[५०८]उद्धृतिरयं संगृहीता 'http://en.wikipedia.org/wiki/Harsahdev Madhav' इति अन्तर्जालमाध्यमतः।

ण। तव स्पर्शे श्पर्शे (काव्यसंग्रहः) – पार्श्वपाबलिकेशन्, अहमदावादः, २००४।

प्रसङ्गतः समुल्लेखार्हं यत् २००६ ईशवीयाब्दे कविरयं 'तव स्पर्शे स्पर्शे' इति काव्यग्रन्थार्थं साहित्य-अकाडेमीपुरस्कारेण सभाजितोऽभूत्। एतानि विहाय स विविधैः[५०९] प्रतिष्ठानैरलंकृतः पुरस्कारेण। मन्ये एकविंशशताब्द्यां संस्कृतसाहित्यमन्यभाषासाहित्यैः सह प्रतिस्पर्धितुमलं हर्षदेववत् कवये।

(४). दक्षिणभारतीयराज्येष्ववार्चीनसंस्कृतसाहित्ये योगदानम्

४.१. अन्ध्रप्रदेशस्य संस्कृतसाहित्ये योगदानम्

४.१.१. कालुरिहनुमन्तरावः (१९३१)

सीतारामशास्त्रिवर्खेतरकृष्णाचार्यादीनां विदुषां सकाशात् व्याकरण-न्यायादि-शास्त्रमधीतवान् कविरयम्। महाभागोऽयं कथाकोविदः समालोचकः कविश्च। संस्कृतं विहाय तेलेगुभाषायामपि तेन कथा विरचिताः।

४.१.२. टी.जी.वरदाचार्यः

अन्ध्रप्रदेशस्य झिट्टिगुण्टूरनगरवास्तव्योऽयं वरदाचार्यः। स हि प्रख्यातः अनुवादकः समासीत्। तेलेगुभाषातः कानिचित् शतककाव्यानि गीर्वाणवाण्यामनूदितानि। तद्यथा– 'श्रीमदन्ध्रनायकशतकम्', 'भास्करशतकम्' (१९५५), 'कालहस्तीश्वरशतकम्' (१९५६), 'सुमतिशतकम्' (१९५४), 'वेमनशतकम्' (१९५४), 'दाशरथिशतकम्', 'गायत्रीनीतिगीतावलिः' (कोल्लूर, १९५७), 'कृष्णशतकम्' (गुण्टूर, १९५४), 'शेषप्पकरवेः नरसिंशतक'ञ्चेति।

४.१.३. श्रीभष्यम-विजयसारथिः (१९३६)

आसीदन्ध्रप्रदेशस्याधिवासी विजयसारथिः प्रख्यातः कविवरः। १९८० खृष्टाब्दे

[५०९] १९९० ईशवीयाब्दे गुजराट्-संस्कृत-अकाडेमी-सम्माननेन, १९९७-९८ ईशवीयाब्दे भारतीयभाषापरिषत्सम्मानेन, 'निष्क्रान्ताः सर्वे' इति ग्रन्थाय सर्वभारतीयकालिदाससम्मानेन, साहित्यगौरवपुरस्कारेण २०१० ईशवीयाब्दे च सभाजितः अयं कविवरः।

मुक्तकम्, मन्दाकिनीकाव्यं[५१०] विरच्य साहित्य-अकादेमीपुरस्कारेण सभाजितोऽयं कविः। तेन विरचिताः कृतयस्तावत् –

१. विषादलहरी (तेलेगूलिप्या) – वारङ्गलः, १९८७
२. शर्वरीविलापः – १९५७
३. अश्रुतर्पणम्
४. गीतमालिका – १९५८
५. आत्मदानम् (काव्यम्) – नव्यसंस्कृतपरिषत्, १९५६।
६. बोधगेयानि (खण्डकाव्यम्) – सर्ववैदिकसंस्थानम्, वारङ्गलः, १९५४
७. वेनुगोपालस्वामिसुप्रभातम्
८. रामचन्द्रसुप्रभातम् – १९६९
९. भारतीसुप्रभातम् (काव्यम्) – वारङ्गलः, १९७३
१०. उदाहरणानि (काव्यसंग्रहः) – विश्वेश्वरसंस्कृत-आन्ध्रकलाशाला, १९८६
११. ज्योतिष्मती (काव्यसंग्रहः) – २००९
१२. मल्लिकार्जुनसुप्रभातम्
१३. श्रीव्रतम् – अनुवादरूपम्
१४. पाञ्चालार्यसुप्रभातम् – १९७४
१५. प्रज्ञालहरी – १९६०
१६. भारतीलेखः – १९७८
१७. गीताञ्जलिः – १९६१
१८. आवाहनम् (काव्यम्) – सर्ववैदिकसंस्थानम्, अन्ध्रप्रदेशः, १९९१
१९. रासकेलिः (गीतिकाव्यम्) – सर्ववैदिकसंस्थानम्, वारङ्गलः, १९९१
२०. भारतभारती (काव्यसंग्रहसः) – सर्ववैदिकसंस्थानम्, करीमनगरम्, १९९१
२१. शवरी परी देवानाम्
२२. परिवादिनी

[५१०] मन्दाकिनी (मुक्तककाव्यम्) – श्रीभष्यंविजयसारथिः, संस्कृतभारतीप्रकाशनम्, वारङ्गलः, अन्ध्रप्रदेशः, १९८०।

२३. श्रीरघुनाथदेशिकोदहरणं चेति काव्यानि प्रसिद्धिं गतानि।

४.१.४. महामहोपाध्यायः पुल्लेल-रामचन्द्रडुः

१. रामचन्द्रलघुकाव्यसंग्रहः

२. गीताञ्जलिः (अनूदितम्) – ओसमानियाविश्वविद्यालयः, ह्यायदाबादः

४.१.५. एस्.वि.रघुनाथाचार्यः

रामविजयम्

४.१.६. डि.अर्कसोमयतिः

प्रसन्नाञ्जनेयम् (मन्दाक्रान्ताछन्दोबद्धकाव्यम्

४.१.७. एन्.सि.रघुनाथाचार्यः

१. विशिष्टाद्वैतवैभवम् (शास्त्रीयग्रन्थम्)

२. श्रीवैष्णवसम्प्रदायसौरभम्' (शास्त्रीयग्रन्थम्)

३. लक्ष्मीसहस्रम् (काव्यम्)

४.१.८ के.रजन्नसास्त्रः

कविताविपञ्ची (काव्यसंग्रहः)

४.१.९ श्रीवोमकान्तिः श्रीनिवासाचार्यः

१. गोपुः सन्देशः (काव्यसंग्रहः)

२. लक्ष्मीनृसिंहशतकम् (स्त्रोत्रकाव्यम्)

१.१०. वाचस्पतिः ओगेटिपरीक्षित्-शर्मा

१. ललितगीतालहरी (रागकाव्यम्) – शारदामासिकपत्रिका, १९६८।

२. यशोद्धरामहाकाव्यम् – शारदागौरवग्रन्थमाला, शारदाप्रकाशनम्, १९७६।

३. परीक्षिन्नाटकचक्रम् (नाटकसंग्रहः) – पुणे, १९८३।

४. जनपदनृत्यगीतामञ्जरी

५. सौन्दर्यमीमासा (काव्यम्) – पुणे, २००२।

६. श्रीमत्प्रतापराणायनम् (महाकाव्यम्) – पुणे, १९९०।

७. अक्षयगीतरामायणम् – १९९७।

८. अक्षयगीतमुकुन्दम् – पुणे, १९९९।

९. कालायतस्मै नमः (उपन्यासः) – पुणे, १९९९।

१०. जानपदः (नृत्यगीतादिः) पुणे, १९८६।

११. गुरुदक्षिणा (रूपकम्) – पुणे, १९८३।

१२. कार्गिलविजयम्

४.२. केरालाप्रदेशे विरचितमाधुनिकसंस्कृतसाहित्यम्

४.२.१. रामपाणिपादः (अष्टादशशताब्द्याः प्रथमार्धस्य)

क. अम्बरनदीशस्तोत्रम् (स्तोत्रकाव्यम्)

ख. चन्द्रिका(दृश्यकाव्यम्)

ग. भागवतचम्पूः (चम्पूकाव्यम्)

घ. मदनकेतुचरितं प्रहसनम्

ङ. मुचुकन्दशतकम् (स्तोत्रकाव्यम्)

च. राघवीयम् (महाकाव्यम्)

छ. लीलावती (दृश्यकाव्यम्)

ज. विष्णुविलासः (महाकाव्यम्)

झ. सीताराघवनाटकम्

४.२.२. सदाशिवदीक्षितः

क. रामवर्मयशोभूषणम् (नाट्यतत्त्वग्रन्थः)

ख. वसुलक्ष्मीकल्याणम् (पञ्चाङ्कमण्डितं रूपकम्)

४.२.३. अश्वति-तिरुनाल-रामवर्मा

क. कार्तवीर्यविजयप्रबन्धचम्पूः (चम्पूकाव्यम्)

ख. रूक्मिणीपरिणयनाटकम्

ग. शृङ्गारसुधाकरभाणः

४.२.४. इलात्तुररामस्वामी शास्त्री (१८२३-१८८७)

तस्य मौलिककृतिषु पुरातत्त्व-शास्त्राध्ययन-भक्ति-कल्पना-हास्यानाम् आधिक्यं वरिवर्ति। तस्य शास्त्रकाव्यचतुष्टयम् –

१. सरूपराघवः[५११]

२. वृत्तरत्नावली

३. रामोदयम्

४. क्षेत्रतत्त्वदीपिका

तथा च स्तोत्राणि, खण्डकाव्यानि, चम्पूकाव्यानि, कथाश्च तेन विरचितानि।

४.२.५. राजराजशर्मा (१८६३-१९१८)

१. गीर्वाणीविजयम्

२. आङ्गलसाम्राज्यम्

३. ओथेलो-इत्यस्यानुवादः

४.२.६. सुब्रह्मण्यसूरी (१८५०-१९१३)

१. वल्लीबाहुलेयम् (अङ्कसप्तकोपेतं नाटकम्)

२. मन्मथमण्डनः (भाणः)

३. शान्तनुचरितम् (गद्यकाव्यम्)

४. बुद्धिसन्देशः (कविता)

५. पद्यपञ्चरत्नम् (कविता)

६. शुकशुद्धाररसायनम् (कविता)

७. रामावतारः (कथा)

८. विश्वामित्रयागः (कथा)

९. सीताकल्याणम् (कथा)

१०. रुक्मिणीकल्याणः (कथा)

११. विभूतिमाहात्म्यम्

१२. असेचनकरामायणम् (११९ आर्याछन्दोभिः ग्रथितम्)

कविरयं प्रख्यातोऽभूत्तस्य गीतिरचनार्थम्। तेन बह्व्यः गीतयः रचिताः। तद्यथा – ‘दोलागीताः’, ‘हल्लीशमञ्जरी’ चेति। संस्कृतभाषया ‘हरिकथाः’ इति ग्रन्थोऽपि तेन ग्रथितः।

[५११]भट्टिकाव्यशैल्याश्रितं सर्गाष्टकयुतं काव्यम्।

४.२.७. सदाशिवशास्त्री (१८२९)

१. काश्मीरशतकम् (शतककाव्यम्)

२. वसन्तशतकम् (शतककाव्यम्)

३. गोपालशतकम् (शतककाव्यम्)

४. दुर्गाशतकम् (शतककाव्यम्)

५. अर्वुदमाहात्म्यसारम् (खण्डकाव्यम्)

४.२.८ पी.के.नारायणपिल्लै (१९१०)

क. कन्याकुमारिं भजे (१९७५)

ख. चिदात्मिकास्तवः (१९५०)

ग. धर्मशास्त्रस्तवः (१९७४)

घ. धर्मसागरः[५१२] (महाकाव्यम्) – त्रिवान्दम्, १९८८।

ङ. मयूरदूतम्[५१३] - जयविहारी जगती, त्रिवेन्दम्, १९८४।

च. विमलानन्दसप्तकम् (१९७४)

छ. विवेकानन्दस्तोत्रम् (१९८६)

ज. विश्वभानुः[५१४] (महाकाव्यम्) – त्रिवेन्दम्, १९८८।

झ. व्रज रामकृष्णम् (१९८१)

ञ. शबरिगिरिकीर्तनम् (१९७५)

ट. श्रीवल्लभेशसुप्रभातम् (१९७४)

४.२.९. के.एन्.एलुत्तछन्

केरलोदयम्

४.२.१०. कुहमुत्तु-कुन्नियूर-कृष्ण-कुरूप्पः

गोवर्धननारयणः

[५१२]वर्तमानशिक्षाव्यवस्थाविषयाश्रितं महाकाव्यम्।

[५१३]भागद्वयोपेतं महाकाव्यमिदं मन्दाक्रान्ताछन्दोबद्धम्, यत्र राणीलक्ष्मीवाई इत्यास्याः स्वदेशप्रेमवर्णनच्छलेन दीप्तमयचरित्रं कीर्तितम्।

[५१४]स्वामिविवेकानन्दजीवनाश्रितम् एकविंशतिसर्गसम्पूर्णं महाकाव्यम्।

४.३. कर्णाटकस्यार्वाचीनसंस्कृतसाहित्यम्[५१५]

दक्षिणभारतस्य राज्येषु कर्णाटके संस्कृतसाहित्यस्य चर्चा सर्वाधिकतया प्राचलत्तथैव वर्तमाने कालेऽप्यविच्छिन्नेन प्रवाहेन कर्णाटकस्थिताः कवयितारो नवनवोन्मेषशालिप्रतिभयाधुनिकसंस्कृतप्रपञ्चं विभूषयन्ति। ऊनविंशशताब्द्या अन्तिमदशकात् स्वाधीनतोत्तरं कालं यावत् कर्णाटकराज्ये संस्कृतसाहित्यस्य धारा निरवच्छिन्नत्वेन तोयधौ प्रवाहिता वर्तते। १९७३ खृष्टाब्दात्पूर्वं कर्णाटकस्य राजधानी समासीत् माइसोरनगरी। नगर्या अस्या महाराजः कला-साहित्य-शास्त्रेष्वासीन्निपुणः। सोऽर्थानुकूल्येन पृष्ठपोषकतया च संस्कृतं सजीवयति स्म। ईक्षणदिशा कर्णाटकस्थितानां कवीनां तथा तेषां सारस्वतकर्माणाञ्च सूची प्रस्तूयते –

कवयितारः	सारस्वतकृतयः
१) जग्गुसिङ्गरार्यः[५१६] (१८९१)	१. यक्षप्रश्ननाटकम् (बैङ्गलौर, १९६८) २. शिविवैभवम्[५१७] ३. धर्मन्यायदर्शनम् (एकाङ्कम्, बैङ्गलूर, १९६८) ४. शौरिशौर्यम्[५१८] (पञ्चाङ्कं नाटकम्) ५. श्रीदाशरथिचरितम् (मैसूर, १९५८)

[५१५]Modern Sanskrit Writings in Karnataka (S. Ranganath, Rastriya Sanskrit Sansthan, New Delhi, २००९।) इति ग्रन्थे कर्णाटकप्रदेशस्य समसामयिकसंस्कृतसाहित्यसन्दर्भे विस्तरेण पर्यालोचनं वर्तते।

[५१६]मेलुकोटेनामके स्थाने लब्धजन्मायं कविः चम्पू-धार्मिक-गीतिकविता-पुरातत्त्वविषयककविता-नाटकानि विरचितवान्।

[५१७]संस्कृतप्रतिभा, दिल्ली, १९६१।

[५१८]तत्रैव, १९७६।

२) गलगलीरामाचार्यः[५१९] (१८९३)	१. यदुवंशमहाकाव्यम्[५२०] (असम्पूर्णम्) २. स्वराज्यरत्नाकरः[५२१] ३. देवी वासन्ती (गद्यकाव्यसंग्रहः) ४. कोऽहम्[५२२] (गद्यकाव्यम्) ५. देवमन्दिरक्रन्दनम् (कविता) ६. मुनिमेनकासंवादः (कविता)
३). जग्गू-बकुल-भूषणः (१९०२)	विंशशताब्द्यां कर्णाटकराज्य- पातिनि मेलूकोटस्थाने जनिं लब्ध्वा जग्गू-बकुल- भूषणो तथा जग्गू-अलयार-अयेङ्गारो निजसहजकारयितृप्रतिभया निम्नोक्त- सारस्वतकर्माणि कृतवान् – १. अद्भुतदूतम्[५२३] (चतुर्थ क्रासं, बैङ्गलौर, १९६८) २. अद्भुतं शुकम्[५२४] (बैङ्गलूर, १९९४) ३. अनङ्गदाप्रहसनम्

[५१९]बीजापुरमण्डलस्थितकृष्णानद्यास्तटवर्तिनि स्थाने लब्धजन्मायं कवयिता साहित्यवेदान्तादिशास्त्रेषु परमप्रवीणः।

[५२०]लौकिककाव्यविरचनशैल्या दशसर्गोपेतस्य लिखितस्य महाकाव्यस्यास्य प्रथमे सर्गनवके यदुवंशवृत्तान्तो वर्णितः। ततः कृष्णजीवनवृत्तं रोचिष्णुतयापायनीकृतम्।

[५२१]गणतान्त्रिकमूल्यबोधस्तथा स्वदेशानुरागो वर्णितौ बृहदाकारकवितायामस्याम्। कवितेयं विविधभागैर्विभक्ता। प्रत्यध्यायं महात्मा-गान्धिनोऽहिंसान्दोलनार्थं प्रतीकधर्मिशास्त्राणां नामभिर्निर्दिष्टम्।

[५२२]मूल्यबोधस्तथा साम्प्रतिके काले स्त्रीणामात्मरक्षायै प्रयत्नो वर्णितौ कविनात्र वृत्तवर्णनच्छलेन।

[५२३]पञ्चदशसर्गोपेते महाकाव्येऽस्मिन् महाभारतस्योद्योगपर्वनिष्ठा विषयाः मूलम्।

[५२४]वेणीसंहारमुपजीव्य ग्रथितं नाटकम् अद्भुतं शुकम्।

	(भारतीपत्रिका, अङ्कः-१६.१८) ४. अमूल्यमाल्यम् (नाटकम्, मैसूर, १९४६) ५. करुणरसतरङ्गिनी (खण्डकाव्यम्) ६. कलिकौतुकम् (अप्रकाशितं खण्डकाव्यम्) ७. जग्गू-बकुलभूषणकाव्यमाला[५२५] जयन्तिका[५२६] (बैङ्गलौर, १९९०) ८. नवजीमूतं नाटकम् (बैङ्गलौर, १९८६) ९. प्रतिज्ञाकौटिल्यम्[५२७] (बैङ्गलौर, १९६८) १०. प्रसन्नकाश्यपम्[५२८] (मेलुकोटे, १९५१) ११. बकुलभूषणरूपकवितानम् (रूपकसंग्रहः, बैङ्गलौर, १९९३) १२. बलिविजयं नाटकम् (मैसूर, १९४६) १३. मञ्जुलमञ्जीरं नाटकम् (मैसूर, १९४६) १४. मणिहारम्[५२९]

[५२५]जग्गू-बकुलभूषणकाव्यमाला- राष्ट्रियसंस्कृतसंस्थानविद्यापीठम्, तिरुपतिः, २००७।
[५२६]कादम्बरीमवलम्ब्य ग्रथित उपन्यासः।
[५२७]मुद्राराक्षसमवलम्ब्य रचितं नाटकमिदम्।
[५२८]अभिज्ञानशकुन्तलमाश्रित्य रचितं नाटकं प्रसन्नकाश्यपम्।
[५२९]ऊरुभङ्गमवलम्ब्य ग्रथितं नाटकं मणिहारम्।

	(बैङ्गलूरु, १९९४) १५. यौवराज्यविजयं नाटकम् (संस्कृतप्रतिभा, १९५६) १६. वितीर्णामृतं नाटकम् (बैङ्गलौर, १९९४) १७. वीरसौभद्रम्[५३०] (बैङ्गलौर, १९९४) १९. व्रतफलं नाटकम् (बैङ्गलौर, १९९४) २०. संयुक्ता निहनतापसञ्च रूपकम् (बैङ्गलौर, १९८२) २१. स्यमन्तकं नाटकम् (बैङ्गलौर, १९९४)
४) के.टि.पाण्डुरङ्गी (१९१८)	चत्वारि नभो-रेडिओरूपकाणि ग्रथितान्यनेन। तद्यथा – १. उपनिषद्रूपकाणि (बैङ्गलूरु, १९६८) २. काव्याञ्जलिः (खण्डकाव्यम्, १९७४) ३. नभोवाणीरूपकाणि (बैङ्गलूरु, १९६०) कन्नडभाषया तेन बहूनि काव्यनाटकादीनि रचितानि।
५). पाण्डरीनाथाचार्यगलगलिः (१९२२)	१. कृष्णकण्ठाभरणम् (धर्मीयसम्बन्धिनी कविता)

[५३०]भासीयदूतघटोत्कचमिति रूपकस्य विषयानाधारीकृत्य ग्रथितमिदम्।

	२. पवनपावनचम्पूः (चम्पूकाव्यम्) ३. लक्ष्मीशतकम् (शतककाव्यम्) ४. लोकमान्यतिलकचरितम् (खण्डकाव्यम्) ५. विश्वेश्वरशतकम् (शतककाव्यम्) ६. शंभुलिङ्गेश्वरविजयचम्पूः[५३१] (बिजापुर, बहन्मठ, १९८२)
५) एस्.वी.नागराजरावः (१९४२)	१. ऋणविमुक्तिः[५३२] (उपन्यासः) २. दाम्पत्यकलहम्[५३३] (नाटकम्) ३. मालविका (कथा, १९७४) ४. लवलीपरिणयम्[५३४] (महाकाव्यम्) ५. वराण्वेषणम् (कथा) ६. विचारलहरी[५३५] ७. विदुलापुत्रीयम्[५३६] ८. विपञ्चिका[५३७] (अनूदितगद्यकाव्यम्)
६. एस्.जगन्नाथः (१९५६)	क. अन्धकासुरसंहारः (नाट्यनाटिका)

[५३१]कर्णाटकराज्यस्यैतिहासिक-सांस्कृतिकवर्णनपरकमिदञ्चम्पूकाव्यम्।
[५३२]ऋणविमुक्तिः – संस्कृतभारती, बैङ्गलौर, २००१।
[५३३]दाम्पत्यकलहम् – भारतीयविद्याभवन, मुम्बाइ, १९७६।
[५३४]लवलीपरिणयम् – चार क्राँस, बैङ्गलौर, १९७५।
[५३५]विचारलहरी – संस्कृतभारती, नई दिल्ली, २०११।
[५३६]विदुलापुत्रीयम् (नाटकम्) – अखिलकर्णाटकसंस्कृतपरिषद्, बैङ्गलौर, १९९३।
[५३७]विपञ्चिका – मुधर्मा, मैसूर, १९७६।

	ख. अर्वाचीनकविमाला[५३८] ग. आभाणकजगन्नाथः[५३९] (आभाणकसंग्रहः) घ. ऋजुरोहितम् (बालकथा) ङ. कौटिल्यवन्दनम् (नाट्यनाटिका) च.तीरम्[५४०] (मन्दाक्रान्ताछन्दोबद्धम् खण्डकाव्यम्) छ. पत्रशौधः (पत्रसंग्रहः) ज. भ्रमकाव्यम् (काव्यम्)
७. जनार्दनहेगडे	१. अङ्कुशः [५४१] (अनूदितम्) २. अनुबन्धः[५४२] (कथासंग्रहः) ३. इड्व्यवस्था[५४३] (शास्त्रसंग्रहः) ४. उत्फुल्लम् अन्तरङ्गम्[५४४] ५. बालकथासप्ततिः[५४५] (बालकथासंग्रहः) ६. बालकथास्रवन्ती[५४६]

एतान् कविवर्यानतिरिच्य अन्ये महान्तः कवयो विलसन्ति, ये संस्कृतकाव्यप्रपञ्चं बहुधालंकृतवन्तः। ते च यथा – चन्द्रशेखरभारतीस्वामि-रल्लपल्ली-अनन्तकृष्णशर्मा-

[५३८]अर्वाचीनकविमाला – आर.पी.इंस्टीट्यूट अफ्.संस्कृत स्टाडीज्, बैङ्गलूर, २००८।
[५३९]आभाणकजगन्नाथः – परिमल पाबलिकेशन्, देहली, २००५।
[५४०]तीरम् – सुरभारती प्रकाशन, दिल्ली, १९९९।
[५४१]अङ्कुशः – संस्कृतभारती, झण्डेलबालान्, नई द्लिली, २०११।
[५४२]अनुबन्धः – तत्रैव, २०११।
[५४३]इड्व्यवस्था – संस्कृभारती, बैङ्गलूरु, २००७।
[५४४]उत्फुल्लम् अन्तरङ्गम् –तत्रैव, २०१३।
[५४५]बालकथासप्ततिः – संस्कृभारती, बैङ्गलूरु, २०१३।
[५४६]बालकथास्रवन्ती – तत्रैव, २०१५।

गोण्टूरवेङ्कटचलशर्मा-हित्तलहल्लीगोविन्दभट्ट-मञ्जुनाथभट्ट-बलगणपतिभट्ट-एम्.जि. नञ्जुन्दराध्यः-विश्वेश्वरदीक्षित-हरिश्चन्द्र-सि.जि.पुरुषोत्तम-नारायणमध्यस्थ-सम्बदीक्षित-शङ्करगणपतिपाठक-अरेयरश्रीरामशर्मा-भारतीतीर्थस्वामि-आर्.गणेशादयोऽन्यतमाः।

(४.४). तामिलनाडुराज्यस्याधुनिकसंस्कृतसाहित्यम्

तामिलनाडुप्रदेशे अनङ्गुलिमेयाः कवयो जनिं लब्धा ततः सारस्वतीकृतीः सम्पाद्य च प्रदेशस्यायस्य सांस्कृतिकभूमिं समृद्धवन्तः। अत्र कवीनां तथा च तेषां रचनाप्रपञ्चस्य नामग्राहमुल्लेखः क्रियते –

४.४.१. गणपतिशास्त्री[५४७] (१८६० – १९२६)

क. अन्योपदेशशतकम् (कविता)

ख. कटाक्षशतकम् (कविता)

ग. गुरुराजसप्ततिः (कविता)

घ. ताटकापरिणयः (कविता)

घ. ध्रुवचरितम् (कविता)

ङ. रसिकभूषणम् (कविता)

च. वृत्तमणिमाला (छन्दोग्रन्थः)

४.४.२. कल्याणशास्त्री

कनकलता[५४८]

४.४.३. भि. राघवन् (१९०६–१९७९)

I. अनार्कली (रूपकम्) – संस्कृततरङ्गम्, मद्रास्, १९७२।

II. आषाढस्य प्रथमदिवसे (एकाङ्कं प्रेक्षणकम्) – तत्रैव, १९६१।

III. कामशुद्धिः (एकाङ्कनाटकम्) – तत्रैव, १९६३।

IV. देवबन्दी विरदराजः (काव्यम्) – अमृतवाणी, बेंगलूर, १९४८।

V. पुनरुन्मेष(एकाङ्करूपकम्) - संस्कृततरङ्गम्, मद्रास्, १९६१।

VI. प्रतापरुद्रविजयम् (नाटकम्) – संस्कृतप्रतिभा, दिल्ली, १९६९।

५४७ अयं कविर्नि हि भासनाटकचक्रस्याविष्कर्ता परं वेदान्तकेशरीति।

५४८ शेक्सपीयार्–इत्यस्य Lucerne इति नाट्यवस्तु ग्रथितं रूपकम्।

VII. प्रेक्षणकत्रयी[५४९] (प्रेक्षणकत्रयम्) – मद्रास्, १९५९।

VIII. फाल्गुनः (लघुकाव्यम्) – संस्कृततरङ्गम्, मद्रास्।

IX. महात्मा (काव्यम्) – वेदान्तकेशरी, मद्रास्, १९४८।

X. महाश्वेता (रूपकम्) – संस्कृततरङ्गम्, मद्रास्, १९६१

XI. मुत्तूस्वामिदीक्षितचरितम् (महाकाव्यम् सप्तदशसर्गसम्पूर्णञ्च)– मद्रास्, १९८०।

XII. रासलीला (एकाङ्कम् ओपेरारूपकम्, संगीतिकम्) – संस्कृतरङ्गम्, मद्रास्, १९६३।

XIII. लक्ष्मीस्वयंवरः (एकाङ्कं प्रेक्षणकम्) – संस्कृततरङ्गम्, मद्रास्, १९५९।

XIV. विमुक्तिः (प्रहसनम्) – १९७१।

XV. मीनाक्षिसुप्रभातम्, कामाक्षीमातृकास्तवः, नरेन्द्रो विवेकानन्दः, महीपो मनुनीतिचोलः, मार्कण्डेयविजयम्, गोपहम्पणश्चेति गीतिकवितास्तेनालिखिताः।

XVI. रवीन्द्रनाथस्य वाल्मीकिप्रतिभा–नटीपूजाभिधानयोः साहित्यकृत्योः संस्कृतानुवादस्तेन कृतः।

४.४.४. वेङ्कटराघव-आचार्यः (१८४९–१९०६)

क. आर्यासप्ततिः (काव्यम्)

ख. मन्मथविजयम् (नाटकम्)

ग. रङ्गनाथाष्टप्रासः (स्तोत्रकाव्यम्)

घ. रामाष्टप्रासमञ्जरी (स्तोत्रकाव्यम्)

ङ. श्रीरङ्गनायिकानक्षत्रमालिः (कविता)

४.४.५. एम. लक्ष्मणसूरी (१८५९–१९१९)

क. कृष्णलीलामृतम् (महाकाव्यम्)

ख. घोषयात्रा (महाभारताश्रितं डिमरूपकम्) – शिवरहस्य प्रेस्,

५४९ प्रेक्षणकानि तावत् विजयाङ्का, विकटनितम्बा, अवन्तीसुन्दरी चेति।

मद्रास्, १९१७।

ग. जार्जशतकम् (आङ्गलस्तुतिपरकं काव्यम्)

घ. दिल्लीसाम्राज्यम् (पञ्चाङ्कविशिष्टं रूपकम्)

ङ. नलोपाख्यानरहस्यसंग्रहः (गद्यकाव्यम्)

च. पौलस्तवधम् (रामायणाश्रितं नाटकम्) – ब्रह्मचारी प्रेस्, मद्रास्, १९२४।

छ. भारतसंग्रहः (गद्यकाव्यम्) – मद्रास्, १९६०।

ज. भीष्मविजयः (गद्यकाव्यम्)

झ. मानसन्देशः (गीतिकविता)

ञ. विप्रसन्देशः (गीतिकविता)

ट. वेङ्कटेश्वरस्तवः (गीतिकविता)

४.४.६ नारायणशास्त्री (१८६०–१९११)

क. आचार्यचरितम् (गद्यकाव्यम् शङ्कजीवनाश्रितम्)।

ख. कलिविधूननम् (नाटकम्)

ग. गौरीविलासः (चम्पूः)

घ. चिन्तामणिः (आख्यायिका)

ङ. मुन्दरविजयम् (चतुर्विंशतिसर्गविशिष्टं महाकाव्यम्)

च. मैथिलीयम् (नाटकम्)

छ. वातृकम् (रूपकम्)

ज. शर्मिष्ठाविजयम् (नाटकम्)

झ. सुरमयूरम् (नाटकम्)

नारायणेन द्विनवतिसंख्यकानां रूपकाणां प्रणयनं कृतम्। तानि सर्वाणि पुरातत्त्वविषयकानि।

४.४.७. महालिङ्गशास्त्री (१८९७ – तञ्जौरमण्डलवास्तव्यः)

क. आदिकाव्योदयम् (नाटकम्) – साहित्यग्रन्थमाला, तिरुवालङ्गाडुः, तञ्जौरः, १९४२।

ख. उभयरूपकम् (प्रहसनम्) – तत्रैव, १९६२।

ग. उद्गातृदशाननम् (रूपकम्) – तत्रैव, १९५८।

घ. कलिप्रादुर्भावः (रूपकम्) – तत्रैव, १९५६।

ङ. कौण्डिन्यप्रहसनम् (प्रहसनम्) – तत्रैव, १९३०।

च. प्रतिराजसूयम् (रूपकम्) – तत्रैव, १९५७।

छ. मर्कटमार्दलिकम् (रूपकम्) – मञ्जूषा, कलकात्ता, १९५१।

ज. शृङ्गारनारदीयम् (प्रहसनम्) – तत्रैव, १९३८।

४.४.८. सुन्दरराम-अय्यरः[५५०]

क. उपापरिणयम्[५५१] (नाटकम्) – तिरुचिः, केरलः, १९५२।

ख. मार्कण्डेयविजयम्[५५२] (रूपकम्) – तत्रैव।

४.४.९. विश्वनाथसत्यनारायणः[५५३]

क. अमृतशर्मिष्ठम् (महाभारतीयवस्तु आश्रित्य रूपकम्) – आन्द्र-महासभा, मुम्बापुरी, १९७५।

ख. गुप्तपाशुपतम् (महाभारतवस्तु उपजीव्य रूपकम्) – तत्रैव।

४.४.१०. टी.एस.सुन्देरेशशर्मा

क. त्यागराजचरितम् (महाकाव्यम्) – दि जनरल स्टोर्स्, तञ्जौरः, १९३७।

ख. प्रेमविजयम् (नाटकम्)।

ग. राघवगुणरत्नावली (दशाधिकस्तोत्रसंग्रहः) – तत्रैव, १९४०।

घ. रामामृततरङ्गिनी (काव्यसंग्रहः) – तत्रैव, १९३८।

ङ. शृङ्गारशेखरभाणः (भाणः)

[५५०] सुब्रह्मण्याचार्यस्य तनुजः तिरुचिरपल्ल्यां लब्धजन्मा।

[५५१] सागरविश्वविद्यालयस्य पुस्तकालये नाट्यस्यास्य प्रतिलिपिर्विलसति।

[५५२] नाट्यस्यास्य प्रतिलिपिर्विद्यते सागरविश्वविद्यालय–पुस्तकालये।

[५५३] भारतसर्वकारेण पद्मभूषणोपाधिनालंकृतः कविरयम्। तेलगुभाषायां शताधिककृतयो विलसन्ति।

षष्ठोऽध्यायः

॥ वङ्गभूमेः अर्वाचीनसंस्कृतसाहित्यम्॥

१.०. प्रस्तावना

मानवमनीषाया विकाशशीलायां सहस्रदिग्गामिन्यां संस्कृतधारायां महनीयस्यास्य भारतवर्षस्य प्रदेशान्तराणामिव वङ्गभूमेरपि दानं गौरवास्पदम्। संस्कृतसाहित्यस्य विविधासु शाखासु वङ्गीयप्रतिभाया गौरवमयी क्रियाशीलता सुदूरातीतकालादारभ्य इदानीन्तनकालं यावद् अम्लानेनैवावतिष्ठते। वङ्गीयकवीनां लेखनीतो निर्गतानि महाकाव्य-दृश्यकाव्यादिप्राचीनसाहित्यधाराम् अतिरिच्य कोषकाव्य-संस्तवकाव्य(Sonnet)-मुक्तककाव्य-उपकथा-चरितकथाद्यवान्तरभेदैः शतशो रुचिराणि रूपाणि, प्रतीक-नभः-पथैकाङ्कात्मकरूपकाणि च दृष्ट्वा, श्रुत्वा, पठित्वा वा भृशं ह्लादयन्ति सहृदयहृदयानि। इह परिच्छेदे प्राथम्येन मया विहङ्गमदृशा पश्चिमवङ्गे लिखितानां संस्कृतसाहित्यानां नामग्राहोल्लेखपुरःसरं मूलवस्तु-प्रकाशनादिविषये विव्रियते, ततः परं द्वितीयांशे द्वादश वङ्गीयकवीनां सारस्वतकृतीः समासेन विचारयिष्यन्ते।

॥ प्रथमं पर्व॥

अत्र विंशैकविंशशताब्द्योः (१८५७-२०१७) परिप्रेक्षे काव्यभेदानुसारि वङ्गीयानां योगदानम् आलोच्यते –

२.१. श्रव्यकाव्यधारायां महाकाव्यम्

कविकर्म द्विधा विभक्तम् – श्रव्यं दृश्यञ्चेति। श्रव्यकाव्यं पुनः महाकाव्य-खण्डकाव्यादिभेदाद्बहुधा प्रविभक्तम्। दृश्यन्ते विंशशताब्द्यां बहूनि महाकाव्यानि ग्रथितानि। तथाहि चन्द्रकान्ततर्कालंकारेण विरचितं कालिदासस्य रघुवंशमनुसृत्य 'चन्द्रवंशमि'ति महाकाव्यं चतुर्विंशतिसर्गविशिष्टम्। चन्द्रवंशस्य वर्णनपरं विषयवस्त्वस्य। महाकाव्यमिदं १८९२ खृष्टाब्दे कलिकातातः प्रचरद्रूपतामितम्।

स 'सतीपरिणयम्'[५५४] इति षोडशसर्गोपेतं महाकाव्यमपि विससार। अपि च, अन्नदाचरणतर्कचूडामणिः रामायणवृत्तान्तमुपजीव्य 'रामाभ्युदयम्' तथा च महाभारतीयं वृत्तमाश्रित्य 'महाप्रस्थानम्' इति महाकाव्यद्वितयं ररर्च। श्रीजीवन्यायतीर्थेन अष्टादशसर्गात्मकं 'पाण्डवविक्रमं' नाम महाकाव्यं महाभारतीयवृत्तमुपजीव्य व्यरचि। पाण्डवानां वनवासस्यान्तिमभागाद् आरभ्य विराट्पर्वणो वृत्तान्तो विधृतोऽत्र। साहित्यदर्पणस्य दशमे परिच्छेदे पर्यालोचितानां प्रायः समेषामेव शब्दार्थालङ्काराणां यथाक्रमं प्रयोगोऽस्य वैशिष्ट्यम्। किञ्च, बहूनां प्रचलितानां कलहंस-मत्तमयूर-मञ्जुभाषिणी-मृगेन्द्रमुखादीनां छन्दसामपि व्यवहारोऽत्रालक्षि। हरिदासेन षोडशसर्गसम्पूर्णं 'रुक्मिणीहरणम्' इति नाम महाकाव्यं ग्रथितम्। १९१० ईशवीयाब्दे रचितमिदं महाकाव्यं १९३३ खृीब्दाब्दे प्रकाशितम्। द्वारकाधिपेन श्रीकृष्णेन विदर्भनृपतेः भीष्मकस्य दुहितू रुक्मिण्या अपहरणं तथा तस्या भ्रातू रुक्मिणः कृष्णेन सममाहवे पराजयश्चेत्यस्य विषयवस्तु। अर्थादेतन्महाकाव्यं महाभारत-पुराणादिवृत्ताश्रितम्। ऊनविंशशताब्द्या अन्तिमलग्ने महेशचन्द्रचर्कचूडामणिना 'भूदेवचरितम्' इति भूदेवस्य जीविताश्रितं चतुर्विंशतिसर्गसम्पूर्णं महाकाव्यमपि च दिनाजपुरस्य राजकुलस्येतिहासपरं सप्तदशसर्गैः 'दिनाजपुरराजवंशम्' इति महाकाव्यद्वयं प्रणीतम्। विंशशताब्द्या आद्यक्षणे काव्यजगतीतले ख्यातिं भ्राजमानः कश्चन प्रौढः कविर्बभूव हेमचन्द्ररायकविभूषणः। तेन बहूनि एव काव्यानि विरचितानि, स्वोत्साहेन स्वभवनादेव तानि प्रकाशितानि च। तेषु कतिचन यथा वीररसप्रधानं 'परशुरामचरितम्' (दशसर्गाः, प्रकाशकालः खृष्टाब्दः १९०४, काव्यस्यास्य विरचनेन कविरयं कविभूषणोपाधिना भूषितोऽभूत्। रामायणवृत्तावलम्बिनोऽस्य रावण-हैहेययोराहवस्तथा रावणस्य पराभव एवेति विषयवस्तुयुक्तं वीररसोपेतं 'हैहयविजयम्' (नवसर्गाः, प्रकाशकालः १९०९ खृष्टाब्दः), वीररसप्रधानं 'रुक्मिणीहरणम्' (द्वादशसर्गाः, खृः-१९१०), 'सुभद्राहरणम्' [सम्भवतः नवसर्गाः] (अप्राप्तम्), शृङ्गाररसोपेतं 'सत्यभामापरिग्रहम्' (सर्गचतुष्टयम्, प्रथमः प्रकाशः – खृः १९१३), महाभारतस्योद्योगपर्वणो भगवद्यानपर्वाध्यायादारभ्य सौप्तिकपर्वण

[५५४]कालिदासस्य कुमारसम्भवमनुसृत्य षोडशसर्गैः रचितम्। १८७१ ईशवीयाब्दे ढाकातः प्रकाशितम्।

ऐषिकपर्वाध्यायं यावद्वृत्तमाश्रित्य प्रवर्तितं वीर-करुणरसविशिष्टं 'पाण्डवविजयम्' (द्वादशसर्गाः, प्रथमः प्रकाशकालः - खृः१९१६) चेति। श्रीयदुनाथकविभूषणेन प्रणीतं नवमसर्गात्मकं पाण्डुवंशीयं जीवनचरितमुल्लेखार्हं वङ्गीयमहाकाव्यपरम्परायाम्। अतिसाम्प्रतं रामायणाश्रयि महाकाव्यम् 'धनुभङ्गम्' वीररसप्रधानं त्रयोदशसर्गोपेतम् उमापदचट्टोपाध्यायेन विरच्य २००५ ईशवीयाब्दे प्रकाशितम्।

तथा च, पञ्चाननतर्करत्नस्य 'पार्थाश्वमेधमहाकाव्यम्'[५५५], कालीपदस्य 'योगिभक्तचरितम्' (वङ्गदेशीयजनेष्ववतारकल्पस्य योगिवर्यस्य नगेन्द्रनाथस्य जीविताश्रितं भक्तिरसपूर्णं विंशतिसर्गात्मकं महाकाव्यमिदम्), 'सत्यानुभवम्'[५५६], नित्यानन्दस्य 'शङ्करमहानुभवम्', 'तारकनाथवैभवम्', विधुशेखरभट्टाचार्यस्य पौराणिकवृत्तमालम्ब्य 'उमापरिणयम्' तथा च 'हरिश्चन्द्रचरितम्', नलिनीकान्तस्मृतितीर्थस्य 'देवव्रतचरित'ञ्चेति महाकाव्यानि शताब्द्यामस्यां लिखितानि। 'शङ्करमहानुभवम्' (त्रयोविंशतिसर्गोपेतम्), 'तारकनाथवैभवम्', 'ओंकारनाथायनम्' (विंशतिसर्गयुतम्), 'तैलङ्गवैभवम्', 'वामाचरणवैभवम्' (विंशतिसर्गसम्पूर्णम्), 'नित्यानन्दवैभवम्' (एतानि सर्वाण्येव विंशतिसर्गयुक्तानि नित्यानन्दस्मृतितीर्थरचितानि) चेत्यादीनि नैकानि महाकाव्यानि विरचितानि परिलक्ष्यन्ते विंशशताब्द्याम्। दीननाथत्रिपाठिनः 'श्रीरामकृष्णचरितम्' इति यद्यपि चरितकाव्यं तथापि कायगतदृष्ट्या इदं महाकाव्यमिति वक्तुं शक्यते। योगिन्द्रमोहनचक्रवर्तिना (१८८९-१९७६) सावित्री-सत्यवतोरुपाख्यानमाश्रित्य प्रणीतं 'कृतान्तपराजयम्'। गुरुप्रसन्नभट्टाचार्यस्य 'श्रीरासमहाकाव्यम्', योगीन्द्रनाथतर्कचूडामणेः 'दशाननवधम्', ललितमोहनभट्टाचार्यस्य 'खाण्डवदाहनमहाकाव्यञ्चे'ति त्रीणि काव्यान्यपि महाकाव्यविधासु एवान्तर्यान्तीति। अतो महाकाव्यधारायां वङ्गीयानां योगदानम् अवश्यमेव स्वीकार्यम्। इंल्याण्डदेशवास्तव्यस्य युवराजस्य सप्तम-एडउयार्डस्य राजपदाभिषेकवृत्तमुपजीव्य यादवेश्वरतर्करत्नेन 'राज्याभिषककाव्यम्' इति ग्रथितं, यच्च हरेन्द्रचन्द्रविद्याविनोदेन १९६१ ईशवीयाब्दे प्रकाशितम्।

[५५५]महाकाव्यस्यास्य 'विद्योदय'पत्रिकायां प्रथमप्रकाशः। ततः १९६२ खृष्टाब्दे ग्रन्थत्वेन प्रकाशितम्।

[५५६]वङ्गदेशे प्रसिद्धं दैवतं श्रीसत्यनारायणमाश्रित्य रचितमिदं महाकाव्यं चतुर्विंशतिसर्गसम्पूर्णम्।

भिक्टोरियाजीवनचरितमवलम्ब्य श्रीश्वरविद्यालंकारेण द्वादशसर्गैः विभक्तं 'विजयिनीकाव्यम्' १९०२ ईशवीयाब्दे प्राकाशि। परन्तु प्रदेशान्तरेषु महाकाव्यरचनायां वैप्लविकं परिवर्तनं परिप्राप्यते, परमत्र तादृशालङ्कारनियमानाम् उल्लङ्घनं तथा विवर्तनं न हि नयनयोरापतति।

२.२. गीतिकाव्यं खण्डकाव्यं वा

लक्ष्यते गीतिकाव्यानां खण्डकाव्यानां वा रचनायां वङ्गभूमेः कारयितृप्रतिभा नियतं स्पन्दनशीला। तथाहि चन्द्रकान्ततर्कालंकारस्य 'प्रबोधप्रकाशम्', 'आनन्दतरङ्गिणी', तथा च 'भावपुष्पाञ्जलिः', पञ्चाननतर्करत्नस्य 'सर्वमङ्गलोदयम्'[५५७], 'श्रीविष्णुविक्रमकाव्यम्' तथा 'मुकुन्ददेवात्मनिदर्शनञ्च', रजनीकान्तसाहित्याचार्यस्य 'चट्टविलापम्'[५५८], 'मङ्गलोत्सवम्' तथा 'विधुविनोदञ्च', विधुशेखरभट्टाचार्यस्य 'यौवनविलासम्', 'दुर्गासप्तशती', तथा 'बद्धविहगञ्च', हेमचन्द्ररायकविभूषणस्य 'भारतगीतिः', गुरुप्रसन्नभट्टाचार्यस्य 'माथुरम्' 'वरूथिनीचम्पू'श्च, श्रीविश्वेश्वरविद्यालंकारस्य श्रीचण्डीमाश्रित्य 'सप्तशतीकाव्यम्' अवर्तन्त चेति गीतिकाव्यान्यन्यतमानि किञ्चिदप्रसिद्धानि। श्रीजीवन्यायतीर्थेन विरचिते 'सारस्वतशतकम्', 'ऋतुचक्रचङ्क्रमणं' द्वे खण्डकाव्ये। हरिदाससिद्धान्तवागीशेन स्वकारयितृप्रतिभया कृतिद्वितयं प्रसिद्धं खण्डकाव्यं 'वियोगवैभवं', 'विद्यावित्तविवादञ्चे'ति। कालीपदतर्काचार्येण 'मन्दाक्रान्तावृत्तम्', 'आशुतोषावदानम्', 'आलोकतिमिरवैरमि'ति त्रीणि खण्डकाव्यानि विरचितानि।

एतदतीत्य, यादवेश्वरतर्करत्नविरचितम् 'अश्रुविसर्जनकाव्यम्' (१९५७), हेमन्तकुमारतर्कतीर्थस्य 'मकरसङ्क्रान्तीयकाव्यम्', शिवरामचक्रवर्तिनः 'बाणविजय-काव्यम्', गोलोकनाथवन्द्योपाध्यायस्य 'देव्यागमनकाव्यम्' 'हीरकजुबिलिकाव्यम्' च, यादवेन्द्ररायस्य खण्डकाव्यद्वयं 'मङ्गलोत्सवम्' 'आरण्यकविलासम्'[५५९] च,

[५५७]श्लेषकाव्यम्, प्रकाशकालः – १९३८।

[५५८]पद्मबन्धेन रचितं चित्रकाव्यम्।

[५५९]'आरण्यविलास'मिति पूर्वोत्तरभेदोपेते खण्डकाव्ये १२५मितश्लोकाः वर्तन्ते। तत्र रामादि-पाण्डवानामरण्यवासमाहात्म्यं प्रतिपादितम्।

विश्वेश्वरविद्याभूषणस्य 'काव्यकुसुमाञ्जलिः'[५६०], 'गङ्गासुरतरङ्गिणी' 'वनवेणु'श्च, प्रसिद्धराजस्य शम्भुचन्द्ररायस्य विक्रमादित्यशासनसमये भारतवर्षस्यावस्थामाश्रित्य प्रणीतं 'विक्रमभारतम्', गोविन्दकान्तविद्याभूषणस्य 'लघुभारतम्' चेत्यादीनि बहूनि काव्यानि विभागेऽस्मिन् अन्तर्गतानि भवितुमर्हन्ति।

दीपकघोषेण 'विलापपञ्चिके'ति गीतिकाव्ये 'मेघविलापः', 'सुरवाग्विलापः', 'अमरविलापः', 'उज्जयिनीविलापः', 'अलकाविलापश्चे'ति विलापपञ्चकं समुपनिबद्धम्। 'राजनीतिलीलामृतमि'ति घोषकवेः द्वितीयं गीतिकाव्यम्। तत्र साम्प्रतं राजनीतेः घृण्यं कुत्सितं च रूपं वर्णितम्। सुखमयमुखोपाध्यायेन 'काव्यमञ्जरी', 'अध्यात्ममञ्जरी', 'प्रकीर्णम्' चेति खण्डकाव्यत्रयं व्यरचि। नित्यानन्देन बहूनि गीतिकाव्यानि लिखितानि, तद्यथा – 'गौरवन्दनम्', 'कालिदासवन्दनम्', 'ओङ्कार-नाथवन्दनम्', 'श्रीपशुपतिनाथवन्दनम्', 'श्रीगुरुवन्दनम्', 'विजयकुमारस्मरणम्', 'जातीयपताकाभिनन्दनम्', 'शैलकुमारस्मरणम्', 'मातृपूजाकथाकाव्यम्'[५६१] चेति। किञ्च, सीतानाथाचार्येण तदीये 'शिशुयुवदुर्दैवविलसितमि'ति गीतिकाव्ये Polio-Vaccine इति प्रतिषेधकौषधस्य संक्रमणाद्बहूनां शिशूनां करुणातिशय्यं जीवनावसानदृश्यं वर्णितम्। कवेरस्य 'का त्वं शुभे' इति प्रेमोपजीव्ये गीतिकाव्ये काव्यनायिकायाः शुभायाः चरित्रं काव्यायितं वर्तते। वङ्गीयकवयित्र्या जयश्रीचट्टोपाध्यायया विरचिते गीतिकाव्ये 'निःसङ्गः प्रणयः' (Love without attachment) शीर्षके विंशतिः कविताः स्थानिताः। ताश्च कविताः विषयगतदिशा व्यञ्जनया गुम्फिताः हृदयावर्जकाश्च।

२.३. पर्यायबन्धाख्यं काव्यम्

यं कमपि भावविशेषमवलम्ब्य विरचितानां श्लोकानां संघातरूपं पर्यायबन्धाख्यं काव्यमिति सीतानाथाचार्यस्य नयः। तत्रापि वङ्गीयानां प्रतिभा चिरं देदीप्यते। प्रसङ्गेऽस्मिन् विश्वेश्वरविद्याभूषणस्य 'काव्यकुसुमाञ्जलिरि'ति उल्लेखार्हं काव्यम्।

[५६०]काव्यकुसुमाञ्जलिः (१९७९) – अत्र चतुस्सप्ततिः (७४) संस्कृतकविताः सन्ति। काश्चन स्तुत्यात्मिकाः, काश्चिच्च प्रशस्तिसंवर्धनाभिनन्दनात्मिकाः॥

[५६१]चम्पूकाव्यम्।

वीरेन्द्रकुमारभट्टाचार्यस्य 'कलापिके'ति संस्कृतकवितासंकलनात्मको ग्रन्थोऽन्यतमः। प्रसङ्गतः उल्लेख्यं यत् 'कलापिके'ति सनेट्-श्रेणीयं काव्यम्। शेक्सपीयार-मधुसूदनाभ्यां प्रभावितोऽपि छन्दःशास्त्रेषु दर्शनादिशास्त्रेषु च नैपुण्यवशादेव कलापिकेयं महच्छ्रेष्ठत्वपदमवाप। पेष्ट्रार्क-शेक्सपीयाराभ्यां प्रतिष्ठितायाः सनेट्परम्परायाः परमाश्चर्यसमन्वयस्तावदियं कलापिकेति। वीरेन्द्रेण सनेट् इति शब्दबन्धाय 'कलापिका' 'संस्तवक'ञ्चेति स्वतन्त्रं नामकरणं विहितम्। वस्तुतः, चतुर्दशपदी कवितेति 'कलापिके'ति नाम्नाभिधीयते। वङ्गसाहित्यप्रपञ्चे मधुसूदनदत्तेन सनेटः प्रथमो व्यवहारः कृतोऽपि रवीन्द्रठक्कुरेण तन्मानोन्नयनं संसाधितम्। प्राध्यापिकाया ऋतायाः चट्टोपाध्यायाया अभिमतं यद् आसामराज्यवास्तव्य आनन्दरामवड़ुया एव संस्कृतसनेटो जन्मदातेति। आनन्दरामो महता प्रयत्नेन निष्ठया चान्तरिकया समं ध्रुपदीसाहित्यसमयान् नोल्लङ्घ्य पेष्ट्राकीय-स्पेन्सारीय-शेक्सपियीर-मिल्टनीयानां शिल्पशैल्या आश्चर्यसमन्वयेन सनेट्साहित्यमलंकृतवान्। आनन्दरामस्य 'English Sanskrit Dictionary' इत्यस्य मङ्गलाचरण-ग्रन्थविसर्जनयोः शिरोनाम्नि सनेट्छन्दसा श्लोकाः परिप्राप्यन्ते। तस्य जीवनस्य श्रेष्ठकीर्तिस्तावद् अधिधानग्रन्थोऽयम्, यस्य ग्रन्थविसर्जनांशे स्वपित्रादीन् प्रति व्यक्तिगतावेगः प्रतिध्वन्यते –

"स्थित्वा यौ देवकल्पौ प्रथमपदमथो पुस्तकस्यास्य बद्धं
विघ्नः सर्वप्रकारः सततमुपनतो यत्प्रसादान्निरस्तः।
कर्मण्यस्मिन् समाप्ते परिणतमनसानुग्रहानभ्युपेत्य
वन्दे तौ स्वर्गसंस्थौ मम परमगुरुदुर्लभागर्गरामौ"[५६२]॥

ग्रन्थेऽस्मिन् प्राचीनैतिह्याधुनिकयोः ऋद्धसमन्वयेन सज्ञानम् आनन्दरामः संस्कृतकाव्यधर्मं संरक्षितवान्। किन्तु संस्कृतसाहित्ये सनेट्-प्रणयनस्य गुण-परिमाणदृष्ट्या प्रथमं श्रेयो गच्छति वीरेन्द्रकुमारभट्टाचार्याय। तन्नाम इतिहासपुटेषु स्वर्णाक्षरेण लिखितं स्यात्। साम्प्रतं राजेन्द्रमिश्र-राधावल्लभादयः कोविदकवयः सनेट्काव्यानि विरच्य स्व-स्वकारयितृप्रतिभायाः नैपुण्यं प्रदर्शितवन्तः।

साहित्य-अकाडेमीतः प्रकाशिते 'षोडशी'नामके आधुनिकसंस्कृतकविता-

[५६२]'English Sanskrit Dictionary' इति ग्रन्थस्य विसर्जनम्।

संकलनात्मके ग्रन्थे वीरेन्द्रकुमारभट्टाचार्यस्य 'तनुतीर्थम्', 'आविर्भावः', 'हृतसर्वस्वः', 'युगकविः', 'मेघदूतम्', 'वर्षाललन्तिका' चेति षट् कविताः सङ्कलिताः वर्तन्ते। प्रसङ्गेऽस्मिन् स्तोत्रकाव्येषु श्रीश्वरविद्यालङ्कारस्य 'शिवकुसुमाञ्जलिः', श्रीजीवन्यायतीर्थस्य 'श्रीभगवच्छङ्कराचार्य्यस्तुतिगीतिः' 'श्रीरामकृष्णस्तुतिगीतिः' इत्यादिकाव्यान्यपि गुरुत्वपूर्णानि। पञ्चाननतर्करत्नस्य 'स्तोत्रावली', 'श्रीराजप्रशस्तिः', 'मातृकाप्रशस्तिः', श्रीजीवस्य बहूनि स्तोत्राणि, नलिनीकान्तस्य नित्यानन्दस्य च कविताविशेषाः उल्लेखार्हाः। सीतानाथ-आचार्यस्य 'भावविलसितमि'ति पर्यायबन्धात्मकानां पञ्चविंशतिसंख्यकानां कवितानां संकलनम्। ग्रन्थेऽस्मिन् संस्कृतभाषामय्यः सप्तविंशतिसंख्यकास्तथा वङ्गभाषामय्यः षट्संख्यकाः कविताः सङ्कलिता वर्तन्ते। अयनभट्टाचार्यस्य 'पद्यवल्लरी'ति कवितानां संकलनात्मको ग्रन्थः सहृदयानां वल्लरीं विनोदयन् विराजते। वङ्गप्रदेशस्य वर्धमान्-जिल्लान्तर्गते मुक्तिपुरे जातजन्मायं हासेम-हाजरा (१९४४) 'स्रोतस्विनी'[५६३] 'स्वाद्यमि'ति काव्यसंग्रहद्वयं विलिख्य सहृदयेभ्यः उपायनीकृतवान्। तत्र स्रोतस्विनीत्यत्र एकषष्ठिः लघुकविताः स्थानिता वर्तन्ते। काव्यग्रन्थस्य नाम अन्वर्थकम्। 'स्वाद्यम्' तावत् नवषष्ठिसंख्यकानां जीवन-संगीतात्मकानां काव्यानां संकलनम्। काव्यस्यास्य प्रतिच्छत्रम् ईश्वरानुभावो ध्वनितः।

२.३. क. विलापकाव्यम्

पर्यायबन्धात्मके काव्यश्रेणीये विलापकाव्य-शतककाव्य-दूतकाव्य-द्वादशक-दशक-अष्टक-पञ्चक-काव्यानामन्तर्भावो भवितुमर्हः। परं लहरीकाव्यम् इदानीमपि पश्चिमवङ्गे न लक्ष्यते। सर्वभारतीयपरिसरे लहरीकाव्यानां प्राचुर्यम् अस्माकं नयनपथे पान्थायते। तद्व्यतीत्य वङ्गप्रदेशानाम् ऊनविंश-विंशशताब्द्योः संस्कृतसाहित्यप्रपञ्चे एतेषां काव्यानां प्राचुर्यं प्रतिपदं संलक्ष्यते। विषयवैचित्र्येण काव्यसुषमासम्पदा च तानि काव्यानि काव्यरसिकानां हृदयह्लादकारिणीत्यत्र नास्ति कश्चित् संशयः। तेषामत्रादावेव

[५६३] 'कलतानम्', 'अनुक्ता कथा', 'स्वच्छन्दा', 'भारतभूमिः', 'नदी', 'धारा', 'आदर्शः', 'स्वदेशः', 'सहवासः', 'आसन्ना', 'याचना', 'स्वाधीना', 'प्रकृतिः', 'आह्वानम्', 'जीवनम्', 'श्यामली' चेति कवितानां संकलनं तावत् 'स्रोतस्विनी'।

विलापकाव्यानां नाममात्रमुल्लेखः क्रियते –

1. रामनाथतर्करत्नस्य 'विलापलहरी'[५६४] (विषयः – पृथिव्या विलापः)
2. मोहितकृष्णकविरत्नस्य 'सावित्रीविलापः'[५६५]
3. भुवनमोहनसांख्यतीर्थस्य पञ्चविंशतिश्लोकविशिष्टो 'व्यथितविलापः'[५६६]
4. ताराचरणभट्टाचार्यस्य पञ्चदशश्लोकैः पूरितो 'विलापः'
5. वेणुधरतर्कतीर्थस्य गद्याकारेण रचितं विलापकाव्यं 'दुःखिनीविलापः'[५६७]
6. भोलानाथकविराजस्य 'चक्रवाकीविलापः'[५६८]
7. हैमवतीदेव्याः 'कोकिलविलापः'[५६९] (सुन्दरीछन्दसा एकलकोकिलस्य सुखमयस्यारण्यजीवनस्य स्मृतिकथनम्)
8. अमरचन्द्रस्मृतिसांख्यतीर्थस्य एकादशश्लोकविशिष्टः 'चक्रवाकी-विलापः'[५७०]
9. श्रीजीवन्यायतीर्थेन रचितं 'विलापकाव्यत्रयम्'[५७१]
10. योगेन्द्रमोहनविद्यारत्नस्य वसन्ततिलकच्छन्दसा पञ्चदशश्लोकैर्विरचितः 'शोकविलापः'[५७२]

परं विलापकाव्यपरिसरे दीपकघोषस्य 'विलापपञ्चिके'ति सर्वापेक्षया प्रसिद्धमेति। कविकुलकोकिलस्य कालिदासस्य मेघदूतं स्मारं स्मारं तथा नामं नामं दीपकघोषेण पञ्चविलापविशिष्टा काचित् नवीना विलापसंगीता काव्यधारा विनिर्मिता। काव्येऽस्मिन् अध्यायाः विलापनाम्ना निरुक्ताः। पञ्चसु विलापेषु सन्ति साकल्येन अष्टाशीतिसंख्यकाः (८८) श्लोकाः इन्द्रवज्रादिवृत्तविनिर्मिताः।

[५६४] स.सा.प., १९९२।
[५६५] तत्रैव, अङ्कसंख्या – ८।
[५६६] तत्रैव, १९२८।
[५६७] तत्रैव, १९३६।
[५६८] तत्रैव, १९३८-३९।
[५६९] तत्रैव, १९४१।
[५७०] तत्रैव, १९४२।
[५७१] न्यायाधीशवियोगविलापः, विलापगाथा, विलापश्चेति विलापकाव्यत्रयम् (तत्रैव, १९५६-६३)।
[५७२] स.सा.प., १९६७।

तत्र 'मेघविलापम्' इत्यत्र मन्दाक्रान्ताछन्दोभिः कवयिता मेघदूते समुपवर्णितं सुखसागरमुपालभ्य स्वदैन्यदशां विवृणोति असाधारणवाङ्माध्यमेन। 'सुरवाग्विलापे' द्वित्रिंशत्परिमितैः श्लोकैः अद्यतनसमाजे संस्कृतभाषायाः अनिर्वचनीया दुर्दशा कीदृशीति न्यरूपि। 'अमरविलापम्' इत्यत्र कविना चतुर्दशश्लोकपूरितेन प्रसिद्धयोः गायकदम्पत्योः वज्वहादुरखाँ-रूपमत्योः प्रेमोपाख्यानम् अनवद्यभङ्ग्या विषयीकृतम्। 'उज्जयिनीविलापे' कविः दीपकघोषः त्रिभिः श्लोकैः उज्जयिन्याः विगतवैभवं संस्मरति। 'अलकाविलापे' शापान्ते अलकां प्रत्यागत्य स्वगृहद्वारे प्रत्युत्तरमप्राप्य दण्डायमानस्य यक्षस्य मनःस्थितिं विरहोत्कण्ठां प्रेमभावनाञ्च षड्विंशतिभिः वियोगिनीभिः सम्यग् निरूप्य कविः तत्तु शुन्यगृहमिति प्रतिपादयति।

२.३.ख. शतककाव्यम्

सप्तमशतके अमरुशतकं प्रसिद्धिं गतमपि काव्यतात्त्विकैः काव्यभेदेषु शतककाव्यस्य पृथक्तया परिगणनं न विहितम्। समग्रस्य भारतस्य प्रदेशान्तराणामिव वङ्गदेशे शतककाव्यरचनायामर्वाचीनानां कवीनां स्वारस्यं सुतरामेव प्रतिस्पर्धीति। अत्रोल्लेखयोग्यं शतककाव्यं तावत् श्रीजीवस्य 'सारस्वतशतकमि'ति। सप्ताधिकशतश्लोकविशिष्टमनवद्यं चित्रकाव्यश्रेणीयकाव्यं तावत् 'सारस्वतशतकम्' इति। काव्यमिदं पठित्वा असंस्कृतज्ञा वङ्गीयाश्चाप्यनायासेनास्य स्वादमुपभोक्तुमलमिति काव्यस्यास्यान्यतमं वैशिष्ट्यं खलु। एतदतीत्य रजनीकान्तसाहित्याचार्यस्य 'विद्याशतकम्', श्रीश्वरविद्यालङ्कारस्य 'शक्तिशतकम्', 'सूर्यशतक'ञ्च, कृष्णनाथसार्वभौमस्य 'देवीशतकम्', नित्यानन्दस्मृतितीर्थस्य 'गणेशशतकम्' 'चैतन्यशतकम्' 'ओङ्कारनाथशतकञ्च', महेशचन्द्रतर्कचूडामणेः 'भगवच्छतकम्'[५७३] चेत्यादीनि शतककाव्यानि वङ्गदेशीयसंस्कृतसाहित्यप्रपञ्चं विभूषयन्ति। सीतानाथाचार्यस्य 'गौरीनाथचरितं' तथा च 'कविते विश्ववन्दिते' शतककाव्यश्रेण्याम् अन्तर्भवतः।

[५७३] 'भगवच्छतक'मिति गिरिशविद्यारत्नस्य मुद्रणयन्त्रे तथा च शशिभूषणभट्टाचार्यस्य साहचर्येण १८९१ ईशवीयाब्दे प्रकाशपदवीं गतम्। अत्र भगवतः विधिरूपाणां दर्शनतत्त्वपूरितं वर्णनं विलसदासीत् मन्दाक्रान्ता-मालिन्यादिच्छन्दोभिः अलंकारप्रयोगपाटवेन।

२.३.ग. दूतकाव्यम्

लौकिकश्रव्यकाव्यपरम्परायाम् अन्यतममुपादानं तावद् दूतकाव्यम्। संस्कृतदूतकाव्यस्य प्राचीनतमो ग्रन्थः कालिदासविरचितं 'मेघदूतमि'ति। मेघदूतस्य रचनाशैलीमादाय परवर्तिनि काले बहूनि दूतकाव्यानि रचितानीति दृश्यते। तेषु प्रामुख्यमभजन्त धोयिविरचितं 'पवनदूतम्', षोडशशतकस्य रुद्रन्यायवाचस्पतिकृतं 'भ्रमरदूतम्' तथा चाष्टादशशतकस्य श्रीकृष्णतर्कालंकारस्य 'चन्द्रदूतञ्चे'त्यादीनि। १८५० ईशवीयाब्दात्परं वङ्गप्रदेशे रसोत्तीर्णानां वर्णनवैचित्र्येण वास्तवोचितानाञ्च गीतिकाव्यानां संख्या नाङ्गुलिमेया। तेषु कानिचिद्दूतकाव्यान्यत्रोल्लिख्यन्ते –

क). अष्टादशशताब्द्या मध्यभागे कृष्णनाथन्यायपञ्चाननेन रचितं शतश्लोकोपेतं 'वातदूतं' काव्यसौन्दर्येण, भाषा-भावयोः मणिकाञ्चनयोगेन चानवद्यमेकं दूतकाव्यम्। तत्र वर्णितविषयस्तावद् रावणेनापहृता सीता रामचन्द्रस्य कुशलवार्तामाप्तुं पवनं दूतत्वेन रामचन्द्रस्य सविधे प्रेषयतीति।

ख). त्रैलोक्यमोहनगुहनियोगिनो मन्दाक्रान्ताछन्दसा द्विशताधिकश्लोकपूरितं 'मेघदौत्यं' कालिदासीयमेघदूतपरिशिष्टम् – 'अस्मि प्रार्थी रचयितुमिदं मेघदूतावशिष्टम्'। यक्षेण प्रेरितं मेघं पुनः तत्सविधे प्रतिदूतरूपेण यक्षपत्न्याः प्रेरणमेव दूतकाव्यस्यास्य विषयमूलम्।

ग). हरिमोहनप्रामाणिकेन विरचितं 'कोकिलदूतम्' (१८५५, कोलकाता) मन्दाक्रान्ताछन्दसा शतश्लोकानामुपभोग्यं दूतकाव्यं, यत्र मथुरागतं श्रीकृष्णमुद्दिश्य विरहसन्तप्तया राधया दूतत्वेन कस्यचित् पिकस्य मुखेन सन्देशप्रेरणमिति विषयः।

घ). वर्तमाने नदीयाजिल्लान्तःवासिना भोलानाथधरामरेण कृतं 'पान्थदूतं' (प्राच्यवाणीमन्दिरम्, कलिकाता, १९४९) राधा-कृष्णयोः शाश्वतं प्रेमविषयकं करुणरसमयं काव्यमेकम् – 'भोलानाथधरामरेण रचितं यत् पान्थदूताह्वयम्'।

ङ). ऊनविंशशताब्द्याः प्रथमे भागे माधवकवीन्द्रभट्टाचार्येण भागवतोपाख्यानम् उपजीव्य एकचत्वारिंशदधिकमेकशतं श्लोकविशिष्टम् 'उद्धवदूतं' व्यरचि। अत्र दूतरूपेण कृष्णं निकषा उद्धवस्य प्रतिसन्देशप्रेरणमेव काव्यस्यास्य विषयः।

च). भट्टपल्लीनिवासिना वशिष्टवंशोद्भवेन यादवचन्द्रविद्यारत्नेन रचितं

'शुकदूतम्' अस्याः शताब्द्याः अन्यतमं दूतकाव्यम्। कृष्णविरहवशाद् राधिकायाः अन्तर्वेदनाया वाणीरूपं तावत् शुकदूतमिदम् –

"सन्तप्ताया दयितविरहे राधिकाया विधाय
स्वनिर्द्देशं शिरसि सगुरो माधवं पत्तनं सन्।
गत्वा पश्यन् प्रमदवनभाक् श्रीहरिं वाक्यमेत-
द्राधाप्रोक्तं स्वरचितमपि स्वादुवाक् प्राह नम्रः"[५७४]॥

छ). नवद्वीपवासिना महामहोपाध्यायेन अजितनाथन्यायरत्नेन विरचितं 'वकदूतं' विंशशताब्द्या (१९१९ ईशवीयाब्दे) वैष्णवेतरदूतकाव्येषु शब्दप्रयोग-रूपकल्प-अलंकारादिमाहात्म्यात् श्रेष्ठतमं सर्वकनिष्ठञ्चेति।

ज). नवद्वीपवास्तव्येन रामगोपालेन विरचिते 'कीरदूतमि'ति काव्ये कृष्ण-सन्निधानेन वृन्दावननिवासि-गोपिनीनां कीरमुखेन दिव्यसन्देशप्रेरणमिति कथावस्तु वर्णितम्।

झ). लम्बोदरवैद्येन आधुनिककविना ग्रथितं 'गोपीदूतं' भावविषयाभ्याम् अनवद्यम्, यत्र गोपभवनात् मधुपुरमुद्दिश्य श्रीकृष्णे गते 'स्थितास्तावल्लेख्या इव विरहतो दुःखविधुरा निवृत्ता निष्पेतुः पक्षिषु शतशो गोपवनिता'।

ञ). 'वाणीदूतमि'ति दूतकाव्यं लक्ष्मीकान्तपञ्चतीर्थेन अमृतलोकसाहित्य-परिषदः (ईशवीयाब्दे २००४) प्रकाशितं सप्तचत्वारिंशच्छलोकविशिष्टं मन्दाक्रान्ता-छन्दोबद्धम् अर्वाचीनं दूतकाव्यम्। अत्र रचयितुः लक्ष्मीकान्तस्य आर्थिककारणात् करुणार्तिः ध्वन्यते।

२.३.घ. द्वादशक-दशक-अष्टक-पञ्चककाव्यम्

द्वादशक-दशक-अष्टक-पञ्चक-काव्यानां रचनास्वपि वङ्गीयकवीनां प्रतिभा नियतं स्पन्दनशीला। यथा – सतीशचन्द्रठक्कुरस्य 'श्रीश्रीदुर्गाद्वादशकम्'[५७५], हेमेन्द्रचन्द्रव्याकरणतीर्थस्य 'भारतीदशकम्'[५७६], हेमचन्द्रकाव्यतीर्थस्य

[५७४]शुकदूतम् (प्रथमः श्लोकः)।
[५७५]स.सा.प., अङ्कसंख्या – १०।
[५७६]तत्रैव (अङ्कः – ५)।

'गिरिदशकम्'[५७७] पुलिनविहारीदाशगुप्तस्य 'मत्कुणाष्टकम्'[५७८], कैलासचन्द्रस्मृतितीर्थस्य 'श्रीश्रीदुर्गाष्टकम्', प्रमथनाथतर्कभूषणस्य 'श्रीविश्वेश्वराष्टकम्', सीतानाथकृतिरत्नस्य तथा च वरदाचरणकाव्यसांख्यतीर्थस्य 'जनन्यष्टकम्'[५७९], हरिपदकाव्यस्मृतिमीमांसातीर्थस्य 'सत्सङ्गाष्टकम्', हेमेन्द्रचन्द्रायुर्वेदाचार्यस्य 'सारस्वताष्टकम्'[५८०], जानकीनाथ-साहित्यशास्त्रिणः 'सुभाषिताष्टकम्', कृष्णप्रसन्नतर्कवागीशस्य 'दुर्गाष्टकम्'[५८१], हरिचरणकाव्यव्याकरणतीर्थस्य 'शङ्करपञ्चकम्', दुर्गाप्रसादद्विवेदस्य 'लक्ष्यपञ्चकम्'[५८२], सुरेन्द्रनाथविद्यारत्नस्य 'शताब्दीमङ्गलपञ्चकमि'[५८३]त्यादीनि समुल्लेखयोग्यानि।

२.३.ङ. स्तोत्रकाव्यम्

अस्मिन् वर्गे काश्चन कविताः स्थानं लभन्ते, ये च पूर्णरूपेण न भवेयुः काव्यपदवाच्याः। परं ते अलंकारशास्त्रदिशा उच्चकाव्यगुणोपेता इति मन्मतम्। यद्यपि 'कवेः कर्म काव्यम्' इति काव्यलक्षणानुसारं या कापि काव्यकृतिः काव्यपदेन व्यपदिश्यते। यद्वा भवतु नाम, कवेः सीतानाथस्य नित्यानन्दस्य च नैकाश्च कविताः प्रशस्तिपरकाः। तौ विहाय श्रीजीवन्यायतीर्थस्य 'आशुतोषशास्त्रिस्मृतिपूजनम्'[५८४], विश्वेश्वरविद्याभूषणस्य 'सुरभारतीवन्दनम्'[५८५], योगेन्द्रमोहनविद्यारत्नस्य 'दुर्दिनं भरतेऽद्य'[५८६], दुर्गादासगोस्वामिनः 'भारतीस्वतगीतः'[५८७], वीरेन्द्रकुमारभट्टाचार्यस्य 'संस्कृतिस्रग्धरा' (१९८२, पञ्चविंशतिश्लोकोपेता कविता), प्रतापवन्द्योपाध्यायस्य

[५७७]स.सा.प., (अङ्कसंख्या – ४०)।
[५७८]तत्रैव (अङ्कः – १०)।
[५७९]तत्रैव (अङ्कः – १२)।
[५८०]तत्रैव (अङ्कः – ६)।
[५८१]तत्रैव, (अङ्कसंख्या – १)।
[५८२]तत्रैव (अङ्कः – १८)।
[५८३]तत्रैव (अङ्कः – ६)।
[५८४]तत्रैव, (अङ्कसंख्या – ५०।५-६)।
[५८५]तत्रैव।
[५८६]तत्रैव।
[५८७]तत्रैव।

'सिद्धेश्वरप्रशस्तिः'[५८८] तथा च 'भारतीपदलीलानां रमणीनां प्रशस्तिः'[५८९] (द्वात्रिंशच्छलोकपूरिता कविता) चेति। याश्च कविताः प्रशस्तिपरकाः कस्मिन्नपि काव्यसंकलने पूर्वमेव स्थापितास्ता अत्र नोलिख्यन्ते।

३.०. दृश्यकाव्यधारा

साम्प्रतिके काले भारतवर्षस्य प्रदेशेषु इव वङ्गप्रदेशे दृश्यकाव्यरचना विचित्रमार्गावगाहिनी। समापतितम् अर्वाचीनदृश्यकाव्यधारायां समयोचितं वैलक्षण्यमाधिक्येन। चिराभ्यस्तमार्गं विहायापि युगप्रयोजनमूलकसमाजसमस्याश्रितानि रूपकाणि विरचितानि विलोक्यन्तेऽत्र। इदमप्यपरं परिगणनीयं वैभिन्न्यमाधुनिकसंस्कृतनाट्यकर्मणः।

दृश्यकाव्यधारायां बहवो विख्यातिं भ्राजमानाः नाट्यकारा विलसन्ति। अत्र नाममात्रं कैश्चित्परिचितैर्विरचितानां रूपकाणाम् उल्लेखो विधीयते –

१) पञ्चाननतर्करत्नः (१८६६-१९४०)।

क. अमरमङ्गलम् (१९३७, नाटकम्)

ख. कलङ्कमोचनम् (नाटकम्)

(२) हरिदाससिद्धान्तवागीशः (१८७६-१९६१)।

क. कंसवधम् (नाटकम्, अप्रकाशितम्)

ख. जानकीविक्रमम् (नाटकम्, अप्रकाशितम्)

ग. मिवारप्रतापम्[५९०] (अङ्कषट्कमैतिहासिकं नाटकम्)

घ. वङ्गीयप्रतापम्[५९१] (अष्टाङ्कात्मकम् ऐतिहासिकं नाटकम्)

ङ. शिवाजीचरितम्[५९२] (दशाङ्कात्मकं महानाटकम्)

[५८८] स.सा.प., अङ्कसंख्या – ७२ (१-१२), १९९४।

[५८९] Prof. Hansaban Hindocha Fel. Vol. Gandjonagar, 2016.

[५९०] स.सा.प., कोलकाता, १३५४ वङ्गाब्दः।

[५९१] तत्रैव, १३५२ वङ्गाब्दः।

[५९२] तत्रैव, १३६१ वङ्गाब्दः।

(३) कालीपदतर्काचार्यः (१८८८-१९७२)।

क. नलदमयन्तीयम् (नाटकम्)

ख. प्रशान्तरत्नाकरम् (नाटकम्)

ग. माणवकगौरवम् (नाटकम्)

घ. स्यमन्तकोद्धारव्यायोगः[५९३] (व्यायोगः)

(५) श्रीजीवन्यायतीर्थः (१८९३-१९९२)।

क. कुमारसम्भवम् (कुमारसम्भवस्य नाट्यरूपम्)

ख. कैलासनाथविजयम् (व्यायोगः)

ग. गिरिधरसंवर्धनम् (व्यायोगः)

घ. चण्डताण्डवम्[५९४] (प्रहसनम्)

ङ. चिपिटकचर्वणम्[५९५] (प्रहसनम्)

च. चौरचातुरीयम् (प्रहसनम्)

छ. दरिद्रदुर्दैवम्[५९६] (प्रहसनम्)

ज. नागनिस्तारम् (नाटकम्)

झ. निगमानन्दचरितम् (अङ्कषट्कयुतं नाटकम्)

ञ. पुरुषपुंगवः(भाणः)

ट. पुरुषरमणीयम् (प्रहसनम्)

ठ. भट्टसंकटम् (पञ्चाङ्कविशिष्टं प्रहसनम्)

ड. महाकविकालिदासम्[५९७] (पञ्चाङ्कविशिष्टं नाटकम्)

ढ. माधुरीसुन्दरम्[५९८] (प्रकरणम् अङ्कदशकम्)

ण. रघुवंशम् (रघुवंशस्य नाट्यरूपम्)

[५९३] प्रणवपारिजातः (प्रथमवर्षः)।

[५९४] संस्कृतप्रतिभा, १९६१।

[५९५] रूपकचक्रम्, १९७२।

[५९६] स.सा.प., कोलकाता, १९६८।

[५९७] तत्रैव।

[५९८] प्रणवपारिजातः (विंशतिवर्षः)।

त. रागविरागम्[५९९] (प्रहसनम्)

थ. राम-नाम-दातव्यचिकित्सालयम् (प्रहसनम्)

द. वनभोजनम् (प्रहसनम्)

ध. विधिविपर्यायम् (भाणः)

न. विवाह-विडम्बनम्[६००] (प्रहसनम्)

प. विवेकानन्दचरितम् (पञ्चाङ्कोपेतं नाटकम्)

फ. शतवार्षिकम्[६०१] (प्रहसनम्)

ब. श्रीकृष्णकौतुकम् (नाटकम्)

भ. श्रीशङ्कराचार्यवैभवम् (नाटकम्)

म. साम्यसागरकल्लोलम्[६०२] (अङ्कद्वयात्मकं नाटकम्)

य. सिन्धु-सौवीरसंग्रामम् (अङ्कात्मकं नाटकम्)

र. स्वातन्त्र्यसन्धिक्षणम् (नाटकम्)

(६) विश्वेश्वरविद्याभूषणः (१९०३-)।

क. उत्तरकुरुक्षेत्रम् (पञ्चाङ्कविशिष्टं नाटकम्)

ख. उमातपस्विनी (नाटकम्)

ग. ओङ्कारनाथमङ्गलम् (नाटकम्)

घ. काशीकौशलेयम् (नाटकम्)

ङ. चाणक्यविजयम् (नाटकम्)

च. दस्युरत्नाकरम् (नाटकम्)

छ. द्वारावती (नाटकम्)

ज. प्रबुद्धहिमालयम् (सप्ताङ्कोपेतं नाटकम्)

झ. भारतमेलनम् (नाटकम्)

ञ. मातृपूजनम् (नाटकम्)

[५९९] रूपकचक्रम्, १९७२।

[६००] संस्कृतप्रतिभा, १९६१।

[६०१] रूपकचक्रम्, १९७२।

[६०२] प्रणवपारिजातः।

ट. वाल्मीकिसंवर्द्धनम् (दशाङ्कविशिष्टं नाटकम्)

ठ. विष्णुमाया (नाटकम्)

ड. शाश्वतभारतम् (नाटकम्)

(७) यतीन्द्रविमलचौधुरी (१९०९-१९६४)।

क. अमरमीरम् (नाटकम्)

ख. आनन्दराधम् (ना.)

ग. औथेलो (ना.)

घ. देशबन्धुदेशप्रियम् (ना.)

ङ. धृतिसीतम् (ना.)

च. निष्किञ्चनयशोधरम् (ना.)

छ. प्रीतिविष्णुप्रियः (ना.)

ज. भक्तिविष्णुप्रियम् (ना.)

झ. भारतजनकम् (ना.)

ञ. भारतभास्करम् (ना.)

ट. भारतराजेन्द्रम् (ना.)

ठ. भारतलक्ष्मीनाटकम् (ना.)

ड. भारतविवेकम् (ना.)

ढ. भारतहृदयारविन्दम् (ना.)

ण. भास्करोदयम् (ना.)

त. भुवनभास्करम् (ना.)

थ. महाप्रभुहरिदासम् (ना.)

द. महिममयभारतम् (ना.)

ध. मिलनतीर्थभारतम् (ना.)

न. मुक्तिशारदम् (ना.)

प. रक्षकश्रीगोरक्षकम् (ना.)

फ. विमलयतीन्द्रम् (ना.)

ब. विश्वविवेकम् (ना.)

भ. शक्तिशारदम् (ना.)

म. सुभाषसुभाषम् (ना.)

य. स्वप्नरघुवंशम् (ना.)

(८) सिद्धेश्वरचट्टोपाध्यायः (१९१८-१९९३)।

क. अथ किम्[६०३]

ख. धरित्रीपतिनिर्वाचनम् (१९७९)

ग. ननाविताडनम् (१९७४)

घ. स्वर्गीयहसनम् (१९७७)

(९) वीरेन्द्रकुमारभट्टाचार्यः (१९१७-१९८२)।

नाटकानि –

क) कविकालिदासम्[६०४] (सप्ताङ्कविशिष्टं कालिदासजीवनाश्रितम्)

ख) सिद्धार्थचरितम्[६०५] (अष्टाङ्कं नाटकं बुद्धजीवनाश्रितम्)

ग) शरणार्थिसंवादः[६०६]

घ) शार्दूलशकटम्[६०७] (पञ्चाङ्कविशिष्टं नाटकम्)

प्रहसनम् –

क. वेष्टनव्यायोगः (एकाङ्कप्रहसनम्)

गीतिनाट्यम् –

क) श्रीगीतिगौराङ्गम् (पञ्चाङ्कैः त्रिंशद्दृश्यैश्च विभक्तं नाट्यम्)

ख) शूर्पणखाभिसारम्

[६०३]स.सा.प., कोलकाता, १९७४।
[६०४]तत्रैव, कोलकाता, १९६९।
[६०५]तत्रैव, १९७०।
[६०६]तत्रैव, १९७२।
[६०७]तत्रैव, १९६९।

(१०) नित्यानन्दस्मृतितीर्थः (१९२३-२००८)।

क. आत्मनिवेदनम्

ख. कंसवधम्

ग. कर्णजीवनम्

घ. कालिदासः

ङ. गङ्गामाहात्म्यकीर्त्तनम्

च. गुप्तधनम्

छ. घटोत्कचवधम्

ज. तपोबलम्

झ. तपोवैभवम्

ञ. तैलङ्गवन्दनम्

ट. परीक्षित्परिरक्षणम्

ठ. पुत्रयज्ञम्

ड. प्रह्लादविनोदनं

ढ. मेघदूतम्

ण. रक्तबीजवधम्

त. वीरवामाचरणम्

थ. शिवप्रसादनम्

द. सिद्धसीतारामम्

ध. सुमतिलाभम्

एतानि रूपकाण्यतिरिच्य शतशः रूपकाणि विद्यन्ते, यानि च प्रकाशालोकं न गतानि।

यद्वा भवतु नाम। एतानि वङ्गीयरूपकाणि अस्माभिः विषयानुसारं विभजयितुमलम्। कानिचिद्रूपकाणि ऐतिहासिकवृत्तोपेतानि ('चाणक्यविजयम्', 'मिवारप्रतापम्', 'अमरमङ्गलम्', 'भारतलक्ष्मीनाटकम्', 'भारतराजेन्द्रम्', 'अमरवीरवृत्तान्तम्' चेति), कानिचन तावत् युगावतारसाधकजीवनाश्रयाणि

('सिद्धान्तचरितम्', 'भारतहृदयारविन्दम्', 'भास्करोदयम्', 'युगजीवनम्', 'गणदेवतानाटकम्', 'विवेकानन्दचरितम्' चेति), अपराणि खलु समकालिक-समस्याश्रयाणि ('अथ किम्', 'चण्डताण्डवम्', 'वेष्टनव्यायोगः', 'दरिद्रदुर्दैवम्', 'पुरुषपुङ्गवः', 'जननी' चेति), इतराणि रूपकाणि उपनिषत्पुराणवृत्तोपजीव्यानि ('नचिकेतश्चरित्रम्', 'महीयसी गार्गी', 'माणवकगौरवम्', 'धर्मराज्यम्' चेति)। विंशशताब्द्यामस्यां विरचितरूपकाणां केषुचित् नाट्यशास्त्रीया नियमाः परिपालिताः दृश्यन्ते। परं बहूषु रूपकेषु प्राचीननाट्यधाराणामुल्लङ्घनं दृष्टिमाकर्षति। पूर्वोक्तेषु केषुचिद् रूपकेषु 'मिवारप्रतापम्', 'भारतलक्ष्मीः', 'भारतहृदयारविन्दम्', 'अथ किम्' इति रङ्गमञ्चे साफल्येन अभिनीतान्यजायन्त।

४.०. गद्यकाव्यपरम्परा

महाकाव्य-खण्डकाव्य-रूपकादिसर्जनविधौ वङ्गीयकवीनां यथाभिरुचिरासीन्न तथा गद्यकाव्यप्रणयने। परं न्याय-स्मृतिशास्त्रव्याख्यानमूलानि बहूनि गद्यानि नयनयोरापतन्ति। किन्तु विंशशताब्द्यां गद्यकाव्यरचनाधारायां वङ्गीयकवीनां प्रतिभा प्रगल्भायते। अधुना तैः पाश्चात्त्य-प्रादेशिकसाहित्यप्रभावात् उपन्यास-लघुकथा-बालकथा-भ्रमणकथादिनूतनगद्यकाव्यविधाः प्रयुक्ताः।

महामहोपाध्यायेन विधुशेखरशास्त्रिणा सरलया भाषया 'चन्द्रप्रभा' तथा च 'भारतचरित'मिति गद्यकाव्यद्वितयं विरच्य सहृदयेभ्यः उपायनीकृतम्। तेन सम्पादितायां 'मित्रगोष्ठी'ति पत्रिकायां साहित्यिकगुणसमन्विताः गद्यरचनाः प्रकाशिताः। क्षितीशचन्द्रचट्टोपाध्यायस्य 'मञ्जूषे'ति पत्रिकायां प्रायेण स्फुटगद्यरचनाः स्थानं लभन्ते। तथा च 'षष्ठितन्त्राख्ये' लघुकथासंग्रहे (षष्ठिः कथाः) क्षितीशचन्द्रस्य न केवलं मौलिक्यः कथाश्चापि अनूदितकथाः[६०८] विलसन्ति। उपेन्द्रनाथसेनः 'पल्लीछविः', 'मकरन्दिका', 'कुन्दमाला' चेति उपन्यासत्रयं रचयित्वा स्वगद्यरचनादाक्ष्यं प्रमाणितवान्। चारुचन्द्ररायचतुर्धुरिणः 'एकवीरोपाख्यानं' वङ्गदेशस्य गद्यकाव्यरचनाधारायां प्रसिद्धमिति। पारिवारिकं सामाजिकञ्च वस्तु आधारीकृत्य पञ्चभिः परिच्छेदैर्विभक्तं

[६०८]'स्वर्णमृगः', 'शकुन्तला', 'समाप्तिः', 'अध्यापकः', 'यज्ञेश्वरस्य यज्ञः', 'विहगयुगल'मिति अनूदितकथाः प्रसिद्धाः।

हरिदाससिद्धान्तवागीशस्य गद्यकाव्यं तावत् 'सरलेति'। भयङ्करझञ्झायां नद्यां नायिकायाः सरलायाः नावविपत्तिः, नायकेन तस्या उद्धारः, पित्रा सह मिलनं तथा चान्ते नायक-नायिकयोः परिणयेन काव्यमिदं समाप्तिं गतम्। १८७५ ईशवीयाब्दे काव्यस्य प्रथमसंस्करणं प्रकाशितम्। प्रसङ्गतः कुञ्जविहारीतर्कतीर्थस्य 'प्रतिभे'ति उपन्यासः, वेणुधरतर्कतीर्थस्य 'वेला'[६०९] तथा च 'यमपुरीपर्य्यटन'[६१०]मिति गद्यकाव्यद्वयं, तरणीकान्तचक्रवर्तिनः 'पुष्पाञ्जलिः', चिन्ताहरणचक्रवर्तिवर्यस्य 'सुशीले'[६११]ति लघुकथा उल्लेखार्हाः। तत्र 'सुशीले'ति लघुकथायां साम्प्रतिके काले निपीडितवध्वाः करुणातिकरुणं निर्ममं जीवनचित्रमङ्कितम्।

वङ्गप्रदेशस्य आधुनिकलघुकथासाहित्याकाशे तारापदभट्टाचार्यो[६१२] ज्योतिष्कायते। कलिकातायाः संस्कृतसाहित्यपरिषदः प्रकाशितो द्वादशसंख्यकानां लघुकथानां सङ्कलनात्मकः 'कथा द्वादशे'ति ग्रन्थो वङ्गदेशे लघुकथारचनायां सफलतमः प्रयास इति निश्चप्रचं वक्तुमलम्। तत्र स्थानिताः कथास्तावत् 'गदाधरविवाहकथा', 'शैवली', 'चौरनादसंवादः', 'मैत्रेयी', 'अथ भेजालकथा', 'राधा', 'इयं पृथ्वी', 'मदनेन कृतम्', 'पट्टकाष्ठिका', 'जीवनतृष्णा', 'तस्मै नमश्चौराय', 'विषमप्यमृतम्' चेति। राधावल्लभत्रिपाठिना तारापदभट्टाचार्यस्य कथाग्रन्थं समीक्ष्य उक्तम् – 'संस्कृतभाषायामेतादृश्यः कथाः विलक्षणा एव, नवीनं वातायनं समुद्घाटयन्त्येताः समकालिकसंस्कृतसाहित्यरचनायाः महालये।...इयं सर्वथा व्यञ्जनागर्भा सूक्ष्मसंकेतवाहिनी शैली।...तारापदभट्टाचार्योऽस्या नूतनकथाशैल्या नदीष्ण आचार्यः'[६१३]।

तत्र 'शैवली'ति कथाया उपजीव्यं तावत् काण-खर्वाकृति-कृष्णकायकन्यायाः शैवलीनामिकायाः सकरुणं वृत्तम्। कथाया प्रारम्भे तारापदेन उक्तम् – 'आसीत् काचित्

[६०९]स.सा.प., (तृतीयवर्षः, १९२०-२१, पञ्चमसंख्या)।

[६१०]तत्रैव (एकादशवर्षः, १९२९)।

[६११]तत्रैव (१९२८)।

[६१२]तदानीं वङ्गदेशस्थढाकास्थविक्रमपुरे जातजन्मायं कथाकारः साम्प्रतं कलिकातायाः भवानीपुरे वसति। रवीन्द्रभारतीविश्वविद्यालये अध्यापकपदमलंचकार। वङ्गभाषया रचिताः तदीयकथाः प्रसिद्धाः।

[६१३]सागरिका (३९।१), पृ. – ९०-९१।

कन्यका शैवली नाम। केकरा, कृष्णा, खर्वा च।...विधाता तथा तिलोत्तमां सृजति, तथा तिलोधमामपि, अन्यथा विभुत्वं व्याहन्यत। तां माता निन्दति, नाभिनन्दति पिता। वर्धते च दिने दिने, न शुक्लपक्षे यथा शशी किन्तु कृष्णायां निस्तारका अमानिशेव'[६१४]। बाल्यतः पितृभ्याम् अवज्ञापूर्वकं परिपालिता मनसि हीनमन्यतां पुष्णाति। काले तस्या विवाहो जातः। किन्तु पत्यापि सा सादरं गृह्यते। तथापि मनसा आत्मविषये पोष्यमाना हीनम्मन्यता तामात्मनि यत्नरहितां करोति। फलतः अकाले जायते तस्याः जीवनदीपं निर्वापितम्। करुणरसोऽत्राङ्गी।

'राधे'ति कथायां दाम्पत्यजीवनव्यथा अभिव्यञ्जिता। विवाहरात्रौ राधायाः स्वामी निहतः। परं सा माधवेन सह विवाहं करोति। किन्तु शतशः प्रयत्नेनापि निःसन्ताना सा आत्मानं जघान इति दुःखभाराक्रान्ता कथा रोचिष्णुतया कथाकृता वर्णिता।

'अथ भेजालकथे'ति लघुकथायां नारदेन सह भज्युपिप्पलादादिमुनीनां संलापेन आधुनिककाले भेजालस्य माहात्म्यं व्यङ्गविधया शैल्या वर्णितम्। हास्यं कथाया अस्याः अङ्गिरसः।

'गदाधरविवाहकथा'यां बुद्धिहीनस्य गदाधरस्य विलक्षणानि कर्माणि हास्यात्मकभङ्ग्या तारापदेन उपस्थापितानि। कथाकारेण तीक्ष्णविद्रूपात्मकभङ्ग्या पित्रादिपरिजनानामतिस्नेहातिशय्यं तिरस्कृतम्। कथायां दार्शनिकतत्त्वं निहितम्[६१५]।

'चौरनादसंवादकथा'यां चौर-नारदयोः कथोपकथनं हास्यरसच्छलेन प्रोच्य अन्ततो गत्वा व्यञ्जनाधर्मित्वं प्रकटीकृतम्। चौरस्य पाण्डित्यं प्रेक्ष्य चौर्यवृत्त्या दीक्षितो नारदः। नारदस्य वर्णनच्छलेन मनुष्यज्ञानानाम् असंलग्नत्वं ध्वनितं तारापदेन।

'मैत्रेयी'ति दीर्घकथायां मालती-मणिका-मैत्रेयी-अनाथानां चतुष्कोणप्रेम विप्रलम्भशृङ्गाररसेन वर्णितम्। पितृ-मातृहीनाया अनाथायाः कथा 'शैवली'ति। मालती-मैत्रेय्योर्मिथः कथोपकथने औपनिषदिकतत्त्वमुपस्थापितम्। कथाकारः मनुष्याणां कुकृत्यं मूषिककृत्येन समं सम्भूषयति मूषी-मूषयोः संवादेन।

पृथिव्यामस्यां मनुष्याणां सुख-दुःख-आनन्द-वेदनादिजीवनवैचित्र्यं

[६१४]कथा द्वादश, पृ. – ९।

[६१५]पुरुष एवेदं सर्वम् (पुरुषसूक्तम्)।

समभिद्योतितम् 'इयं पृथ्वी'ति कथायाम्। कथेयम् उपन्यासश्रेणीयेति वक्तुमलम्। अस्याः कथायाः आदितः अन्तिमं यावत् करुणरसधारा प्लाविता। कथावस्तु इत्थम् –

बाल्ये मातृहीनोऽनाथो गोपालः छायायां स्निह्यति। किन्तु रोगाक्रान्ता छाया जीवनस्य सर्वाणि सुःखदुःखान्युपभुज्य गोपालेन संगता मृता। ततः प्रतिवेशिनी वधूः मालती स्वपुत्रेण राकेशेन सह ग्रामं प्रत्यागता। मालत्या सह तस्य भ्रातृत्वसम्पर्कः स्थापितः। सहकर्मिणः सेवायां राकेशस्य परिचर्यायाञ्च स्वयं व्याधिग्रस्तो गोपालः मालतीसकाशं स्वकथां श्रावयित्वा प्राणान् तत्याज। तारापदः वर्णयति –

"गोपाल आवृत्तिं चकार –

इयं पृथ्वी पूर्णा जनकजननीस्नेहरसत
इयं पृथ्वी रम्या दयितदयिताप्रेमरभसैः।
इयं पृथ्वी पुष्टा फलकुसुमतोयैश्च बहुश
इयं पृथ्वी दृष्ट्वा नवशिशुमुखं नन्दति भृशम्"[६१६]॥

कथाकारः तारापदः नारीचरित्रत्रितयं तथा पुरुषचरित्रमेकञ्चाश्रित्य 'मदनेन कृतमि'ति हास्यरसाश्रितां कथां विरचयति। नायिकयोः पुष्या-अश्लेषयोः कथोपकथनेन कथायाः प्रारम्भः। व्यङ्गविद्रूपयोरवकाशो नास्त्यत्र, परं सहृदयानामानन्दविधानाय कथेयं रचिता।

'पट्टकाष्ठिका', 'तस्मै नमश्चौराय' इति कथयोः तारापदः कौतुकवहां स्थितिं रचयन् समानेन प्रकाशसौष्ठवेन हास्यं तथाभिव्यञ्जयति यथा तद् हास्यविवशं विधत्ते पाठकान्।

'जीवनतृष्णे'ति आकारदृशा बृहत्तरा श्रेष्ठा च कथा तारापदस्य, यत्र चतुष्कोणप्रेम्णो मनोज्ञं वर्णनं विलसति। कथायाः नायिका सायन्तनी, नायकश्च रजनीशः, उपनायकः सूर्यनारायणस्तथा कथायाः पुष्टिसम्पादने सहायकः पल्लवश्चेति। तेषां जीवनस्य वास्तवरूपं कथाकृता शृङ्गारोचितभङ्ग्या निरूपितम्। कथेयं व्यञ्जनागर्भा दार्शनिकतत्त्वपरका चेति।

'विषमप्यमृत'मिति कथायां प्रलम्ब-मन्दाकिन्योः दाम्पत्यकलहं कथाकारः

[६१६]कथा द्वादश, पृ. – १०६।

प्रभविष्णुतया वर्णयित्वा महदेव जीवनकारुण्यं विषयीकरोति। कथेयं अश्रुसिक्तं करोति पाठकान्।

'कथा द्वादश' इति कथासंग्रहस्थाः कथाः अतिरिच्य विविधासु पत्रिकासु कथाकृता बह्व्यः कथाः प्रकाशिताः। ताश्च तावत् – 'नारद उवाद' (संस्कृतसाहित्यपरिषत्पत्रिका, २०१३-१४, हास्यात्मिका कथा), 'द्वितीयः पक्षः' (संस्कृतसाहित्यपरिषत्पत्रिका, २०१०-११, वास्तवधर्मिणी दीर्घा कथा), 'स्वप्नः नु माया नु' (शोधनिधिः, २०१८, हास्यरसोऽङ्गी) चेति। तथाहि सूष्ठूक्तम् आचार्यवरैः रमारञ्जनमुखोपाध्यायैः ग्रन्थभूमिकायां –

'Bhattacharyya, as a matter of fact, has given eternity to moments created in his short stories, and this has enabled him to find a comfortable place in community of successful story writers'[६१७]

सीतानाथाचार्यस्य 'बान्धवी रक्षिते'ति कथायां स्त्री-पुरुषयोरवैषम्यता ध्वनिता। तत्र नायकस्य सुदर्शनस्य कुकृत्यं समभिद्योतितम्। प्रथममेव सुदर्शनः शुचिस्मितया समं विवाहं सम्पाद्य परं सन्तानं स्त्रियञ्च परित्यज्य चान्यत्र प्रस्थितः। परवर्तिनि काले मधुमितया सह पुनः सम्बन्धं स्थापितवान्। परं शुचिस्मिताया महता प्रयत्नेन सुदर्शनस्य करालग्रासतः मधुमिता आत्मानं रक्षितवतीति। समाजस्य घृण्यतां मूढ़ताञ्च प्रति सुतीव्रं व्यङ्गकशाघातं वितनोति कथाकारः सीतानाथः।

वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य सहायक-अध्यापकेन राकेशदाशेन चन्द्रगुप्तनाम्ना बह्व्यः सामाजिकाः कथाः कथासरितः विविधेषु तरङ्गेषु प्रकाशिताः। ताश्च – '29.04.1872', 'इन्द्रोश्चन्द्रिका', 'चरमश्वासः', 'एका तमिस्रा', 'का मे जननी' इति। तस्य कथासु क्वचित् आधिभौतिकता, क्वचिच्च प्राचीनभारतीयैतिह्यञ्चान्यत्र पणप्रथादिसामाजिकव्याधिः विषयत्वेनोपस्थाप्यन्ते। साम्प्रतं राकेशदाशेन 'आशा' इति कथासंग्रहः प्रकाशितः। तत्र नव कथाः सङ्कलिताः। अत्र कथाकारस्य दृष्टिः समाजे व्याप्तं द्वैधं, द्वन्द्वं, पाखण्डं चोद्घाटयति। तस्य सर्वाश्च कथानिकाः विषयवस्तुनो गौरवेण महीयन्ते।

[६१७] कथा द्वादश, संस्कृतसाहित्यपरिषत्, कोलकाता, २००४।

५.०. छायाकाव्यम्

संस्कृतकाव्यस्य संस्कृतकाव्यान्तरे विपरिणामरूपस्य नवीनस्य काव्यमार्गस्य प्रवर्तकस्तावत् सुखमयमुखार्जी (१९२३-१९९५)। तेन प्रवर्तितः काव्यमार्गः खलु 'छायाकाव्यम्'। मेघदूतं कुमारसम्भवञ्चावलम्ब्य ('मेघच्छाया' 'कुमारच्छाया' चेति) छायाकाव्यद्वितयमनेन व्यरचि। भावानुवादात्मकमपि कवयिता स्वकसारस्वतकारयितृ-प्रतिभाबलाद्रचितं छायाकाव्यद्वयं सहृदयानां मनःसु चमत्कृतिं जनयति। विशेषेण, मेघदूतस्य प्रतिश्लोकं छायानिर्माणं विदधाति सुखमयवर्यः। एतेन मूलस्य भावसम्पत्तिः सम्पूर्णतया रक्षिता वर्तते। मन्दाक्रान्ताछन्दोभिः विप्रलम्भशृङ्गाररसेन चार्द्रीकृत्य 'मेघच्छाये'ति काव्यं निरमायि। दिङ्मात्रमुदाहरणं तावत् – 'कश्चित् कान्ता…' इति मेघदूतस्यादिमश्लोकस्य छायानिर्माणमेवम् –

"इत्थं दूरादभिनववधूसङ्गमाद् विप्रलम्भः।
सेहे दुःखान्यसकलधृतिः सोऽधिकं दुःसहानि।
सम्मोहाद्वा प्रणयिनि जने सन्निकृष्टेऽन्यथा वा।
कार्यभ्रान्तिर्भवति महतामप्यपभ्रंशनिष्ठा"[६१८]॥

काव्यस्यास्य व्यञ्जनाधर्मिता सुतरामेव प्रशंसार्हेत्यत्र नास्ति संशयलवः कश्चित्।

६.०. अनुवादसाहित्यम्

अनुवादो महच्छिल्पकर्मैकम्। अनुवादस्य साफल्यविधावनुवादकर्तुर्यथापेक्षिता सहृदयताचुम्बिनी तथा सृष्टिधर्मिणी प्रतिभा। चिरं प्रगल्भा चकास्ति अनुवादसाहित्येऽपि वङ्गीया प्रतिभा। संस्कृतानुवादधारा द्विशाखतया विवेकिभिर्विवेकबुद्ध्या विभज्यते– संस्कृतभाषातो भाषान्तरेष्वनुवादरूपा भाषान्तरेभ्यः संस्कृतभाषायामनुवादरूपा च। द्विविधायामस्यामनुवादधारायां वङ्गीयप्रतिभा प्राधान्येन आङ्गलभाषां वङ्गभाषाञ्चावलम्बते।

[६१८] 'Contribution of Bengal in Some fields of Sanskrit Studies' (Proceedings of National Seminar in Ramakrishna Mission Vidyamandira, Belur,) 2008. (P- 71-72).

A. वङ्गभाषातोऽनुवादः, रवीन्द्रसाहित्यम्

ऊनविंशशताब्दीतः इदानीन्तनकालं यावत् विविधेषु भारतीयभाषासाहित्येषु वङ्गसाहित्यस्य संस्कृतेऽनुवादो विपुलायतन इति विद्वांसो मन्यन्ते। तत्र वङ्गभाषातः संस्कृतभाषायां क्रियमाणेऽनुवादसाहित्ये रवीन्द्रसाहित्यं सर्वोत्तमं स्थानमधिकरोतीत्यत्र नास्ति संशयः। विभिन्नप्रकारप्रभिन्नस्य रवीन्द्रसाहित्यस्य गीर्वाणवाण्यामनुवादमधिकृत्य किञ्चिद्दिग्दर्शनं विधीयते स्थालिपुलाकन्यायेन कृतिमतिनातिमन्दमतिना मया।

1. गीताञ्जलेः संस्कृतानुवादविश्वम्[६१९] –

अनुवादकः	प्रकाशकः	प्रकाशकालः
अमरेन्द्रमोहनतर्कतीर्थः	संस्कृतपुस्तकभाण्डारः	१९२९ (पुनर्मुद्रणम् २०१०) (गीतद्वयम्)
कालीपदतर्काचार्यः	विश्वभारती (पुस्तकाकारेण गीताञ्जलिच्छाया)	संस्कृतसाहित्यपरिषत्-पत्रिकायां १९६१ खृष्टाब्दतः क्रमान्वयेन स्फुटरूपेण प्रकाशितम्, परं ग्रन्थरूपेण विश्वभारतीग्रन्थ-विभागतः प्रकाशपदवीं गतो ग्रन्थोऽयम्।
इन्द्रमोहनचक्रवर्ती	संस्कृतप्रतिभा	सप्त गीतानि (१९६६)
दुर्गादासगोस्वामी	संस्कृतप्रतिभा	षड् गीतानि (१९६६)
रामप्रसन्नभट्टाचार्यः	रवीन्द्रकाव्यकुसुमाञ्जलिः, (दिल्ली-संस्कृत-अकाडेमी)	२००१
लक्ष्मीकान्तपञ्चतीर्थः	'निर्झरशीकर'मिति ग्रन्थः,	गीतद्वयम्, २०००

[६१९]बनमालीबिश्वाल-नारायणदाश-राकेशदाशैः सम्पादिताद् 'संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्' इति ग्रन्थात्तथ्यानि संगृहीतानि।

	(अमृतलोकसाहित्यपरिषद्, मेदिनीपुरम्)	
दीपकघोषः	कवीन्द्ररवीन्द्रम्	दश गीतानि (१९९५)
विश्वेश्वरविद्याभूषणः	संस्कृतरवीन्द्रम्	गीतमेकम् (१९६६)
विश्वनाथभट्टाचार्यः	सागरिका, सागर-विश्वविद्यालयः, सागरः	गीतमेकम्
गिरिजाप्रसन्नलाहिडी	संस्कृतसाहित्यपरिषत् (रवीन्द्रसंख्या, २०१२) (स्फुटरूपेण, ९।३८९)	गीतत्रयम्
निखिलेशचक्रवर्ती	सत्यानन्दम्, जाह्नवी, समाजभारती चेति पत्रिकासु प्रकाशिताः	अशीतिसंख्यकानां रवीन्द्रगीतीनामनुवादः
इन्दिराचट्टोपाध्यायः	'विराज मम नयनसम्मुखे' (Raga Music)	दश गीतानि (२००५)

2. रवीन्द्रकवितायाः संस्कृतानुवादः[६२०]–

रवीन्द्रकाव्यम्	अनुवादकः	प्रकाशकालः
अभिसारः	अशोकनाथभट्टाचार्यः इन्द्रमोहनभट्टाचार्यः श्यामाप्रसादभट्टाचार्यः अमरेन्द्रमोहनतर्कतीर्थः लक्ष्मीकान्तपञ्चतीर्थः	संस्कृतसाहित्यपरिषत्-पत्रिका (१९२६) तत्रैव (रवीन्द्रसंख्या, १९६१) तत्रैव (८०।५२, १९६१) तत्रैव (१९।३, १९३६) निर्झरशीकरम् (२०००)

[६२०]बनमालीबिश्वाल-नारायणदाश-राकेशदाशैः सम्पादिताद् 'संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्' इति ग्रन्थात्तथ्यानि संगृहीतानि।

कृपणः (१९५९), देवताग्रासः (१९५९), गुप्तप्रेम (१९७५), प्रतिनिधिः (१९५७), प्रार्थनातीतं दानम्, पणरक्षा, स्वामी लाभः, मस्तकविक्रयः (१९५५), वन्दीवीरः (१९५८), स्पर्शमणिः (१९५४), गान्धार्या आवेदनम्, कर्णकुन्तीसंवादः, अन्तिमशिक्षा (१९७५), उर्वशी (१९५५), अभिसारः (१९५५), देवतानिर्वासनम्, नगरलक्ष्मीः (१९५६), फल्गूत्सवः (१९५८), भिक्षुकन्या (१९५८), मानी (१९५७), मूल्यप्राप्तिः (१९५५), मुक्तिः (१९७५), राजविचारः (१९५७), वङ्गमाता (१९७५), विग्रहद्वयभूमिः (१९५६), विवाहः (१९५९),	फटिकलालदासः	संस्कृतसाहित्यपरिषत्- पत्रिका, संस्कृतरवीन्द्रम्, रवीन्द्रकुसुमाञ्जलिः, मञ्जूषा

विसर्जनम् (१९५८), सत्यरक्षा (१९५९), स्वर्गच्युतिः (१९७५), स्पर्शशिला (१९५९), असारदानम् (१९५५), पद्मा (१९७५), कृत्रिमदुर्गम् (१९५८), कवेरमरत्वम् (१९५८), अपमानवरः (१९५५), तुच्छा क्षतिः (१९५५), निष्फल उपहारः, पतिता (१९६६), पादुकाविस्कारः, निष्कृतिः(१९७५), पुरातनो भृत्यः (१९५६), ब्राह्मणः (१९५७), परिशोधः (१९६०), पुरस्कारः(१९५६), पूजार्थिनी (१९५४), कचं प्रति (१९६०), आवेदनम् (१९५९), नरकवासः (१९७५), सती (१९७५), पूजार्थिनी (१९५४)		
निर्झरस्य स्वप्नभङ्गः, भारततीर्थम्, वसन्तः,	दुर्गादासगोस्वामी	संस्कृतसाहित्यपरिषत्- पत्रिका,

अपमानितः (१९६६), प्रश्नः (वर्षम् – २), नमस्कारः (१९६६), नववर्षम् (१९६१), उर्वशी (१९५८)		संस्कृतरवीन्द्रम् (१९६६), प्रणवपारिजातः, मञ्जूषा
वृष्टिर्निपतति टाप्टुप्कारकम्, पुरस्कारः (१९६६), परिशोधः (१९६०), मेघदूतम्, देवताग्रासः, गान्धार्यावेदनम् (१९६१), निर्झरस्य स्वप्नभङ्गः, यथार्थ आत्मीयः, प्रस्थानाभिशापम्	कालीपदतर्काचार्यः	संस्कृतसाहित्यपरिषत्- पत्रिका १९६२, (रवीन्द्रसंख्या – २००९) संस्कृतरवीन्द्रम्
उर्वशी	विभुभूषणन्यायतर्कतीर्थः, लक्ष्मीकान्तत्रिपाठी, लक्ष्मीकान्तपञ्चतीर्थः	संस्कृतसाहित्यपरिषत्- पत्रिका (रवीन्द्रसंख्या १९६१) तत्रैव (१९९०) तत्रैव (निर्झरशीकरम्, १९९०)
पूजारिणी	धीरेन्द्रनाथकाव्यतीर्थः	संस्कृतसाहित्यपरिषत्- पत्रिका (१९५४)
विदायः अभिशापः, नववर्षम् (१९६१), कचदेवयानीसंवादः	विभुभूषणन्यायतर्कतीर्थः	संस्कृतसाहित्यपरिषत्- पत्रिका (१९६१)
कर्णकुन्तीसंवादः	चक्रधर आचार्यः दुर्गाप्रसन्नविद्याभूषणः	मञ्जूषा (१९६०) संस्कृतसाहित्यपरिषत्- पत्रिका (५४, ११३)

अधिकारी, आनन्दमयः, अपमानमहिमा, जन्मभूमिः, द्वा सुपर्णा, निर्झरप्रबोधः, पतिता, पराजयः, प्रस्तरमूर्तिः, दीना, मूल्यज्ञानम्, वञ्चिता, स्पर्शमणिः, राहुप्रणयः, कामः(२), व्यर्थसाधनम्, स्मृतिमन्दिरम्	अमरेन्द्रमोहनतर्कतीर्थः	गीताञ्जलिः (१९२९, पुनः मुद्रणम् – २००१) संस्कृतपुस्तकभाण्डारः, कलिकाता
अभिसारः, आफ्रिका, आचार्यजगदीशचन्द्रवसुः, आविर्भावः, उर्वशी, धूसरगोधूलिलग्ने, प्रतिनिधिः, निवेदनम्, तपोवनम्, निर्भयः, तपोभङ्गः, परिशोधः, भारततीर्थः, प्रश्नः, स्वल्पा क्षतिः, सभ्यतां प्रति, वर्षामङ्गलम्, मातृवन्दना, विजयिनी, पृथिवी, वन्दीवारः, कुमारसम्भवकाव्यम्, कल्याणी, एकतानम्,	रामप्रसन्नभट्टाचार्यः	रवीन्द्रकाव्य- कुसुमाञ्जलिः (२००१)

चञ्चला, कालिदासः, काव्यम्		
आविर्भावः (१९५८), उर्वशी (१९४९), कथं मधुरम्, वर्षावसानम् (१९७५), जन्मकथा (१९६०), निरुद्देशयात्रा (१९५७), प्रतिनिधिः (१९५७), दुःसमयः (१९६०), रोत्स्यामि गमनं तव	विष्णुपदभट्टाचार्यः	संस्कृतसाहित्यपरिषत्-पत्रिका, नवमञ्जरी, मञ्जूषा

3. रवीन्द्रकथानां संस्कृतानुवादः[६२१] –

अनुवादकः	कथायाः नाम	प्रकाशनालयः
क्षितीशचन्द्रचट्टोपाध्यायः	अध्यापकः (१९५६), मुक्तेरभ्युपायः (१९५३), यज्ञेश्वरस्य यज्ञः (१९५६), समाप्तिः (१९६०)	मञ्जूषा (११।१-३, वर्षम् – ७, ११, १३)
विष्णुपदभट्टाचार्यः	कङ्कालम् (१९६१), काञ्चनम् (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
अमरेन्द्रमोहनतर्कतीर्थः	जयपराजयम् (१९६६)	संस्कृतरवीन्द्रम्
तुहिनिकादेवी	यज्ञेश्वरस्य यज्ञः (१९५६), रसमयी	संस्कृतसाहित्यपरिषत्-पत्रिका
रामधनशास्त्री	प्राचीनमाख्यानम्	संस्कृतसाहित्यपरिषत्-

[६२१] बनमालीबिश्वाल-नारायणदाश-राकेशदाशैः सम्पादिताद् 'संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्' इति ग्रन्थात्तथ्यानि संगृहीतानि।

	(१९६१)	पत्रिका (रवीन्द्रसंख्या)
राकेशदाशः	घट्टस्य कथा, विदूषकः मेघदूतम्, प्रथमपत्रम्, चित्रम्, अनधिकारप्रवेशः, कृतघ्नः शोकः, अग्रजा, क्षुधितप्रस्तराः, परी, कङ्कालः, पुत्रयज्ञः, राजपथस्य कथा, उद्धारः,	कवीन्द्रकथाकल्लोलिनी (२०११)
तन्मयकुमारभट्टाचार्यः	वाणी, पादपथः, रथयात्रा, एकी दृष्टिः, व्यवधानम् अप्सरसः परिचयः,	कवीन्द्रकथाकल्लोलिनी (२०११)

4. रवीन्द्ररूपकाणां संस्कृतानुवादः[६२२] –

अनुवादकः	रूपकस्य नाम	प्रकाशनालयः
अशोकचट्टोपाध्यायः	अभ्यर्थनम् (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
विमलकृष्णमतिलालः	रथरज्जुः (१९६२)	तत्रैव
ध्यानेशनारायणचक्रवर्ती	वार्तागृहम्, मुक्तधारा (१९६६)	संस्कृतरवीन्द्रम्, साहित्य-अकाडेमी
कालीकुमारदत्तशास्त्री	सूक्ष्मविचारः (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
यादवेन्द्रनाथन्यायतर्कतीर्थः	स्वर्गीयप्रहसनम्	संस्कृतसाहित्यपरिषत्-पत्रिका (५१।१३२)

[६२२] बनमालीबिश्वाल-नारायणदाश-राकेशदाशैः सम्पादिताद् 'संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्' इति ग्रन्थात्तथ्यानि संगृहीतानि।

नित्यानन्दस्मृतितीर्थः	मुकुटम्, व्यवधानम्, गुप्तधनम्, सोपानवचनम्, श्रीनलिनपराभवम्, रोगिबान्धवम्, पुत्रयज्ञम्, रहमतख्यानवृत्तान्तम्, रासमणिपुत्रम्	हाओडा-संस्कृत-साहित्य-समाजः (१४१६ वङ्गाब्दः)
कमला	अन्त्येष्टिसंस्कारः (१९६२)	सूर्योदयः – ३८

5. रवीन्द्रप्रबन्धानां संस्कृतानुवादः –

अनुवादकः	प्रबन्धस्य नाम	प्रकाशनालयः
श्रीजीवन्यायतीर्थः	उत्सवस्य दिवसः (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
रमारञ्जनमुखोपाख्यायः	काव्यम् (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
फटिकलालदासः	देयादेयम् (१९६६)	संस्कृतरवीन्द्रम्
सिद्धेश्वरचट्टोपाध्यायः	पुत्रयज्ञः (१९६६)	संस्कृतरवीन्द्रम्
कालीपदतर्काचार्यः	मेघदूतम् (१९६१), कुमारसम्भवम् (१९६१), रामायणम् (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
क्षितीशचन्द्रचट्टोपाध्यायः	शकुन्तला, स्वर्गमृगः(१९५८)	मञ्जूषा (१३)
सिद्धेश्वरपञ्चतीर्थः	साहित्यस्य मानम् (१९६१)।	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
भवानीप्रसादभट्टाचार्यः	मनुष्यस्य धर्मः (2008-11)।	सत्यानन्दम्
विष्णुपदभट्टाचार्यः	परिचिता नैट् उपाधेः	नवमञ्जरी (पर्व – 13)

	प्रत्यर्पणम् (१९६१)	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)
सत्यनारायणचक्रवर्ती	प्राचीनसाहित्ये अभिज्ञानशकुन्तला	संस्कृतसाहित्यपरिषत्-पत्रिका (रवीन्द्रसंख्या)

उपर्युक्तसूच्यैतत्प्रमाणीभवति यत् अनुवादसाहित्यप्रपञ्चे कालीपद-फटिकलालदास-अमरेन्द्रमोहनादीनामनुवादो नितरां प्रशंसार्हः। विशेषेण रवीन्द्रप्रतिभाया विश्वविस्मयसृष्टेर्निदर्शनभूतस्य 'गीताञ्जलिकाव्यस्य' संस्कृतवाङ्मयाञ्चितं रूपं प्रदर्शयितुं बहूनां वङ्गविदुषां प्रतिभा विहितावधाना कृतित्वमादधाना च देदीप्यते। ते च विद्वन्मूर्धन्यभूता गिरिजाप्रसन्नलाहिडी-कामिनीकुमाराधिकारि-कालीपदतर्काचार्य-अमरेन्द्रमोहनतर्कतीर्थ-प्रमुखाः। एतेषु कालीपदतर्काचार्येण कृतोऽनुवाद एव प्रशस्यतम इत्यस्माकं मतिः। छन्दःशास्त्रस्य गुरुलघुमात्रानिशितपथेन न गच्छतानुवादकेन मुलकवेर्हृद्भावानुगुणं भाषान्तरकरणरूपानुवादलक्ष्यान्न भ्रष्टम्। क्वचिद्वाक्षरशोऽपि अनुवादस्तेन कृतः। किन्तु सहृदयहृदयानां सकाशे कवेर्भावानुपस्थापयितुमाधिक्येन विहितो भावानुवादः। गीताञ्जलेः प्रथमं गीतं तावत् –

"आमार माथा नत करे दाओ हे तोमार
चरण धुलार तले।
सकल अहंकार हे आमार
डुवाओ चोखेर जले।" इति

कालीपदस्यानुवाद एवम्-

"(मम) शीर्षं नयनति मयि! तव
चरणरेणुतले।
सकलमहङ्कारं मम
मज्जयाश्रुजले" इति।

अनुवादोऽयं सर्वोत्तमतया प्रतिभाति। अनुवादेऽस्मिन् मौलिको भावः शब्दविन्यासश्च प्रायेणाव्याहतौ स्तः। केवलमेका जिज्ञासा – 'चरणरेणुतले' इत्यत्र 'चरणधूलितले' इति पाठे कृते शब्दविन्यासः समधिको मूलानुगः किं न स्यात्।

अत्र सुधियः प्रमाणम्। क्वचित् 'हे' इत्यस्य अनुवादार्थं कश्चित् शब्दविशेषो नोपात्तः। 'मज्जयाश्रुजले' इत्यत्र 'मज्जयाक्षिजले' इति पाठः साधीयान् स्यान्न वेति सुधीभिर्भाव्यम्। कथमिति चेदुच्यते 'अश्रु' इति पदं नेत्रजलस्य पर्यायवाचकम्। मूले अस्ति – 'चोखेर जले'। अतः 'अक्षिजले' इत्यनुवादे न पक्षपातः। कवेः मौलिकविचारो यथाक्षुण्णः स्यादित्येतदर्थमनुवादकः सर्वत्र प्रयत्नशील आसीदिति तस्यानुवादतः प्रतीयते स्पष्टतया।

अनुवादकर्मण्यस्मिन् कैश्चित् परम्परागतानां संस्कृतच्छन्दोनियमानां परिपूर्णतयानुसरणं विहितम्। कैश्चिदन्यैः निरुक्तनियमानुल्लङ्घ्य अनूद्य कवितानुगत्येन विधुभूषणभट्टाचार्येण रवीन्द्रनाथस्य उर्वशीकविताया अनुवादे संस्कृतच्छन्दो न समाश्रितम्। फटिकलालदासेन पुनः सैव कविता संस्कृतच्छन्दोमाध्यमेनानूदिता। दिङ्मात्रमुदाहरणं यथा –

"नह माता नह कन्या नह वधू सुन्दरी रूपसी,
हे नन्दनवासिनी उर्वशी! **(रवीन्द्रकवितापङ्क्तिः)**
"न हि न माता न हि कन्या न हि सुन्दरी वधूरसि,
हे नन्दनवासिनि उर्वशि! **(विधूभूषणकृतोऽनुवादः)**
"माता वधूर्वा दुहितानवद्ये
कस्यापि जातूर्वशि नासि लोके।
आनन्देन नन्दनकाननाङ्के
वासो हि नित्यस्तव दिव्यधाम्नि"॥ **(फटिकलालकृतोऽनुवादः)**

अत्रेदं लक्षणीयं विधुभूषणकृतेऽनुवादे पदसन्निवेशविधौ ध्वनिसाम्यसृष्टौ च मूलानुसारिता समधिका परिलक्ष्यते। फटिकलालकृतेऽनुवादे छन्द इन्द्रवज्रा, छन्दसो नियमपालनाय तत्र मूलातिरिक्तानि पद्यानि संयोजितानि। मूलकविताया ध्वनिवैशिष्ट्यं किञ्चित् क्षुण्णमिवाभाति।

किञ्च, कामिनीकान्तेनाधिकारिणा संस्कृतच्छन्दोभिरनूदिता गीतयः। तस्यानुवादो यथा –

"शीर्षं मे तव पादसक्तरजसा नीचैः प्रभो धारय।

सर्वं गर्वचयं ममाहमिति मे नेत्राम्बुभिः प्लावयः"[६२३]॥ इति।

कविताया अनुवादो मौलिककविताग्रथनतो दुष्कर इति अनुवादविशेषज्ञा अभिप्रयन्ति। यतो मौलिककवितायां कवेः स्वकीयानुभूतिरभिव्यक्ता भवति रीतिविशेषमवलम्ब्य। पक्षान्तरेणानुवादेऽन्येनाभिव्यक्ताया अनुभूतेः प्रकाशः करणीयो भवति। सफलानुवादस्य कृतेऽनुवादकस्य भावयित्र्याश्च प्रतिभाया विद्यमानतावश्यिकी। अनुवादको भावयित्र्या प्रतिभया भावयति तत्तद्भाषानिबद्धां कविकृतिम्, कारयित्र्या प्रतिभया च तां भाषान्तरे परिणामयति।

रवीन्द्रनाथेन रचितानां कर्णयोर्मधुधारामभिवर्षतां सहृदयहृदयं समुन्मादयतां सङ्गीतानां संस्कृतभाषायां कृतानुवादकानां मध्ये कलिकाताविश्वविद्यालये प्राध्यापकवरस्य दीपकघोषस्य नाम पुरस्फूर्तिकतामायाति। तेन हि पञ्चविंशति-संख्यकानां रवीन्द्रसङ्गीतानां कविसार्वभौमदर्शितदिशा स्वरसंयोजनं विदधता संस्कृतेऽनुवादो विहितः। स चानुवादः 'संस्कृतरवीन्द्रसङ्गीतम्' इति नाम्ना साहित्य-अकाडेमीतः प्रकाशितो वर्तते। तेषां सङ्गीतानां नैका ध्वनिमुद्रा अपि प्राप्तरूपा विद्यन्ते। रवीन्द्रभारतीविश्वविद्यालयस्याध्यापिकास्वन्यतमया चट्टोपाध्यायोपनामिकया डक्टर्-इन्द्रिरया रवीन्द्रसङ्गीतानां संस्कृतानुवादे धृतव्रतया भूयते। तस्यैव संस्कृतेऽनूदितैः तयैव गीयमानैः दशभिः रवीन्द्रसङ्गीतैः समन्वितैका ध्वनिमुद्रा 'Raga Music' इति संस्थातः २००५ खृष्टवर्षे प्रकाशिता सङ्गीतानुरक्तैः समादृता च वर्तते। मद्गुरुणा निखिलेशचक्रवर्तिना नूनतया २००१ खृष्टाब्दतः २०१२वर्षं यावत् पञ्चदशाधिकैकशतसंख्यकानि रवीन्द्रगीतानि गीर्वाणवाण्यानूदितानि। तेष्वन्यतमत्वं भजन्ते – 'केवला तव वाणी नास्ते', 'खेलागेहबन्धनपरो...', 'जगति आनन्दयज्ञे...', 'जयतु जयतु नवारुणोदयः...', 'जीवने मम यावदानन्दोः...', 'तव हि गेहे पालनं स्नेहैः...', 'त्वं नीरवेणासि...', 'तवानं शून्यमद्य...', 'दिवसा मे स्वर्णपञ्जरे नासन्...' चेति। न केवलं रवीन्द्रनाथीयगीतानाञ्चापि नजरुल-अतुलप्रसाद-रजनीकान्त-भूपेनहाजारिकादीनां वङ्गगीतीनां संस्कृतानुवादो विहितस्तेन प्रतिचरणमन्त्याक्षरसादृश्येन तथा च मूलगीतस्वरसाम्येन।

[६२३]गीताञ्जलिसंस्कृतम् – कामिनीकुमाराधिकारी, १९६१, पृ. – १६।

B. रवीन्द्रेतरसाहित्यम् –

रवीन्द्रसाहित्यस्य संस्कृतानुवादकरणे यथा वा वङ्गीयानामभिरुचिर्वर्तते, न तथा रवीन्द्रेतरसाहित्यस्यानुवादचिर्कीर्षायाम्।

रवीन्द्रेतरसाहित्यम्	अनुवादकः
द्विजेन्द्रलालसंगीतानि	दिलीपकुमारः, निखिलेशचक्रवर्ती
जीवनानन्दस्य वनलतासेनः (कविता)	सुरेन्द्रनाथदेवः, राकेशदाशः
मधुसूदनस्य मेघनाथवधः	नित्यगोपालविद्याविनोदशर्मा
चैतन्यचरितामृतम्	भास्करानन्दस्वामी
वङ्किमचन्द्रस्य वृष्टिः (गद्यकविता)	सुदीप्तमुन्सी
कपालकुण्डला, कृष्णकान्तस्य पत्रपेटिका	हरिचरणविद्यारत्नः
रजनी	वेणुदेवी
दुर्गेशनन्दिनी	जनार्दनकाव्यतीर्थः
राधाराणी, कृष्णकान्तस्य पत्रपेटिका, निष्कृतिः	क्षितीशचन्द्रचट्टोपाध्यायः
(विवेकानन्दस्य) प्राच्यपाश्चात्त्यम्	ध्यानेशनारायणचक्रवर्ती
प्राच्यपाश्चात्त्ययोः संघर्षः	यादवेन्द्रनाथरायन्यायतर्कतीर्थः
द्विजेन्द्रलालरायस्य भारतवर्षः	विष्णुपदभट्टाचार्यः
शरच्चन्द्रचट्टोपाध्यायस्य निष्कृतिः	उपेन्द्रमोहनः
चिन्ताहरणचक्रवर्तिनः 'आधुनिक वांला नाटकेर सङ्गे संस्कृतनाट्यसाहित्येर सम्बन्ध'	तारकनाथ-अधिकारी
हरप्रसादशास्त्रिणः वाल्मीकि-विजयः	विश्वनाथभट्टाचार्यः
प्रभातचन्द्रमुखोपाध्यायस्य अध्यापकमहोदय-प्रतिज्ञापूरण-रसमयी-वायुपरिवर्तनानां संस्कृते सफलानुवादः	क्षितीशचन्द्रचट्टोपाध्यायः
रामकृष्णकथामृतम्	स्वामिध्यानात्मानन्दः, स्वामीतत्त्वविदानन्दः
सुकान्तभट्टाचार्यस्य लेलिनः, नजरुलस्य काण्डारी-हुँशियार, मधुसूदनस्य आत्मविलापः	सीतानाथाचार्यः

कृष्णात्रेयकविना सीतानाथेन अपि कासाञ्चिद् वङ्गभाषानिबन्धानां कवितानां संस्कृतेऽनुवादो विहितः। तासु त्रितयमेव सामान्येन आलोच्यते। नजरुलविरचिता 'काण्डारी हुँशियार' इति कविता संस्कृतेऽनूदिता। समीक्षार्थं प्राथमिः अंशविशेषः समुद्ध्रियते –

"दुर्गम गिरि कान्तार मरु दुस्तर पारावार
लङ्घिते हवे रात्रि निशीथे, यात्रीरा हुँशियार।
दुलितेछे तरी, फुलितेछे जल, भुलितेछे माझि पथ,
छिँडियाछे पाल के धरिवे हाल आछे कार हिम्मत्?
के आछ जोयान, हओ आगुयान्, हाँकिछे भविष्यत्?
ए तुफान भारी, दिते हवे पाडि, निते हवे तरी पार"। (मूलकविता)

संस्कृतानुवादः खलु –

"दुर्गमौ गिरिकान्तारौ मरुश्चाब्धिः सुदुस्तरः।
लङ्घ्या रात्रिनिशीथे च यात्रिभिरवधीयताम्॥
दोदुल्यते तरी हन्त स्फायते च जलं भृशम्।
विस्मरति पथञ्चैव नौचालकः पुनः पुनः॥
छिन्नो नौकापटो हा हा कर्णं को नु धरिष्यति।
कस्यास्ति दृढपौरुषम्॥
कोऽस्ति युवा बलिष्ठश्च सोऽग्रे सरतु साम्प्रतम्।
आह्वयति भविष्यत् तम्।
प्रबलेयं महाझञ्झा समुत्तार्या तथापि सा।
पातं नेयां तरी तथा"॥

अत्रानुवादोऽनुष्टुप्छन्दसा क्रियमाणोऽस्ति। मूलकविताया भावरक्षणेऽवहितेनापि

अनुवादकेन छन्दोनियमपारतन्त्र्यान् मूलेऽविद्यमानानामपि पदानामनुप्रवेशो विहितः। किञ्च क्वचित् क्वचित् अनुष्टुप्छन्दोलक्षणान्वितपादत्रययुक्तः श्लोकोऽप्यत्र सन्निवेशितः।

सुकान्तकृतायाः 'लेनिन' इति कविताया अनुवादकरणे संस्कृतच्छन्दः परिहृतं वर्तते, मुक्तकच्छन्दसैवानुवादो विहितोऽस्ति। दिङ्मात्रमुदाहरणं यथा –

"लेनिन भेङेछे रुशे जनस्रोते अन्यायेर बाँध,
अन्यायेर मुखोमुखि लेनिन प्रथम प्रतिवाद।
आजकेओ रुशियार ग्रामे ओ नगरे
हाजार लेनिन युद्ध करे,
मुक्तिर सीमान्त घिरे विस्तीर्ण प्रान्तरे।
विद्युत् इशारा चोखे, आजकेओ अयुत लेनिन
क्रमश संक्षिप्त करे विश्वव्यापी प्रतीक्षित दिन,
विपर्यस्त धनतन्त्र, कण्ठ रुद्ध, वुके आर्तनाद ;
आसे शत्रुजयेर संवाद"॥ (मूलम्)

संस्कृतेनानुवादस्तावदस्य चरणस्य –

"लेनिनो भग्नवान् रुशे जनस्रोतसा अन्यायस्य बन्धम्,
अन्यायस्य मुखामुखि लेनिनः प्रथमः प्रतिवादः।
अद्यापि रुशियाया ग्रामे तथा नगरे
सहस्रं लेनिना युद्धं कुर्वन्ति,
मुक्तेः सीमान्तं संवेष्ट्य विस्तीर्णे प्रान्तरे।
विद्युदिङ्गितचक्षुषा, अद्यापि अयुतं लेनिनाः
क्रमशः संक्षेपयन्ति विश्वव्यापि प्रतीक्षितं दिनम् –
विपर्यस्तं धनतन्त्रम्, कण्ठो रुद्धः, वक्षसि चार्तनादः,
ऐति शत्रुजयस्य संवादः"।

मुक्तकच्छन्दसा कृतेऽनुवादेऽस्मिन् मूलकविताया भावः शब्दसम्पत्तिः ध्वनिमाधुर्यञ्च अव्याहतानि सन्तीति प्रतिभाति।

C. भाषान्तरेभ्योऽनुवादः –

न केवलं वङ्गभाषातः संस्कृतभाषायाम् अनुवादकरणे दर्शितकृतिता वङ्गप्रतिभा परन्तु भाषान्तरेभ्योऽपि। तथाहि परमविदुषा रोनाल्डसे-महोदयेन रचितः 'The Heart of Āryāvarta' इत्याख्यो ग्रन्थः विष्णुपदभट्टाचार्येण संस्कृतभाषायामनूदितः। संस्कृतवाङ्मयात्मकस्यास्य ग्रन्थस्य नाम 'आर्यावर्तहृदय'मिति।

कलिकाताविश्वविद्यालयस्य संस्कृतविभागे प्राचार्यचरेण (Ex-Professor) ड० सुखमयमुखोपाध्यायेन शेक्सपीयर्-कृतस्य 'हेमलेट्नाटक'स्य प्रशंसनीयोऽनुवादो विहितः। तस्य ग्रन्थस्य नाम एवम् – 'महाकविश्रीशेक्षपीवरविरचितं दीनार्कराजकुमारहेमलेखम्'। प्रकाशितो वर्तते अनुवादग्रन्थोऽयं दिल्लीस्थितया मोतीलालबनारसीदास इति प्रकाशनसंस्थया।

सीतानाथेन शेलीविरचितायाः 'To The Skylark' इत्याख्यायाः कवितायाः पद्यात्मके संस्कृतवाङ्मये विपरिणामः साधितः। अस्यैव आङ्गलकवेः 'To Night' (विभावरीं प्रति) इति कविता श्रीजीवन्यायतीर्थेन तथा 'Loves of Philosophy' (प्रेमतत्त्वम्) इति कविता विष्णुपदभट्टाचार्येणानुदिता।

ओमरखैयामकविकृतो 'रुवाइ' इत्याख्यो मुक्तककाव्यसंग्रहः (पार्सीभाषामयः) सहृदयानां सुतरां हृदयहारी। संस्कृतानुवादकेषु वङ्गीयस्य वीरेन्द्रकुमारभट्टाचार्यस्य कृतित्वं विशेषतः स्वीकरणीयम्।

सुकुमाररायस्य 'हुँको मुखो ह्यांला' इति कवितायाः संस्कृतानुवादो विहितः देवार्चनासरकारेण। अपि च, तरुणकविना तथा अनुवादकेन सुदीप्तमुन्सिना शेक्सपीयारस्य दशसंख्यकानां सनेट्-कवितानां संस्कृतानुवादः तथा च मीर-तकि-मीरस्य 'पत्ता पत्ता वुटा वुटा' इति हास्यरसात्मकानां कवितानां संस्कृतभाषया अनुवादो विहितः। आङ्गलनाट्यकृतः शेक्सपीयरस्य दशसंख्यकासु कवितासु उल्लेख्यास्तावत् – "Shall I compare thee to a summer's day?" (सनेट् – 18), "A woman's face, with nature's own hand painted," (सनेट् – 20), "My glass shall not persuade me I am old," (सनेट् – 22); "When in disgrace with fortune and men's eyes" (सनेट् – 29), "Tired with all these, for restful

death I cry," (सनेट् – 66) "Unthrifty loveliness, why dost thou spend" चेति। एतासां कवितानाम् क्वचित् अक्षरशः क्वचिद् भावानुवादस्य अनन्यबन्धनेन अनुवादो विहितः। दिग्दर्शनरूपेण शेक्सपीयारस्य द्वादशसंख्यकसनेटः सुदीप्तमुन्सिना कृतः संस्कृतानुवादस्तावत् –

"न स्वीकरोमि वार्धक्यं प्रमाणीकृत्य दर्पणम्।
यावदसि समानस्त्वं वयसा यौवनेन वै॥
यदा द्रक्ष्यामि रेखास्तु त्वयि कालकृताः खलु।
द्रक्ष्येते वै मया कालो मद्दिनावसृतिस्तथा"॥

७.०. साहित्यशास्त्रम्

आधुनिककाले वङ्गीयानां प्रतिभा अलंकारशास्त्रेऽपि विशेषेणोल्लेखार्हा। अस्मिन् समये बहवो अलंकारशास्त्रीयग्रन्था विरचिताः। तेष्वन्यतमो महामहोपाध्यायस्य चन्द्रकान्ततर्कालंकारस्य 'अलंकारसूत्राणी'ति काव्यशास्त्रविषयकग्रन्थः। तत्रापि प्राचाम् आलंकारिकाणां तत्त्वानां समावेशो दृश्यते।

हरिदाससिद्धान्तवागीशेन 'काव्यकौमुदी'ति अलंकारग्रन्थो निर्मितः। सूत्रवृत्तिभ्यां ग्रथितोऽयं ग्रन्थः। अस्य ग्रन्थस्य निर्माणे को हेतुरिति प्रदर्शयितुमाह हरिदासः – "हन्त! कियन्तः शिक्षार्थिनः काठिन्यश्रवणाद् विस्तारभयाच्च प्राचीनान् अलंकारग्रन्थानध्येतुमेव नारभन्ते, केचित् पुनरारभमाणा अपि तदुभयदर्शनादेव विरमन्ति, यावज्जीवं सन्तापमनुभवन्ति च। तेषामिदमपरिहार्यं दुःखं निवर्तयितुं महान्तमाश्वासं विश्वासञ्च विधातुं मया खल्वयं काव्यकौमुदीग्रन्थो निरमायि"[६२४]।

पञ्चदशकलाभिः विभक्तेऽस्मिन् ग्रन्थे पूर्वसूरिणां साहित्यशास्त्रीयराद्धान्तानां समाकलनं दृश्यते। तत्र प्रथमे काव्यप्रयोजनं, स्वरूपञ्च, द्वितीये दृश्यकाव्यं, तृतीये श्रव्यकाव्यम्, चतुर्थे ध्वनिः, पञ्चमे गुणीभूतव्यङ्ग्यं, षष्ठे शक्तित्रयं, सप्तमे रसः, अष्टमे नायकादिः, नवमे नायिकादिः, दशमे दोषः, एकादशे गुणः, द्वादशे रीतिः, त्रयोदशे शब्दालंकारः, चतुर्दशे चित्राद्यलंकारः, पञ्चदशे अर्थालंकारश्चेति वर्णिताः सन्ति।

ग्रन्थस्यास्य लक्ष्यरूपाण्युदाहरणानि स्वरचितानि तथा च माघादिग्रन्थेभ्यो

[६२४] काव्यकौमुदी (ग्रन्थारम्भे निवेदनम्)।

निबद्धानि। ग्रन्थे पूर्ववर्तिकाव्यशास्त्रीयग्रन्थानां सरस्वतीकण्ठाभरण-काव्यप्रकाश-साहित्यदर्पणानामपि समुल्लेखो विद्यते।

हरिदासेन भावयितृप्रतिभाया निदर्शनत्वेन महाभारत-शिशुपालवध-मेघदूत-शकुन्तला-उत्तररामचरित-मुद्राराक्षसादीनाम् आर्षमहाकाव्य-खण्डकाव्य-रूपकाणां बह्व्यो टीकाः टीकिताः। तेन रचिता 'कुसुमप्रतिमे'ति साहित्यदर्पणस्य टीका प्रसिद्धा सरला साहित्यतत्त्वोपेता च।

अष्टादशशताब्दीको बलदेवविद्याभूषणः 'काव्यकौस्तुभम्', 'साहित्यकौमुदी' चेति ग्रन्थद्वितयं विरचयामास। नवप्रभाभिर्विरचिते 'काव्यकौस्तुभे' ग्रन्थे काव्यफल-शब्दार्थवृत्ति-रस-गुण-रीति-दोष-ध्वनिभेद-मध्यमकाव्यशब्दार्थालंकारादिविषया पर्यालोचिता विलसन्ति। परं 'साहित्यकौमुदी' खलु काव्यप्रकाशस्य टीकेति।

साहित्यतत्त्वविश्लेषणे काश्यपकवेः कालीपदतर्काचार्यस्य योगदानं विशिष्टम्। तेन कालिदास-भवभूतिप्रभृतीनां कवीनां श्रेष्ठकृतिततीनां समीक्षात्मकः 'काव्यचिन्ते'ति ग्रन्थः प्रकाशितः संस्कृतसाहित्यपरिषत्पत्रिकायाम्। अस्य निवेदने भणितम् – "अयं खलु प्रथमो भागः काव्यचिन्तायाः। अत्र कालिदासस्य तथा श्रीकण्ठस्य प्रायेण निःशेषैव समालोचना संन्यवेश्यत। अतःपरमस्ति किल कामना द्वितीयभागस्य प्राकाश्ये।...तत्र समासेन प्रथितमहिम्नां माघ-श्रीहर्ष-वाणभट्टप्रभृतीनां श्रव्यकाव्यकवीनां तथा शूद्रक-विशाखदत्त-भास-श्रीहर्षादीनां दृश्यकाव्यकवीनां सविशेषा समालोचना प्रवर्त्तयिष्यत इति भवत्सु सूचनावादेन निवेदयामः"।

नाट्यतत्त्वसमीक्षायां सिद्धेश्वरचट्टोपाध्यायस्य भूमिका सततं संस्मरणीया। यतः सागरनन्दिकृतस्य नाटकलक्षणरत्नकोशस्य वङ्गभाषायां प्रथमं सम्पादनं विवृतिसहितं संसाधितं सिद्धेश्वरेण।

काव्यतत्त्वजगतीतले विष्णुपदभट्टाचार्यस्य नाम श्रद्धया संस्मर्यते। तेन ध्वन्यालोकग्रन्थमुपरि 'ध्वन्यालोकप्रभे'ति टीका व्यरचि। महिमभट्टस्य व्यक्तिविवेकस्य व्याख्याविवृत्यादिभिः मनोज्ञां सम्पादनां विहितवान् विष्णुपदभट्टाचार्यः। तस्यापरं श्रेष्ठं कृतित्वं तावद् भामहस्य काव्यालंकारसोपरि 'मयूखः' इति टीका। टीकेयं संस्कृतमहाविद्यालयस्य 'Our Heritage' इति पत्रिकायां प्रकाशितावर्तत।

नन्दनतत्त्वव्याख्यायां न केवलं पश्चिमवङ्गे सर्वभारतीयस्तरे चापि रवीयमानोऽशेषख्यातिभाग् वङ्गदेशीयो रमारञ्जनमुखोपाध्यायोऽद्वितीयः। संस्कृत-वङ्ग-आङ्गलभाषासु नन्दनतत्त्वव्याख्यानेन न केवलं भारते, चापि आन्तर्जातिकपरिसरे वङ्गीयसारस्वतधाराया विजयवैजयन्तीमुड्डीयमानां विदधाति अयमाचार्यो रमारञ्जनः।

साम्प्रतिके काले संस्कृतसाहित्यतत्त्वविश्लेषणे येषामाचार्याणां योगदानम् अवश्यमेव उल्लेखार्हम्, ते तावत् चिन्मयीचट्टोपाध्याय-दिलीपकुमारकाञ्जिलाल-करुणासिन्धुदास-सीतानाथाचार्य-कल्पिकामुख्योपाध्याय-प्रतापवन्द्योपाध्याय-तारापदचक्रवर्ति-सत्यनारायणचक्रवर्ति-धनञ्जयचक्रवर्ति-गोपालचन्द्रमिश्रप्रमुख्याः। परमर्वाचीनसंस्कृत-समीक्षायाम् अध्यापिकायाः ऋताचट्टोपाध्यायदेव्याः योगदानं सुतरामेव उल्लेखार्हम्।

॥ द्वितीयं पर्व ॥

अध्यायस्य द्वितीये पर्वणि विंशैकविंशशताब्द्योः संस्कृतवाङ्मयस्याभ्रंलिहाग्रे भव्ये राजप्रासादे राराज्यमानां येषां द्वादशावङ्गीयानां कवीनां कारयितृप्रतिभाविषये यथामति आलोच्यते, ते तावत् चन्द्रकान्ततर्कालंकार-पञ्चाननतर्करत्न-हरिदाससिद्धान्तवागीश-विश्वेश्वरविद्याभूषण-कालीपदतर्काचार्य-वीरेन्द्रकुमारभट्टाचार्य-श्रीजीवन्यायतीर्थ-सिद्धेश्वरचट्टोपाध्याय-यतीन्द्रविमलचौधुरी-नित्यानन्दस्मृतितीर्थ-दीपकघोष-सीतानाथाचार्याश्चेति।

१. चन्द्रकान्ततर्कालंकारस्य साहित्यम्

०. उपोद्घातः

अविभक्तवङ्गदेशस्य प्राचीनसारस्वतपरम्परायाः साक्षात्तया आसीद्वाहकः चन्द्रकान्ततर्कालंकारः। अयञ्च प्रौढः कविवरः ईशवीये १८३६तमे वर्षे तदानीं वांलादेशस्य मयमनसिंहजिल्लान्तःपातिशेरपुरग्रामवास्तव्यः राधानाथसिद्धान्तवागीश-ब्रह्ममयीदेव्योः सुयोग्यपुत्रः। व्याकरण-स्मृति-न्याय-वेदान्तशास्त्रेष्वस्य दाक्ष्यं जगति चिरं प्रथते स्म। तस्मात् स परवर्तिनि काले

शास्त्रेष्वस्य प्रविरलपाण्डित्याय 'तर्कालंकारोपाधिना' सभाजितोऽभून्नवद्वीपे। १८८३ ईशवीयाब्दे स कलिकातायाः संस्कृतमहाविद्यालयेऽध्यापकपदमलंकार। तदा संस्कृतमहाविद्यालयस्याध्यक्षपदे वृतो बभूव ईश्वरचन्द्रविद्यासागरमहाशयः। आङ्गलसर्वकारेण स 'महामहोपाध्यायो'पाधिनापि भूषितः।

१. कवेरस्य काव्यविश्वम्

अयञ्च न केवलमासीत् शास्त्रे प्रवीणः, परं कारयितृप्रतिभायाः मूर्तविग्रहः। अनेन महाकाव्य-नाटक-अलंकारग्रन्थादीन् विरच्य संस्कृतकाव्यमालापञ्चं विभूषितम्। तस्य मौलिकसाहित्यकृतयस्तावत् –

क). चन्द्रवंशम् (महाकाव्यम्, १८९२)

ख). सतीपरिणयः (महाकाव्यम्, १८७१)

ख). कौमुदीसुधाकरम् (प्रकरणम्, १८८८)

घ). अलंकारसूत्राणि (अलंकारग्रन्थः, १९११)

ङ). प्रबोधशतकम् (शतककाव्यम्)

तदानीन्तनकालस्य दार्शनिकेषु मूर्ध्नि राजते सः। तद्विरचिताः दर्शनग्रन्था एव तत्प्रकाशयन्ति। तस्य दर्शनग्रन्थास्तावत् –

क). वैशेषिकसूत्रभाष्यम् (कणादस्य वैशेषिकदर्शनस्य टीका, १८८७)

ख). तत्त्वावली (वैशेषिकदर्शनस्य तत्त्वमूलम्, १८६९)

ग). कुसुमाञ्जलिटीका (उदयनस्य कुसुमाञ्जलिग्रन्थमुपरि)

घ). कातन्त्रचन्द्रप्रक्रिया (सूत्रवृत्तिसमेता कातन्त्रव्याकरणसम्मतचर्चा, १८९६)

क). कौमुदीसुधाकरम्

काल्पनिकप्रेमविषयमुपजीव्य रचितं पञ्चाङ्कोपेतं प्रकरणमिदं शिवस्य स्तुत्या प्रारभते –

"किञ्चिद्वक्तुं न खलु कुशलः सम्मुखादिन्दुमौलि-
श्चिन्ताम्लानो भवतु भवतां भूयसे मङ्गलाय"[६२५]॥

कविनात्र श्लोकद्वितयेन शम्भोर्मङ्गलाचरणं विहितम्। वस्तुतः, भूस्वामिनः

[६२५]कौमुदीसुधाकरम्, (पृ. – १।)।

हरचन्द्रस्य पुत्रयोर्विवाहमुपलक्ष्य प्रस्तुतमिदं प्रकरणम्। तस्मात् प्रस्तावनायामुदितम्– …कौथुमः चन्द्रकान्तो नाम ब्राह्मणः प्रतिवसति। स च स्वनिर्मितं कौमुदीसुधाकरं नाम प्रकरणमस्मासु समर्पितवान्[६२६]। चन्द्रकान्तेन प्राथम्येनैवोक्तं यत् कथञ्च तस्य मौलिककाव्यादिविनिर्माणे प्रवृत्तिः अभूत् –

"अप्रौढ़ाप्यप्रगल्भापि सरसा कविनिर्मितिः।
बालेव हृदयालूनां भावैः स्पृशति मानसम्"[६२७]॥

रूपकस्यास्याद्येऽङ्के प्रियमित्रं सालङ्कायनं प्रति नायकः सुधाकरो वर्णयति कौमुदीम्। तदा राज्ये कात्यायनीमहोत्सवः प्रचलन्नस्ति। सुधाकरः स्वविरहं निर्वर्ण्य सुन्दर्या मुखात् कौमुदीविरहं प्रतिशृणोति। द्वितीयाङ्कस्तावत् नवमालिका-चूतलतिकयोः कथोपकथनेनारब्धः। तत्र विरहिणी कौमुदी सुधाकरं दृष्ट्वा नितराम् आनन्दिताभूत्। तृतीयाङ्के दृश्यते खण्डमुण्डस्य शिष्या कङ्कालमालिनी कौमुदीम् अपहृत्य गुरोः बलीपूरणार्थमानीतवती। प्रसङ्गानुसारं सुन्दरी-कौमुदी-सुधाकराणां वार्तालापो वर्णितो रोचिष्णुतया नाट्यकृता चन्द्रकान्तेन। चतुर्थाङ्कस्य नाम 'कौमुदीपरिणयाख्य'मिति। विरही सुधाकरः उपवनशोभां पश्यन् कौमुदीहरणसंवादं प्राप। सालंकायनश्चापि कौमुदीवृत्तं श्रुत्वा तस्या उद्धाराय सुधाकरेण सह यतते स्म। अस्मिन् अङ्के वसुमित्र-दम्भ-कापालिकानां पारस्परिकं कथोपकथनं वर्णितम्। पञ्चमेऽङ्के प्रियां मृगयितुकामः सुधाकरः इतस्ततः विलपन् भ्रमति स्म। अन्ततो गत्वा कौमुदी सुधाकरेण मिलितेति कृत्वा सुखान्तं भवति रूपकम्।

रूपकेऽस्मिन् ओजःगुणस्य प्राधान्यात् तथा दीर्घसमासबद्धपदप्रयोगाच्च वाणभट्टीयशैली स्मर्यते। दिङ्मात्रमुदाहरणं तावत् – "परार्धपर्य्याणसनाथानवरतचर्व्यमाण-खलीनफेणपुञ्जारञ्जितसुक्कणीकोन्नमितबालहस्तनिरन्तरस्फीतधुरघुरायमाणरचित-सुत्कारघोणह्रेषारवमुखराविष्कृतास्कन्दितधौरितकरेचितवल्गितसेनुतकुलीनविनीत-तुरङ्गमस्तोमः…"[६२८]। अर्वाचीनकालस्य दृश्यकाव्यविधौ व्यतिक्रमतया

[६२६]कौमुदीसुधाकरम्, पृ. – ३।
[६२७]तत्रैव, पृ. – ६।
[६२८]तत्रैव, पृ. – ९।

प्राकृतभाषायाः प्रयोगबाहुल्यं लक्ष्यते अस्मिन् रूपके स्त्रीपात्राणामाधिक्यात् प्रवादप्रवचनानां सरसप्रयोगाद्रूपकमिदं कालोत्तीर्णं रसोत्तीर्णञ्च जातम्। विषयवस्तुग्रथने पूर्वसूरिणां कालिदास-भवभूत्यादीनां सुस्पष्टं प्रभावो नयनयोरापतति। चरित्रचित्रणेऽपि नाट्यकर्तुः कृतित्वमनस्वीकार्यम्। विशेषेण स्त्रीपात्राणां द्विपदिका-जम्भलिका-चर्चरीप्रभृतीनां नामकरणे। 'न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते' इति आलंकारिकवचनं शिरसिकृत्य चन्द्रकान्तो विरहप्रेमवर्णनञ्चकार –

"तडित इव विवर्तैः पृक्तमात्रः प्रियायाः।
प्रणयमधुरचेष्टैर्लोचनैः स्पन्दशून्यः"[६२९]॥

उपमा-रूपक-अर्थान्तरन्यास-दीपक-अतिशयोक्ति-दृष्टान्तादिभिरलंकारैर्नवत्यधिकं द्विशतं श्लोकैश्च ग्रथितमिदं प्रकरणम्।

ख). सतीपरिणयमहाकाव्यम्

'सतीपरिणयम्' षोडशसर्गसम्पूर्णमेकं महाकाव्यम् १८७१ ईशवीयाब्दे ढाकातः प्रकाशितमभूत्। महाकाव्यस्यास्य मूलमुपजीव्यं तावत् कालिदासस्य कुमारसम्भवमहाकाव्यम्। कुमारसम्भवस्य सतीपरिणयवृत्तमाधारीकृत्य चन्द्रकान्तेन स्वकल्पनावैभवेन अलंकार-रसोचितमाहात्म्याच्च महाकाव्यमिदं व्यरचि।

ग). चन्द्रवंशम्

चतुर्विंशतिसर्गैर्विभक्तेऽस्मिन् महाकाव्ये चन्द्रवंशीयानां राज्ञां कृतित्वं चन्द्रकान्तेन स्वकारयितृप्रतिभया अङ्कितम्। महाभारतस्य तथा हरिवंशस्य च प्रसिद्धानि वृत्तानि उपजीव्य ग्रथितमिदं महाकाव्यम्। परं महाकाव्यकृता अलंकार-वृत्त-रस-वस्तुग्रथने कालिदासीयशैली सुतरामेव संयोजिता।

'पुरूरवसम्भवाख्ये' प्रथमसर्गे बुद्ध-इलयोः सन्तानरूपेण पुरूरवजन्म, 'धर्मप्रसाद'नामके द्वितीये सर्गे इन्द्रेण उर्वश्या अभिशापवृत्तम्, तृतीये उर्वशीवियोगेन पुरूरवसो विप्रलम्भः, चतुर्थे देवैः प्रेरितस्य सनत्कुमारस्य राष्ट्रव्यवस्थाविषयकोपदेशवर्णनम्, पञ्चमे इन्द्रपत्नीं पुलोमजां प्रति अत्यासक्तिवशात् पुरूरवस्पुत्रस्य नहुषस्य प्राप्ताभिशापेन मर्त्यागमनम्, षष्ठे ययातिना समं देवयानीपरिणयः,

[६२९]कौमुदीसुधाकरम्, पृ. – १२।

सप्तमे पूरूराज्याभिषेकः, अष्टमे पूरोः प्रप्रौत्रस्य अहयातेः महति सम्पराये केकयराज्यविजयः, नवमे दुष्यन्तेन शकुन्तलापरिग्रहः, दशमे सर्गे राज्ञः सम्बरणस्य मृगयावसरे हिमालयप्रकृतिवर्णनम्, 'तपतीपरिणयाख्ये' एकादशे सर्गे वशिष्ठस्योद्योगेन तपती-सम्बरणयोः विवाहः, द्वादशे उभयोः वाणप्रस्थाश्रमगमनात्प्रागेव पुत्रस्य पुरोः राज्याभिषेकः, त्रयोदशे नृपत्वेन कुरुगुणवर्णनम्, चतुर्दशे ग्रीष्मविहारवर्णनम्, पञ्चदशे जन्मान्धधृतराष्ट्रात् परं पाण्डुराज्यलाभः, षोडशे सर्गे स्वयंवरसभायां पतित्वेन कुन्त्याः पाण्डुप्राप्तिः, सप्तदशे सर्गे मिलनावस्थायां हरिणवधात् पाण्डोरभिशापः, अष्टदशे सर्गे धृतराष्ट्रस्यादेशेन पाण्डवानां खाण्डवप्रस्थप्राप्तिः, ऊनविंशतितमे सर्गे पाण्डवानां दिग्विजयः, विंशतितमे सर्गे पाण्डव-कौरवपक्षयोर्मध्ये युद्धस्यान्तिमे दिवसे भीमेन दुर्योधनवधः, एकविंशतितमे अध्याये युधिष्ठिरराज्याभिषेकवर्णनम्, ततः सर्पसत्रवर्णनम्, त्रयोविंशतितमेऽध्याये काश्मीरराज्यसौन्दर्यवर्णनं, चान्तिमे सर्गे चन्द्रवंशस्यान्तिमराज्ञः क्षेमकस्याजितेन्द्रियस्वभावश्चेति विषयाः चन्द्रकान्तेन पौराणिकवृत्तानि परिवर्त्य नवनवरसैः आर्द्रीकृत्य स्वकपोलकल्पनया च उपायनीकृताः अस्मिन् महाकाव्ये।

महाकाव्यस्यास्याङ्गी रसः वीरः। नायकाः चन्द्रवंशीया राजानस्तावत् युद्धवीराः। विश्वनाथादिभिरुक्तानि महाकाव्यलक्षणान्यत्र चन्द्रकान्तेन आमूलचूडमनुपालितानि। काश्मीर-हिमालय-ग्रीष्मजल-नगर-कुरुक्षेत्रयुद्ध-कण्वाश्रम-वर्षर्तु-स्वयंवरसभादीनां महाकाव्योचितभङ्ग्या रोचकं वर्णनमुपस्थापितमिह महाकाव्ये। कालिदासीयशैलीमनुसृत्य चन्द्रकान्तेन वैदर्भी रीतिः समाश्रिता। स्वभावोक्ति-प्रतिवस्तूपमा[६३०]-उपमा-अर्थान्तरन्यास[६३१]-अप्रस्तुतप्रशंसाद्यर्थालंकाराणां यमकानुप्रासानां शब्दालंकाराणां वैचित्र्येण काव्यमिदं शोभमानं विलसति। कविना स्वकीये महाकाव्ये उपेन्द्रवज्रा[६३२]-इन्द्रवज्रा-वंशस्थविल-मालिनी[६३३]-वसन्ततिलक-अनुष्टुप्-वियोगिनी[६३४] प्रभृतीनि सुप्रचलितानि छन्दांसि व्यवह्रियन्ते।

[६३०]चन्द्रवंशम् (५।१४)।

[६३१]तत्रैव (७।५९)।

[६३२]चन्द्रवंशस्य प्रथम-एकादश-अष्टादश-त्रयोविंशतितमेषु सर्गेषु उपेन्द्रवज्राछन्दसः प्रयोगो दृश्यते।

[६३३]काव्यस्यास्य द्वितीय-दशम-द्वादश-ऊनविंशति-एकविंशतितमसर्गेषु मालिन्याः प्रयोगः उल्लेख्यः।

[६३४]चन्द्रवंशस्य एकादशे सर्गे वियोगिनीछन्दसा श्लोकाः प्राप्यन्ते।

घ). अलंकारसूत्राणि

चन्द्रकान्ततर्कालंकारः 'अलंकारसूत्राणि' इति स्वतन्त्रालंकारग्रन्थं लिलेख। अलंकारशास्त्रस्य प्रथमाध्येतॄणां कृते ग्रन्थोऽयमुपकारकः। तथाहि तेनोक्तम् – 'अलंकारशास्त्रे प्रवेशमिच्छतां बालानां न द्रागित्येव प्रवेशयोग्यौ तौ प्रबन्धौ/अतस्तेषां सौकर्याय मया निर्मितोऽयं प्रबन्धः'[६३५]। उपेन्द्रनाथचक्रवर्तिना ग्रन्थोऽयं कलिकातातः प्रकाशितः। सूत्रवृत्तिभ्यां विन्यस्ते अस्मिन् अलंकारग्रन्थे परिच्छेदाष्टकं वर्तते। ते चाध्यायास्तावत् – काव्यस्वरूपम्, शब्दार्थः, रसः, काव्यभेदः, गुणः, शब्दालंकारः, अर्थालंकारः, दोषश्चेति।

२. पञ्चाननतर्करत्नस्य सारस्वतसाधना

०. भूमिका

पञ्चाननतर्करत्नो वङ्गीयः कश्चन प्रख्यातो नाट्यकृदासीति विंशशताब्द्याम्। नाट्यकारोऽयं १८६६ खृष्टाब्दे पश्चिमवङ्गप्रदेशस्य उत्तरचव्विशपरगणाजिल्लान्तः-पातिनि भट्टपल्लीति स्थाने जन्म लेभे। पिता तस्य नन्दलालविद्यारत्नः। संस्कृतस्य ऐतिह्यमण्डितस्य परिवारस्य सन्तानत्वेन स संस्कृतस्याभ्युन्नतये संस्कृतसाहित्यपरिषदः स्थापने महद्योगदानं चकार। स्वाधीनतान्दोलने स भागं जग्राह। कलिकातास्थिते वङ्गवासीमहाविद्यालये आदौ अध्यापकपदमलंकृत्य परवर्तिनि समये स्वगृहे शास्त्राद्यध्यापनं कृतम्। वङ्गदेशस्य शास्त्रचर्चायां पञ्चाननस्य योगदानम् अनस्वीकार्यम्। वर्णाश्रमधर्मं प्रति आसक्तिवशात् वर्णाश्रमसिद्धान्ताः तस्य रचनासु प्रत्यक्षतया प्रतिभासमाना आसन्।

अनेन नैकाश्च टीकाश्चापि लिखिताः। तास्वन्यतमास्तावत् 'देवीभाषा' (चण्डी), सांख्यतत्त्वकौमुद्या उपरि 'पूर्णिमा', वैशेषिकदर्शने 'परिष्कारः' तथा च 'शक्तिभाष्यम्' इति। प्राचीनग्रन्थानां सम्पादने तस्याभिरुचिरासीत् प्रबला। तेन सम्पादितेषु ग्रन्थेषु मुख्यास्तावत् 'मनुसंहिता', 'रामायणम्', 'महाभारतम्', 'भागवतम्', 'विष्णुपुराणम्',

[६३५]अलंकारसूत्राणि, पृ. – १।

'ब्रह्मवैवर्त्तपुराण'ञ्चेति। १९२९ खृष्टाब्दे पञ्चाननः संस्कृतविद्याचर्चायां महते योगदानाय 'महामहोपाध्यायो'पाधिना सम्मानितोऽभूत्। परं तेनोपाधिरयं परित्यक्तः।

१. पञ्चाननस्य कारयितृप्रतिभायाः निदर्शनम्

पञ्चाननेन सहजया कारयितृप्रतिभया 'पार्थाश्वमेधमहाकाव्यम्', 'श्रीविष्णुविक्रम'महाकाव्यम्, 'शोककवितावली'[६३६], 'श्रीराजप्रशस्तिः', 'प्राणदूतम्', 'सर्वमङ्गलोदयः'[६३७], 'स्तोत्रावली' चेति श्रव्यकाव्यानि रचितानि। तत्र पौराणिकविषयमुपजीव्य पार्थाश्वमेधमहाकाव्यस्य 'विद्योदय'पत्रिकायां प्रथमः प्रकाशो जातः। तदनु १९६२ ईशवीयाब्दे महाकाव्यस्यास्य ग्रन्थत्वेन प्रकाशितोऽभूत्। अनेन 'अमरमङ्गलम्' तथा च 'कलङ्कमोचनं' नाम नाटकद्वयमपि व्यरचि।

क). अमरमङ्गलम् नाटकम्

राणाप्रतापस्य पुत्रस्यामरसिंहस्य प्रतापद्योतकं जीवनकथानकमुपजीव्य अष्टाङ्कसम्पूर्णम् 'अमरमङ्गल'मिति ऐतिहासिकं रूपकं १९३९ खृष्टाब्दे प्राकाशि। नाटकस्यास्य नान्दीश्लोकद्वयं विरोधाभासालंकाराभ्यां विन्यस्तम्। इह नाटके पञ्चाननस्य जातीयताबोधो यथा ध्वनितस्तथैव च दासत्वजनितश्लानिः भारतीयानां प्रतिपदं वर्ण्यते।

नाटकस्य प्रस्तावनानुसारं रामचन्द्रस्य द्वितीयपुत्रो लवो राजस्थानस्य प्राचीनतमो नृपः समभूत्। ततो वावरस्य दृप्ततेजसा संग्रामसिंहः पराजितो बभूव। तत्रासीत् उदयसिंह: संग्रामसिंहस्य पुत्रः। उदयसिंहस्य पुत्रो राणाप्रतापस्तदा चित्तौडराज्यम् उद्धर्तुं प्रतिज्ञां चकार। प्रतापस्य पुत्रेणामरसिंहेन पर्णशालाया: स्थाने सौधावलिर्विनिर्मिता।

तत्र प्रथमाङ्के राणाप्रतापपुत्रश्चितौडदर्शनार्थं भगवत्या अर्चनार्थमुत्सुको बभूव। तन्मते आजीवनं भगवत्याः उपासनमेव धर्मः। तदुक्तम् अमरसिंहेन –

"आजीवनमेव भवदुपासनमेव धर्मस्त्वद्गौरवाय मरणं च सुखं यदीयम्।
तेषां त्वदभ्युदयदर्शनवञ्चितानां मातर्दयस्व तनुजेषु भव प्रसन्ना"[६३८]॥

द्वितीयाङ्कात् पूर्वं विष्कम्भके दृश्यते यत् मानसिंहेन गुप्तचरद्वय-साहाय्येन

[६३६]शोककवितावली तावत् काव्यसंकलनम्।
[६३७]सर्वमङ्गलोदयः खलु श्लेषप्रधानकाव्यम्।
[६३८]विं.सा.ना. (रामजी) पृ. – १७)।

अमरसिंहं विपथे परिचालयितुं महती परिकल्पनैका नियोजिता। अर्थात् अमरसिंहस्य विनाशं कामयाञ्चक्रे स मानसिंहः। तथाहि पञ्चाननेन उक्तम् –

"कपटो हृदये कपटो वचने कपटो नयने कपटो वपुषि।
कपटस्त्वचि चेति समृद्धगुण: परवञ्चनवर्त्मनि दक्षतर:"[६३९]॥

तस्मात् परिकल्पनानुसारं राणाप्रतापस्य सौजन्येन विमुग्धा सती तस्यानुगामिनी अमरसिंहस्य प्रेयसी सञ्जाता। अपि च, जरत्याः स्वगतोक्तित एतदेव प्रतीयते यत् सा विषयप्रयोगेन वा उपायान्तरेण पत्न्या सह अमरसिंहं निहत्य कृत्स्नं राजकुलं भस्मसात् कर्तुम् अभिलषितवती।

द्वितीयाङ्के वीरायाः पाणिग्रहणाय देव्या अमरसिंह: प्रार्थितः। अमरेण प्रतिज्ञातमासीद् यत् चित्तौडविजयमृते नाहं काञ्चित्कामिनीं कामयिष्ये। चित्तौडाक्रमणस्य परिकल्पनां दृढीकर्तुं विचारार्थञ्च काचित् सभा आयोजितापि सामन्तानां पारस्परिकविरोधविचारैः सा योजना सम्यक् न परिणतिं प्राप्ता। द्वितीयाङ्के राणाप्रतापेन समं पत्न्याः वीरायाः प्रणयकलहो दृक्पथमायाति। तत्तु अतिरोचकं रसोत्तीर्णञ्च वर्तते। परमत्र राणाप्रतापं प्रति वीरायाः प्रेमातिशय्यं भूयो भूयो परिलक्ष्यते। वीरा कथयति – 'यत् कृतं तत् कृतं पुनरकार्यं न करिष्यामि। कपटेनार्यपुत्रं न पातयिष्यामि'[६४०] इति।

द्वितीयाङ्कस्य विशेषत्वमत्र यत् रङ्गमञ्चे गीतस्यायोजनं लोकरञ्जकं संविधानात्मकमस्ति। सुबला गायति –

"देव! सुधाकर! किर करं, दिनकर दुर्जयतिमिरहरम्।
तव सुखोदयलालसहृदयं सेवतां विमलममृतम्"[६४१]॥

तृतीयाङ्के नवनिर्मिते राजप्रासादे भोगविलासेन जीवनं यापयन् आसीत् अमरसिंहः। राजगुरुणा राणाप्रताप-मानसिंहयो: प्रकरणविषयकान् साधिक्षेपान् कण्ठाग्रीकारयित्वा शुकावलिरेका मानसिंहस्यावासं प्रति प्रेषिता। अप्रियां शुकवाणीं

[६३९]अमरमङ्गलम् (१।५९)।
[६४०]तत्रैव (द्वितीयाङ्कः)।
[६४१]वि.श.ना (रामजी), पृ. – २०।

निशम्य मानसिंहेन सक्रोधम् उन्मत्तेन कश्चन शुकपक्षी अपि निहत:।

चतुर्थाङ्कस्य कथानकानुसारम् राणामरसिंहः देशे युद्धकारणात् अशान्तिं जनयितुं नैच्छन्नपि मुघलसेनाया: प्रतिरोधाय भिल्लानां महतीं सेनावाहिनीं निर्मितवान्। शालुम्ब्रापति-भणसिंह-बान्दा-ठक्कुरादयः सामन्तास्तस्य विलासगृहमागत्य तं युद्धाय प्रेषयामासु:। परम् तेन छलमाश्रित्य तेषामुपेक्षा कृता। युद्धं प्रारब्धम्। यवन-प्रेरितानां भीषणानाम् आग्नेयास्त्राणां भयेन क्षत्रियभटाः रणक्षेत्रात् पलायनपरा दृश्यन्ते। पलायमानान् सैन्यान् आलोक्य अमरसिंहस्य पत्न्या सानन्दं तारस्वरेण निगदितम् –

"शृणुत शृणुत पुत्रा मातरं मामवेक्ष्य
त्यजत समरभीतिं यात वैरिक्षयाय।
सकलविजययात्रा मण्डिता: पुण्यकीर्त्या
वरमुचितमभीष्टं प्राप्स्यथ प्रीतिपूर्णा:"[६४२]॥

महाराज्ञ्याः उत्साहव्यञ्जकवार्तां निशाम्य अमरसिंहस्य वीरा भटा अपि नितरां प्रफुल्लिता अभवन्। अमरेणापि राज्ञी वीरा इत्थं प्रशंसिता – 'त्वमेव राजनीतौ मम शिक्षयित्री' तथा च 'त्वं गेहिनी सदृशदुःखसुखा सखी च'।

षष्ठाङ्के वीरायाः क्वचिदन्यत्र गमनोद्योगो दृश्यते। सा वृद्धतापस्याः श्वेतवस्त्रं परिधाय ब्राह्मणान् आह्वयति। परं ते सर्वे विप्रवेषधारिणो निहितशस्त्राः सैनिका आसन्।

सप्तमाङ्के चित्तौडस्य विजयार्थं प्रयाणवेलायां सेनापतिपदप्राप्तये भणसिंह-वान्दाठक्कुरयो: मध्ये मतविरोधः संघटितः, परं राजपुरोहितस्य कौशलेन शान्तावुभौ बभूवतुः।

अष्टमाङ्के चित्तौडविजयो वर्णित:। सागरेण राज्यममरसिंहाय समर्पितम्। अमरसिंहस्य राज्याभिषेक: संवृत्त:।

रूपकमिदं नाट्यतत्त्वदिशा अभिनवं वर्तते। यतः –

क). कापटिकस्य समरसिंहस्य कार्यं छायातत्त्वानुसारि वरीवर्ति।

ख). पञ्चाननस्य लोकोक्तयो यथास्थानं सन्निवेशिता: सुमण्डिताश्च सन्ति। यथा –

[६४२]अमरमङ्गलम् (चतुर्थाङ्कः)।

१. 'को नाम स्वतन्त्र: स्वयमुपनतं पीयूषं नाभिनन्दति।'

२. 'उदरं मे गुडगुडयति।'

३.'प्रमादे हि प्रभवो रक्षणीयो मन्त्रिभि:'।

ग). अमरमङ्गलस्य भरतवाक्यमाकर्षकं व्यञ्जनागर्भं च विद्यते –

"सन्तु स्वधर्मनिरता मनुजा समस्ता:
प्रीतिं सजातिषु भजन्तु विहाय माया:।
सम्पूजयन्तु जननीमिव जन्मभूमिं
भूपालभक्तिनिरताश्च चिरं भवन्तु"[६४३]॥

घ). रूपकमध्ये गौणसंवादानां प्राबल्यमलक्षि।

ङ). आङ्गिकाभिनयमपि पञ्चाननः प्रसङ्गानुसारं नाटके विनिवेशितवान्। दिङ्मात्रम् उदाहरणं तावत् – 'इति खड्गमादत्ते (समरसिंहः)'।

च). पञ्चाननस्य भाषा न सर्वदा ओजोगुणसम्पन्ना परं वर्णनाक्षमता अनन्या। प्रसङ्गतः नाटके वर्णितस्याग्निकाण्डस्य वर्णनं वास्तवोचितं वर्तते –

"वंशग्रन्थिविभेदसम्भवरवैरापूर्य्यते दिङ्मुखं
तारोल्कासदृशैः स्फुलिङ्गनिचयैराकासमाच्छाद्यते।
आलोकेन दिवेव नष्टतिमिरा रथ्या दरीदृश्यते
हाहाकारविमिश्रितः कलकलोऽप्येष क्रमाद् वर्धते"॥

अर्थात् पञ्चाननस्य रचनाशैल्यां भाव-भाषयोः युगपत्समन्वयः समभूत्।

ख). कलङ्कमोचनम्

'कलङ्कमोचनं' पञ्चाननतर्करत्नस्य अपरमेकं प्रख्यातं नाटकम्। कृष्णप्रियाया: राधाया कलङ्कस्य निराकरणं प्राचीनवृत्तान्याधारीकृत्य भक्तिरसेन च कृतमत्र कविना।

[६४३]अमरमङ्गलम् (अष्टमाङ्के भरतवाक्यम्)।

३. हरिदाससिद्धान्तवागीशस्य साहित्यविच्छित्तिः

०. प्रस्तावना

येषां पण्डितप्रकाण्डानां सुविस्तृतया मनीषया वङ्गसंस्कृतिः समृद्धेश्चरमसीमानमधिरूढाः, तेषु हरिदाससिद्धान्तवागीशोऽन्यतमः। १८७६ खृष्टाब्दे इदानीन्तने वङ्गदेशान्तर्गतस्य फरिदपुरमण्डलस्य कोटालिपल्ल्या ऊनशियाग्रामे लब्धजन्मायं पण्डितप्रवरः। पितास्य गङ्गाधरविद्यालंकारो माता च विधुमुखी देवी। मधुसूदनसरस्वत्याः मध्यमभ्रातुः यादवानन्दन्यायाचार्यस्य कुलेऽयं समजायत। स्मृत्यादिषु विषयान्तरेष्वस्य प्ररूढाधिकारितायां सत्यां काव्यस्य विनिर्माणे व्याख्याने तथा समीक्षायाञ्चास्य कृतित्वं सर्वसम्मान्यम्। पञ्चदशवर्षीय एवासौ कंसवधग्रन्थस्य प्रणयनेन लब्धदरोऽभवत्। 'विद्यावागीश'-'महामहोपाध्याय'-'पद्मभूषणा'दिभिः सम्माननैर्भूषितोऽयं सारस्वतः कविः।

१. हरिदासस्य कवित्वप्रतिभा

मौलिककाव्यकृतीश्च विहाय अनेन संस्कृतकाव्य-नाटकादीनामुपरि बह्व्यः टीकाः विरचिताः। तस्य मौलिकरचनाकणास्तावत् –

महाकाव्यम् – रुक्मिणीहरणम्

खण्डकाव्यानि – वियोगवैभवम्, शङ्करसम्भवम्, विद्यावित्तवियोगः

नाटकानि – कंसवधम्, जानकीविक्रमम्, वङ्गीयप्रतापम्, मेवारप्रतापम्, शिवाजिचरितम्, विराजसरोजिनी चेति।

गद्यकाव्यम् – सरला

अलंकारग्रन्थः – काव्यकौमुदी

शास्त्रीयग्रन्थाः – स्मृतिचिन्तामणिः, वैदिकविवादमीमांसा चेति।

टीकाप्रपञ्चः – भारतकौमुदी (महाभारतीयटीका), अभिज्ञानकौमुदी (१९२१, शाकुन्तलटीका), कुमारसन्तोषिणी (१९१५, दशकुमारचरितटीका), कल्पलता (१९१६, कादम्बर्याः टीका), वसन्तसुषमा (१९२०, मृच्छकटिकटीका), जयन्ती (१९२६-२७, नैषधीयटीका), चाणक्यचातुरी (१९२८, मुद्राराक्षसटीका), माधुरी (१९२६, शिशुपालवधटीका), चञ्चला (१९१९, मेघदूतटीका), सर्वार्थबोधिनी (१९१३, उत्तररामचरितस्य टीका), कुसुमप्रतिमा (१९१९, साहित्यदर्पणस्य टीका), मालविकाग्निमित्रस्य (१९१३) तथा च मालतीमाधवस्य (१९१४) टीका हरिदासेन टीकिताः।

२. हरिदासस्य श्रव्यकाव्यानि

क). रुक्मिणीहरणम्

महाभारतीयं ब्रह्मवैवर्तपुराणगतञ्च श्रीरुक्मिणीसंवादमवलम्ब्य हरिदास-सिद्धान्तवागीशेन षोडशसर्गात्मकं महाकाव्यं निरमायि। व्याकरण-काव्य-पुराणतीर्थ-साहित्य-विनोदश्रीहेमचन्द्रतर्कवागीशभट्टाचार्यप्रणीतया विचित्राख्यया टीकया तत्कृतेनान्वयेन वङ्गानुवादेन च सहितं महाकाव्यमिदं प्राकाशि १८८० तमे शकाब्दे।

तत्र प्रथमसर्गे रुक्मिण्या जन्मवृत्तान्तः, द्वितीये राजपुत्रकन्यानां विद्याग्रहणम्, तृतीये रुक्मिण्याः भ्रातू राज्याभिषेकम्, पञ्चमे कृष्णं प्रति रुक्म्याः विद्वेषभावः, षष्ठे च सर्गे कृष्णमुद्दिश्य रुक्मिण्याः प्रेमपत्रप्रेरणम्, सप्तमे कञ्चुक्याः विदर्भतः द्वारकां यावत् यात्रापथवर्णनम्, अष्टमे कृष्ण-कञ्चुक्योः कथोपकथनं, नवमे सर्गे विदर्भं प्रति रुक्मिणीहरणार्थं कृष्णस्य यात्रा, एकादशे सम्भोगशृङ्गारवर्णनम्, द्वादशे शिशुपालस्यागमनं तथा च रुक्मिण्या तस्याभ्यर्थनम्, त्रयोदशे कृष्णेन रुक्मिणीहरणम्, चतुर्दशे क्रुद्धया रुक्मिण्या कृष्णमुद्दिश्य युद्धयात्रावर्णनम्, पञ्चदशसर्गे प्राधान्येन रुक्मिण्या सह भयङ्करसम्पराये कृष्णस्य जयलाभः, अन्तिमे च सर्गे रुक्मिणीमादाय कृष्णस्य द्वारकायां प्रत्यावर्तनं तथा च वसुदेव-भीष्मकयोरुपस्थितौ कृष्ण-रुक्मिण्योर्विवाहश्चेति विषयाः काव्योचितभङ्ग्योपस्थाप्यन्ते कविनामुना।

कविनानेन काव्यचमत्कृतेः सम्पादनार्थं प्राचीनवृत्तान्तस्य परिवर्तनं नवीकरणञ्च विहितो। पुराणादिषु अतीव संक्षिप्तभावेन वर्णितं रुक्मिणी-श्रीकृष्णयोः प्रेमवृत्तं प्रकृते महाकाव्ये बहुभिः श्लोकैः वर्ण्यमानमालोच्यते। प्रसङ्गेऽस्मिन् रुक्मिण्याः कञ्चुकीमाध्यमेन प्रेमपत्रप्रेरणं विशेषतः समुल्लेखनीयम्। प्रेमपत्रमेवं रचितं विलोक्यते–

"व्रजितास्मि तत्र ससखी परकः परितो वृता प्रहरिभिरुद्यतायुधैः।
हर मां मनोहर हरे पराक्रमी कलयत् परान् खगपतिः मुखानिव"॥

काव्योपजीव्यस्य कथावस्तुनः विस्तृतये प्रेमपत्रस्यास्य भूमिका अनस्वीकार्या।

कविनात्र महाकाव्यवैशिष्ट्यसाधकानि नगरीसभामध्यात् समयादीनां वर्णनानि नवीनतया संयोजितानि। किञ्च, नरपतेः भीष्मकस्य स्वतनयं रुक्मिणं राज्ये अभिषिच्य सन्न्यासं गृहीत्वा मुनिभिः सह निवास इत्येतद्वृत्तमपि कविना अकारि।

महाकाव्यस्यास्य अङ्गिरसो वीरः। नायकः तावत् कृष्णो युद्धवीरः। विश्वनाथादिभिरुक्तानि महाकाव्यलक्षणान्यत्र रोचिष्णुतया परिदृश्यन्ते। सन्धा-प्रभात-मध्याह्न-नगर-समुद्र-युद्ध-सम्भोगशृङ्गारादीनां महाकाव्योचितभङ्ग्या वर्णनम् उपस्थापितमिह महाकाव्ये। काव्यास्यास्य पञ्चदशे सर्गे विविधानां यमकानां तथा चार्थालंकाराणां निदर्शनं परिप्राप्यते। महाकाव्यमिदं कवेः प्रतिभायाः सफलतमं निदर्शनमिति निश्चिततया शक्यवचमिति।

ख). वियोगवैभवम्

सर्गद्वयोपेतं खण्डकाव्यमेकम्। अत्र नायक-नायिकयोः विरहक्लिष्टावस्था समभिव्यञ्जिता। तत्र प्रथमसर्गो यामिनीवैभवनाम्ना कविनोक्तः परं द्वितीयसर्गस्य किमपि नाम न दत्तम्। उल्लेख्यं यन्मिवारप्रतापनाटकेन सह खण्डकाव्यमिदं १३५४ वङ्गाब्दे प्रचरद्रूपतां गतम्। तत्र प्रथमे सर्गे द्विषष्टिसंख्यकास्तथा द्वितीये त्रिषष्टिमिताः श्लोकाः कविना ग्रथिताः। मदनदेवो हि चिरकालीनविच्छेदस्य प्रतीक इति कृत्वा कामदेवस्य विच्छेदजनिता यन्त्रणामय्योऽभिव्यक्तयोऽत्रोपवर्णिताः सप्रसङ्गम्। अतोऽन्वर्थसंज्ञकमिदं खण्डकाव्यम्।

अत्र नायक-नायिकयोर्विच्छेदस्यापारैश्वर्यं वर्णितम्। युवक-युवत्योः उद्दामसम्भोगलीलोपवर्णितापि विप्रलम्भशृङ्गारमयं काव्यमेतत्। यतो वियोगोऽयं न वास्तविकः परमिह खण्डकाव्ये प्रेयस्या समं कामिनः प्रोद्दामशारीरिकसम्भोगावस्थायामेव रात्र्यवसाने तथा सूर्योदये पारस्परिकं विच्छेदजनिताया यन्त्रणादग्धाभिव्यक्तेः काल्पनिकी रूपरेखाङ्किता कविना।

काव्यस्यादिमे श्लोके कविना दक्षयज्ञावसरे सत्याः देहत्यागाद्विरहिनः ताण्डवनृत्यतः शितिकण्ठस्य शिवस्य स्तुतिर्विहिता। शिवोऽपि साक्षात्तया विच्छेदस्य प्रतिमूर्तिरूपः। तस्माद् हरिदासेनोदितम् –

"परमपुरुषरूपोऽप्यर्धनारीशरीरी
रहयतु विरहोऽसौ दुःसहो वश्चिराय"[६४४]॥

खण्डकाव्यस्यास्यापातदृष्ट्या नायकस्तावत् कामदेवो मदनः –

"स इह तु मम वर्ण्यो वर्णनीयाग्रगण्यो
न खलु महिमहीनं स्तौति कश्चिद्विपश्चित्"[६४५]॥

प्रथमे सर्गे मदनस्य यौवनोचितविलासाः कविनानवद्यभङ्ग्या वर्णिताः। यामिनीविलासाख्ये प्रथमे सर्गे विषयीकरोति कल्पयति च कल्पनालोकं मदनदेवस्य रात्रिकालीनलालावैचित्र्यं हरिदासः –

"त्वदधरमधुभाण्डं चुम्बितं नार्पितापि
दशति दशनमाला मे स्वयं किं करोमि?
स्वयमिह खलु कर्णं वंशवंशो निनादः
हरति च हरिणाङ्कः पङ्कजञ्चाक्षि लोके"[६४६]॥

रात्रौ नायक-नायिकयोः मिथः उद्दामयौवनविलासं कवयित्रा सम्भोगशृङ्गाररसेनार्द्रीकृत्योपस्थापितम् –

"विलुलितरसनान्ते चारुताम्बूलखण्डान्
चलननयनयुग्मे चञ्चले लोचने च।
पुलकितकुचकुम्भे साधु दत्त्वैव पाणिं
स्फुरितमधरविम्बं नायकोऽसौ निनंसे"[६४७]॥

हरिदासेन प्रायेणैव मालिनीछन्दोभिः तथा च प्रथमसर्गस्य अन्तिमे श्लोकद्वितये मन्दाक्रान्ताछन्दसा पति-पत्न्योर्यन्त्रणामयानि वृत्तानि वर्णितानीति कृत्वा मिथः विरहभावः प्रोद्दीप्तोऽभूत्।

कालिदासेन वियोगात्मकं विमूर्तभावमुपजीव्य मेघदूते यक्षस्य विरहो रोचिष्णुतया वर्णितस्तथैव अर्वाचीनकविना स्वकपोलकल्पितेन हरिदासेनापि विच्छेदस्यैश्वर्यं समवलम्ब्य सम्भोगशृङ्गारवर्णनच्छलेन विप्रलम्भशृङ्गारोऽङ्गिरसरूपेणोपवर्णितः।

[६४४] वियोगवैभवम् (१।१)।
[६४५] तत्रैव (१।६)।
[६४६] तत्रैव (१।२५)।
[६४७] तत्रैव (१।३३)।

प्रसादगुणच्छटया मालिनीछन्दसः प्रयोगाच्च काव्यस्य पदलालित्यं विवृद्धिं गतम्। दम्पत्योः शारीरिकसुखैश्वर्यं पुङ्खानुपुङ्खतया क्वचित् अतिशयोक्ति-श्लेष-अप्रस्तुतप्रशंसादिभिः क्वचिद्वा उपमा-रूपक-अर्थान्तरन्यासाद्यलंकारैः उद्भासितम्। काव्येऽस्मिन् ग्राम्यता-अश्लीलतादिदोषाणां सद्भावादपि काव्यरसो न व्याहन्यते। शब्दार्थालंकाराणां स्वच्छन्दोव्यवहारात् काव्यमिदं सहृदयेभ्यः आनन्दं जनयति।

ग). विद्यावित्तविवादम्

हरिदासेन विरचिते अध्यायद्वितीयात्मके 'विद्यावित्तविवाद'मिति अपरेस्मिन् खण्डकाव्ये द्व्यधिकशतं श्लोकाः विन्यस्ताः। अत्र विद्यादेव्याः सरस्वत्या सह वित्तदेव्याः लक्ष्म्याः विवादचित्रं काव्योचितशैल्या कविनोपायनीकृत्य १८७५ ईशवीयाब्दे प्राकाशि।

घ). सरला

पारिवारिकं सामाजिकञ्च वस्तु आधारीकृत्य पञ्चभिः परिच्छेदैर्विभक्तं सिद्धान्तवागीशस्य गद्यकाव्यं तावत् 'सरलेति'। भयङ्करझञ्झायां नद्यां नायिकायाः सरलायाः नावविपत्तिः, नायकेन तस्या उद्धारः, पित्रा सह मिलनं तथा चान्ते नायिक-नायिकयोः परिणयेन काव्यमिदं समाप्तिं गतम्। १८७५ ईशवीयाब्दे काव्यस्य प्रथमसंस्करणं प्रकाशितम्।

ङ). काव्यकौमुदी

हरिदासस्य भावयितृप्रतिभायाः निदर्शनरूपोऽपूर्वः सरलसूत्रवृत्त्यात्मकः अलंकारग्रन्थस्तावत् 'काव्यकौमुदी'। काव्यलक्षण-प्रयोजन-दृश्यश्रव्यात्मकभेद-ध्वनिलक्षण-ध्वनि-गुणीभूतव्यङ्ग्यात्मककाव्यभेद-शब्दशक्ति-रस-नायकनायिकाभेद-दोष-रीति-गुण-शब्दार्थालंकारादि-काव्यशास्त्रीयविषयाः सरलया मञ्जुलया च भाषया पर्यालोचिताः। ग्रन्थोऽयं पञ्चदशकलाभिर्विभक्तः। परमुल्लेख्यं यत् काव्यकौमुद्यां विश्वनाथकविराजकृतस्य साहित्यदर्पणग्रन्थस्य प्रभावो वरीवर्ति। ग्रन्थोऽयं १३६५ वङ्गाब्दे प्राकाशि कविनामुना।

३. हरिदाससिद्धान्तवागीशस्य नाट्यसाहित्यम्

पञ्चदशवर्शीयो हरिदासः कंसवधादिमौलिकग्रन्थप्रणयनेन लब्धदरोऽभवत्। कवेरस्य सुप्रसिद्धेषु नाटकेषु 'विराजसरोजिनी', 'मिवारप्रतापम्', 'शिवाजीचरितम्', 'वङ्गीयप्रतापम्', 'जानकीविक्रमञ्चे'ति सुप्रसिद्धानि।

हरिदासस्य प्रतिधमणि हिन्दुत्वाभिमानं प्ररोचकमथ च याथार्थ्यतया सञ्चारितं दृश्यन्ते यथा –

"हिन्दुरेव हि हिन्दूनां विकृतः कुरुते क्षतिम्।
मुद्गरीकृतलौहं हि लौहं दलति शाश्वतम्"[६४८]॥

एवं मिवारप्रतापस्य पञ्चमेऽङ्के – 'हिन्दुभिरेव हिन्दूनां हिंसया संवृत्तोऽयं सर्वनाशो भारतस्य।' तस्मात् स्वदेशप्रेम तस्य प्रतिनाटकं प्रतिध्वनितं वरीवर्ति।

क. मिवारप्रतापम्

मेवारप्रदेशस्य राज्ञः प्रतापसिंहस्य ऐतिहासिकवृत्तमुपजीव्य वीररसप्रधानं षडङ्कं 'मिवारप्रतापं' नाम नाटकं हरिदासेन १६४४ खृष्टाब्दे ग्रथितम्। तदनु कलिकातास्थे स्टार-रङ्गमञ्चे १६४५ खृष्टाब्दे प्रथममेव अस्याभिनयः समभूत्। राजपुतानां देशप्रेमोज्ज्वलं पराक्रमं नाट्यकृता ऐतिहासिकपरिप्रेक्षे समभिवर्णितम्। प्रत्यङ्कं नाटकस्य पृथङ् नामकरणं विहितम्। तत्र प्रथमाङ्कः 'प्रतिज्ञा', द्वितीयः 'कमलाकौशलम्', तृतीयः 'मिवारप्रयाणम्', चतुर्थः 'प्रतापपराजयः', पञ्चमो 'वनवासः' तथा च षष्ठाङ्को 'द्वात्रिंशद्दुर्गविजय'श्चेति नामभिः अभिधीयन्ते। प्रस्तावनायां सूत्रधारः संस्कृतभाषाया अमरत्वं समुद्घोषितवान् –

"वेदादि-शास्त्र-निचय-स्फुट-दिव्यमूर्तिः,
सा वाक् किमन्यवचनादमरा म्रियेत।
मध्याह्ने सूर्यकरणो हि यदि ब्रवीति
रात्रिः किलेयमिति हन्तु स एव मूढः"[६४९]॥ इति।

मेवारपतिः प्रतापसिंहः स्वदेशरक्षायै आकरवस्य सेनापतिं मानसिंहं सेलिमञ्च

[६४८]मिवारप्रतापम्, (३।१८)।
[६४९]तत्रैव (१।३)।

विरुध्य हलदिघाटयुद्धे अदमनीयविक्रमं प्रदर्श्यापि पराजितोऽभूत्। कथानुसारं मानसिंहो राणाप्रतापस्य गृहमागत्य भोजनार्थं च निवेदयति। परं नानुमतोऽयं प्रस्तावः प्रतापेन। नाटकस्यास्य नायकेन प्रतापेन राणाप्रतापस्य तिरस्कारजनितेन क्रोधाग्निना मानसिंहेन सपद्येव प्रतिज्ञातम् –

"यद्यमुष्य प्रतीकारं न कुर्य्यां वीर्य्यवानपि।
तदाम्बरं न यास्यामि यास्याम्यम्बरतां पुनः"[६५०]॥ इति।

अर्थात् मानसिंहकृतस्यापमानस्य प्रतिकारं न कुर्याच्चेत् कथमपि मिवारराज्यं न प्रवेष्टुमिति प्रतापस्य प्रतिज्ञया नाटकस्यास्य प्रथमाङ्कस्यारम्भः – 'त्वमपि यतस्व तावदस्मदुच्छेदाय, वयमपि यतिष्यामहे युस्मदुच्छेदेन चितोरोद्धाराय'। तस्मात् प्रथमाङ्कस्य नाम 'प्रतिज्ञे'ति। राणाप्रतापः प्रतिज्ञाञ्चक्रे – 'प्रयोजने जायमाने समरे प्राणानपि प्रदास्यामः', 'तृणशय्यामधिशय्य यामिनीं यापयिष्यामः', 'वेशविलासं परिछरिष्यामः'। मानसिंहस्य प्रस्थानादनन्तरं प्रतापेनानुमितं यद् आकबरस्याक्रमणमासन्नमेवास्ति। तदर्थं प्रतापेन सर्वे वीराः देशप्रेमसूचकवचोभिः सम्बोधिताः।

द्वितीयाङ्के सौन्दर्यप्रतिस्पर्धायां महिलासम्मेलनं वर्त्तते। सौन्दर्यप्रतिस्पर्धायां मुघलराज्यस्य सुन्दरीभ्यः पुरस्करान् वितरयिष्यन्ति। प्रतियोगितायां पृथ्वीराजस्य रूपवती तथा धीमती पत्नी कमला साम्राजोऽकबरस्याज्ञानुसारं समागता परं तस्या मनसि संशयो जातः आकबरस्य असदुद्देश्यं परिकल्पनञ्च अनुभूय। तदा कमला कथमपि स्वोद्भावितकौशलेन शस्त्रसाहाय्येन गृहं च परावर्तत।

तृतीयाङ्के मानसिंहेनाकबरो राणाप्रतापकृते अपमानविषये निवेदितः। तत्र सैन्यैः समं मानसिंहस्य तथा च सेलिमस्य मेवाराभियानं समुपवर्णितम्। प्रसङ्गतः मानसिंहस्य प्रतिज्ञात्रोल्लेखनीया –

"मिवारजयमग्रतः कमलमीरसंलुण्ठनम्।
प्रतापधृतिमानयं प्रसभमस्य दिल्लीपुरे॥
समं सुमलमानकैः सदसि भोजनं तस्य च।

---

[६५०]मिवारप्रतापम् (१।१५)।

क्रमेण करवान्यहं तव समेत्य साहायकम्"[६५१]॥

'प्रतापपराजया'ख्ये चतुर्थाङ्के हल्दीघाटस्थाने सञ्जातस्य संग्रामस्य उत्साहव्यञ्जकं वर्णनं विद्यते। अस्यैव गर्भाङ्के शक्तिसिंहस्य परामर्शेन तुरङ्गसाहाय्येन च प्रतापस्य कथमपि प्राणरक्षा वर्णिता। परम् अङ्कस्याङ्गत्वेन वर्णिताः नाट्यकृता युद्धे प्रतापस्य पराजयः, स्वामिभक्त्या झालपतेः आत्मत्यागः, प्रतापस्य पलायने तस्य उद्योगः, चैतकस्य मृत्युः, युद्धक्षेत्रात् प्रतापस्य पलायनवृत्तम्, प्रतापस्य मनोवेदना चेत्यादयः वृत्तान्ताः। प्रतापं प्रति शक्तसिंहस्य परामर्शेन अङ्कस्यास्य परिसमाप्तिः। चतुर्थाङ्कस्तावत् नाटकस्य सर्वापेक्षया दीर्घाङ्को वर्तते।

'वनवासाख्ये' पञ्चमेऽङ्के परिवारस्य परिजनैः सह पार्वत्याञ्चले राणाप्रतापः खाद्याभावात् सर्वं कष्टादिकं साहं साहं वनान्तरम् अटन् आसीत्। परं खाद्याभावात् क्षुधार्तकन्यायाः दुरवस्थां पश्यन् प्रतापः स्वमानं तृणीकृत्य आकबरं निकषा सन्धिप्रस्तावं प्रेषयामास।

षष्टेऽङ्के देवीदुर्गग्रहणस्य चर्चा वर्तते। पृथ्वीराजः प्रतापस्यानेनाचरणेन मर्माहतः सन् द्व्यर्थबोधकं पत्रमेकं विलिख्य प्रतापाय प्रेषितवान्। प्रतापः पत्रस्यार्थमवबुध्य उद्दीप्तः सन् सहसा मन्त्रिणां साहाय्येन द्वात्रिंशद्दुर्गाणि अधिचकार। प्रसङ्गतः उल्लेख्यं यत् आपातदृष्ट्या पत्रमिदं प्रतापस्यात्मसमर्पणद्योतकं परम् आकबरं विरुध्य प्रतिशोधग्रहणं हि पृथ्वीराजस्य मनसोऽभिप्रायः। तत्रापि यवनैः साकं तुमुलं युद्धं समभुत्। निर्वाहणे प्रताप एवाजयत्।

नृत्यगीतादेर्योजनं हरिदासस्य रोचकं संविधानं वर्तते। कालीपर्वताद् अधस्ताद् आगत्य भिल्लसैनिकाः गायन्ति –

"महु महु महुरं सीहु सीहु णिअरं पिउ पिउ चतुरं वीर।
लहु लहु चरणं बहु बहु करणं संहर जवनं धीर॥
करेहि जीवनपणं धरेहि नु पहरणं।
मारेहि जवनगणं पत्थर सम सरीर"[६५२]॥

---

[६५१]मिवारप्रतापम् (३।१०)।
[६५२]तत्रैव, प्रथमाङ्कः, पृ. – १५।

तृतीयाङ्के आकबरेण सम्राजः पदस्य विडम्बना, कमलया उपेक्षा, विविधधर्मानुयायिभिः विघ्नोत्पादनं, मनसि महती चिन्ता चेति प्रदर्श्यन्ते। अस्मिन्नेवाङ्के शक्तसिंहस्य एकोक्तिर्वर्त्तते। सोऽत्र मानसिंह-प्रतापयोः स्थितिमाकलयन् कांक्षति – "यदि वयमत्र संग्रामे विजयलक्ष्मी लप्स्यामहे तदावश्यमेव भारताद् यवनापसारणेन साम्राज्यमारोपयितुमेव यतिष्यामहे"।

विशेषत्वम् –

1. नाट्यकृदिह नाटके लोकोक्तिप्रयोगात् स्वव्यवहारिकज्ञानस्य परिचयं प्रादात्। तत्र काश्चिद् उल्लेख्या लोकोक्तयः –

क. 'दारिद्र्यम् नाम सर्वशक्तिनिदानम्'

ख. "यावतीह गृहिनो धनसम्पत्तावती ध्रुवममुष्यहि चिन्ता।
चिन्तयति विकले किल लोके शान्तिमन्नहि सुखं समुशैति"॥[६५३]

2. हरिदासेन भारतस्य स्वाधीनतायै या देशात्मबोधिका संगीतिः गीता, तदत्र प्रणिधानयोग्यम् –

"स्वस्वजीवनदानेन रक्षणीयैव जन्मभूः।
आदत्ते हि महद्वस्तु स्तोगत्यागेन बुद्धिमान्"[६५४]॥

भारतवर्षं हिन्दूनां स्थानमिति तेन स्पष्टतयाभाणि –

"हिन्दुस्थाने यवनवसतिर्नोचिता भारतेऽस्मिन्
नीहारौघस्थितिरिव शरद्व्योम्नि नक्षत्रदीप्तैः।
तस्मादस्मान्निजजनिजधिया यात मृयं स्वदेशान्
अश्रुस्रातः स्रवतु न खलु छिन्नभिन्नाच्छरीरति"[६५५]॥

3. नाट्यकृता केषुचित् स्थलेषु श्रवणोपयोगिशब्दानां सुप्रयोगः कृतः। तद्यथा – हुल-हुल्लिका-गुडुम-गुडूम-दुलप्रभृतयः।

4. नाटकमिदं बहुविचित्रेण रोचिष्णुतया च प्राकृतभाषाप्रयोगेन

[६५३]मिवारप्रतापम्, ३।१।
[६५४]तत्रैव, १।२४।
[६५५]तत्रैव, ६।१३।

हृदयमनोग्राहितामलभत।

5. आलंकारिकाणां युद्ध-वधादिनिर्देशमुपेक्ष्य मञ्चे तिर्यग्योनिसम्भूतस्याश्वस्य प्रवेशेन नाट्यकृत् स्वीयाभिनवत्वं प्रकटीचकार। नाटकेऽस्मिन् धीरोदात्तो नायकः प्रतापः विश्वनाथादिप्रोक्तैः[६५६] नायकगुणैः विभूषितः। नाटकमिदम् ऐतिहासिकवृत्तैः प्रपूरितम्। नान्दी-प्रस्तावनादिभिः नाटकलक्षणैः नाटकमिदं समृद्धम्। अत्र उद्घात्यकप्रस्तावना। वीररसः अस्य अङ्गी। इह नाटके विदूषक-नायिकयोः उल्लेखो नास्ति।

ख. शिवाजीचरितम्

प्रकृतदेशप्रेमिकत्वेन उपस्थाप्यमानं शिवाजीचरितमुपजीव्य दशाङ्कविशिष्टं महानाटकं 'शिवाजीचरितं' १६४५ खृष्टाब्दे विरचितम्। परमस्य प्रथमाभिनयः स्वाधीनतादिवस-यात्रावसरे समभुत्। सूत्रधारो ब्रवीति यत् 'भारतवासिनां हृदयेषु देशप्रेम-दीपनार्थमेव वयमभिनेतुमभिलषामः'। ऐतिहासिकवृत्तमुपजीव्य नाटकस्यास्य मुख्यचरित्रं तथा च वृत्तान्ता निर्मिताः। रचनेयं सर्वथा कालानुयोगिनी। तस्मान्नाट्यकृतोक्तं निवेदनांशे– "…प्रायेणैव यथायथमितिहासमनुसरता वृत्तान्तपरिवृत्तिमकुर्वता पात्रमात्रञ्च कल्पयता नाटकीयलक्षणादीनि च परिरक्षता नाटकमिदं मया निरमायि"। विशेषत उल्लेख्यं यत् प्रथमाङ्कः 'सङ्घसङ्घटनम्', द्वितीयः 'तोरणदुर्गाधिकारः', 'शाहनाथवन्दीकरण'मिति तृतीयाङ्कः, 'वन्दीविनिमया'ख्यः चतुर्थाङ्कः, पञ्चमः 'आफजलविजयः', 'पुण्यपत्तनविजय' इति षष्ठाङ्कः, सप्तमाङ्कः 'शिवानन्दवन्दीकरणम्', 'अपक्रमोपायनिर्णया'ख्यः अष्टमाङ्कः, 'विजयः' इति नवमाङ्कः तथा च अन्तिमाङ्कः 'शिवानन्दराज्याभिषेकः' इति। मिवारप्रतापमिव नाटकेऽस्मिन् प्रत्यङ्कं स्वतन्त्रनामभिर्निर्दिष्टमिति हरिदासस्य विशेषकृतित्वम्।

नाटकस्यास्य कथानुसारं प्रथमाङ्के शिवाजी गोविन्दादिसहपाठिभ्यो विबोधयितुमलं यत् 'गुरुजनाः शास्त्राण्यध्येतुमादिशन्ति मनश्च शस्त्रग्रहणाय समुत्कण्ठते। राज्यं यवनैरपहृतम्। शत्रूणां संख्या चान्यूना।'

तदा गोविन्दोऽवदत् –

"सम्पदि विपदि वालिशं छायेवानुवर्तिष्ये भवन्तम्।

[६५६]'नेता विनीतो मधुरस्त्यागी…' (दशरूपकम्, २।१)।

राजनि च त्वयि मन्त्री भवितास्मि कारायां च सहगामी"[६५७]॥

ततः शिवाजी ब्रवीति – 'सुखमयमपि हिन्दुस्थानमप्यद्य हिन्दोर्न खलु वसतियोग्यं भोग्यमेतत् पिशाचैः[६५८]।' अन्ततो गत्वा सर्वे शिवाजिनः सुहृदः स्वदेशप्रेम्ना उद्दीप्ताः सन्तः सङ्घवद्धा भवन्ति।

द्वितीयाङ्के तोरणदुर्गस्याध्यक्षः करीमवक्सो विलासीति विज्ञाय शिवाजी सैन्यैः समं साधुवेशं परिधाय तोरणदुर्गं गतस्तस्य मनोरञ्जनाय। अचिरेणैव सर्वे नर्तकाः युद्धवेशेन सज्जीभूय दुर्गाधिकारिणाम् आक्रमणञ्चक्रुः। तैः करीमवक्सो निगडितः। तोरणदुर्गश्च जितः शिवराजेन।

तृतीयाङ्के बीजापुरस्य नादिरनाम्नोऽधिपतेर्दुर्गोऽप्यधिकृतः शिवराजेन। पुत्रस्यापराधेन पिता शाहनाथो वन्दित्वं प्रापितः। नादिरेण आफजलनामकं सेनापतिमाहुय भाषितं यच्छिवाजीलुण्टको हन्तव्यः। आफजलः प्राह – 'चातुरीत एव चतुरं व्यापादयिष्यामि'।

चतुर्थाङ्के पूर्ववृत्तानां संक्षिप्तसूचना वर्त्तते। शिवाजी पितरं वन्दीदशातः उद्धर्तुं वीजापुरगतदुर्गाधिकारावसरे वन्दिप्राप्तान् विपक्षसैन्यान् मुमोचेति 'वन्दीविनिमय'स्तावत् चतुर्थाङ्कः।

पञ्चमेऽङ्के विजापुरस्य सेनापतिः आफजलखानः शिवाजीं हन्तुमना तस्य सान्निध्यं प्राप्तुकामः समुद्यतो बभुव। तथाहि अभिसन्धिना शिवराजस्य वामकुक्षौ छुरिकया प्रहर्तुमियेष, किन्तु चतुरः शिवाजी साक्षात्कारस्य प्रस्तावे दुरभिसन्धिमनुमाय व्याघ्रनखजालेन तस्यैवोदरं विदारितवान् इति कृत्वा आफजलं विरुध्य शिवाजेर्विजयो वर्णितः।

षष्ठेऽङ्के विष्कम्भकानुसारं नादिरशाहस्य शिवाजीदमनविषयकानि कुचक्राणि वर्ण्यन्ते। कस्मिंश्चिद् दिवसे भास्करनाम्ना शिवराजस्य कश्चन प्रियसहपाठी सहकारी सेनापतिश्च वैष्णवसाधुवेशं परिधाय सायस्ताखानसमीपं गत्वा स्खलिताक्षरैः प्राह – 'मम मातुः शवयात्रायानेनैव दुर्गमार्गेन भवितव्यम्'। भास्करस्य कथां विश्वास्य तेनापि

[६५७]शिवाजीचरितम्, १।१५।

[६५८]तत्रैव (१।१७)।

अनुमतिः प्रदत्ता। 'अचिरमेव कृत्रिमशवयात्रिणस्तत्राजग्मुः। ते सर्वेऽपि सायस्ताखानस्य सेनां विद्राव्य पुनादुर्गमधिकृतवन्तः'।

सप्तमेऽङ्के औरङ्गजेवः राजसभायां विराजमानोऽस्ति। तदा शिवाजी औरङ्गजेवस्य निमन्त्रणरक्षायै अम्बरराजेन जयसिंहेन सह तत्राविशत्। औरङ्गजेवस्य उपेक्षाभावेन असौ शिवाजी परं क्षुब्धो जातः। अपमानाहतः स गृहं प्रत्यागन्तुमियेष परं तं वन्दीकृत्य मुगलाधिपतिः कारागारे निक्षिप्तवान्।

ततः शिवराजः औरङ्गजेवं सूचयामास यदहं रुग्णोऽस्मि दानार्थञ्च कानिचिन्मिष्टान्नपात्राणि प्रेषणीयानि। शिवाजी फलमिष्टान्नादिपात्रे निलीय तस्मान्निर्गच्छतीति हेतोः अष्टमाङ्कः अपक्रमोपायनिर्णयनाम्ना हरिदासेन लिखितः। शिवाजिनः पलायनप्रयासं विज्ञाय औरङ्गजेवः घोषितवान् –

"यो धृत्वार्पयितुं तमर्हति जनस्तस्मै प्रदेया ध्रुवम्।
मुद्राः पञ्च सहस्रिका व्रज जवाद गृह्णातु वा हन्तु वा"[६५९]॥

नवमेऽङ्के मुघलपक्षीयं सेनानायकं मुर्दनसिंहं विरुध्य विजयं प्राप्य महाराष्ट्रस्य स्वाधीनशासकोऽभूद् शिवाजी। चान्ततो गत्वा औरङ्गजेवोऽपि शिवाजिनं राजरूपेणाङ्गीचकार। दशमेऽङ्के शिवराजस्य राज्याभिषेकानुष्ठानं वर्णितम्। ततः नायकः शिवाजी भरतवाक्यमुच्चारयतीति कृत्वा महानाटकमिदं समाप्तं जातम्।

विशेषत्वम्–

1. हरिदासेन नाटकारम्भे भूमिकायां यत् प्रतिज्ञातं तद्यथायथम् इह रूपके अनुपालितम् ऐतिहासिकवृत्तम्। ऐतिहासिकवृत्तानां कुत्रापि विकृतिः न साधिता नाट्यकृता। स्वदेशप्रेमोद्दीपका सूक्तयोऽनवद्यरीत्या विलिखिताः नाट्यकृता। दिङ्मात्रं तावत् – 'मनसो बलमेव वीरत्वम्', 'प्रयागे मूत्रितं येन गङ्गा तस्य वराटिका', 'विषमा पराधीनता पिशाची सर्वेषामेव प्रौरुषं ग्रसते' चेति।

2. कविना शिवाजीचरिते गीतानि समावेशितानि। प्रथमाङ्कस्यान्ते शिवानन्दं प्रदक्षिणीकृत्य नाटकीयसहचराणां बालगीतं वर्त्तते –

"बालको युवकः प्रौढो वृद्धः मनसा वचसा वपुषा शुद्धः।

[६५९]शिवाजीचरितम् (९।२३)।

भवतु त्वरितमेकतावहः देशोद्धारे मास्तु विरुद्धः॥
धर धर प्रहरणं चलं चलं महारणम्।
कुरु भारतोद्धरणं न भव कोऽपि विरुद्धः''॥

3. नाटके छायातत्त्वं परमोन्नतं वर्त्तते। सप्तमाङ्कस्य प्रारम्भे औरङ्गजेवस्य एकोक्त्या वर्णनमुपलभ्यते। स कथयति यद् धर्मस्य संवर्धनं जीवनस्य चरमलक्ष्यं वर्त्तते।

4. शिवाजीचरिते नाट्यकृता वीररसः अङ्गित्वेनोपस्थापितः। वास्तवोचितस्य युद्धपरिमण्डलस्य निर्माणाय हरिदासः परमः कृतित्वभाक्।

5. नाटकस्यास्य भाषा अभिनययोग्या तथा च स्वदेशचेतनया पूरिता। भारतवर्षस्योद्धाराय तथा च धर्मराज्यप्रतिष्ठायै प्रयत्नः नाटकस्य प्रत्यङ्कं विन्यस्तः। शिवाजिनोक्तम् – 'कुर्यामस्मिन् पुनरपि वयं धर्मराज्यप्रतिष्ठाम्'।

6. ऐतिहासिकवृत्तानि हरिदासस्य लेखनीस्पर्शेन प्राणवन्ति बभूवुः। भाव-भाषा-रचनाशैली-आलंकारिकरचनाचातुर्यैर्नाटकमिदं रसोत्तीर्णं जातम्।

ग. वङ्गीयप्रतापम्

हरिदासेन वर्तमानवङ्गदेशस्य यशोरस्थानस्य राज्ञः प्रतापादित्यस्य वीरत्वपूर्णां काहिनीमुपजीव्य अष्टाङ्कं 'वङ्गीयप्रताप'मिति इतिहासमनुसरतैव १६६७ खृष्टाब्दे निरमायि। इदं प्रथमं कवेर्गृहे नाम उनशियायाम् अभिनीतम्। वर्षत्रयादनन्तरं कलकत्तानगरे मिनर्वारङ्गालये नाटकमिदं द्विः, आसामे गौरीपुरे च सोल्लासतया उदयनसमितिद्वाराभिनीतम्।

नाटकस्य कथानुसारेण वङ्गीययुवा शङ्करचक्रवर्ती शेरखानवावस्य हिंस्रकर्मचारिभिः प्रपीडितानां जनकानां राक्षायै साहाय्यार्थं च प्रायतत। नवावस्य कोपभाजनं भूत्वा स दण्डभयाच्च आत्मानं परित्रातुकामः कानने पलायितवान्। तत्र तेन प्रतापादित्येन साकं सख्यं समासादितम्।

शङ्करस्य सविधे प्रतापेनापि स्वकीयविचाराः प्रकटीकृताः –

''विधर्म्यधीना वत भारतप्रजा नदीप्रवाहे पतिता लता यथा।
नैवोन्नतिं गच्छति निष्कलोद्यमा परानुगत्यं हि लघीयसां क्रिया''॥

उभौ मिलित्वा प्राणत्यागेनापि देशान्मुघलानां विताडयितुम् प्रतिज्ञां चक्रुः।

'विहङ्गनिपाता'ख्ये द्वितीयाङ्के यशोरराज्यस्य नरपतेर्विक्रमादित्यस्य पूर्वपरिचितस्य वैष्णवद्वयस्य गोविन्ददासस्य श्रीनिवासस्य च मिथः सम्मेलनमुपवर्णितम्। तत्र विक्रमादित्यस्य दुर्बलचरित्रं तथा च वसन्तरायस्य कुटिलता काहिनीमुखेन हरिदासेन उपस्थाप्येते। परं प्रतापादित्ये समासीत् विक्रमादित्य-वसन्तराययोरचला भक्तिः।

तृतीयाङ्कस्यारम्भे कार्यस्थलं शङ्करस्य गृहं वर्त्तते। नवावः सुरेन्द्रनाथनामकौ निजसेनापतिम् अपराधिनो शङ्करस्य पत्नीम् अपहर्तुं प्रेषयामास। शङ्करः सूर्यकान्तगेहस्य रक्षायै स्वभवने धर्मपत्नीं च निधाय पलायितवान्। सूर्यकान्तः सुरेन्द्रनाथं निवर्तयितुम् असकृत् प्रार्थयामास। किन्तु सुरेन्द्रनाथो नानुमेने तस्य वचनम्। ततः सूर्यकान्तस्तारस्वरेणेदं जगाद –

''सतीकुलशिरोमणिं द्विजवरस्य पत्नीं द्विजो
भवन्नपि समीहसे यवनभोगसम्पत्तये।
कदापि भविता न ते फलवतीयमाशालता
सवीय हविषः स्रुतिः पतति कुक्कुरास्ये किमु''[६६०]॥

एतत्समाकर्ण्यं सुरेन्द्रनाथः परमम् अकुध्यत्। तत्र तौ तुमुलमयुध्येताम्। सूर्यकान्तः पक्षधरैः सह वीरगतिं प्राप। सुरेन्द्रः शङ्करस्य पत्न्याः निकटं जगाम। सा शिवस्तुतिं कुर्वन्ती आसीत्। तस्मिन्नेव क्षणे शङ्करः प्रतापश्च तत्राजग्मतुः। ताभ्यां सुरेन्द्रो हतः। तस्मात् मुघलसैन्यानां सकाशात् शङ्करस्य पत्न्याः सुन्दर्य्याः मोचनं वर्णितम् इति हेतोरङ्कस्यास्याभिधानं 'कल्याणीपरित्राणम्'।

'राज्यलाभ'नामके चतुर्थाङ्के प्रतापादित्यस्य निखिलयशोरराज्यावाप्तिः वर्णिता। आकबरोऽपि प्रतापादित्यस्य शौर्यं प्रतापञ्च विज्ञाय तं यशोरनृपतित्वेन स्वीचकार।

'वङ्गेशविजय' इति पञ्चमेऽङ्के वङ्गनवाबो यशोरराज्यं लक्ष्यीकृत्य आक्रमणञ्चकार परं प्रतापः तं पराजित्य अशेषं वङ्गदेशमायत्तीकृतवान्।

षष्ठेऽङ्के विक्रमादित्येन राज्यस्य भूयान् भागः प्रतापाय परमवशिष्टो भागश्चानुजाय वसन्ताय समर्पितः। ततश्च नवराजधान्यां धूमघाटनामके स्थले

[६६०] वङ्गीयप्रतापम् (३।९)।

प्रजानामुपस्थितौ प्रतापस्य राज्याभिषेको वर्णितः साडम्बरम्। तथाहि अङ्कस्यास्य नाम 'प्रतापराज्याभिषेकः' यथार्थमिति मन्ये।

'दुर्जननिधन'मिति सप्तमाङ्के मानसिंहो यशोरराज्यस्याक्रमणञ्चकार। तदा मानसिंहपुत्रेण दुर्जनेन समं प्रतापपुत्रस्य उदयादित्यस्य युद्धेन दुर्जनो हतः। एकदा वसन्तरायः प्रतापं हन्तुं प्रायतत किन्तु परमकौशलेन प्रतापेन स वसन्त एव मृत्युपदं प्रापितः।

आकबरस्य मृत्योरनन्तरं जहाँगीरेण महती सेनावाहिनी यशोरराज्यं जेतुं प्रेषिता। बभूव सेनापतिः मानसिंहः। तस्मिन् तुमुले सम्पराये प्रथमं मानसिंहः पराजितोऽभवत्। प्रतापादित्यो विजयं प्राप्य अन्ते भरतवाक्यमुच्चारितवान्। तस्मादन्तिमाङ्कः 'प्रतापविजय'नाम्ना अभिहितः।

विश्लेषणम् –

1. नाटकस्य नायकः प्रतापः युद्धवीरः, देशप्रेमिकः तथा च स्वाधीनचेता। तस्य वीरत्वस्य तथा विजयस्य कथानिकामुपजीव्य हरिदासेन नाटकमिदं निरमायि। परं नाट्यकृता युद्धस्य तृतीये दिवसे मानसिंहेन प्रतापस्य विजयो वन्दित्वञ्च न वर्णितौ इत्यस्वाभाविकम्।

2. नाट्यकृता इह नाटके वीर-शृङ्गार-हास्यरसानां त्रिवेणीसंगमः संप्रयुक्तः। परं वीर एवाङ्गी। कल्याण्याः लावन्यं शृङ्गाररसस्य निदर्शनम् –

"वामेन केशमवधृत्य करेण पश्चात्।
दक्षेण कङ्कतिकया विजटीकरोति।
आस्फालितं कुचयुगं घनपीनतुङ्गं
यूनो युयुत्सव इवेत् सहोरसास्याः"॥ इति।

हास्यरसस्य दिङ्मात्रमुदाहरणं तावत् –

"नारिणां गुड़िका विखण्डितदलं दोक्ता च सक्ता पृथक्
नस्यं भूरि मनीषिणाञ्च चुरटं चञ्चद्विलासात्मनाम्।
हुक्का-गुड़्गुड़िकाल्वलाविलसनैः शेषान् समालम्बते

चक्रं दर्शयते च्युतं वितनुते मुक्तिं प्रदत्ते परम्"[६६१]॥

3. वङ्गीयप्रतापे साङ्गीतिकं मनोरञ्जनं स्थाने स्थाने सन्निविष्टमस्ति। प्रथमाङ्कस्यारम्भः शङ्करस्य संगीतेन भवति। द्वितीयाङ्के श्रीनिवासो नाम वैष्णवसाधुर्गायति –

'जीव, श्रीनरदेहो
निमेषे हि नाशमेति किं मानमहो।
गृहं त्यज वनं व्रज, हरिं भज किमिच्छसि हो।
नारीनरः प्रणश्वरः स्थिरतरः कोऽपि किमाहो॥'

तृतीयाङ्के विष्कम्भकस्यारम्भो धीवराणां प्राकृतगीतेन भवति –'अले आकासे वहइ वा अ, भासाइ मेहो दीसइ भङ्गओ' इत्यादिकम्।

4. सर्वाधिकं महत्त्वपूर्णं ज्ञायातत्त्वं कल्याणीचित्रमाधारीकृत्य विनिवेशितं कविना।

5. सूत्रधारेण नाटकस्यास्य प्रस्तावनायां सूचितं यत् सामाजिकानां देशभक्ति-रस-परिप्लुत-सुन्दर-प्रबन्धाभिनयार्थम् आदेशोऽस्ति।

6. नाट्यतात्त्विकदिशा वङ्गीयप्रतापमुच्चकोटिकं वर्तते। अत्र विश्वनाथादिप्रोक्तानां नाटकतत्त्वानां साधु सन्निवेशो विहितो नाट्यकृता।

7. वङ्गीयप्रतापमिति नाटकं छायातत्त्वैः पूरितम्। रङ्गपीठे व्याघ्रः शरेण विद्ध इति कृत्वा शरनिक्षेपस्याभिनयः छायातत्त्वस्य सूचकम्। अत्र मानवो व्याघ्रोऽभवत्। पुनः पञ्चमाङ्के नवावस्य कल्याणीसम्बलितञ्चित्रमादाय कथोपकथनं छायातत्त्वस्य निदर्शनम्।

घ. विराजसरोजिनी

'विराजसरोजिनी'ति नाटिकाया रचनाकालः १९०० ई० वर्षं मन्यते। कवेराचार्यस्य आनन्दचन्द्रविद्यारत्नस्याग्रहेण नाटिकाया अभिनयोऽभूत्।

मालवदेशस्य अधिपतिर्हरिदश्वो वाराणसीवासिन्याः सरोजिनीनामिकाया कस्याश्चित् कुमार्याः प्रेमपाशेन आबद्ध इति कथा नाटिकाया विषयमूलम्। स भित्तौ

[६६१] वङ्गीयप्रतापम् (३।२३)।

आत्मानं सङ्गोप्य प्रेयसीं पश्यन् वर्णयति –

"इममेव युवा नवाङ्गना ललितालापरसं पिपासति।
युवकात्मनि यस्य सन्निधौ नवपीयूषरसोऽपि नीरसः"[६६२]॥

एषा राजकन्या सरोजिनी ललनाललामभूतेति। अत्रान्तरे पुरुषाभ्यां द्वाभ्यां सरोजिनीं पत्नीत्वेन प्राप्तुम् इष्यते इति विज्ञाय नायको हरिदश्वः चिन्तितो जातः। एकदा नायिकां चित्रलेखाम् आकाशमार्गेण मालवं प्रेरयित्वा नायकं च तत्सकाशमानेतुमादिदेश। तत्र समुपस्थित्य तस्य मन्त्रपाठेन सरोजिनी निद्रां गतेति दृष्ट्वा नायिकाविषयकं प्रेमालापं कुर्वन् हरिदश्वः।

द्वितीयाङ्के सरोजिनी नायकस्य कक्षे दिव्यशक्त्या समुपस्थिता सती नायकः केवलस्तां द्रष्टुमलम्, नान्ये। महादेव्यां तत्र समागतायां सरोजिनी प्रस्थानञ्चक्रे। तया नायकः प्रचोदितः यत् तस्मिन् सरोजिनी स्निह्यति स्म। परिशेषे महादेवी नायकस्य इतरां प्रेमिकां प्रति आसक्तिं समर्थितवती। तदा नायकः तस्यै विबोधयन्नाह –

"प्रथमा त्वयि प्रियतमे प्रियता न हि सा विनंक्षतीति परेऽपि गता।
अपरं तरुं स्वशिरसाश्रयते व्रततिर्न तु त्यजति मूलमपि"[६६३]॥

तृतीयाङ्के विदूषकमाध्यमेन ज्ञायते यत् हरिदश्वेन सह सरोजिनी परिणयसूत्रेण आबद्धा भवतु इति राज्ञ्याः नाभिप्रायः। अत्रान्तरे आसीत् सुबाहुनामको दानवः तां बलाद् अपहर्त्तुकामः। सरोजिनी दानवाय विबोधयितुं प्रायतत यत् हरिदश्वाय मृत्युमपि आत्मीकर्तुं नास्ति कापि कुण्ठा तस्याः – 'त्वदर्थं जातोऽस्मि प्रणयिनि निहीनेन्द्रिय इव'।

ततः हरिदश्वस्य सेनापतिना वीरसिंहेन सह सुबाहोः भीषणः सम्परायः प्रारब्धः। निर्वहणे राक्षसो हतः। चतुर्थाङ्कतो ज्ञायते यत् सरोजिन्यै राजा राज्यकार्यं प्रति वीतरागोऽभूत्। मानसिकं स्थैर्य्यं तस्य अपगतम्। सर्वाः रमणीः स सरोजिनीभ्रमेण आह्वयति। विदूषको राज्ञः इमामवस्थां दृष्ट्वा मर्माहतो दृश्यते। विदूषकस्य साहाय्येन पश्चात्तयोः उद्वाहेन सर्वथा सम्प्रीतिरजायत। कविना लोकरञ्जनार्थं नृत्यसङ्गीतयोः आद्यन्तनिर्वाहो विहितः।

---

[६६२]विराजसरोजिनी (१।१४)।
[६६३]तत्रैव (२।३१)।

नाटिकायाश्चतुर्थोऽङ्को कालिदासस्य विक्रमोर्वशीयस्य चतुर्थाङ्केन प्रभावभावितः इति मन्येते। हरिदश्वो नायिकाया वियोगे कथयति –

"द्वितयचपलभृङ्गप्रान्तसम्पीयमाना
सरलमृदुशृगालद्वन्द्वसंश्रीयमाणा।
अनधिकविकचाभ्यां सङ्गता कोरकाभ्याम्
पतदुदकसरोजा नान्यरूपा स्थलेऽपि"[६६४]॥

नाटिकाया अस्या अन्यद् अपरं वैशिष्ट्यं तावत् सूक्तिव्यवहारः। दिङ्मात्रमुदाहरणं यथा– 'दीननाथस्य दर्शनं विना न भवति अरविन्दस्य विकाशः', 'न खलु वारिप्रवाहः तीरमेकतरमेव प्लावयते' चेति। स्त्रीणां विषये हरिदासस्य वक्तव्यं[६६५] स्पष्टमत्र प्रतिभाति, तथैव तदानीं दरिद्रपण्डितानां परिस्थितिः कीदृशी शोचनीया आसीदिति। अर्थात् हरिदासस्य रूपकेषु कलाकैवल्यवादो यथालक्षि तथैव वास्तववादस्य प्राधान्यम्।

हरिदासेन लोकरञ्जनार्थं भूयो भूयः नृत्य-गीतीनां व्यवहारः कृतः। प्रस्तावनायां नटी नृत्यं संगीतञ्च कुर्वन्ती रङ्गपीठम् अवतीर्णा। आलंकारिकदृष्ट्वा प्राकृतभाषां परिवर्त्य नारीचरित्रेण संस्कृतगिरा गीतं परिवेशितं नाट्यकृता –

"चन्द्रचूड! शान्ति कर! कुरु करुणाम्।
मालती यूथी विकासिनी याति यातनाम्।
अतीत कलिकादशाम् उदिततरुणरसां
विनाह लमति विरसां पश्य मलिनाम्।
शोषयति समीरणः तापयति विरोचनः
दिवसे, निशि च पुनः याति मुद्रणाम्"[६६६]॥

द्वितीयाङ्कस्य गर्भाङ्के नाट्यनिर्देशो दृश्यते- ततः प्रविशति गगनादवतरन्ती चित्रलेखा। गर्भाङ्कस्य संयोजनं नाटिकायामस्यां दृश्यस्य समतुल्यमिति प्रतीयते। द्वितीयाङ्कस्य गर्भाङ्के नायकस्य स्वगतोक्तयः अर्वाचीनत्वं प्रकटीकुर्वन्ति।

---

[६६४]विराजसरोजिनी (४।२४)।
[६६५]'सरले कुटिलाचारा सुलभे दुर्लभा पुनः।
मृदुले कठिनी नित्यमपमाने च मानिनी'॥ (आ.स.सा.रू., पृ. – ७४)।
[६६६]विराजसरोजिनी, पृ. – ५।

४. विश्वेश्वरविद्याभूषणस्य नाट्यसाहित्यम्

०. भूमिका

पण्डितमूर्धन्यस्य ऋषिकल्पस्य विश्वेश्वरविद्याभूषणस्य जन्माभवत् पश्चिमवङ्गस्य चव्विशपरगणाजिल्लान्तःपातिनि दत्तपुकुरस्थे ऋषिधाम्नि ख्रीष्ट्रीये १९०३तमे वर्षे सेप्टेम्बरमासि। तस्य पिता सङ्गीत-नाटकयोः रसबोद्धा पण्डितप्रवरश्च कृष्णकान्तकृतिरत्नो महामहोपाध्यायो बभूव। पितामहः कालीकिङ्करस्मृतिभूषणाचार्योऽपि आसीत् संस्कृतसाहित्यादिशास्त्रे प्राज्ञः। बभूव कवेर्माता कुसुमकामिनीदेवी संस्कृतशास्त्रेषु पारदर्शिनी।

विश्वेश्वरविद्याभूषणः संस्कृतमहाविद्यालयस्याध्यापकरूपेण दीर्घकालम् अध्यपयामास। शताधिकवत्सरान् यावत् कवेरस्य परिजना अध्यात्मचर्चायां ससम्मानञ्च देशकल्याणे सारस्वतकर्मणि चात्मानं निवेदितवन्तः। स्वप्रयत्नेन निःसन्दिग्धभावेन संस्कृतस्य तथा वङ्गसाहित्यस्य समृद्धौ कृतभूरिपरिश्रमः प्राचार्यः विश्वेश्वरः सर्वोच्चस्थानमवाप। तस्मिन् वर्तते सहजा सारस्वतकारयितृप्रतिभा। शक्त्यानया तेन ग्रथितानि बहूनि नाटकानि। तेन 'वाल्मीकिसंवर्धने' नाटके स्वरचितानां ग्रन्थानां नामान्युल्लिखितानि। तेषां नामग्राहमुल्लेखः क्रियते –

१) चाणक्यविजयम्[६६७]
२) उत्तरकुरुक्षेत्रम्[६६८]
३) दस्युरत्नाकरम्[६६९]
४) भरतमेलनम्[६७०]
५) वाल्मीकि-सम्बर्द्धनम्[६७१]

[६६७]प्रणवपारिजातः (१९६६ शकाब्दः)।
[६६८]तत्रैव (१९६८)।
[६६९]मञ्जूषा (१९५७-१९५८)।
[६७०]तत्रैव
[६७१]रूपकमञ्जरी (१९६६)।

६) विष्णु-माया
७) उमातपस्विनी
८) द्वारावती
९) राजर्षिभारतम् (नाटकम्)
१०) प्रबुद्धहिमाचलम् (१९६९)

तस्य द्वे खण्डकाव्ये तावत् 'काव्यकुसुमाञ्जलिः' तथा च 'गङ्गासुरतरङ्गिनी' चेति। अनेन 'मणिमालिके'ति कथापि व्यरचि।

कविशेखरस्य विश्वेश्वरविद्याभूषणस्य प्रबन्धाः दिल्लीस्थसंस्कृतरत्नाकर-संस्कृतप्रतिभा-संस्कृतसाहित्यपरिषत्-प्रणवपारिजात-उज्जीवन-वसुमती-देवयान-गायत्री-आर्यदर्पण-संविदादिपत्रिकासु प्रकाशमानाः दरीदृश्यन्ते। एतेन तस्य भावयितृप्रतिभाया अपि निदर्शनमुपलभ्यते। अर्थात् विश्वेश्वरः समभूत् कारयितृ-भावयितृप्रतिभयोर्विरलाधारः। तस्य काव्यनाटकानामुपजीव्यं वस्तु समासेनालोच्यते –

क). चाणक्यविजयम्

विश्वेश्वरविद्याभूषणेन विरचितम् ऐतिहासिकवृत्तान्तमुपजीव्य राजनीतिमूलकं सप्ताङ्कविशिष्टं नाटकं तावत् 'चाणक्यविजयम्'। १९६६ खृष्टाब्दे प्रणवपारिजाताख्यायां पत्रिकायां प्रथमं प्रचरद्रूपतामितं नाटकमिदम्।

नाट्यस्यास्य मुख्यं प्रतिपाद्यं तावत् ब्राह्मण्यतेजस्तथा क्षात्रबलश्चत्यनयोश्च समानुपातिकसंमिश्रणेन प्रपञ्चेऽस्मिन् धर्मराज्यप्रतिष्ठापनम्। पुनश्च कल्याणयज्ञस्यास्य ऋत्विक् खलु चाणक्यः। 'चाणक्ये तिष्टति नास्ति भयकारणमबलानाम्'[६७२], 'न हि अकारणं किमपि करोति कौटिल्यः'[६७३] चेत्यादिभिरुक्तिभिः चाणक्यस्य चारित्रिकदृढत्वं प्रकाश्यते।

मुरापुत्रस्य चन्द्रगुप्तस्य खुल्लतातो भ्राता राजानन्दः सन्देहवशाद् राजरोषेण च नगराद्बहिष्कृतः। चन्द्रगुप्तेन कथितम् – राजपुत्रत्वादहं स्वकीयं भागं प्राप्तुमिच्छामीति। तदा नन्देनोदितम् – 'त्वं दासीपुत्रोऽसि। अतस्तव कुतो भागः?' अनन्तरं चन्द्रगुप्तो

[६७२]चाणक्यविजयम्, पृ. – ५०।
[६७३]तत्रैव, पृ. – २७।

दोषभाग् इति हेतोः स दण्डनीय इति पार्षदैर्घोषितम्। नन्दस्यादेशाच्चन्द्रगुप्तेन सह माता मुरापि कारागारे निक्षिप्ताभूत्। एकस्मिन् दिने रक्षिषु सुप्तेषु मुरा चन्द्रगुप्तम् अमिलत्। तदा चाणक्यस्य बालिका शिष्या गुप्तमार्गेण कारागारं प्रविवेश। ते द्वेऽपि कारागृहाद्बहिः तेनैव गुप्तमार्गेण चन्द्रगुप्तं समानीतवत्यौ। तृतीयाङ्के चन्द्रगुप्तः कथयति – 'हृतराज्यं प्राप्तुमिच्छामि'। चाणक्यस्तस्य साहाय्यं कर्तुं प्रतिज्ञाञ्चक्रे। नन्दस्य पितृश्राद्धे आमन्त्रितश्चाणक्यो नन्देनापमानितः सन् प्रतिज्ञातवान् –

"मोचयामि शिखां चेमां ज्वलन्तीं ब्रह्मतजेसा।
सवंशे त्वयि संनष्टे ग्रन्थिष्यामि पुनश्च ताम्"[६७४]॥

चतुर्थेऽङ्के पल्लीभवनस्थितश्चन्द्रगुप्तः कुसुमपुरमभिषेणयितुमुपक्रमते। चाणक्यस्य बालिका शिष्या परिव्राजकरूपं परिगृह्य चन्द्रगुप्तेन सह मिलित्वा तस्मै आक्रमणयोजनारूपं पत्रं प्रायच्छत्। युद्धाय चन्द्रगुप्तस्य भटाः सज्जिताः। पूर्णिमाया रात्रौ यदा नागरिका कौमुदीमहोत्सवे प्रमत्ता भवेयुः तदा चन्द्रगुप्तेन आक्रमिष्यता सह चाणक्यस्य साक्षात्कारोऽभूत्।

पञ्चमाङ्के दृश्यन्ते उत्सवेऽस्मिन् राजा, परिचारिकाः सुहृदश्च सर्वे नितराम् आनन्दिताः। राज्ञी वीणां वादयित्वा राज्ञां परितोषं विदधाति। तेन राज्ञीं परितो सानन्दं नरीनृत्यते विदुषकस्य चित्तम्।

ततश्चन्द्रगुप्तः ससैन्यं तत्र समागत्य चाणक्याय सादरं स्वगतमाशंसनं व्याजहार। तदनु छद्मवेशिनी शिष्या सैन्यबलवृत्तान्तं राजभवनस्य गुप्तपथं पूर्णतया विजानाति स्म। सा नन्दस्य सैन्यानां सर्वं परिकल्पनाजातं सम्यक्तया वेत्ति। तदा चाणक्यस्यादेशानुसारं चन्द्रगुप्तपक्षीयैः सैन्यैः कुसुमपुरम् आक्रान्तम्। भयङ्करयुद्धेन चन्द्रगुप्तो विजयी अभवत्। चाणक्येन चन्द्रगुप्ताय राजनीतिगता उपदेशाः प्रदत्ताः। चाणक्यचरित्रं सम्पूर्णरूपेण राजनैतिकमिति। नन्दराजधान्यां स्त्रियः प्रति चाणक्यस्याभया वाणी षष्ठाङ्के परिलक्ष्यते– "यदि कोऽप्यशिष्टमाचरति मातृजनेषु तदा शूलेन स बध्यो भवेत्"[६७५]। तदनन्तरं चाणक्यो मदनाख्यं विदूषकं प्रति पुनश्च ब्रूते –

[६७४]चाणक्यविजयम् (प्रथमाङ्कस्य तृतीयदृश्यम्), पृ. – ३४।
[६७५]तत्रैव (पञ्चमाङ्कस्य तृतीयदृश्यम्), पृ. – ५०।

"कौटिल्ये जीवति शासति च वसुधां चन्द्रगुप्तेऽत्र मौर्ये।
न कोऽप्याचरेदविनयं ब्राह्मणेषु नारीजनेषु च"[६७६]॥

सप्तमाङ्के चाणक्यो नन्दपक्षीयं मन्त्रिणं गुणसिन्धुं स्वपक्षमानिनाय। अन्ते राज्ञा चन्द्रगुप्तेन चाणक्यचरणयोः स्वमुकुटं न्यस्तम्। स्वप्रतिज्ञानुसारं ततश्चाणक्यः स्वशिखां बन्धाति –

"धर्मराज्यं प्रतिष्ठाप्य भारते श्रीगुणान्वितम्।
पूर्णव्रतोऽस्मि सानन्दं यास्यामि तपसे वनम्"[६७७]॥

चाणक्यः शिष्यायै बालिकायै प्रत्युपदिदेश – 'खण्डच्छिन्नविक्षिप्तं भारतवर्षमैक्यं प्रापय' इति।

नान्दीश्लोके भारतमातुः उच्चकोटिकं वन्दनं, प्रस्तावनायां सूत्रधार-पारिपार्श्विकयोः कथोपकथनेन च संस्कृतस्योच्चप्रशंसनं संश्रूयेते। प्रथमाङ्के गायन्त्याः बालिकायाः चाणक्यगृहे समागमनं तथा चान्यत्र सङ्गीतस्य व्यवहारः, द्वितीयाङ्के राज्ञ्याः विलासवत्याः वीणावादनञ्च विशेषेणोल्लेखार्हाः। विश्वेश्वरेणात्र चाणक्यं विहायापि नन्दपक्षीयस्य मन्त्रिणः गुणसिन्धोः, चन्द्रगुप्तस्य, चन्द्रगुप्तस्य शूद्रमातुः मुरायास्तथा च चाणक्यशिष्यस्य कौण्डिन्यस्य चरित्रचित्रणे स्वदाक्ष्यं प्रकटीकृतम्। नाटकेऽस्मिन् स्वगतोक्तीनां प्रतिस्थानं यथावद् व्यवहारस्तथा च वर्णनायाः सौन्दर्यं कलात्मकं प्रसङ्गोचितञ्च नाटकस्य अलौकिकत्वे मानम्। चाणक्यविजयम् इति नाटके नान्दी-प्रस्तावना-भरतवाक्यानि मनोमुग्धकराणि। नाटके वर्णिताः कौटिल्यस्य अर्थशास्त्रीयोपदेशाः सत्यमेव राजनैतिकदृष्ट्या मूल्यवन्तः।

विश्वनाथादिभिरुक्तानि नाटकवैशिष्ट्यानि यथार्थरूपेणात्र परिपालितानि। नाटकं सप्तमांकविशिष्टं तथा च प्रत्येकमङ्कः पुनः दृश्यैर्विभक्तः। चाणक्यचन्द्रगुप्तयोः साक्षात्कारः छायातत्त्वानुसारीति। सुर-वृत्त-सङ्गीतादिसंयोगान्नाटके गीतिधर्मितापि संलक्ष्यते। प्रथमांकस्य प्रथमे दृश्ये बालिकायाः संगीतम् उल्लेखार्हम् –

"मनोमन्दिरे विराज से मनोहर

[६७६]चाणक्यविजयम् (पञ्चमाङ्कस्य द्वितीयदृश्यम्), पृ. – ५७।
[६७७]तत्रैव, पृ. – ६७।

प्राणदैवत विश्वदेव दुःखहर।
हे मंगलमय,
याचे ते पुण्यप्रेम, अस्त जय"[६७८]॥

नाटकस्यापरमेकं वैशिष्ट्यं यदसंस्कृतज्ञा अपि श्लोकार्थाननायासेन बोद्धुमलम्। नाटकेऽस्मिन् प्रायः सर्वत्रैव सरलया भाषया गेयधर्मिणः लघुसंलापाः नयनयोरापतन्ति। तस्मात् ऋताचट्टोपाध्यायेनागादि – 'So far the style is concerned, we find the style is extraordinarily simple. It combines simplicity with a fine poetic quality'.[६७९]

ख). उत्तरकुरुक्षेत्रम्

विश्वेश्वरविद्याभूषणेन विरचितं पञ्चाङ्कविशिष्टं नाटकं तावद् 'उत्तरकुरुक्षेत्रम्'। १९६८ खृष्टाब्दे ज्येष्ठपुत्रस्य ध्यानेशनारायणचक्रवर्तिनः सहयोगितया ऋषिधाम्नि प्रकाशितमिदं नाटकम्। महाभारतीयं पौराणिककथानकमाहृत्य पाण्डवानां कुरुक्षेत्रयुद्धे विजयादनन्तरं तैः श्रीकृष्णस्य जीवनस्य शिष्टदृश्यवर्णनञ्चेत्यादिवृत्तैर्नाटकमिदं सम्पूर्णम् ऋद्धञ्चेति। नाट्यमिदम् अन्वर्थसंज्ञकम्। तस्मादुक्तम् –

"उत्तरमिति शब्दाद्यं कुरुक्षेत्रपदान्वयम्।
इदं हि नाटकं नाम चक्रे विश्वेश्वरो द्विजः"[६८०]॥

प्रथमाङ्कस्य प्रथमे दृश्ये कुरुक्षेत्रे विषादाच्छन्नाय अर्जुनाय श्रीकृष्णः सदुपदेशान् प्रददौ – क्षत्रियोचितो धर्म एवावश्यमेव परिपालनीयः। युधिष्ठिरस्य वानप्रस्थगमनेच्छात्र क्रोडीकृता। द्वितीयाङ्कस्य तृतीये दृश्ये श्रीकृष्णस्य विरहयन्त्रणा, द्वारकायाः श्रीहीनत्वं शून्यत्वञ्च रचिष्णुतया वास्तवोचितभङ्ग्या चोपवर्णितानि।

कुरुक्षेत्रसम्पराये सर्वेष्वात्मीयेषु निहतेषु फाल्गुनो दुःखेन संभिन्नोऽभूत्। श्रीकृष्णमते, धर्मयुद्धोऽयं क्षत्रियाणां श्रयसे। युधिष्ठिरः वानप्रस्थं जिघृक्षति स्म परं यादवानाम् आह्वनात् कृष्णः द्वारकां जिगमिषति। 'धर्मो वो रक्षतु' इत्युक्त्वा स

[६७८]चाणक्यविजयम् (प्रथमदृश्यम्), पृ. – ६।
[६७९]S.L. (20th), P.– 76.
[६८०]उत्तरकुरुक्षेत्रम् (प्रस्तावना), पृ. – २।

द्वारकामुवास। हस्तिनापुरे शतपुत्राणां मृत्युकारणाद् धृतराष्ट्रो विषन्नवदनेनास्थित इति दृश्यते। गान्धारी-युधिष्ठिरादयः सम्बन्धिनः सर्वे धृतराष्ट्रेण सह मिलितवन्तस्तत्र। तदा तेषां समक्षं युधिष्ठिरः स्वीयां वानप्रस्थगमनेच्छां स्पष्टतया प्रकटीचकार। चतुर्थाङ्के दधि-मोदकविक्रेत्र्योः हास्यपरिहासात्मकं दृश्यं मनोरञ्जकम्।

कुन्ती वानप्रस्थग्रहणात्पूर्वम् इदानीं गार्हस्थ्यभारं द्रौपद्यै समर्पयितुम् इयेष परं गान्धारी तां वारितवती। कुन्त्या उक्तं तदा – 'सम्प्रति भवत्या सार्धं श्रेयः साधयिष्यामि' इति।

रुक्मिणीं सत्यभामाञ्च परितः कृष्णोऽब्रवीत् यत् प्रभासक्षेत्रं स जिगमिष्यति अधर्माचरणान्मिथः कलहायमानानां यदुवंशीयानां ध्वंसरोधाय।

नारदस्तत्र समागतः। रुक्मिणी-सत्यभामाभ्याम् आतिथ्यग्रहणात् परं नारदो मदिरापानात् प्रमत्तं नारीवेशधारिणं साम्बं ददर्श। तदा यादवैर्नारदः पृष्टः – 'इयं स्त्री पुत्रं सेविष्यते उताहो कन्याम्?' नारदस्तेषाम् असाम्प्रतम् आचरणं दृष्ट्वा जगाद – 'एको मुसल उत्पत्स्यते येन युस्माकं सर्वेषां यादवानां नाशो भविता'।

द्वारकामागत्य दारुकोऽर्जुनमब्रवीत् – 'भगवता भवान् मृतयादवानामन्त्येष्टि-संस्काराय समादिष्टः। अवशिष्टानां नारीणां बालकानाञ्च योग्यस्थाने निवेशनायापि भवानादिष्टः'।

अथ द्वारकाम् आगत्य दारुको युधिष्ठिराय विनिवेदितवान् – 'कृष्णेनेहलोकलीला संवृत्ता। द्वारकाया यादवा विनष्टाः। इदं सर्वं गान्धार्याः शापात् संवृत्तम्'। मार्गे यादवस्य स्त्रियः दस्युभिः लुण्ठिताः। युधिष्ठिरो यादवानां कृते उदकदानब्राह्मणभोजनादिकं सुकृतं सम्पाद्य परीक्षिन्नामानं राजानं राज्ये अभिषिक्तवान्।

पञ्चमाङ्के मृगयार्थम् अटन् परीक्षित् वनलक्ष्मीं ददर्श। तदनन्तरम् अनुचरान् मृगयन् स परीक्षित् अज्ञातवशाद् ऋषेः पितुः शमीकस्य कण्ठे मृतसर्पं प्रक्षिप्य तत्पुत्रेणाभिशप्तो भूत्वा सप्ताहमध्ये सर्पदष्टः सन् मृत्युशापमर्जितवान्। ततः स गङ्गातटे शुकदेवमुखाद्भागवतकथां शुश्राव। सप्तमेऽहनि कश्चिद् ब्राह्मणः पुष्पफलादिपूर्णं भोजनं दधानः तत्सर्वं वस्तु राज्ञे उपायनीकृतवान्। तस्मात् पुष्पभाजनान्निष्क्रम्य सर्पः परीक्षिन्नामानं नृपं दष्टवान्। तेन स दिवं गतः। तदा जनमेजयो नागयज्ञमनुष्ठाप्य तस्माद्

घोरकर्मणश्चिराय विरमति स्म। अन्ततो गत्वा जनमेजयो वरं प्रार्थयते –

"प्रवर्त्ततां पुण्यतपस्तपस्विनां
निरङ्कुशं शान्तिमयं भवेद् गृहम्।
जनाः कृतार्थाः प्रभवन्तु धर्मगो
रत्नेन पूर्णा धरणी सदास्तु नः"[६८१]॥

साहित्यदर्पणकृतो विश्वनाथस्य मतानुसारम् 'उत्तरकुरुक्षेत्रम्' यथार्थतया नाटकपदवाच्यम्। अत्र दिव्यो नायकः श्रीकृष्णः, महाभारतमस्योत्सभूतम्। किञ्च, ऐतिहासिकप्रेक्षापटे महाभारतयुद्धानन्तरं दुःस्थितेश्चित्रणम् अत्र परिलसितम्। भावभाषाछन्दसां सुरमूर्च्छनया नाटकमिदं हृदयग्राहीति। तथा हि विश्वेश्वरेण गीतम्–

"रणभार पीडिता जर्जर मेदिनी,
करोति रक्तस्रोतः स्नानम्।
सुषमाहीना प्रकृतिदीना,
मुञ्चति तप्तमश्रुजातम्।
आकुलविषादः खनति पवने,
ध्वनति विलापो गगने भुवने"[६८२]।

इह नाटके वीर-हास-भयानकादिरसानां समावेशेनापि वीररसो मुख्यः। प्राचीनच्छन्दांसि परिवर्त्य आधुनिकवङ्गछन्दोभिः संस्कृतसंगीतरचनायां विश्वेश्वरः धुरी वर्तते। प्रस्तुतस्यास्याभिनयो मधुपूर्णिमामहोत्सवे सम्पन्नः। अस्य प्रकाशनम् अभूत् कलिकातास्थितायाः संस्कृतसाहित्यपरिषत्पत्रिकाया पञ्चाशत्तमे वर्षे सर्वेष्वङ्केषु तथा च एकपञ्चाशत्तमवर्षस्य प्रथमभागे।

ग). दस्युरत्नाकरम्

विश्वेश्वरविद्याभूषणाचार्येण विरचितं 'दस्युरत्नाकरम्' इति नाटकमेकाङ्कम्। पुत्रेण ध्यानेशनारायणेन सह यौथभावेन मञ्जुषायां पत्रिकायां १९५७-५८ शकाब्दे प्राकाशि नाटकमिदं नाट्यकृता। 'वाल्मीकिसम्बर्धन'मिति नाटकस्य क्षुद्रसंस्कारमात्रम्

[६८१]उत्तरकुरुक्षेत्रम् (भरतवाक्यम्), पृ. – ४४।
[६८२]तत्रैव।

एतन्नाटकम्। दस्योः रत्नाकरस्य भक्तिपरिप्लुतं जीवनालेख्यं पौराणिकाख्यानमुपजीव्य गीतिवैचित्र्येण कविनात्र उपायनीकृतम्।

ब्रह्मा-नारदयोर्बन्धनं कृत्वा रत्नाकर उवाच – 'यदि जीवितुम् इच्छसि, तत् सर्वम् अर्पय'[६८३]। परन्तु पुनश्च ब्रह्मा जगाद – अतीव क्लेशमयो हि पापस्य परिणामः इति। पितरौ च भार्यापि दस्योः रत्नाकरस्य पापभारं ग्रहीतुं नेच्छन्ति स्म। तृतीयदृश्ये रत्नाकरस्य पिता स्पष्टतया ब्रुते – 'जनकजनन्योः भरणपोषणं पुत्रेण अवश्यमेव कर्तव्यम्। तच्च साधुनोपायेन' इति। मातापि प्राह – '...माता समतिक्रान्तशैशवस्य पुत्रस्य पापं स्वीकुर्यादिति मातुर्यद्धरणं स पुत्रस्य धर्म एव' इति। माताप्यकथयत् – 'सर्वथा भरणीयैव उपायस्तु तद्वादयः, तत्कथमहं पापभाग् भवेयम्' इति। तदा रत्नाकरः प्राह – 'त्रायस्व माम्'। ब्रह्मा तदा रामचन्द्रस्य भजनायोपदिदेश। नारदकर्तृकेण संगीतादिरत्रोपस्थाप्यते –

"रामाय रामचन्द्राय रामभद्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः"[६८४]॥

अन्तिमे नारदः श्रीरामचन्द्रविषयकं सङ्गीतं साधु परिवेशितवान्। जीवनस्य गतिमयत्वस्य मनुष्यत्वविकाशस्य चोत्कृष्टतममुदाहरणं तावदेतन्नाटकम्। विवेकोदयेन रत्नाकरजीवनं चरित्रञ्च स्वमहिम्ना भास्वरम्। अत्र भक्तिरसस्य प्राधान्यमपि नयनयोरस्माकमापतति इह नाटके।

घ). वाल्मीकिसंवर्धनम्

भक्तिरसभावादिभिः आप्लुतं 'वाल्मीकिसंवर्धन'मिति तावत् विश्वेश्वरप्रणीतम् ऐतिहासिकं नाटकमेकम्। द्वादशाङ्कविशिष्टं नाटकमिदं रत्नाकरस्य जीवनस्य परिवर्तितमालेख्यम्। तथा हि नाट्यकृता आभाणि – 'वाल्मीकिसंवर्धनमित्याख्यं दृश्यकाव्यं कलुषनिपीडितस्य मानवात्मनो मुक्तेरितिहास...। नास्ति किञ्चित् तपसा असाध्यम्...तत्साधनया मानवपूर्णो भवतीति आख्यानस्यास्य शाश्वती वार्ता। सा हि वाल्मीकेः पूर्णचरितकथाभिषिक्ता प्रेमगङ्गासु प्लावनेन चित्तं प्लावयति च भूतलमानन्दमयभक्तिरसप्रवाहेण' इति। कलिकातायाः 'रूपकमञ्जरी'ति ग्रन्थमालायां

[६८३]दस्युरत्नाकरम्।
[६८४]तत्रैव।

रूपकस्यास्य प्रकाशनमभूत्। आकाशवाण्यामपि नाटकस्यास्य प्रसारणं जातम्।

अरण्ये भ्रमन्तौ ब्रह्मा-नारदौ रत्नाकरस्यानुचरैः पिङ्गलाक्षचण्डकेशादिभिः दृष्टौ। तदा ते तयोर्मार्गम् अवरुद्ध्य दण्डाघातेन धनाद्यपहरणप्रयासं कृत्वापि ताभ्यां किमपि न प्रापुः। एतेन तयोर्दैन्यदशा प्रकटीभवति। ततः ब्रह्मा-रत्नाकरयोरतिविश्रुतं कथोपकथनमत्र उपन्यस्तम्। ब्रह्मणा दस्युराजः पृष्टः – 'अपि तवास्मिन् पापकर्मणि कोऽपि समभागी?' तदा रत्नाकरो गृहं गन्तुकामोऽस्य प्रश्नस्योत्तरं प्रष्टुम्। आदावेव तस्य पितरौ पुत्रकृतायाः पापप्रवृत्तेः उद्विग्नौ आस्ताम्। तदा रत्नाकरेण पृष्टौ पितरौ स्पष्टतया कथितवन्तौ यत् पापकर्ता एव पापभाग् भवेदिति – 'पापन्तु कर्तरि फलम्'। भार्यापि सममेवोत्तरं प्रददौ तस्मै। अनन्तरं पापकर्मणे भृशम् उद्विग्नो रत्नाकरः पुनः तयोः ब्रह्मा-नारदयोः शरणमागत आत्मशुद्धये – 'को मां त्रास्यति? को मां पापात् रक्षिष्यति?' तदा ब्रह्मणोपदिष्टम् – निरन्तरं पापहरं 'जयतु श्रीराम श्रीराम' इति मन्त्रं जप। कालान्तरं दस्युराजो रामनाम उच्चार्य समाधिं गतः। रत्नाकरस्य द्वावनुचरावपि रत्नाकराभावे कठोरदारिद्र्यहेतुना सुदूरं देशं गत्वा अर्थोपार्जनस्य अभिप्सां प्रकटीचक्रतुः। परं तावपि सन्न्यासवृत्तिम् अवलम्ब्य वैराग्यं साधयितुं मनश्चक्रतुः।

अष्टमाङ्के बहूनि दिनानि व्यतीत्य पुनः ब्रह्मा-नारदौ तत्र आगत्य नेपथ्यतो रत्नाकरस्य मुखनिःसृतां सुधामयीं रामनामवाणीं श्रुत्वा परमानन्दं प्राप्तवन्तौ। पुनः ब्रह्मा-नारदौ तत्रागतौ। रत्नाकरं स्पृष्ट्वा ब्रह्मा आदिदेश – 'उत्तिष्ठ ब्रह्मन् परिहर योगसमाधिं जगतां कल्याणाय'। ततो व्याधेन निहतं क्रौञ्चं निकषा तद्भार्यायाः सकरुणं क्रन्दनध्वनिं श्रुत्वा वाल्मीकिमुखान्निर्गतोऽयं श्लोकः –

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्"॥

परं निषादो वाल्मीकिसकाशमागत्य क्षमां ययाचे। स्वाभाविकत्वेन वाल्मीकिः स्वाभिशापान्मुक्तः। तदानीमेव सरस्वती उवाच – 'स्वच्छन्दादेव ते कण्ठान्निर्गतेयं सरस्वती' इति। ब्रह्मणोक्तम् – 'अनेन निषादप्रसङ्गेन वाग्देवी त्वां रामायणं लिखितुं प्रेरयति' इति। ततः सरस्वती रामकथागानाय नारदाय आदिदेश इति अतिप्रसिद्धं परं लोकरञ्जकं वृत्तमाधारीकृत्य द्वादशाङ्कोपेतं नाट्यमिदं भाषालालित्येन तथा च

सुललितच्छन्दोबद्धगीतिमाधुर्येण रसोत्तीर्णं जातम्।

ङ). प्रबुद्धहिमाचलम्

'प्रबुद्धहिमाचलम्' इति रूपकमिदं सप्ताङ्कविशिष्टं देशभक्तिपरकञ्च। देशवन्दनात्मिका रूपकस्यास्य नान्दी –

"उद्यत्स्वर्णकरोज्ज्वलाद्रिमुकुटां नीलाब्धिनीराञ्चलां
श्यामां काननकुन्तलां च ललितां पुण्यप्रभाशीतलाम्।
काशीवङ्गकलिङ्गमद्रसहितां सौराष्ट्ररम्यस्थलां
वन्दे भारतमातृकां सुवरदां गङ्गासरिन्मालिनीम्"[६८५]॥

अत्र भारतीयं सनातनवैभवोत्कर्षं चित्रितमास्ते। प्रसङ्गत उल्लेखार्हं यत् उमामहेश्वरयोः यात्राप्रसङ्गे नाटकमिदमभिनीतम्। आकाशवाण्या प्रसारितमिदं नाटकम्।

प्रथमाङ्के दृश्यते यद् विशालपुरीनगर्याः राष्ट्रप्रधानो विक्रमवर्धनः सर्वेभ्यः राज्यवासिभ्य आदिदेश – अद्यावधि सर्वे मठाः मन्दिराणि तथा च तेषां सम्पत्तयो राष्ट्रयत्ता भविष्यन्ति। तथा च तत्स्थानीयाः निवासिनो जनाः शिल्पं कृषिं वा कुर्वन्तः जीविकां निर्वाहयन्तु। किञ्च, राज्ञोऽपरो निदेशोऽयमेवासीत् – समग्रा भूमिरपि राष्ट्रायत्ता भविष्यति।

द्वितीयाङ्के विशालपुरस्थराज्यप्रासादे अमात्यैः सह मन्त्रयमाणो विक्रमवर्धनश्चिन्तयति यत् नवनीत्या राष्ट्रस्याभ्युदयो साधितोऽपि कथं नास्माभिः स्वराष्ट्रस्य वर्धमानायै जनसंख्यायै देवगिरेः तटवर्ती प्रदेशः स्वायत्तीक्रियते? तदनुसारं चण्डशासनो नाम सेनाध्यक्षो देवस्थानम् आक्रमितुं सैन्यान् आदिदेश।

तृतीयाङ्के गन्धर्वनगरे मृगयां कुर्वन् विजयकेतुः सहसा पान्थवेषधारिणं दस्युदलं ददर्श। ते दस्यवः मधुच्छन्दादिगन्धर्वकुमारीः अपहरन्तीति दृष्ट्वा स बाणैः तान् दस्यून् आक्रम्य तासां स्त्रीणां रक्षणं चकार। सत्कर्मणः पारितोषिकत्वेन गन्धर्वराजश्चित्रभानुः स्वदुहितरं मधुच्छन्दां विजयकेतवे प्रददौ।

चतुर्थाङ्के राजकविः सुधाकण्ठो वीणावादनरतो दृश्यते। अङ्कोऽयं राष्ट्रियविचारादर्शानां द्योतकः।

---

[६८५] प्रबुद्धहिमाचलम्, पृ. – १।

पञ्चमाङ्के विक्रमवर्धनस्य भटाः सिन्धुकूटाधिपतिना सह अरुणाञ्चल-प्रान्तप्रदेशमाक्रमितवन्तः। सेनापतिना पुरञ्जयेन शत्रूणां पश्चादपसरणसंवादः प्रदत्तः। देवस्थानीयाः साधारणमानवाः देशरक्षायै उद्योगिन आसन्। पूर्वकूटप्रदेशस्य शरणार्थिनो देवस्थानमनुप्रविष्टाः। विजयकेतुः रत्नमञ्जर्याः प्रार्थनासंगीतं श्रुत्वा आदिदेश–

'उन्मोचय मम नगरद्वारमनाथेभ्य आश्रयदानाय। अद्य प्रभृति राजभवनं शरणार्थिभ्यः स्थानदानाय सदोन्मुक्तं तिष्ठतु'[६८६] इति। राज्ञी मधुच्छन्दापि शरणार्थिव्यवस्थायां पूर्णसाहाय्यमाचरितवती।

षष्ठाङ्के सनातनाय ब्रह्मानन्दो निवेदयति स्म – 'देवा अधुना योगनिद्रामाश्रयन्ते। प्रसुप्तोऽधुना देवलोकः। देवतात्मा हिमाचलोऽपि समाधिलीनो निद्राति ...। पश्यैनां दिव्यालोकसमुद्भासितदिङ्मण्डलां देवभूमिम्'। सनातनः स्थिरयोगासनमास्थाय योगविधिना महासमाधिम् अवलम्बते इति नाटकमिदं समाप्तिं गतम्।

नाट्यतात्त्विकगतदिशा नाटकमिदं नोच्चकोटिकं परं वैचारिककार्यसिद्धेर्दृश्यते प्राचुर्यमत्र।

च). भरतमेलनम्

भरतस्य चारित्रिकादर्शान् सहृदयेभ्यः उपायनीकर्तुं विश्वेश्वरेण षडङ्कसम्पूर्णं नाटकमिदं निरमायि। मञ्जूषायाः पत्रिकायाः त्रयोदशवर्षे नाटकस्यास्य प्रकाशनमभूत्। रामायणीयवस्तु विशेषेणायोध्याकाण्डगतं वृत्तम् उपजीव्य भावरसालंकारादिभिः समलंकृत्य कविना प्रस्तुतं नाटकमिदम्। नाटकस्यास्य सहलेखकोऽभूत् विश्वेश्वरपुत्रो ध्यानेशनारायणः।

नाटकस्य वस्तु इत्थम् – रामवनगमनाद् दुःखितो भरतो रामस्य प्रत्यावर्तनाय प्रातिष्ठत। सैन्यैः सह आयान्तं भरतं प्रेक्ष्य तमाक्रमिणं विभाव्य निषधराजः स्वभटवाहिनीं सज्जीकृत्य अकथयत् –

"एषा मे शोणितास्वादलोलुपा मर्मघातिनी।
नृत्यतु समरोल्लासाच्छल्यकी शितधारिणी"[६८७]॥

[६८६]प्रबुद्धहिमाचलम् (पञ्चमाङ्कः)।
[६८७]वि.स.ना. (रामजी), पृ. – १३४।

जटाधारिणं भरतं दृष्ट्वा तं परिव्राजक इति मन्यते निषधराजः। तदा भरतस्तमाह – 'दीनोऽहं रामं द्रष्टुमिच्छामि'। गुहराजो भरताय रामस्य पर्णकुटीरमदर्शयत्। रामस्य इमामवस्थां दृष्ट्वा भरतो विलपन् आह –

"क्व वत स्वर्णपर्यङ्के कोमला पुष्पशय्या।
क्व चेह रामभद्राय वृक्षमूलाधिवासः"[६८८]॥

मातृरूपिणीं सीतामुद्दिश्य सोऽवोचत् –

"यूथभ्रष्टा मृगी कान्ता चरत्येका यथा वने।
निःसहाया तथार्या मे संश्रितेदं शिलातलम्"[६८९]॥

पञ्चमाङ्के भरद्वाजस्याश्रमाध्येतारो भरतागमनाद् अनध्यायेन हृष्टा दृश्यन्ते। षष्ठेऽङ्के चित्रकूटाश्रमे भरतेन समं रामस्य मिलनं सञ्जातम्। तत्र राम-भरतयोर्मध्ये करुणरससिक्तेन कथोपकथनेन सहृदयहृदयानि चिराय देदीप्यन्ते। भरतनये, कैकेय्या अन्याय्यमाचरितम्। रामेणाभिहितम् – 'मम माननीयायाः जनन्याः कृते नैवं वक्तव्यम्'। तदा कैकेकी रामसकाशम् आगत्य अब्रवीत् – 'अहं भवन्तं वनं संप्रेष्य कलङ्कभागिन्यस्मि'। भरतः प्रत्युवाच – 'वयं भवन्तं विना कथं जीविष्यामः? भवान् स्वं राज्यं गृह्णातु'। रामः पुनः प्राह – 'पितुराज्ञाया विपरीतमाचरणमसाम्प्रतं वर्तते। अस्माभिस्तथानुष्ठिते जनकः स्वर्गभ्रष्टो भविष्यति'। कैकेयी रामं वारं वारमनुरुद्धवती अयोध्यां प्रत्यागन्तुम्। परं रामः तत्कर्तुं नालमिति स्पष्टं ज्ञापयामास। चान्ते भरतेनानुरुद्धम्– 'तर्हि स्वपादस्पर्शपरिपूतं दीयतां मे पादुकायुगलम्। तदेव रत्नसिंहासने स्थापयित्वा भक्तः प्रतिनिधिः सन् राज्यभारं वक्ष्यामि'। तदा रामस्तस्मै स्वपादुकाद्वयं समर्पयन् आह –

"हे वीर धन्योऽसि गुणैर्वरेण्यैरुदारचेता रघुवंशदीपः।
त्वत्कीर्तिमाल्यं विमलं वहन्ती जाता सुगन्ध्या वसुधा प्रकामम्"[६९०]॥

अनन्तरं रामस्यादेशं शिरसि निधाय भरतः पुनः अयोध्यां प्रत्यागच्छदिति।

रूपकस्यास्य किमपि नास्त्यभिनवत्वम्। रामायणीयकथावस्तुनोऽनुकरणात्मकं

[६८८]वि.स.ना. (रामजी), पृ. – १३५।
[६८९]तत्रैव।
[६९०]तत्रैव।

रूपकमिदम्। वनलक्ष्म्या सङ्गीतेन नाट्यमिदं समाप्तिमितम्। पौराणिकवृत्तमुपजीव्य प्रेक्षकाणामानन्दविवर्धनाय नाट्याकारौ कौशलेन करुणरसं सञ्चारयतः नाट्येऽस्मिन्। सुललितया प्राञ्जलभाषया गीतिमाधुर्येण भरतादिचरित्रविन्यासेन शब्दवैचित्र्येण च नाटकमिदमुच्चाङ्गमित्यत्र नास्ति संशयलवः कश्चित्।

छ). काव्यकुसुमाञ्जलिः

'काव्यकुसुमाञ्जलि'रित्यत्र विश्वेश्वरस्य चतुःसप्ततिः संस्कृतकविताः स्थानिताः। तत्र काश्चन कविताः देवीस्तुतिरूपाः, काश्चित् प्रशस्ति-संवर्धन-अभिवन्दनात्मिकाश्च विलसन्ति। हिमाचलप्रशस्ति-वसन्तोत्सव-गङ्गा-भारतमातृकावन्दनादिकवितासु कवेः प्रतिच्छत्रं विश्वेश्वरस्य देशभक्तिः ध्वनिता। काव्यसंग्रहोऽयं १९७९ ईशवीयाब्दे प्रकाशपदवीं गतः। दिङ्मात्रम् उदाहरणं तावत् –

"जय सुरतरङ्गिणी केशवनन्दिनि शम्भुविलासिनि देहि पदम्।
जय त्रितापहारिणी त्रिभुवनचारिणि त्रिपथगामिनि देहि पदम्"[६११]॥

गङ्गाया विशेषणान्यत्र द्योतितानि। सम्बोधनात्मिका कवितेयम्। गङ्गावन्दनमाधुर्यं कविना विश्वेश्वरेणात्र शब्दार्थालंकारैः समलंकृत्योपायनीकृतम्। परमुल्लेख्यं यत् विश्वेश्वरस्य कवितासु ध्वनि-रस-भावादीनां प्राचुर्यं न नयनयोरापतति। विषयाङ्गिकादि-दृष्ट्या अभिनवत्वं प्रायो नास्ति। उपजातिच्छन्दोभिः कविताः ग्रथिता अनेन।

[६११]सं.प.अ, पृ. – १८०।

५. कालीपदतर्काचार्यस्य साहित्यवैभवम्

०. भूमिका

संस्कृतविद्वत्परिषदि सारस्वतमूर्धन्यानां मधुसूदनसरस्वतीपादानां प्रपूते वंशे लब्धजन्मायं सुरभारतीगङ्गाया भगीरथस्वरूपः कालीपदतर्काचार्योऽर्वाचीनकालस्य कविषु प्रविरलो, यस्मिन् लसति युगपत्तया कविदार्शनिकसत्तयोर्मेलबन्धनम्। अयञ्च दर्शनस्य दुरूहतत्त्वानि मनसिकृत्य तैश्च स्वहृदयं परिशील्य कल्पनाया वैभवेन भावसम्पत्त्या च काव्यनाटकानि ससर्ज। अपि च, तदानीन्तनकालस्य दार्शनिकेषु मूर्ध्नि राजते सः। तद्विरचिताः दर्शनग्रन्था एव तत्प्रकाशयन्ति। तथाहि श्रूयते आभाणकोऽयम् –

"तर्केषु कर्कशधियो वयमेव नान्ये।
काव्येषु कोमलधियो वयमेव नान्ये"॥ इति।

नैयायिकप्रवचनस्य याथार्थ्यं तेन प्रमाणीकृतम्।

१. काश्यपकवेर्व्यक्तिजीवनम्

ऊनविंशशताब्द्या अन्तिमे दशके (आनुमानिके १८८८ ईशवीये वर्षे) अधुना वांलादेशस्य फरिदपुरजिल्लान्तःपातिनः ऊनशियाग्रामस्य ब्राह्मणवर्णप्रधाने कोठालिपाडानाम्नि जनपदे जनिं लेभे कालीपदः। तत्रैव ऊनशियाजनपदे अद्वैताचार्यमधुसूदनसरस्वत्या जन्मप्रपूते काश्यपवंशे दारिद्र्यदुष्टे ब्राह्मणगेहे जनिरस्य। पूर्ववङ्गेषु कोठालिपाडे प्रमोदनपदाभिधः पुरन्दराचार्यः समासीत्। कान्यकुब्जजनिपवित्रे काश्यपे वंशे श्रीमद्रामिश्राग्निहोत्रिणः कुलाग्रणीः बुधो जातः। श्रीनाथनामाचार्य्यचूडामणिशब्दमान्यः प्रथमः सुतोऽस्य। सकुलाभिमानी विदुषां वरेण्यः सदा आचारपरो यशस्वी। द्वितीयः पुत्रः यादवानन्दो न्यायाचार्यस्तथा च तृतीयः सरस्वतीनामा मधुसूदनः। अद्वैतसिद्ध्याद्याः सिद्धा ग्रन्था उपलब्धा इति कृत्वा तार्किकसभायां प्रसिद्धे श्रीनाथस्य कुले च तर्कतीर्थोपाधिधारी विद्वान्हरिदासो जन्म लेभे। तस्य तार्किकप्रतिभा विद्वत्सु विस्मयं जनयति स्म। सत्यनारायणस्योपासकस्य पितुर्हरकुमारस्यातुलनीयस्य सच्चरित्रस्याधिकारी हरिदासः सत्यपथेऽवसत्। रामजाया सीतेवासीत्सीता तस्य सहधर्मिणी। प्रतिपदं हरकुमारः

युगधर्मप्रभावान्मुक्तोऽभूत्। तस्य देशकालकुलाचाराद्यनुसारेण स्वल्पे वयस्येव गृहीतदारस्य यदा सुचिरेणापि कालेन स्वपत्न्यां सीतादेव्यां नापत्यमजनिष्ट, तदा तत्पिता हरकुमारः स्वपुत्रात्स्ववंशधाराप्रणाशशङ्क्या दूयमानो यथाविधि बहुभिर्ब्राह्मणैः श्रीश्रीचण्डीशतावृत्तिपाठं पौत्रकाम्यया कारयामास। ततस्तस्यामुत्पन्नाश्चत्वारस्तनुजाः क्रमात्। आद्यः कालीपदः, ततो हरिहरः, तृतीयः श्रीरामरतनश्चतुर्थश्च कार्त्तिकः। चण्डीकृपया लब्धजन्मनः काले पितामहः कालीपदेति मानपदं प्रचारयामास।

२. कालीपदस्य स्वीकृतयो वैदुष्याय

कालीपदेन प्रथममेव विद्यालयेषु संस्कृतस्याध्यापनं प्रारब्धम्। स कलिकातानगर्य्या राजकीयसंस्कृतमहाविद्यालये न्यायविभागे प्राध्यापकपदमलञ्चकार। १८४१ खृष्टाब्दे आङ्गलशासिते राज्ये तत्कालीनराष्ट्रपतिपरिचालकास्तं 'महामहोपाध्याय' इत्युपाधिना भूषितवन्तः। श्रीशृङ्गेरीमठाधीशः शङ्कराचार्यस्वामी तस्मै न्यायशास्त्रेऽसामान्यप्रतिभायै 'तर्कालंकारः' इत्युपाधिं ददौ। काशीभारतधर्ममहामण्डलं तस्मै 'विद्यावारिधि'रित्युपाधिं दत्तवत्। तस्य कविप्रतिभां संस्मरन् हावडा-संस्कृत-साहित्य-समाजस्तं 'महाकवि'रित्युपाधिना भूषितवान्। १९७२ ईशवीये वर्धमान्-विश्वविद्यालयेनासौ 'D.Lit.' इत्युपाधिना अलंकृतः। स्वाधीनभारतस्य राष्ट्रपतिस्तर्काचार्यं भारतस्यान्यतमं श्रेष्ठपण्डितं मन्यमानो विशेषमानपत्रं वार्षिकत्रिसहस्रमुद्रामूलामाजीवनभोग्यां वृत्तिञ्चानुमोदितवान्। अवसरग्रहणात्परमनतिचिरेण तत्रैव महाविद्यालये नवप्रवर्तितायां महाचार्यश्रेण्यामन्यतमाध्यापकत्वेन कतिचिद्वर्षाणि कार्यं कुरुते कालीपदः।

३. कालीपदस्य सारस्वतवैभवम्

साहित्यमार्गे कारयित्री भावयित्री चेति प्रतिभाद्वितयमभ्युपगतं साहित्यसमालोचकैः। तत्र कारयित्र्या प्रतिभया जागतिकपदार्थसार्थमनितरसाधारणदृष्ट्या विलोकयति प्रकाशयति च तस्य सस्पन्दसुन्दरमभिनवं स्वरूपम्। तदुक्तं 'व्यक्तिविवेके'–

> "साहित्यचक्षुर्भगवतस्तृतीयमिति गीयते।
> येन साक्षात्करोत्येष भावांस्त्रैलोक्यवर्तिनः॥" इति।

कविनानेन स्वककारयितृप्रतिभाबलादेव मौलिककाव्यजातं विरच्य

विमलं यशोऽर्जितम्। समासीद्बाल्यादेव काव्यकर्मणि तस्य महानाग्रहः। असमाप्तव्याकरणाध्ययन एवासौ सरलेन छन्दसानवद्यानि पद्यानि विरचयितुमारेभे। बाल्यात् प्रभृत्येव समासक्तिरजायतात्यर्थमस्य क्वचिद् उत्सवादिष्वभिनयेषु, कदाचिद्वा परिषदि संस्कृतभाषया विद्वद्गोष्ठ्याञ्च मिथः संवादे, विवाहसभासु वरकन्यापक्षयोः एकतमपक्षमादाय पक्षप्रतिपक्षभावेन विवादे प्रस्तुते शास्त्रार्थविचारे श्लोकेन प्रश्नोत्तरप्रदानपूर्वकञ्च। परं काव्यशास्त्रे सविशेषं ज्ञानार्जनार्थं मूलाजोडसंस्कृतविश्वविद्यालयमेत्य तत्र काव्यिकरत्नश्रीहरिपदविद्यारत्नमहोदयेभ्यः सुनिपुणं काव्यालंकारतत्त्वान्यध्यापयामास। तदैव स नलदमयन्तीवृत्तान्तमधिकृत्य 'विदर्भसमागममिति' सप्तमाङ्कसम्पूर्णं नाटकं प्रणिनाय।

विरराज काव्ये कोमलधीस्तर्काचार्यः साहित्यसदसि सम्राडिव। खण्डकाव्य-महाकाव्य-गीतिकाव्य-दृश्यकाव्यादिरचनासु सोऽप्रतिद्वन्द्वी सहृदयहृदयान् रसिकान् तोषयामास सुतराम्। न केवलं तद्रसनायां सरस्वती ननर्त, तस्य लेखनीमुखे देवी भारती नवनवभूमिकामाश्रित्य लीलाञ्चकार। बाल्ये वयसि स्वरचितश्लोकविरचनाग्रहस्तस्य महाकवित्वस्य मानमिति मतिर्मामकी। कवेरस्य सारस्वतकर्मणि प्रकर्षं तद्रचिता निम्नोक्तग्रन्थाः प्रमाणयिष्यन्ति।

कवेः कालीपदस्य मौलिकसाहित्यिकग्रन्था दृश्यश्रव्यानुवादभेदादुल्लिख्यन्ते यथेक्षणदृष्ट्या –

दृश्यकाव्यम् –

क) नलदमयन्तीयम्
ख) प्रशान्तरत्नाकरम्
ग) माणवकगौरवम्
घ) स्यमन्तकोद्धारव्यायोगः

श्रव्यकाव्यम् –

क) सत्यानुभावम्
ख) मन्दाक्रान्तावृत्तम्
ग) योगिभक्तचरितम्

घ) आलोकतिमिरवैरम्

ङ) आशुतोषावदानम्

अनुवादसाहित्यम् –

क) गीताप्रतिच्छाया

ख) गीताञ्जलिच्छाया

ग) श्रीश्रीचण्डीप्रतिच्छाया

४. दृश्यकाव्यसर्जनविधौ महाकवेर्विशिष्टत्वम्

नाट्यकृद्रूपेणापि तर्काचार्यस्य महती ख्यातिर्विद्योततेतमाम्। नाट्यशास्त्रीयरीतीश्च पूर्णतया अनुसृत्य प्रायेण अनेन प्रख्यातेतिवृत्तं समाश्रित्य नाटकचतुष्टयं व्यरचि।

क). नलदमयन्तीयम्

सप्ताङ्कसम्पूर्णं कालीपदेन विरचितं 'नलदमयन्तीय'मिति नाटकं पौराणिक-श्रेण्याः। कालानुरूपं वर्तते नाटकमिदम्। तथाहि कविः कथयति –

"कालानुरूपरचनाप्रचितं यदि स्यात्।

काव्यं कदा कवयितुः कविता चकास्ति[६९२]॥ इति।

नलदमयन्त्योः प्रेमवृत्तमाधारीकृत्य कल्पनास्पर्शात् केषाञ्चिन्नूतनविषय-संयोजनेन च कविना नाटकमिदमालिखितम्। नेषधचरिते वर्णितयोर्नलदमयन्त्योः विषयादतिरिक्तं किञ्चिद्विलक्षणत्वं प्रतिभाति नाट्यकर्तुर्नाटकेऽस्मिन्।

नान्द्यन्ते सूत्रधारः प्रथमे श्लोके गोपीहृदां तस्करं गोविन्दं तथा शृङ्गारदेवं हरिं निकषा अस्माकं शिवपदावाप्तिविषयिणीं प्रार्थनाञ्चकार –

"कालिन्दीकलगानसङ्गतवियत्सञ्चारिवेणुस्वरो

राधाकुञ्जनलतान्तसौरभहरः श्यामप्रभासुन्दरः।

नन्दानन्दकरक्रियासहचरो गोपाहृदां तस्करो

गोविन्दो वितनोतु वः शिवपदं शृङ्गारदेवो हरिः"[६९३]॥ इति।

द्वितीये च सर्वार्थकल्पद्रुमः वाञ्छितफलं वः विदधातु इति प्रार्थना क्रियते

[६९२]नलदमयन्तीयम्, पृ. – २।

[६९३]तत्रैव – १।१।

नाट्यकृता। ततः शृङ्गाररङ्गिनं प्रत्यपि स्तुतिर्विहिता –

"कालं कञ्चन गोकुले व्रजवधूसङ्गादनङ्गीभव-

वक्रेण जगाम यो हि मधुरां निक्षिप्य शोकेऽखिलान्।

विस्मृत्येव चिराय गोपजनतामुत्सारयामास यः,

सोऽयं वो वितनोतु वाञ्छितवरं शृङ्गाररङ्गी चिरम्"[६९४]॥

राजा नलो दमयन्त्याश्चित्रं दृष्ट्वा तस्या दर्शनाय व्याकुलो जातः। तदा स दमयन्तीपर्याकुलः सन् जगदेव तन्मयं पश्यति। मनस्तापं दूरीकर्तुं रमणीयमुद्यानं प्रविवेश नलः। तत्र राजहंसं ददर्श सः। हंसोऽयं राज्ञो दमयन्तीं प्रति दौत्यकार्यं सम्यक्तया सम्पादयामास। दृश्यते परं विदर्भदेशे दमयन्त्याः स्वयंवरानुष्ठानं प्रारब्धम्। बहुषु विघ्नेषु सत्स्वपि नलदमयन्त्योः परिणयः सम्पन्नोऽभूत्। नलो द्यूतेन पराजितः सन् वने प्रसुप्तां दमयन्तीं त्यक्त्वान्यत्र जगाम। निद्रात उत्थाय नलमप्राप्य तारस्वरेण क्रन्दन्तीं दमयन्तीं किरातराजो ददर्श। समयान्तरे सङ्गमो जातस्तयोः पुनरपि।

पात्रानुसन्धानदृष्ट्या मानवरूपधारिभावानां रोचिष्णुतया व्यवहारः श्लाघ्यो मनोरञ्जकश्चेति। तत्र विवेकमोहादयो भावाः पात्रतां गताः। नाटकेऽस्मिन् कलिः गुरुत्वपूर्णनाटकीयपात्रत्वेन वर्णितः –

"क्रूरः कालः परिभवं सुतरामुपेतः।

कीर्तिः सुनिर्मलतया प्रसृता पृथिव्याम्॥"[६९५] इति।

कलेर्विपरीतचरितरूपेण धर्मो नाट्यायितो वर्तते। बहुषु स्थलेषु नाटकस्य दीर्घतरसंवादा नाट्योचितान् प्रतीयन्ते। उत्तररामचरितमिव छायातत्त्वं प्रायो नाटकस्य सर्वेष्वेवाङ्केषु दृश्यते। अर्वाचीनसाहित्ये विशेषेण नाट्यसाहित्ये प्राकृतभाषाया व्यवहारः प्रविरलतयालक्षि। नाट्यकृता किरातराजस्य मुखे प्राकृतभाषा योजिता। चतुर्थाङ्के मायाव्यापारद्वारा आरभटीवृत्तेः प्रवर्तनं रमणीयमस्ति। कालीपदेन नल-दमयन्तीयस्य रचना १८२७ खृष्टाब्दे कृता। नाटके वीरशृङ्गाररसयोः प्राधान्यं वरीवर्ति। तथाहि उक्तम् –

[६९४]नलदमयन्तीयम् – १।२।

[६९५]तत्रैव, पृ. – १४५।

'वीरस्य भूषणमरातिवधे कृपाणं,
शृङ्गाररङ्गसमये तदयोग्यमेव' इति।

ख). माणवकगौरवम्

भारतीयानां चिरन्तनस्वभावविपर्यासेन अवश्यम्भाविनीम् अधःपातसीमाम् आकलय्य तथाभूतोपपल्लवप्रतीकारम् आसाशानेन कालीपदतर्काचार्येण महाभारतस्यादिपर्वान्तर्गतम् ऋषिधौमशिष्याणाञ्च अतिप्रसिद्धवृत्तान्तम् उपजीव्य सप्तमाङ्कसम्पूर्णं माणवकगौरवमिति रूपकं विरचितं यच्च सहृदयहृदयरोचकम्।

प्रथमाङ्के महानाचार्यो धौमो विलम्बोत्थितं कात्यायनं छात्रान्तराणि विनिद्रयितुमादिष्टवान्। तस्योपमन्यु-कात्यायन-आरुणि-हारीतादयः सर्वे छात्रा गुरुमातुः स्नानार्थं सरोवरगामिमार्गस्य सौष्ठवकरणेऽभवन् दत्तावधानाः। केवलेन हारीतेन गुरुविरुद्धमाचरितम्।

द्वितीयाङ्के आरुणेर्माता चिन्तितापि तस्य पितुराश्वासनेन तृप्त आरुणिर्गुरोः धौमस्यादेशपालने बभूव दृढव्रतः।

तृतीयाङ्के शिष्येष्वन्यतमो हारीतो गुरुं प्रति आसीदतीव क्रुद्धः। स मन्यते –

"तद्धि सुदुष्करेषु कृत्य शतेषु निर्विवेकम्
नारतं गुरूणामस्माकं नियोजनम्।
दृश्यां तदास्मदृशमानुषशक्तिबाह्ये
जलमयसंस्कारव्यापारे नियोजनम्।
येन गुरोः शापभयात्सुसम्पादिता
सुचिरकालात्ययेऽपि नापगता नः शरीरवेदना।।"[६९६] इति।

चतुर्थेऽङ्के हारीतो गुरुद्वेषवशात्कुष्ठरोगेणाभवत्प्रपीडितः। धौमस्तस्मै सूर्योपासनार्थमादिष्टवान्। उपमन्युर्गोचारणकर्मण्यभून्नियुक्तः। गुरोराशयोऽयं यत्सुवर्णं तप्तं सद्रमणीयालङ्कारतामुपयाति –

"विना हुताशनस्य विशेषतापनं
न जातु शुद्धिं समुपैति काञ्चनम्।

[६९६]माणवकगौरवम्, पृ. – ४१।

न वा तदेवाय स ताडनादृते
मनोहारालङ्करत्वमञ्चति।।"[६९७] इति।

पञ्चमे आरुणेर्गुरुभक्तिं दृष्ट्वा धौम उवाच – "सम्पूर्णमद्य ते सुदुष्करं शिष्यव्रतम्। तदद्यारभ्य सर्वास्ते विद्याः सरहस्याः प्रतिभास्यन्ति"[६९८] इति। तदुत्तरेणारुणिर्जगाद –

"अद्य मे सफलं जन्म सर्वं पुण्यं फलोन्मुखम्।
तमसो ज्योतिरुद्दीप्तं नीतोऽस्मि गुरुणा यतः।।"[६९९] इति।

एकस्मिन् दिवसे उपमन्युरान्ध्यदोषात्कूपे पतितः। स गुरोरनुग्रहवशादृष्टिशक्तिं प्राप। हारीतोऽपि कुष्ठपीडया क्रन्दन्नपि परं गुरोरनुग्रहेण झटित्येव कुष्ठरोगान्मुक्तोऽभूत्। तदाकाशतो गुरुभक्तिर्ध्वन्यते –

"युष्माकमायतनिरामयमायुरस्तु
चित्तेषु वो निरुपधिगुरुभक्तिरस्तु।
कल्याणमस्तु विपदां नियतं लयोऽस्तु
शिष्ये गुरौ च यशसामभिवृद्धिरस्तु।।"[७००] इति।

नाटके नान्दी-भरतवाक्य-सन्धि-प्राकृतभाषाणां व्यवहारः नाट्यशास्त्रप्रोक्तधाराम् आश्रित्य परं स्वतन्त्रशैल्या च अभूत्। माणवकगौरवस्य कथानकं सर्वथा नवीनमेव। नाटकस्यास्य संविधानं संस्कृतिपरकम्। राजतन्त्रस्य, मुनिजीवनस्य, नीतेश्च सूक्ष्मनिदर्शनं प्रतिपदं परिभाषितम्। नाटके दृश्यपटानां विशेषता वर्तते। वैतालिका रूपकान्तरेषु प्रायोऽङ्कान्तभागे कालवर्णनं प्रकुर्वन्ति। शिष्याणां सकाशे गुरुभक्तिरेवैकं शरणम् – 'नान्यः पन्था विद्यतेऽयनाय' इति। भावोऽयं ध्वनितो नाटकस्यास्य प्रत्येकमङ्केषु। गुरुभक्तिरत्र नारीचरित्रत्वेन उपस्थापिता काश्यपकविना। नाटके जागरणस्य गीतीनां बाहुल्यं वर्तते। द्वितीयतृतीयाङ्कयोर्मध्यभागो विवेकगानरूपः। सर्वेषु पात्रेषु गतवत्सु रङ्गमञ्चे विवेक एकाकी एवागच्छति। सप्तमाङ्के गुरुभक्तेर्गीतं वर्तते – 'अभया गुरुपदसेवा, यो गुरुमञ्चति कुशलं स भजति। तस्य हि तुष्टा देवाः' इति।

[६९७]माणवकगौरवम्, पृ. – ६५।
[६९८]तत्रैव, पृ. – ७३।
[६९९]तत्रैव, पृ. – ७३।
[७००]तत्रैव, पृ. – ११२।

घ). प्रशान्तरत्नाकरम्

कृत्तिवासस्य रामायणवृत्तान्तम् उपाश्रित्य कालीपदेन नवाङ्कसम्पूर्णं निजप्रतिभाकल्पितानल्पशिल्पप्रभावान् नानारसोद्बोधकबहुविधपात्रदृश्याद्युपन्यासेन ‘प्रशान्तरत्नाकरम्’ इति नाटकमपूर्वं ग्रथितम्। संस्कृतसाहित्यपरिषत्पत्रिकायां १९८८ ईशवीये वर्षे नाटकमिदं प्राकाशि। कस्यचिद्दस्योः शुद्धधार्मिकत्वेन परिवर्तनमिति वृत्तमुपाश्रित्य नाट्यायितं वर्तते ‘प्रशान्तरत्नाकर’मिति रूपके।

प्रथमाङ्के संलक्ष्यते यद्रत्नाकरः कश्चनाकिञ्चनो यः स्वस्य तथा च तस्य परिवारस्थजनानां भरणपोषणं कर्तुं नालम्। कश्चिद्दस्युः कस्याश्चित्स्त्रियः सर्ववस्तुजातमपहृत्य तया सह रमणं कर्तुमभिललाष। रत्नाकरस्तां रक्षयित्वावदत्-

“भवत्या मातृतुल्याया नापरं किञ्चिद्दर्शये।
मनस्तापविनाशार्थमाशीरेव प्रदीयताम्॥” इति।

रत्नाकरस्य शौर्यं प्रेक्ष्याभिभूतेन वीरबलाख्येन तस्करेण समं रत्नाकरस्य सख्यता सञ्जाता। सुहृद्भिस्तस्करैः सह मिलित्वा कामेश्वरस्य समूलं विनाशार्थं परिकल्पयामास रत्नाकरः।

द्वितीयाङ्के नाट्यमञ्चे समवतीर्णः कामेश्वरो राज्यस्य प्रजानां रक्षार्थं नासीद्दत्तावधानः – “तादात्म्यसुखनिरपेक्षः कथं प्रजासुखमिक्ष्य...” इति। रत्नाकरः सर्वाश्च परिकल्पनाः सफलीकृत्य कामेश्वरस्य रत्नादिसम्पत्तिजातमपजहार।

रत्नाकरस्य पित्रा च्यवनेन तथा च पुत्रेण आत्रेयेण सह दस्यूनां कोऽपि सम्बन्धोऽस्तीति कृत्वा कामेश्वरस्य सैन्यैरुभौ धृतावभवताम् इति विज्ञाय रत्नाकरस्तत्र गत्वा सैन्यान्निहत्य पितरं पुत्रञ्चोन्मुच्य रत्नापुरनगरीमानीतवान्। रत्नाकरस्य दस्युवृत्तिजैः कुकृत्यैः दुःखितः पिता आत्मानं जघान।

अष्टमाङ्कानुसारं रत्नाकरपरिवारस्य सर्वे सदस्या मृत्युपदं प्राप्तवन्तः। तदा सोऽपि क्रूरां दस्युवृत्तिं परित्यज्य धार्मिकजीवनं यापयन्नासीत्। ततः प्रभृतिः स दरिद्रेभ्योऽन्नवस्त्रवासस्थानादिकं प्रदाय सत्पथे जीवनमतिवाहितवान्। नाटकमिदं समाप्तिं गतं नायकोच्चारितभरतवाक्येन।

नाटकमिदं पर्यालोच्य वक्तुं शक्यते यद्रत्नाकरः कश्चन साम्यवादी बभूव। स

साम्यवादविषये ब्रूते –

“गर्वं खर्वयत प्रभावजनितं वित्तेश्वराणां मुहुः।
सर्वेषां समतास्तु भूमिवलये दैन्यं लयं गच्छतात्॥
एको भूरिविलासभोगनिरतो भोज्यं विना चापरः।
प्राणैरेव वियुज्यते कथमिदं वैषम्यमालोक्यताम्”[७०१]॥ इति।

एकोक्तीनां विपुलतोल्लेखनीयास्ति। भारतीयनाट्यशास्त्रानुसारं वध-युद्ध-लिङ्ग-राज्य-देशादिविषया न दर्शनीयाः।[७०२] किन्तु नाटकस्यास्य रङ्गपीठे राज्ञा सह वेश्यायाः परस्परमालिङ्गनदृश्यं नाट्यायितमपि तच्च शास्त्रविरुद्धम्। प्रथमाङ्केऽन्योन्यताडनस्य दृश्यं मनोरञ्जकं वर्तते। राममुद्दिश्य श्लोकद्वितयेन स्तुत्या नाटकमिदं प्रारभ्यते। परवर्तिनि काले नाटकमिदं साफल्येन साहित्यपरिषदः सदस्यैरभिनीतम्।

ङ). स्यमन्तकोद्धारव्यायोगः

भागवत-पद्म-स्कन्दपुराण-हरिवंशादिग्रन्थेषु उपवर्णितं स्यमन्तकमणिवृत्तम् उपाश्रित्यैकाङ्कमपि दृश्यपञ्चकपरिलसितं व्यायोगकोटिकं रूपकं कालीपदेन आलिखितम्। सर्वाणि पात्राणि ततः सङ्घीभूय नान्दीपदं कुर्वन्ति। नाट्यारम्भार्थं प्रस्तावनायां पारिपार्श्विकादयो रूपकवस्तुसम्बन्धनिबन्धिनीं काञ्चित् कल्पितघटनासमस्याम् उपस्थापयन्ति। प्रारम्भिके नान्दीश्लोकत्रितये विष्णोर्दशावतारा वर्णिताः। प्रस्तावनायां कृष्णसात्यक्योः कथोपकथनं विवृतमस्ति।

सूर्यो दीप्तिमन्तं महाशून्यं स्यमन्तकरत्नं यादवराजाय सत्राजिते प्रददौ। यदा सत्राजिद् द्वारकामागतः स्यमन्तकेन सह तदा कृष्णेन भूयो भूयोऽनुरुद्धोऽपि सत्राजिद्राज्ञ उग्रसेनाय मणिमुपहारत्वेन न दत्तवान्। रहसि स मणिमनुजाय प्रसेनाय प्रदाय नगराद्बहिर्गन्तुमादिदेश। अत्रान्तरेऽरण्यमार्गे समणि प्रसेनो निहतोऽभूत्सिंहेन। ततो यदा सिंहो मुखेन मणिमादाय गच्छन्नासीत् तदा राजा जाम्बवान् सिंहं निहत्य स्यमन्तकमणिमात्मसात्करोति स्म। किन्तु सर्वत्र प्रचारितं यत् श्रीकृष्णः

[७०१] प्रशान्तरत्नाकरम् (द्वितीयोऽङ्कः), पृ. – ३५।
[७०२] साहित्यदर्पणः (षष्ठः परिच्छेदः)।

प्रसेनात्स्यमन्तकमणिं चोरयामास। तथाहि कृष्णो येन तेन प्रकारेण मणेरुद्धारं कृत्वैतत् प्रमाणयितुमियेष यत् चतुर्दिक्षु प्रचारितः संवादः खलु मिथ्याभूतः।

श्रीकृष्ण एकाक्येव सत्योद्घाटनाय स्यमन्तकमन्वेष्टुं गभीरारण्यं प्रविवेश। तदा वसन्तकालस्याविर्भावो दृश्यते प्रकृतौ। वनदेव्या विष्णुशक्त्या सह तस्य तत्र साक्षात्कारोऽभूत्। कृष्णवनदेव्योः कथोपकथनाज्ज्ञायते सर्वमरण्यराज्यं जाम्बवता परिगृहीतमत्याचारितञ्च। परिशेषे श्रीकृष्णो जाम्बवतो गुहां प्राप्य तत्र च प्रविश्य मणिना सह क्रीडन्तं जाम्बवतः पुत्रं ददर्श। अत्रान्तरे तत्र समागते जाम्बवति कृष्णेन सहोत्तप्तवाक्यालापादुत्तरमुभयोर्मध्ये संघर्षो बभूव। अन्तिमे श्रीकृष्णो जाम्बवतीमुद्वहति स्यमन्तकमणेर्लिप्सेच्छया। सुकुमारकः स्यमन्तकमणिं कृष्णाय प्रददौ। ततः जाम्बवत्या सह कृष्णो द्वारकामागतः। इत्थं मृदङ्गध्वनेः सङ्गीतेन नाटकमिदं समाप्तिं गतम्।

वनदेवी-जाम्बवद्-विष्णुशक्तिप्रभृतीनां चरित्रत्वेन रङ्गमञ्चावतरणं छायातत्त्वात्मकं प्रतिभाति। चतुर्थदृश्ये स्यमन्तकमणियुग्मप्राप्तुकामस्य दारकस्य बालहठसुलभं संविधानं विशेषरमणीयम्। ऋक्षपर्वतस्य मनोज्ञवर्णनं, द्वितीयदृश्ये कृष्णस्यानवद्यवर्णनं तथा च स्यमन्तकस्यासाधारणत्वं कविना कालीपदेन प्रभविष्णुतया वर्णितानि।

रूपकेऽस्मिन् वीररस एवाङ्गिरसपदं प्रापितः किन्त्वेतस्याद्यन्तव्यापिनी स्थितिर्नास्ति। अन्तिमदृश्यं सर्वथा शृङ्गाररसपरिलसितमेव। व्यायोगे नियमतो विष्कम्भक-प्रवेशकौ न स्तः। इह रूपके तथापि सर्वत्रोपक्षेपोचितसामग्री त्वङ्कभागे समाविष्टा। व्यायोगस्यास्य प्रस्तावना अवलगितश्रेणीया। शब्दविन्यासः समग्रसंस्थानशोभावर्धक एकास्ति। दिङ्मात्रमुदाहरणं यथा –

"बहुश्रुतानां भवतां समागमाद् विशीर्यते मुग्धजनस्य मन्दता।
वसन्तसङ्गाज्जान्तिमानमात्मनो वनप्रियो मुञ्चति पञ्चमस्वरे"[७०३]॥

अत्र गीतीनां प्रयोगो बाहुल्येन कृतः कविना। रूपकस्यास्य प्रयोजनानुसारिगीतानां समावेशो लालक्ष्यते। वनदेवी गायति – 'तापसपूजित, कौस्तुभशोभित भक्तवशीकृत-विश्वपते' इति। पञ्चमदृश्ये रङ्गपीठे नृत्यस्यापि संयोजनं दृश्यमानं वर्तते।

[७०३]प्रणवपारिजातः (प्रथमवर्षः दशमसंख्या), पृ. – २०१।

५. श्रव्यकाव्यसर्जने कालीपदस्य प्रयोगदाक्ष्यम्

कालीपदतर्काचार्यस्य कारयित्री प्रतिभा नैसर्गिकी च पूर्वजन्मसंस्कारजा। अपि चायं सारस्वतकविभाग् यतो जन्मान्तरसंस्कारवशात्स प्रवृत्तसरस्वतीको बुद्धिमान्। किञ्च, सोऽन्यतमो महाकविरर्वाचीनकालस्याङ्गुलिमेयमहाकविषु गद्यपद्यान्यतरप्रबन्धरचने परमप्रवीणत्वात्। तथाहि कविरयं जीवद्दशायां पञ्च श्रव्यकाव्यानि ससर्ज।

क). सत्यानुभावम्

वस्तुविन्यासः

श्रीसत्यनारायणप्रवृत्तिपरिपूतं नूतनं 'सत्यानुभावम्' इति नाम महाकाव्यमिदम् अखण्डग्रन्थात्मना प्रकाशितं कलिकातास्थ-राजकीय-संस्कृतमहाविद्यालय-प्राच्यविभागीय-प्रधानाध्यापकेन महामहोपाध्यायेन कालीपदतर्काचार्येण। तथाहि कविवरेण भूमिकायामुदितं – "यदा तावदिदं काव्यं क्रमेण संस्कृतसाहित्यपरिषत्-पत्रिकायां प्रकाश्यमानं दर्शनगोचरतामंशेनांशेन समाससाद गीर्वाणवाणीप्रणयिणां वाचकमहोदयानां, यदा तेषु कतिपयेषु सत्स्वपि संख्यातीतेषु पुराणादिप्रसिद्धविविधप्रशस्तरसभावाद्यनुविद्धवृत्तकदम्बकेषु किमिति चराचरे चिरप्रचरद्रूप-श्रीसत्यनारायणवृत्तानुवर्तनेन भवतो महाकाव्यनिबन्धप्रवृत्तिरिति पौनःपुनिकप्रर्यनुयोगेन प्रत्यक्षं परोक्षं वा मामत्यर्थमुदवेजयन्। तदुत्तरमर्यादया किञ्चिदवश्यं मया निवेदनीयमित्युत्तरवर्ति वस्तु विनिवेद्यते।"[७०४] इति।

भागीरथ्याः पुण्ये पश्चिमे कूले कलिकातामहानगर्या नातिदूरे श्रीनृत्यगोपालमुखोपाध्यायो नाम चिरन्तनः प्रियसुहृदासीत् कालीपदस्य। स हि स्वकुलोचित-कालानुगुण-ब्राह्मणनिष्ठादिगुणगणेन सुचिरादेव श्रद्धामतिसमिद्धाम् अध्याकार्षीत् सज्जनानाम्। स खलु श्रीसत्यनारायणात्मनि परमात्मनि स्कन्दपुराणान्तर्गत-रेवाखण्डस्य गीर्वाणवाणीमयं श्रीसत्यनारायणवृत्तान्तं पद्यमय-वङ्गभाषया सर्वथा मूलानुगतया निःशेषमनूद्य उपचिकीर्षया सर्वेषामुपानयत् प्राकाश्यम्। तस्य तदनुवादकृत्योपक्रमे केनापि कारणान्तरेण तत्प्रेरणया एव संस्कृतमयं

[७०४]सत्यानुभवम् (भूमिका)।

तन्मूलम् आदितः अन्तिमं यावत् साभिनिवेशं पर्यालोचयन् आसीत् कालीपदः। यथा सत्यपि तत्र प्रतिपाद्यवस्तुगत-विविधवैचित्र्येण संक्षेपानुरोधाद्वा कारणान्तराद्वा वर्णनानां प्रतिपदमेव प्रायेण समुपनयता महती न्यूनता वर्तते। तदस्य न्यूनतापनुत्तये समपेक्षितविभिन्नवृत्तवर्णनोपस्कारेण प्रतिसंस्कारः कृतश्चेद् इदं सुमहदेकं काव्यं भवितुमर्हतीति काव्यकर्तुराशयः। तथाहि सकलसंसारकारणं श्रीसत्यनारायणचरणं शरणीकृत्य ग्रन्थप्रणयनकृत्ये प्रथयते स्म कविवरोऽयम्। अपि च, कालीपदो देवताशक्तौ तथा विश्वसिति, यथा नान्यत्र लौकिकशक्तौ। तदस्य काव्यस्य श्रीसत्यनारायणवद् उपजीवित्वे फलान्तरं भवतु न वा, नूनमनेन भविष्यत्येव दैवतवृत्तानुकीर्तनजन्यः पुण्यपर्याय इत्यत्र न कोऽपि संशयलवः।

काव्येऽस्मिन् स्कन्दपुराणान्तर्गत-रेवाखण्डप्रोक्त-लक्षपतिवणिग्वृत्तमेव सूत्ररूपेण समुपादाय कल्पनास्पर्शात् प्रभूतनवीनवस्तूनि सन्निवेश्य चतुर्विंशतिः सर्गाः स्थापिताः।

तत्र प्रथमसर्गे कलिप्रभाववर्णनम्, द्वितीये रमोपदेशः, तृतीये नारदवैकुण्ठप्रवेशः, चतुर्थे नारदप्रेरणम्, पञ्चमे दरिद्रब्राह्मणभिक्षाटनम्, षष्ठे सर्गे नारदोपदेशः, सप्तमे प्रदोषवर्णनम्, अष्टमे सत्यपूजोत्सवः, नवमे ब्राह्मणवणिक्संवादः, दशमे सर्गे वैश्यकृतसत्यपूजामहोत्सवः, एकादशे लक्षपतिवाणिज्यव्यवसायः, द्वादशे सर्गे वणिग्भवनदाहः, त्रयोदशे वणिग्दुर्गतिसमारम्भः, चतुर्दशे सर्गे सत्यस्य राज्ञीजारापहरणम्, पञ्चदशे सर्गे वणिक्संयमनम्, षोडशे सर्गे वणिक्तमोगृहवासः, सप्तदशे सर्गे सत्यप्रसादः, अष्टादशे सर्गे वणिग्बन्धनमोक्षः, ऊनविंशे वणिक्प्रस्थानम्, विंशे सत्यव्याजः, एकविंशे सर्गे विरूपसत्यसंवादः, द्वाविंशे सर्गे पुनः सत्यप्रसादः, त्रयोविंशे सर्गे वणिक्स्वदेशलाभः, चतुर्विंशे सर्गे वणिजः सर्वविपत्परिमोक्षश्च इत्येते विषयाः। महाकाव्यमिदं सत्यनारायणदेवायोत्सृज्यते महाकविना –

"सत्याय सत्यविभवाय भवातिगाय
भक्तिप्रियाय भवभीतिविभञ्जनाय।
तन्मामगीतपरिपीतकलङ्कशङ्कं
सत्यानुभावमिदमद्य समुत्सृजामि"[७०५]॥ इति।

[७०५]सत्यानुभावम् (वस्तुसंक्षेपः)।

२. काव्यशास्त्रदिशा विश्लेषणम्

साम्प्रतं विद्यन्ते कालान्तरे चावर्तन्त केचन तथा कवयो येषां काव्येषु समालोच्यमानेषु बहुत्रैव स्थूलदृशामपि प्राचीनकविनिबद्धकाव्यानुकृतिः प्रत्यक्षीभवति, अन्ये च सुगमपदक्रमोपन्यासेन काव्यस्य गौरवहानिं सम्भावयन्तो दुरूहपदानुबन्धेन स्वस्वकाव्यं मण्डयन्ति, स्वीयशास्त्रवैदुष्य-प्रतिपिपादिषया च बलात्कारेणापि तत्तदङ्लकारशास्त्राद्युक्तविषयविशेषान् आहृत्य आहृत्य स्वकाव्येषु सन्निवेशयन्ति। केचिदपरे पुनः कालदेशाद्यनुपयुक्त-वस्तुविशेषवर्णनासन्निवेशेन श्रोतॄणां वाचकानाञ्च स्वकाव्यानुशीलनजन्यं रसानुभवं विघटयन्ति। केचिच्च महाकवयोऽपि राराज्यन्ते ये प्रसङ्गायतं विषयविशेषं तथा पृथक्कृत्य वर्णयन्ति येन प्रकृतवस्तुविस्मरणेन सामाजिकानाम् अत्यर्थं रसविच्छेदः समापतति। तथाहि काव्यकर्त्रा कालीपदेन अभ्यधायि – 'अस्माकं प्रकृतकाव्यनिर्माणावसरे ज्ञानतः सर्वथा तत्तद्दोषान् परिजिहीर्षतामपि ज्ञानतो यद्युपनतास्तेषु केचित्तदा कृपया नवीना कृतिरियमिति विज्ञानेन वयं क्षन्तव्याः'[७०६] इति।

अत्र वर्णनायाम् आधुनिकवस्तूनि यथोपयोगम् अनेकस्थानेषु उपन्यस्तानि। यानि खलु काव्यरसानुभवैषिणाम् आधुनिकानाम् अन्तःकरणकामनया सुसंवदन्ति। अत्र नायिका कलावती तथा च नायकः धीरोदात्तगुणान्वितः शङ्खपतिः। तयोर्मिलनेन महाकाव्यमिदं समाप्तिं गतमिति। काव्यमिदं दाम्पत्यं प्रणयं प्रगुणीकरोति।

'सर्गबन्धो महाकाव्य'मित्यादिलक्षणैः नितरां समन्वितं चतुर्विंशतिसर्गसम्पूर्णं सूर्योदय-प्रदोषादिवर्णनोपेतं वसन्ततिलक-शार्दूलविक्रीडित-वंशस्थविल-द्रुतविलम्बितादिवृत्तमहिम्ना अष्टदल-पद्मबन्धानां भूरिः प्रयोगैः २१५० मितश्लोकैः विरचितमिदं महाकाव्यम्। काव्येऽस्मिन् क्वचिन्माघस्य, क्वचिद्वा भट्टिकवेः, कालिदासस्य च प्रभावात् काव्यशोभा विवर्धिता। सुरसिकः कविरयं पल्लीप्रकृतेः रमणीयञ्चित्रं वर्णयति –

"पथिकनयनभीतेः कापि पल्लीकुमारी
निजपरिजनसङ्गं सेवमाना सलज्जा।

[७०६]सत्यानुभावम् (भूमिका)।

अलसनयनरश्मिं न्यस्य पादाग्रभागे
मृदुगतिरतिमुग्धा स्निग्धामानर्च्चरभ्याम्"॥[७०७]

महाकाव्यमिदं शान्तरसप्रधानम्। विश्वनाथादिभिः आलङ्कारिकैः उक्तानि महाकाव्यवैशिष्ट्यानि महाकाव्येऽस्मिन् सर्वतोभावेन विलसन्तीति कृत्वा उत्तमकाव्य-श्रेण्यां महाकाव्यमिदं समापततीति विशेषः।

ख). मन्दाक्रान्तावृत्तम्

काश्यपकविना अकाले स्वर्गमाप्ताया राजलक्ष्मीसमाख्यायाः पत्न्याः चिरं संस्मृतये 'मन्दाक्रान्तावृत्त'मिति काव्यं ग्रथितम्। खण्डकाव्यमिदं षड्विलाससम्पूर्णम्। प्रथमविलासस्य नाम 'कोट्टलपत्तनवर्णन'मिति। कोट्टलपल्ल्या वास्तविकं समाज-संस्कृत्यादिमूलकं रमणीयचित्रं चित्रितं वर्तते –

"एवं नानागुणपरिचयैः पत्तनं कोट्टलं तन्
नित्यं संवर्द्धयति धरणौ भारतस्याभिमानम्।
क्षौणी सर्वा यदि च भजते तुल्यरूपादियोगं
स्वाधेयानां गुणगणवशात्ते कापि शस्ता तथापि"[७०८]॥ इति।

पूर्ववङ्गप्रदेशान्तर्गते कोट्टलाख्यमहापुरे सद्वृत्तभूसुरः विप्रदासाख्यः कश्चनासीत्। विद्याचारादिसम्पन्नो विष्णुदासस्तस्यात्मजः। तस्य विष्णुदासस्य देवसुतोपमः सुरो बभूव। पितामहस्तस्य पुत्रस्य नाम चकार 'श्यामादास' इति। स हि चण्डीशतवृत्तिपाठाज्जनिं लेभे। तथाहि निगद्यते विषयेऽस्मिन् –

"चण्डीपाठात् स्वरविघटनं व्यर्थमत्यर्थकष्टं
ध्यानं स्तोत्रं विफलमखिलं शान्तये मन्त्रजापः।
तद्विज्ञानाम्लमिह सुरालम्बनेनेति वाणी
सर्वत्रैव क्षितिपरिसरे वर्त्ततां सुप्रचारा"[७०९]॥ इति।

प्रथमशिक्षायां समाप्तायां स्वके गेहे स विशिष्टविद्यालाभार्थं दूरदेशे वासितः।

[७०७]सत्यानुभावम् – ७।१०।
[७०८]मन्दाक्रान्तावृत्तम् (१।१११)।
[७०९]तत्रैव (२।४८)।

स्वगुरोः सन्निधौ सुचिरं वसन् विविधविद्यासु सयत्नं स ज्ञानमर्जितवान्। चतुर्थविलासे द्वादशाधिकशतमिता श्लोका विद्यन्ते। तत्रादिमे भागे श्यामादासस्य गुरोः सविधे विद्याभ्यासो वर्णितः तथ्यपुरस्कारेण। कवेः वर्णनायाम् – श्यामादासः प्रकृतिनिपुणः प्रायशः सूक्ष्मदर्शी, वाक्ये वाचस्पतिरिव पटुर्जेतृकीर्तिं प्रपेदे। तर्कशास्त्रे श्यामादासः क्रमेण विद्यार्थिमुख्यः परिणतश्चाभूत्। गुरुः वाणीनाथः स्वतनयगुणेनैव गर्वमनुभूतवान्। तथाहि विषयेऽस्मिन् उच्यते –

"वाणीनाथो रहसि तमतिस्नेहमाहूय काले
साशीर्वादं शिरसि निदधत् स्वं करं प्राह मुग्धः।
स्वस्त्यास्तां ते प्रियतम गतस्त्वं चिदम्भोधिपारं
पाठस्यान्ते तदिह गुरवे दक्षिणा प्रदेया"[७१०]॥ इति।

ततः गुरुः वाणीनाथः शिष्यं श्यामादासं निकषा स्वदक्षिणां प्रार्थितवान्। तथाहि गद्यमुखेन कालीपदेन स्वलेखन्या उक्तम् –

"एका कन्या मम सुचरिता वर्णमात्रेण कृष्णा
नाम्ना राधा पृथुकसमयादप्रगल्भस्वभावा।
या वः सर्वान् रमयति चिरं सोदरत्वेन मत्वा
तां दत्वा ते घटयितुमिच्छामि जामातरं त्वाम्"[७११]॥ इति।

तस्य विद्याग्रहणकर्मणि समाप्ते सति कालीपदः गुरोः कन्यामुपरेमे। तेन असौ दृढमर्थितः। पूर्वं गुरोः सुतां प्रति कालीपद आसीत् अतीव स्नेहशीलः। परं विवाहात् परतः कृष्णां राधालक्ष्मीं प्रीत्या नासौ जग्राह। राधा पितृगृहस्य सर्वबान्धवान् परित्यज्य पतिगृहं प्राप्य सर्वबान्धवान् परिजनान् च प्रीणयित्वापि शीलाद्यैः पत्युः न प्रीतिमधिगतवती। कालीपदस्य कृते राधादर्शनमासीत् अतीवाप्रियम्। तथाहि विषयेऽस्मिन् पद्यमिदमनुसन्धेयं –

"पूर्वं यस्यां गुरुकुलगतः स्नेहमेव प्रपेदे
सौदर्यायामिव गुरुसुतेत्यस्मरन् रूपदैन्यम्।

[७१०]मन्दाक्रान्तावृत्तम् (४।८०)।
[७११]तत्रैव (४।८७)।

तस्यां मन्दग्रहविभवतो दारभूयं गतायां
द्वेषः स्नेहं बत विघटयन्नन्तवासाम्बभूव"[७१२]॥ इति।

तथाहि कालीपदः पितुर्विद्यालयं स्वाश्रयं सदा व्यधात्। पञ्चमविलासे राधालक्ष्म्याः रोगाक्रान्तजीवनं करुणातिकरुणेन वर्णितम्। क्रमेण पत्युः आत्मन्यवज्ञया वृद्धिं प्राप्तया सा राधा निद्राहारादिकं तत्याज स्वजीवनस्यार्थं नानुमेय। जीवने निर्व्यपेक्षा असौ निद्राहारादिवर्जनात् गुरुणा राजयक्ष्मणा रोगेण आक्रान्ताजनि। क्रमेण रोगो वबृधे। चिकित्सा च व्यर्थतामगात्। राधाया रोगशय्यायामुपविष्टः कदाचन नानाकोमलभाषितैः क्षमां सम्प्रार्थयाञ्चक्रे। राधया याचितोऽप्यन्ते ब्रूते प्रस्खलिताक्षरम् – 'स्वप्नेऽपि मे प्रिया नान्या भविता यदि ते मृतिः' इति। तेनासाध्येन रोगेण साचिरेण निःशेषान् शीलाद्याकृष्टबान्धवान् शोके निमज्ज्य असून् जहौ।

तदनन्तरं वैधविधानान्ते पुनः करे परिग्रहे पितामहः श्यामादासप्रवृत्त्यर्थं यत्नं चक्रे। ततः अचिरेण गृहं परित्यज्य तेन रक्षित आत्मा। क्रमेण च नवद्वीपं गत्वा तत्र स उवास। शिष्याध्यापनकृत्याद्यैः सुमहद् यशः प्रपेदे। मन्त्रवज्जाह्नवीतटे राधेति चाजपत् नित्यमेव। पूर्वं प्राणपरित्यागात् स सादरं शिष्यान् आह –

"पितुर्मे विष्णुदासस्य प्रसिद्धभवनान्तिके
राधा श्यशानं सम्प्राप्य सेयं वो गुरुदक्षिणा"॥ इति।

शिष्याः तदनुसारं भक्त्या तद्देहवाहिनः यथाविधि राधाश्मशाने तद्देहदाहं चक्रुः। 'दम्पतिप्रेमतीर्थ'मिति नाम्ना तत् स्थानं सुप्रथितं भुवि।

२. गीतिकाव्यत्वेन मन्दाक्रान्तावृत्तस्य मूल्यम्

खण्डकाव्यमिदं दाम्पत्यप्रणयं प्रगुणीकरोति ६५९ मन्दाक्रान्ताछन्दोभिः। नामकरणं काव्यस्य गर्भितार्थप्रकाशमिति विश्वनाथमतं शिरसिकृत्य वक्तुमलम् – 'मन्दः शनिः, तेनाक्रान्ता मन्दाक्रान्ता' इति व्युत्पत्त्या शनिदशाप्रभावात् नायकः कथंकारं नायिकाया दूरे स्थितः, तदुपरतौ च नितरां दुःखितः सन् स्वप्रणयभावनां प्रकटीकरोति इति अन्वर्थसंज्ञकं काव्यमिदम्। विरही कविः कालीपदः स्वकृतकर्मणः कारणाद् अकाले पत्नीं जहार। स्वाभाविकगत्या तस्य हृदोऽन्तस्थलाद् बहिर्गतान्तःलीनानुभूतिरूपा

[७१२]मन्दाक्रान्तावृत्तम् (४।१०७)।

श्लोकावली –

"राधा पत्युर्विरहविधुरा चक्रवाकीव दूना
श्वश्र्वा सार्द्धं विरहशयनं संश्रयन्ती विलोला।
स्वीयं भाग्यं विषमविषमं मानिनाधिक्षिपन्ती
रात्रिं चिन्तागहनमनसा जापयामामनैषीत्॥"[७१३]

ग). योगिभक्तचरितम्

नगेन्द्रनाभजीवनाधारितं गुणभावालंकारैः सम्यक्तयानुरञ्जितं 'योगिभक्तचरितम्' इति काव्यम्। महाकविना भक्तिरसेनार्द्रीकृत्य च सहृदयसामाजिकेभ्यः उपायनीकृतम्। सुमधुरया छन्दोबद्धया गीर्वाणवाण्या नगेन्द्रनाथस्य जीवनकथा काव्यरूपेण परिणमय्य निरमायि। तद्यथार्थमेव शब्दानां लालित्येन विषयाणां गौरवेण प्रयोगनैपुण्येन च भक्तिरसाप्लुतानां सहृदयानामपूर्वमानन्दसन्दोहमाप्नोति। ग्रन्थस्यास्य प्रतिपाद्यविषये कवेर्वर्णनानैपुण्यञ्चतुरचेतसा चेतसि कमपि चमत्कारातिशयमादधाति। अंशतो यदि 'योगिभक्तचरित'मिति काव्यमिदं पठितुं अनुपालितञ्च स्यात्तदास्मिन्नपि युगे जगतोऽस्य महाकल्याणम् –

"यः पातकविनाशाय धर्मसंस्थापनार्थाय च।
लीलाशरीरमास्थाय सञ्जातो धरणीतले॥
तस्य श्रीहरिभक्तस्य योगिवर्यस्य धीमतः।
नगेन्द्रनाथपादस्य चरितमस्तु शर्यदम्"॥ इति।

कथङ्कारमाध्यात्मिकरूपं दधद्दैवतस्वरूपमुपालभतेत्येव वृत्तं तथ्यपुरःसरं सुसंस्कृत्य काव्यायितं वरीवर्ति। काव्यस्यास्य प्रतिपदं महाकवेर्भक्तिरसस्य फल्गुधारा प्रवहति। इह काव्ये नगेन्द्रनाथदेवस्यालौकिकमाहात्म्यं भक्तवृन्दांश्च प्रति प्रेम वर्णितं। श्रीश्रीनगेन्द्रमठपत्रिकायामितः काव्यमिदं प्रकाशम्।

घ. आलोकतिमिरवैरम्

'आलोकतिमिरवैर'मिति खण्डकाव्यं काश्यपकविना विरच्य १९६० ईशवीयाब्दे दिल्लीस्थसंस्कृतप्रतिभापत्रिकायां प्रकाशितम्।

[७१३]मन्दाक्रान्तावृत्तम् (५।१०८)।

खण्डकाव्यस्यास्य 'आलोकप्रथमलपितं' नाम पूर्ववैरं तथा च 'तिमिरलपितं' नाम मध्यमवैरमिति भागद्वयं वर्तते। काव्यस्यास्य नाम श्रुत्वाभिधातुमलं यदालोकतिमिरयोश्चिरवैरितात्र काव्यायिता वर्तते। मिथः भुवने तिमिरालोकयुगे विरोधिता प्रथते बहोः कालात्। तिमिरे सति न घना प्रभा तदास्पदे तिमिरं नापि घनं वर्तते। गगने सूर्योदये तिमिरं दूरमुपैति साध्यसात्परं सितभानुसमुद्गमे निशि तन्मुञ्चति निजां सान्द्रताम्। तदमुष्य गुणादिहेतुभिर्द्रव्यपदार्थता यथा प्रमिता तथैव पररूपविकाशनादिना स तेज इति प्रसिद्धति। तिमिरस्य तत्त्वनिर्णये सुधियां विप्रतिपत्तिरायत्ता। पृथगेव बुधाः स्वयुक्तिभिः स्वपक्षरक्षणं प्रणमन्ति। कैश्चित् तिमिरं द्रव्यतया व्यवस्थितम्। न्याययुक्त्या गुणकर्महेतुतः तिमिरं द्रव्यमिति मतिः। चापरे लाघवप्रिया तद्भावं मदतः प्रचक्षते। ते कथयन्ति दोषसम्भवां गुणकर्माधिगतिं तमोगताम्। विरहेण समं प्रतियोगी विरोधभाग् नियतं व्यवस्थितः। तत एव तथा तमस्त्विषोर्वैरमभूच्चिरन्तनं प्रथितं जगतीतले। तमसः कारणात्सर्वेषां मानवानामसौविध्यं कविनात्र वास्तवोदाहरणमुखेनोपस्थापितम्। पथिकाः पथि दृप्ततामसे पदमर्शसूचिते मृदुगत्या प्रतिपदं विपदापतनं दृढमुत्प्रेक्ष्य दुःखिताश्चलन्ति। तिमिरकारणाच्चौरा निर्भयं परवित्तानि हरन्ति। एवमालोकः सपरिकरं गुणाभिमानादित्येवं वीर्यदीप्तं वचनमुदीर्य प्रम्लानं तिमिरमवेक्ष्य लज्जयैव विजयभवश्रियं व्याकोचां प्रपेदे।

आलोकेन तिमिरं बहुधा निन्दितम्। ततो मानसविप्लवादिव खरशान्तसयुक्तिकोक्तिभिस्तिमिरमुखेनालोकयशो रोचिष्णुतया कविना खण्डितम्। तथाह्युक्तम् –

"अयि किन्नु विरत्थसे मुधा कथया ते व्यथते मनः सताम्।
अपराधलवेन विच्युते मयि ते द्वेषमतिः किमीदृशी" इति॥

आलोकः सर्वदा गवाक्षवर्त्मना तिमिरमपसार्य वीर्यभाग् भवति। परं तिमिरं द्रुलताद्यवकाशवर्त्मना हृदि शिवास्पदं सम्भाव्य गहनं विशति। तथाहि तत्र तं दुनोति विशन् आलोकः आलोकस्य भिया क्रमादधिकारं विजहेत्। ततस्तिमिरं गिरिगह्वरमेव संश्रये यथा क्षुद्रधराधिपो विजितो भवति। इत्थमालोकेनोत्थापितां युक्तिं स्ववचोभिः खण्डयित्वा स्वमाहात्म्यं प्रतिष्ठापयति तिमिरम्। स तिमिरं ब्रुते – दोषशते सत्यपि साधवो न हीतरस्य निन्दां कुर्वते। खलु एवान्यस्य सद्गुणानपसार्य

दूषणं प्रतनोति। क्षुधया तृष्णया च मानवा दुर्बला बलवन्तोऽपि पुराद्बहिः स्थिता निशि तिमिरमुपगम्य सुखेन साहसं मङ्गलं समुपायान्ति। सुप्तमानवे नगरे भीतिबलेन ते वर्जिताः प्रविशन्ति जनयन्त्यपि च पृथग्विधैर्निजकाम्यैरनिशैश्चित्ततर्पणम्। निशि सुप्तवतां गेहे भवति न कापि विपद्, ततः परमप्रमादिनां कथमन्यः खलु दोषभाग् भवेदिति प्रश्नस्तिमिरस्य। बहुकल्याणफलप्रदायिनां श्रुतिबोधितयागकर्मणां हिंसनदोषचिन्तया विबुधा निन्दनमाचरन्ति। अकल्याणस्य लवो हि तिमिरस्य कृते शिवसङ्गे सुतरां प्रलीये। ललितोज्ज्वलभूरिदीधितो हरिणाङ्के हरिणो न गण्यन्ते। परदोषकथनातिरोहिता यदि स्वदोषः स्यात्तर्हि परदोषवार्त्तया निजदोषान् परिचिन्तयात्मनालम्। तथाहि तिमिरं कथयति यदसतां नयोऽयं यदिमे निजदोषे अन्धदृष्टयः सर्वतः परं परदोषेषु सहस्रलोचनाः परगौरवबोधवर्जिताः। इत्थं तीक्ष्णशान्तं वचनमुदीर्य त्वरितं महाद्रिकुक्षिं तिमिरमगात् – "लघु चरितमहर्षिवैरिभीता सहदनुगा हि भवन्ति बुद्धिमन्तः"।

ङ). आशुतोषावदानम्

'वङ्गदेशस्य व्याघ्र' इत्याख्यया सुपरिचितस्य आशुतोषमुखोपाध्यायस्य समुत्साहव्यञ्जकजीवनवृत्तमाधारीकृत्य 'आशुतोषावदान'मिति खण्डकाव्यं काश्यप-कविना निरमायि। विलसति काव्यस्यास्य प्रतिच्छत्रं आशुतोषमुखोपाध्यायस्य वङ्गवास्तव्यान् प्रति महद् योगदानम्। काव्येऽस्मिन्वीर्यवतो मुखोपाध्यायस्य दृप्त-परहितैषि-महानुभवादिवैशिष्ट्योपेतचरित्रं किंवदन्त्याश्रयेण वीररसाङ्गिपदत्वेन कालीपदस्य कल्पनालोकेन च रोचिष्णुतया काव्यायितं वर्तते। काव्यमिदम् अद्यापि अप्रकाशितम्।

६. कालीपदस्यानुवादसाहित्यम्

इदानीन्तनमनूदितसाहित्यं स्वकं नवनवीनं भव्यञ्च प्रस्थानं निर्माति इतरभाषाणां निरवद्यकाव्यास्वादने तत्पर्यायवाचकशब्दप्रयोगचमत्कारेण च वङ्गदेशेऽधुना क्वचिदधिकतया अनूदितसंस्कृतसाहित्यं प्रसरति। अनुवादकर्मण्यस्मिन् कालीपदस्य सविशेषं योगदानं वर्तते। अनेन गीताया, चण्ड्याः तथा च गीताञ्जलेः अनुवादो विहितः।

अ). गीताञ्जलिच्छाया

रवीन्द्रनाथेन प्रणीतो 'गीताञ्जलि'रिति काव्यग्रन्थः समग्रे प्रपञ्चे प्रसिद्धिं प्राप्तोऽस्ति गीताञ्जलिकृत्यैव रवीन्द्रनाथो नोवेलविरुदेन सभाजितोऽभवत्। गीताञ्जलेः प्रथमप्रकाशकालः १९१० खृष्टवर्षोऽभूत्। आङ्गलसंस्करणं १९१२ ईशवीयाब्दे प्रकाशितम्। इदमपि किञ्चन स्मरणीयं तथ्यं यत् आङ्गभाषया गीताञ्जलेरनुवाद एव नोवेलप्रशस्तये विवेचितः सम्मानितश्च। अयञ्च न तु मूलभाषया नाम वङ्गभाषया लिखितो ग्रन्थः। 'गीताञ्जलिः', 'नैवेद्यम्', 'शिशुः', 'खेया', 'गीतिमाल्यम्', 'चैतालिः', 'कल्पना', 'स्मरणम्', 'उत्सर्गः', 'अचलायतनम्' इत्येतेभ्यः कविकृतकाव्यसंग्रहेभ्यः काश्चन कविताः संगृह्य गीताञ्जलेराङ्गलानुवादो रवीन्द्रनाथेनैव कृतः। अनन्तरं तस्यानुवादकर्मणः परिष्कारं विधाय प्रकाशनं जातम्। अनन्तरकाले विश्वस्य विविधभाषाभिर्गीताञ्जलेरनुवादकार्यं सातत्येन प्रचलदस्ति।

न केनापि मूलगीताञ्जलेः संस्कृतानुवादः सम्पूर्णतया संसाधितः ऋते कालीपदतर्काचार्यात्। जीवनसायाह्नमुपागतेन कालीपदेन विविधकर्मसु व्यापृतेनापि कविगुरुवर्यस्य पद्यानि विशेषेण गीताञ्जलिकाव्यसंग्रहस्य पद्यानि गीर्वाणवाण्यामनूद्य न केवलं वङ्गीयानामपि चावङ्गीयानां संस्कृतसेविनां रवीन्द्रसाहित्यावबोधनाय सौकर्यं संसाधितम्। महाकवेरशेषश्रद्धास्पदभूतायाः सुरभारत्याः सौभाग्यं भृशं वर्धितम्। अनुवादस्यास्य विशेषत्वमत्रैव यत्कालीपदतर्काचार्येण अनुवादकेन सर्वाण्येव पद्यानि गद्यच्छन्दसा सुरचितच्छन्दसा सज्जीकृतानि। तत्रत्यानि पद्यानि 'प्रार्थना', 'दया', 'पाषाणप्रतिमा', 'अपमानमहिमा', 'अधिकारी' चेत्यादीनि। तथा च व्याकरणशास्त्रस्य कठोरशासनशतैः शासितोऽपि छन्दःशास्त्रस्य गुरुलघुमात्रानिशितपथेन न गच्छतानुवादकेन मुलकवेर्हृद्भावानुगुणं भाषान्तरकरणरूपानुवादलक्ष्यान्न भ्रष्टम्। क्वचिद्वाक्षरशोऽनुवादोऽपि तेन कृतः। किन्तु सहृदयहृदयानां सकाशे कवेर्भावान् उपस्थापयितुमाधिक्येन विहितो भावानुवादः।

भक्तिसुधारससिक्तो रवीन्द्रो वैदिकवाङ्मये निष्णातः सन् प्रथमं गीतं गायति –

"आमार माथा नत करे दाओ हे तोमार
चरणधुलार तले।

सकल अहंकार हे आमार
डुवाओ चोखेर जले।
निजेरे करिते गौरव दान
निजेरे केवलि करि अपमान,
आपनारे शुधु घेरिया घेरिया
घुरे मरि पले पले
सकल अहङ्कार हे आमार
डुवाओ चोखेर जले।
आमारे ना येन करि प्रचार
आमार आपन काजे,
तोमारि इच्छा करो हे पूर्ण
आमार जीवन माझे।
याचि हे तोमार चरम शान्ति,
पराने तोमार परम कान्ति,
आमारे आडाल करिया दाँडाओ
हृदयपद्मदले।
सकल अहंकार हे आमार
डुवाओ चोखेर जले॥इति

कालीपदस्यानुवाद एवम्–

"(मम) शीर्षं नय नतिमयि! तव
चरणरेणुतले।
सकलमहङ्कारं मम
मज्जयाश्रुजले।
साधयितुं स्वगौरवम्,
सदा दधे स्वपरिभवम्,
वृथा, केवलमावेष्ट्य निजं

भ्रमामि प्रतिपले।
सकलमहंकारं मम
मज्जयाश्रुजले।
प्रचार्य्यतां न निजगुणो
मयका निजकर्मणे,
पूर्णं कुरु निजवाञ्छित-
मयि। तव मम जीवने।
चरमशान्तिरर्थ्या तव,
परमकान्तिरन्तस्तव,
तिष्ठ व्यवधाय मां हि हृदयपद्मजले।
सकलमहंकारं मम मज्जयाश्रुजले"॥ इति।

अनुवादोऽयं सर्वोत्तमतया प्रतिभाति। अनुवादेऽस्मिन् मौलिको भावः शब्दविन्यासश्च प्रायेणाव्याहतौ स्तः। केवलमेका जिज्ञासा – 'चरणरेणुतले' इत्यत्र 'चरणधूलितले' इति पाठे कृते शब्दविन्यासः समधिको मूलानुगः किं न स्यात्! अत्र सुधियः प्रमाणम्। क्वचित् 'हे' इत्यस्य अनुवादार्थं कश्चित् शब्दविशेषो नोपात्तः। 'मज्जयाश्रुजले' इत्यत्र 'मज्जयाक्षिजले' इति पाठः साधीयान् स्यान्न वेति सुधीभिर्भाव्यम्। कथमिति चेदुच्यते 'अश्रु' इति पदं नेत्रजलस्य पर्यायवाचकम्। परन्तु एतादृशः प्रयोगो भूयान् लक्ष्यते। मूले अस्ति – 'चोखेर जले'। अतः 'अक्षिजले' इत्यनुवादे न पक्षपातः।

गीताञ्जलिगतं १०६ संङ्ख्यकं गीतम् – 'हे मोर चित्त, पुण्यतीर्थे जागो रे धीरे...' इत्यादिकं बहुभिरनूदितम्। तत्र कालीपदेन विहितोऽनुवादो समधिकमूलानुगतया प्रतिभाति। मूलकवितायाः प्रारम्भांशः –

"हे मार चित्त, पुण्य तीर्थे, जागो रे धीरे –
एइ भारतेर महामानवेर, सागरतीरे।
हेथाय दाँडाये दु-बाहु वाडाये, नमि नरदेवतारे,
उदार छन्दे परमानन्दे, वन्दन करि ताँरे"॥ इति।

तर्काचार्यस्यानुवादः –

"हे मम मानस पावनतीर्थे, मन्दं जागृहि रे,
एतद्भारतमहिमसमन्वितमानवसागरतीरे।
अत्र स्थित्वा प्रसार्य बाहू, नरदैवतमभिवन्दे,
समहाच्छन्दः परमानन्दं, तद्वन्दनमनुविन्दे"॥ इति।

तर्काचार्येण मुक्तकच्छन्दसानुवादो विहितः, अन्यैः वसन्ततिलकवृत्तेन। 'जागो' इत्यस्यानुवादे 'सर्वैर्जागृही'ति पदं व्यवहृतम्। तर्काचार्येण 'चित्ते'ति पदस्य 'मानसे'ति अनुवादः कृतः। 'धीरे' इत्यस्यानुवादे तर्काचार्येण 'मन्द'मिति पदं गृहीतम्। 'रे' इति द्वितीयं मूलस्थितं सम्बोधनसूचकं पदं तर्काचार्येण विहाय सर्वैरन्यैरनुवादकैः परिहृतम्। तर्काचार्येण 'पावनतीर्थे' इत्यनुवादो विहितः 'पुण्यतीर्थे' इति पदस्य। 'ए भारतेर महामानवेर सागरतीरे' इत्यस्यानुवादे 'प्राचीने'ति पदमधिकं पूरितं धीरेन्द्रनाथेनानुवादकेन। परम कालीपदेन 'एतद्भारतमहिम' इत्यनुवादः कृत इति कृत्वानुवादोऽयं प्रशस्यतर इति मन्ये। 'हेथाय दाँडाये' इत्यादिपंक्तिद्वितयस्यानुवादे तर्काचार्यः प्रशस्यतमः प्रतिभाति।

अस्मिन्ननुवादे मौलिको भावः शब्दविन्यासश्चाव्याहतौ वर्तेते प्रायेण। अनूदितपद्यस्य भाषा सुरगीरप्यतीव सुषमा, मञ्जुला, सरला च। प्रतिभात्यनुवादोऽयं सर्वोत्तमतया। काश्यपकवेरयमनुवादः सत्यमेव मूलगीताञ्जलेः छायाविशेषः। तथाह्यनुवादस्य नामकरणमपि यथार्थमिति मामकी मतिः। एतन्निश्चप्रचमभिधातुमलं यदनुवादकत्वेन कालीपदः ध्रुवमेव विशिष्टस्थानमधिकरोतीत्यत्र नास्ति संशयलवः कश्चित्।

आ). गीताप्रतिच्छाया

न केवलं संस्कृतानुवादे कालीपदस्य विशेषत्वं वरीवर्ति, अपि च श्रीमद्भगवद्गीतायाः 'Blank Verse' इति नव्यच्छन्दसा कृतो मूलानुरूपो वङ्गानुवादः खलु 'गीताप्रतिच्छाये'ति। अनुवादोऽयं देवयानपत्रिकायां प्रचरद्रूपतां गतः। अनुवादकेन श्रीमद्भगवद्गीताया भावसम्पत्तिं मनसिकृत्य प्रेक्षापटञ्च सम्यक्तयावबुध्य क्वचिद्भावानुवादः क्वचिच्चाक्षरशोऽनुवादः कृतः। ये खलु वङ्गीयाः संस्कृतं न जानन्ति,

गीतार्थविबोधनाय गीताञ्च मातृभाषयानूद्य सौकर्यमनेन संसाधितम्। इह अनुवादे परिस्फुरन्ति काश्चन मौलिकसौन्दर्यच्छटा, शब्दविन्यासचारुत्वं भङ्गिभणितिवक्रिमा चेति।

ङ). श्रीश्रीचण्डीप्रतिच्छाया

कालीपदविरचिता 'श्रीश्रीचण्डीप्रतिच्छाया' हि मार्कण्डेयचण्डीग्रन्थानुवादो, यश्च 'Blank Verse' इति छन्दसा लिखितो वङ्गभाषामयः। तेनानुवादोऽयं सरलवङ्गभाषया भावसम्पत्त्याः पूर्णप्राधान्यं विधाय कृतः। सुदर्शनपत्रिकायामंशतः प्रकाशितोऽनुवादोऽयम्।

७. उपसंहृतिः

परिशेषे वक्तुमलं यत् कालीपदतर्काचार्यः समासीत् कश्चन महान् कारयितृप्रतिभासम्पन्नः पण्डितप्रवरः महाकविः। नान्यथा श्रव्यकाव्यान्यनायासेन विरचयितुं नार्होऽभवत्। तस्य सर्वाणि काव्यानि विश्वनाथाद्यालंकारिकैर्विहितानि वैशिष्ट्यान्यनुसृत्य ग्रथितानि। भाषायाः काठिन्यमपि काव्यानां प्रतिपदं परिलसति। वैदर्भीरीत्याः प्रभावो दरीदृश्यते। कवेरसाधारणप्रतिभादीप्त्या सामान्यः शब्दो वार्थो वा विच्छित्तिमहिम्ना महिमान्वितो भवति। प्रसङ्गेऽस्मिन् मनसि नीलकण्ठदीक्षितस्योक्तिरायाति –

"यानेव शब्दान् वयमुच्चारयामो यानेव चार्थान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति"॥ इति।

कालीपदस्य संस्कृतकाव्येषु प्राचीनशब्दानां व्यङ्ग्यपरकतया विशिष्टप्रयोगा दृश्यन्तेऽस्माभिः। गुणालंकारभावरसैः काश्यपकवेः काव्यानि रसाप्लुतान्यभवन्। किञ्च, "पुराणमित्येव न साधु न चापि काव्यं नवमित्यवद्यम्" इति कालिदासभणितिं शिरसा निधाय शक्यवचं यत् कालीपदः पुराणं काव्यवस्तु स्वमनसो माधुरीं मेलयित्वा तथा च वस्त्वाङ्गिकादिभिर्नवीनं वृत्वा सहृदयहृदयेभ्यः उपायनीकरोति।

६. अर्वाचीनसंस्कृतसाहित्ये वीरेन्द्रकुमारभट्टाचार्यस्य योगदानम्

०. भूमिका

प्रचलितपरम्परामतिरिच्य नवीनखातावच्छिन्नपथेन संस्कृतसाहित्यं रचयन्नासीद् वीरेन्द्रकुमारभट्टाचार्यः। अद्यतनकाले वांलादेशस्य शिलोटमण्डले १९१७ ईशवीयाब्दे लब्धजन्मायं कविः कलिकाताविश्वविद्यालयाद् उच्चशिक्षां समाप्य दर्शनशास्त्रस्य प्राध्यापकपदमलंचकार। परवर्तिनि काले पश्चिमवङ्गसर्वकारस्य विभिन्नमहत्त्वपूर्णप्रशासनपदेषु स नियुक्तोऽभवत्। देशीय-वैदेशिकच्छन्दःसु तथा च राग-रागिणीनां सफलतया प्रयोगे सिद्धहस्तोऽयं कविः संस्कृतसाहित्यस्य प्रथमः सनेट्श्रेणीयकाव्यनिर्माता। यद्यप्यासीन् नाट्यकृद्रूपेण प्रख्यातोऽयं तथापि गीतिकाव्यरचनायां स तैलपूरितदक्षः। न केवलं संस्कृतभाषायां, परं वङ्ग-आङ्गलभाषाभ्यां दार्शनिकप्रबन्धाः काव्यानि च व्यरच्यन्त।

१. वीरेन्द्रकुमारभट्टाचार्यस्य रचनाकणाः

अस्य रचनाप्रपञ्चः अधः समुल्लिख्यते –

क). सनेट्-संग्रहः – कलापिका
ख). नाटकानि – कविकालिदासम्, सिद्धार्थचरितम्, शार्दूलशकटम्, शरणार्थिसंवादः
ग). प्रहसनम् – वेष्टनव्यायोगः
घ). गीतिनाट्यम् – श्रीगीतगौराङ्गम्, शूर्पणखाभिसारम्
ङ). अनुवादकर्म – ओमोरखैयामम्

एतान् प्रकाशितरचनाकणान् अतिरिच्य काश्चित् अप्रकाशिताः कृतयोऽपि वर्तन्ते। ताश्च यथा –

१. मार्जिनाचातुर्यम् (आलिबावा तथा चत्वारिंशतः चौराणां कथामाश्रित्य रचितं नाटकम्)
२. मेघदौत्यम् (मेघदूतमुपजीव्य नाटकम्)

३. लक्षणव्यायोगः (नक्सलवारी-आन्दोलनमवलम्ब्य रूपकम्)

४. सुप्रभास्वयंवरः (अष्टावक्र-सुप्रभयोः प्रणयकथाश्रित्य रचितम्)

५. चार्वाकताण्डवम् (दार्शनिकरूपकम्)

क). कलापिका[७१४]

छन्दःशास्त्रे दर्शनादिशास्त्रेषु च कवेः वीरेन्द्रकुमारभट्टाचार्यस्य नैपुण्यात्तथा च सहजकारयितृप्रतिभया 'कलापिके'यं महच्छ्रेष्ठत्वपदमवाप। पेष्ट्रार्क-शेक्सपीयाराभ्यां प्रतिष्ठितायाः सनेट्परम्परायाः परमाश्चर्यसमन्वयस्तावदियं 'कलापिके'ति। वीरेन्द्रेण सनेट् इति शब्दबन्धाय 'कलापिका' 'संस्तवक'ञ्चेति स्वतन्त्रं नामकरणं विहितम्। वस्तुतः, चतुर्दशपदी कवितेति 'कलापिके'ति नाम्नाभिधीयते। वङ्गसाहित्यप्रपञ्चे मधुसूदनदत्तेन सनेटः प्रथमो व्यवहारः कृतोऽपि रवीन्द्रनाथठक्कुरेण तन्मानोन्नयनं संसाधितम्। प्राध्यापिकाया ऋतायाः चट्टोपाध्यायाया अभिमतं यद् आसामराज्यवास्तव्य आनन्दरामवड़ुया एव संस्कृतसनेटो जन्मदाता इति। आनन्दरामो महता प्रयत्नेन निष्ठया चान्तरिकया समं ध्रुपदीसाहित्यसमयान् नोल्लङ्घ्य पेष्ट्रार्क-स्पेन्सारीय-शेक्सपियीर-मिल्टनीयानां शिल्पशैल्या आश्चर्यसमन्वयेन सनेट्साहित्यमलंकृतवान्। आनन्दरामस्य 'English Sanskrit Dictionary' इत्यस्य ग्रन्थे मङ्गलाचरण-ग्रन्थविसर्जनयोः काव्यद्वयं सनेट्छन्दोभिः प्रस्तुतम्। तस्य जीवनस्य श्रेष्ठकीर्तिस्तावद् अभिधानग्रन्थोऽयम्, यस्य ग्रन्थविसर्जनांशे स्वपित्रादीन् प्रति व्यक्तिनिष्ठभावावेगः प्रतिध्वन्यते –

"स्थित्वा यौ देवकल्पौ प्रथमपदमथो पुस्तकस्यास्य बद्धं
विघ्नः सर्वप्रकारः सततमुपनतो यत्प्रसादान्निरस्तः।
कर्मण्यस्मिन् समाप्ते परिणतमनसानुग्रहानभ्युपेत्य
वन्दे तौ स्वर्गसंस्थौ मम परमगुरुदुर्लभागर्गरामौ"[७१५]॥

ग्रन्थेऽस्मिन् प्राचीनैतिह्याधुनिकयोः ऋद्धसमन्वयेन सज्ञानम् आनन्दरामः संस्कृतकाव्यधर्मं संररक्ष। किन्तु संस्कृतसाहित्ये सनेट्-प्रणयनस्य गुण-परिमाणदृष्ट्या प्रथमं श्रेयो गच्छति वीरेन्द्रकुमारभट्टाचार्याय। तस्मात् तन्नाम इतिहासपुटेषु

[७१४]कलापिका – कविः वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतपुस्तकभाण्डारः, कलकाता, १९६९।

[७१५]कलापिका (तृतीयः श्लोकः)।

स्वर्णाक्षरेण लिखितं स्यात्। साम्प्रतं राजेन्द्रमिश्र-राधावल्लभादयः कोविदकवयः स्व-स्वकारयितृप्रतिभया सनेट्काव्यानि विरच्य संस्कृतसाहित्यं भूषितवन्तः। प्राकरणिकतया राधावल्लभस्य सनेट्काव्यान्यत्र उदाह्रियन्ते –

"अट्लाण्टानगरी गरीयसि मया देशे च दृष्टा पुन-
र्दृष्ट्वा पुष्पततिं वसन्तसमये सन्तोषमाप्तं मनः।
न्यूयार्के भ्रमितं खचुम्बिभवने ताराञ्चिते खे यथा।
कुल्याभिः परिपूरितेऽपि गमितं पीटर्सबर्गे तथा।
वर्णैश्चित्रविचित्ररम्यभवनैर्युक्तस्य वै का कथा।
प्राहानामपुरस्य भाति खलु तद् गन्धर्वसृष्टिर्यथा॥
रम्या सा वियनापुरी विहगवच्चोड्डीय खे संस्थिता।
साहित्यस्य च संस्कृतेश्च निनदैः जोगुञ्जति स्पन्दिता॥
संरब्धं बहुगर्वविस्मयमयं दृष्टं तथा लन्दनं
कान्तारे बहुवृक्षराजिविततं चैकं यथा नन्दनम्॥
जापाने भ्रमितं सुशिल्पमहिते विज्ञानविभ्राजिते
बैङ्काके लसिते तथैव विहृतं सौन्दर्यसारायिते।
दृष्टं सर्वमिदं परन्तु न क्वचित् तं प्राप्तवानीश्वरम्।
दर्शं दर्शमिदं तथापि नगरं तुष्टोऽस्मि बालेश्वरम्"॥

सनेट्काव्ये चतुर्दशपादानि भवन्त्यन्त्ययमकोपेतानि। पेट्रार्कनये, सनेटः भागद्वयम्– अष्टकम् षट्कम् च। तत्रापि अन्त्ययमकं स्यात् – कखखक / कखखक / गघङ गघङ। किन्तु शेक्सपीयारशैल्याम् अष्टकं षटकमिति प्रकारेण विभाजनं न दृग्गोचरीभवति। परन्तु अन्त्ययमकं भवेत् कख कख गघ गघ ङच ङच। ननु सनेटो विषयः क इति चेदुच्यते प्रथमयुगे प्रमैवासीत् सनेटः प्रधानमवलम्बनम्। परवर्तिनि काले सनेटो विषयगतं वैविध्यं संलक्ष्यते। जीवनस्य यासां कासामप्यनुभूत्यां विशेषेण सुख-दुःख-राग-शोकादीनां प्रकाशो वा भवतु नाम, पुस्तकस्य उत्सर्गपत्रेऽपि सनेटो व्यवहारो नास्वाभाविकः।

माङ्गलिकीमेकां विहाय इह ग्रन्थे पञ्चाशत् संस्तवकानि

शेक्सपीयारेणानुप्राणितानि। कवेः 'देहमन्दिरा'ख्यस्य वङ्गभाषालिखितस्य ग्रन्थस्य केचित् संस्कृतानुवादाः कलापिकायां स्थानं लभमानाः लक्ष्यन्ते। किञ्च, अवशिष्टाः श्लोकाः वीरेन्द्रेण कोमलभावोद्दीपकाः नूतनच्छन्दोभिर्निर्मिताः। कवेः पेट्रार्कस्य शैल्या माङ्गलिकी रचितापि ग्रन्थस्यान्यत्र शेक्सपीयारशैल्याः प्रभावो लक्षणीयः। संस्कृतसाहित्यस्य सनेट्संग्रहोऽयं शब्दमाधुर्य-भाव-रसादिभिर्मण्डितो भूत्वा नान्दनिकतामलभत। संस्कृतवृत्तानां वैचित्र्य-भावगाम्भीर्य-पदलालित्यैः वीरेन्द्रस्य संस्तवकान्यपूर्वशोभान्वितान्यभवन्। तथाहि प्राच्यविदुषा राधावल्लभत्रिपाठिनोक्तम् – 'सारे संस्तवक वस्तुतः कविकर्म के प्रति गहरे समर्पण और साधना का परिणाम हैं भट्टाचार्य के संस्तवक अन्त्यनुप्रास के साध छन्द के अक्षुण्ण निर्वाह और उसमें कल्पना और भावसौष्ठव के समन्वय के दुर्लभ उदाहरण हैं'[७१६]। कवेरस्य कृतित्वं स्मारं स्मारं तेनागादि यत् – 'संस्कृतसाहित्यपरिसरे सनेट्जातीयकवितानिर्माणे अयमेव प्रथमतया सम्भाव्यते'[७१७] इति। मद्गुरुवरस्य सीतानाथस्य भाषया वक्तुं शक्यते – 'भावविभूत्या भाषासम्पदा च भट्टाचार्यस्य कविताः सर्वथा निरवद्याः सहृदयहृदयतर्पकाश्चे'[७१८]ति। तथाहि भट्टाचार्यवर्यैर्विरचितानि पञ्चाशत्संख्यकानि संस्तवककाव्यानि नामतः समुल्लिख्यन्तेऽधस्तादावेव –

कलापिका (संस्तवकपञ्चाशिका)।

तनुतीर्थम्	निर्मोचनम्	कल्पलोकः	असंबाधः	आविर्भावः
मुक्तपक्षः	निरुपमा	मृत्युञ्जयः	वासन्तिका	प्रेमशक्तिः
अनुशोकः	वित्तहीनः	मर्मवाणी	वित्तशाली	सृष्टलीला
सत्यप्रेम	आवर्तनम्	दुर्दिनम्	हृतसर्वस्वः	स्मृतिविलासः
विस्मरणम्	जगद्वैचित्र्यम्	पुनर्जन्म	द्वैताद्वैतम्	प्रेममाया
स्नेहच्छद्म	सञ्जीवनी	काव्यामोदः	अनिर्वचनीया	पुष्पबाणवल्ली

[७१६]स.सा.बी.श. पृ. – १०४।
[७१७]संस्कृतसाहित्ये वङ्गीयानामवदानम् : विंशशताब्द्याः परिप्रेक्षे, पृ. – ४८।
[७१८]तदेव।

भ्रष्टलग्नम्	मृगतृष्णिका	मिथ्याचारः	रूपतृष्णा	मोहमुक्तिः
उन्मादना	दुर्भिक्षम्	असंगतिः	कर्मफलम्	पूजापरिहासः
जम्बूद्वीपम्	चित्रतारकाः	देशनायकाः	महाप्रभुः	राजपुरुषाः
अमृतसुताः	चन्द्रजयः	जयपराजयौ	रौरवेशः	युगधर्मः

सनेट्संग्रहेऽस्मिन् संदृश्यते विषयगतं नावीन्यं वैचित्र्यञ्च। तथापि सनेट्काव्ये दृक्पथमायाति प्रेमाश्रयिकवितानां प्राधान्यमाश्चर्यरूपेण। कविः यथा प्रेम्णः पूजकस्तथा कवितासंग्रहे इह स समाजसंस्कारकस्य भूमिकायामवतीर्णः। अत्रोल्लेख्यं यत् संस्कृतभाषाया माहात्म्यमेतत् भाषेयं सर्वयुगस्य मानवचिन्ताम्, अनुभूतिं कपोलकल्पनाञ्चेति वास्तवोचितभङ्ग्या कलयति।

युगप्रभावभावितः कविः कलापिकाख्यं नूतनं काव्यं कौति, यत्र स कोमलप्रणयभावान् व्यवहरति, विस्तारयति कल्पनायाः कल्पलोकम्, निरूपयति सृष्टिलीलातः विविधस्मृतिलीलाविलासान्, वर्णयति हृतसर्वस्वस्य दुर्दिनं दुर्भिक्षञ्च, पूजापार्वणे स्वार्थान्वेषिणां कुटिलतां, मिथ्याचारस्य भ्रष्टलग्नतां तथा च रूपतृष्णायाः मृगतृष्णिकायां द्वैताद्वैतभावाननुभूय मोहमुक्तिं यावत्।

कवयिता वीरेन्द्रः तद्हृदयमन्दिरे तीर्थावाहनं कुर्वन्नस्ति 'तनुतीर्था'ख्य-कवितायाम्। समर्पणमिदं कवेर्मानसलोके क्वचिच्छरीरतर्पणमिव, क्वचित्तु प्राकृतिकसौन्दर्यं प्रति कवेर्दुर्निवारतृष्णेति। तथाहि कविनाभाणि –

"प्रज्वाल्य दीपं कल्पनाप्रतीकं स्निग्धं च हृदार्तिधूपम्।
हुत्वा च तस्यै प्रेमचन्दनाक्तं पुष्पं मम कल्पनायाः"[७१९]॥

तनुतीर्थकवितायां शङ्कराचार्यस्य सौन्दर्यलहर्याः प्रभावः कियदंशेन प्रपतितो दृश्यते। कवेर्मानसनेत्रयोः सदा कलयति प्रसिद्धाङ्गलकवेरुक्तिः – 'Beauty is truth, truth beauty' इति। अर्थात् सत्य-शिव-सुन्दराणां प्रपूजकः कविर्वीरेन्द्रः। तथाह्युक्तं तेन–

[७१९]तनुतीर्थः (प्रथमः श्लोकः)।

"आनन्दमात्रं स्वर्गसौख्यतुल्यं पश्यन्ति परं सूरयः।
काव्यञ्च यूनां कल्पनां प्रणोद्य प्रीणाति चिरं विह्वलम्॥
सौन्दर्यपूजा दिश्यते तु येन प्रेमा स हि मृत्युञ्जयः।
तद्वन्दनार्थं चित्रगीतिमाल्यं हास्याश्रुचितं निर्मलम्"[७२०]॥

तस्य सौन्दर्यभावनायाः प्रतिविम्बनमस्माभिः दृश्यते 'प्रेमशक्तिः', 'प्रेममाया', 'पुष्पवाणवल्ली', 'कल्पलोक'श्चेत्यनवद्यकारयितृप्रतिभोपेतकवितासु। 'निरुपमे'ति कवितायां कविना तस्य काल्पनिक्याः प्रेयस्या अनन्यं शारीरिकसौन्दर्यं वर्णयितुकामेन कृष्णपक्षीयरात्रेरनवद्योपमा प्रदत्ता –

"लोचने प्रियायाः न विदिते कदापि शम्पांशूपमे।
औष्ठरागरश्मिर्जयति न प्रबालदीप्तेरुष्णताम्।
कोमले उरोजे न हसतो हिमस्य कान्तेर्वा समे
सान्द्रकेशपाशः सुरुचिरो न याति रात्रेः कृष्णताम्"[७२१]॥

वर्णनमिदं कुमारसम्भवे पार्वत्याः सौन्दर्येण प्रभावितमिति मामकीना मतिः।

प्रकृत्या एतल्लीलावैचित्र्यं वर्णयन्नपि कविरतृप्तः। स प्रकृतेर्नान्दनिकरूपम् अधिकतयोपभोक्तुमलम्। परमधुना तेन दार्शनिकवत् क्वचिद् द्वैतभावनायाः पथि प्रचलता द्वैताद्वैतयोर्विभेदं विस्मृत्याद्वैतस्तरमुन्नीतम्, क्वचिच्च परकीयां प्रेयसीं संस्मृत्य मोहभङ्गेन मृत्युञ्जयत्वपदं प्राप्तम्। 'मुक्तपक्ष' इति कवितायां तद्भावनायाः प्रतिच्छविराप्यते –

"स्निग्धाम्बरे यो भ्राम्यति प्रकामं मुक्तपत्रतो विहङ्गः।
तृष्णां तु तस्य स्वप्ननीडवासस्तृप्यति कुत्र प्रसङ्गः"[७२२]॥

द्वैताद्वैताख्यकवितायां कविना वीरेन्द्रेण द्वैताद्वैतसत्ताया मिलनेन चिरमुक्तिसुखम् आस्वाद्यते – 'यदा तनू द्वे मिलने प्रेम परैति लयम् सायुज्यं लभते तनुश्चेन्मनसा मुक्तिसुखं मिलनम्'[७२३]।

[७२०] माङ्गलिकी, कलापिका।
[७२१] निरुपमा (प्रथमः श्लोकः)।
[७२२] मुक्तपक्षः (चतुर्थः श्लोकः)।
[७२३] द्वैताद्वैतम्।

कविरयं प्रकृतेः पूजकः। तथाह्यस्माभिर्दृश्यते यत् षण्णामृतूणां वर्णनेन कवेः प्रकृतं मुखमुन्मोचितम्। वर्षासु वङ्गदेशस्य ग्रामनगरावास्तव्यानाम् असौविध्यानि तत्र प्राकृतिकचित्रञ्चानवद्यं लीलावैचित्र्यमर्थालंकारैः प्राणवन्ति अजायन्त। 'दुर्दिन'मिति कवितायां कविः दीपकालंकारेण चौरं धीवरं कविञ्चेकत्रीकरोति। साम्यभावना कवेः काव्ययात्रायाः अन्यतमं प्रस्थानमेकम्।

कलापिकेति काव्ये पूजापार्वणे स्वार्थैषिणां जाल्मतां, नृजम्बूकानां चित्रतारकाणाञ्चित्रकथाः, मित्याचारस्य भष्टलग्नादिकञ्च क्रोडीकरोति कविरयं स्वकपोलकल्पनावैभवेन।

समाजे परिव्याप्तहिंसा-द्वेष-घृण्य-पूजैषणादिकं प्रेक्ष्यं प्रेक्षं कवयिता मनसा वीतरागः अभवत्। समाजस्याधःपतनं निशाम्य कवेरन्तरात्मा नितरां क्लिश्नाति। तथाहि तस्यान्तःस्थलात्तन्नैराश्यमभिव्यनक्ति 'रौरवेशः', 'पूजापरिहासः', 'चित्रतारका'श्चेति कवितात्रितये। कल्पनालोकं विचरन्नपि स वास्तवोचितं सत्यञ्च जीवनं रुक्षमुपायनीकरोति तत्काव्येषु। तथाहि दृश्यते काव्यस्य प्रतिच्छत्रं कलाकैवल्यवादापेक्षया वास्तववादस्य प्राधान्यम्। तथाहि 'युगकविता'यां वीरेन्द्रेणावादि –

"हित्वा पृथ्वीं गजदन्तरचितं तुङ्गसभ्राङ्गलीनम्
हर्म्यं गुह्यं श्रयसे युगकवेः कल्पनायाः किमर्थम्॥
सङ्गीतं ते तरलीकृतरसं वास्तवस्पर्शहीनम्।
वाष्पीभूय प्रसभं रमयितुं प्राकृतान् नो समर्थम्॥१॥
क्वाश्रुप्लावं श्रमकरिगलितं जीवितं दैन्यस्पृष्टम्।
सौख्यस्नातं क्व नु वा सुरभिणा जीवनं ते प्रकीर्णम्॥
काव्यं बन्धो क्व च कर्णसुभगं स्वप्नसंलापसृष्टम्
कुत्रार्तानां दलितान्तररुतं कण्ठाभङ्गावदीर्णम्"[७२४]॥२॥

साम्प्रतं कविसम्प्रदायं प्रति वीरेन्द्रस्य सनिर्बन्धानुरोधः – भोः कवयः! समयः समागतः, कल्पलोकस्य मायामतिक्रम्य वास्तवरुक्षभूमिमादाय हस्तेषु क्षुरधारकमलं

[७२४] युगधर्मः (१-२)।

रक्तं करालं धृत्वा जीवनकाव्यानि लिखन्तु। युगस्याकाङ्क्षेयम्। तथाहि 'युगधर्म' इति कवितायां कविना व्याकृतः को नाम युगधर्मः। सृष्टेरादिलग्नतः पापि-छद्मवेशि-स्वार्थपरादिश्रेणीयमानवसमाजस्य धर्म एव युगधर्मः। मन्ये कलिकालो हि युगधर्मस्य प्रकारान्तरमिति। तथाहि कविना समीरितो युगधर्मः स्ववाचा –

"हिंस्रैर्घोरान्यैः रणकलमुखरः साध्यते धर्महेला।
मिथ्या जाता हि त्रिदिववरसुताः कृष्णसिद्धार्थखृष्टाः"[७२५]॥

प्रसङ्गतो मनसि आयाति सीतानाथाचार्यस्य 'सन्त्रासवाद'स्तथा 'दादाजनाः' इति कविताद्वयम्।

कवेः सनेट्-रचनाया अन्यतमवैशिष्ट्यं तावत् छन्दोवैचित्र्यम्। तेन फुल्लदाम-शार्दूलविक्रीड़ित-मत्तेभविक्रीड़ित-हरनर्तन-मकरन्दिका-शार्दूलललित-नन्दन-चित्रलेखा-सुरसा-सुमधुरा-नाराच-मेघविस्फूर्जित-छाया-पत्रचामरादीनि बहून्यप्रसिद्धानि छन्दांसि व्यवहृतानि। किन्तु कविः स्वयमेव मञ्जुध्वनि(६)-कम्बुनाद(२-५)-तूर्यमन्द्रा(७)-मेघमन्द्रा(९)-सुमङ्गला(११)-तड़िल्लता(२४)-व्याघ्रविभ्रम(२७)-मत्तमातङ्ग(३०)-जयन्तिका(३४)-शम्पाहास(३५)-लज्जावती(३८)-सोमलता(३९)-अनुराधा(४४)-नृत्तपदादि(४५)-वृत्तानि निर्माय काव्यमालिकायाञ्च तानि व्यवहृत्य सहृदयहृदयेभ्यः उपायनीचकार। एतेषां छन्दसां प्रयोगवैचित्र्येण काव्यमिदं सहृदयावर्जकमभवत्।

परिशेषे वक्तव्यमिदं यत् स्वाधीनतोत्तरकाले वङ्गप्रदेशे विरचितकाव्येषु गुणदृष्ट्या कवेः वीरेन्द्रस्य 'कलापिके'ति सनेट्-काव्यम् उत्तमश्रेणीयमिति निश्चप्रचं वक्तुमलम्। राधावल्लभेन स्वीयेऽलंकारग्रन्थे अर्वाचीननूत्नकाव्यधारानुसारं कवेश्चतुर्विधत्वमङ्गीकृतम् – सिद्ध-साधक-आभ्यासिक-घटकभेदात्। तथाहि 'अभिनवकाव्यालङ्कारसूत्रस्य' वृत्तावुक्तं यत् –

"चतुर्विधकाव्यानुसारि चातुर्विध्यमुक्तं कवीनाम् – उत्तमोत्तमं कवयन् सिद्धः, उत्तमं कवयन् साधकः, मध्यमं कवयन्नाभ्यासिकोऽवरं च कुर्वाणो घटकः। भवति

[७२५]युगधर्मः (४८)।

चैषां चतुर्विधानां कवीनां तासु तासु विधासु रचनाभिनिवेशः"[७२६]। मन्ये मुक्तपक्षः कविः वीरेन्द्रकुमारभट्टाचार्यः खलु उत्तमोत्तमं काव्यं निर्माय सिद्धकवित्वपदमलभत अर्वाचीनसंस्कृतवाङ्मये।

ख). कविकालिदासम्[७२७]

सुप्रसिद्धस्य महाकवेः कालिदासस्य प्रसिद्धां किंवदन्तीं निरस्तीकृत्य भिन्नशैल्या सप्ताङ्कविशिष्टं 'कविकालिदास'मिति नाटकं १९६९ ईशवीयाब्दे प्रसादगुणोपेतेन व्यरचि वीरेन्द्रकुमारेण। कालिदासस्य नवनवोन्मेषशालिनी कारयित्री प्रतिभा नाट्यकृतः स्वकपोलकल्पनया समाकलितात्र। निखिलभारतप्राच्यविद्यासंगोष्ठ्याः रजतजयन्त्युत्सवे नाटकमिदमभिनीतम्।

प्रथमाङ्के वररुचि-कालिदासौ मिथः स्वकीयां योग्यतां प्रमाणीकृत्य विक्रमादित्यस्य अष्टमरत्नत्वेन नवमरत्वरूपेण च नियुक्तौ। तृतीयाङ्के कालिदासस्य श्लोकावलीं पठित्वा विदुषी राजकन्या तस्मिन् स्निह्यति। कालिदासो विक्रमादित्यकन्यायाः मञ्जुभाषिण्या विषये काव्यं ससार। उभयोः सम्बन्धः क्रमेण दृढतरो जातः। उभौ मिथः रहसि मिलितवन्तौ। अस्मिन् अङ्के तस्याः कालिदासानुरागो वर्णितः।

सा कालिदासात् काव्यकलामधीते स्म। उभयोः प्रणयसम्बन्धं राजा न स्वीचकार। तेनायोजितायां स्वयंवरसभायां राजकन्यायाः सहमतिर्नासीत्। सर्वं विज्ञाय राजा कन्यां वन्दीकृत्य एकवर्षं यावत् कालिदासं च रामगिरौ निर्वासितवान्। रामगिरौ स्थितः कविः वररुच्यनुरोधेन मेघदूतम् अरचयत्। पञ्चमाङ्के दीर्घविरहात् परं तयोर्विवाहं कारितवान् राजा विक्रमादित्यः। वस्तुतः विप्रलम्भशृङ्गारोऽत्राङ्गिपदं प्राप।

अत्र कवेः जीवनाधारितं काल्पनिकं वृत्तं विषयीकृत्य तस्य मूर्खत्वप्रतिपादकत्वं निराकृतम्। रस-भाव-वृत्त-अलंकारादिभिः वीरेन्द्रकुमारस्य सारस्वतकवित्वं प्रमाणी-भवति। रूपकेऽस्मिन् नूतनच्छन्दसां विचित्रितः प्रयोगः लक्ष्यते। कालिदासीयकाव्येभ्यः पञ्चविंशतिः पद्यानि उद्धृतानि नाट्यकृता।

[७२६]अभि.सूत्र., पृ. – २६।
[७२७]कविकालिदासम् – वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतपुस्तकभाण्डारः, १९६७।

ग). शार्दूलशकटम्[७२८]

समकालिकविषयम् आधारीकृत्य पञ्चाङ्कसम्पूर्णं नाटकमिदं 'नवीनैः काम्येते नवयुगकथा नूतनं दृश्यकाव्य'मिति सूत्रधारोपस्थापनया प्रवर्तते। अत्र पश्चिमवङ्गस्यावहेलितायाः परिवहनसंस्थायाः कर्मचारिणां जीवनयात्रोपवर्णिता। रूपकविरचनावसरे नाट्यकारो वीरेन्द्रो राष्ट्रियपरिवहनसंस्थायाः सर्वाध्यक्षो बभूव।

यद्यपि 'शार्दूलशकटम्' इति नाम प्रकरणं तथापि नाट्यतात्त्विकैः उक्तं प्रकरणलक्षणम् अनेन रूपकेण नैवान्वेति। प्रस्तावनायामुदितम् – 'अद्य खलु उपस्थाप्यतेऽत्र वीरेन्द्रकुमारभट्टाचार्येण विरचितं शार्दूलशकटनामकम् अभिनवं प्रकरणम्'। ग्रन्थादौ नाट्यकृता निवेद्यते – 'श्रमिकाणां मङ्गलविधानं च तस्मै भूयसा रोचते। अतस्तेषां वास्तवानुगं जीवनचरितं वर्णयितुमेव प्रचेष्टते सः' इति। सूत्रधारस्योक्तिरत्र प्रणिधानयोग्या – 'संघो जिष्णुर्भवति नितान्तं नान्यः पन्थाः कवियुगसंख्ये'।

प्रथमाङ्के कर्मचारिणाम् आन्दोलनमुपजीव्य नाटकमिदं प्रारभते। तेषां प्रतिनिधिः प्रभाकरो मन्यते यत् साम्यवादिनः शिल्पजीविनो वास्तविकरूपेण कोटिपतयः। परं संघप्रधानोऽमृतो भिन्नमतं पोषयति। तन्मते, ते यथाशक्ति कर्मचारिणां साहाय्यं करिष्यन्तीति।

द्वितीयाङ्के परिवहनसंस्थायाः तारातलास्थाने श्रमिकनेतॄणां कर्मन्याससिद्धान्तः तथा च सर्वाध्यक्ष-श्रमिकनेतॄणां मध्ये कथोपकथनञ्च वर्ण्येते। संस्थायाः निर्देशकः कथमपि श्रमिकान् निवारयति आन्दोलनात्।

परं तृतीयाङ्के दुर्गापुरस्थश्रमिकाः वेतनह्रासप्रतिवादेन आन्दोलनं घोषयन्ति। परं तेषां निदेशकः आदिशूरस्तान् सर्वान् कथमपि विबोधयन् आन्दोलनान्निवारयितुं प्रयतते। अन्ततो गत्वा तत्र श्रमिकैः कार्यरोधसिद्धान्तः त्यक्तः। स च आदिशूरः अप्राप्त-अवशिष्ट-नूतनवेतनान् प्रवर्तयति। नायक आदिशूरः संस्थायाः कर्मचारिणाञ्च मङ्गलं सदा कामते। स प्रकृत्या कोमलस्तथा शान्तः। किन्तु प्रयोजने सति कथमपि तेन न क्षन्तव्यो दुष्कृतकारी कार्यविरतौ।

[७२८]शार्दूलशकटम् – वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतपुस्तकभाण्डारः, १९६९।

चतुर्थाङ्के श्रमिकाणां दैनन्दिनजीवनस्य वास्तवचित्रमङ्कितम्। दिवाकरः शोषणस्य निवारणाय श्रमिकान् आह्वयति। तेषां कार्यरोधेन सञ्चालका व्यग्रा भवन्ति। तत्र धनञ्जयनामधेयः कश्चन श्रमिको घोषितवान् –

"श्रमिका नः पितरः पितामहास्तथा श्रमिका भवन्ति वान्धवः।
ह्रियते येन धनं द्विषास्मदीयकं लभतां स एव जाल्मकः"॥

आरक्षकाणां वृत्तिः भक्षकवृत्तिरिव। तस्मात् वीरेन्द्रेणोक्तम् –

"श्रूयते यदि रक्षणकर्ता भक्षकवृत्तिमपि स्वपदे।
क्रियते खलु केन तु राष्ट्रे शिष्टजनस्य रिपोर्दमनम्"॥

निवर्हणे 'परस्परं विश्वास एव संस्थायाः श्रेष्ठवित्त'मिति मतं प्रकटीकृतम्। पञ्चमाङ्के परिवहनसंस्थायाः सर्वे कर्मचारिणः संस्थायाः उच्चकार्यालयं समागत्य स्वस्वाभियोगान् व्याकृतवन्तः। अन्ते च परिवहनमन्त्रिणः सकाशे ते चरमपत्रं प्रेषितवन्तः। तेषाम् अभियोगान् श्रुत्वा स्वराष्ट्रमन्त्रक-परिवहनसंस्थयोः मिथ उद्योगेन वादानुवादानां मीमांसां कृत्वा च संस्थाया निर्देशकः समाधानम् उपदिशति। परिवहनसंस्थायाः गौरवगीतेन नाटकमिदं समाप्तिं गतम्।

इह रूपके प्रचलितानामप्रचलितानां छन्दसां प्रयोगेणैव नाट्यमिदं लोकोत्तरत्वं समाप्नोति। प्रायेणैव चत्वारिंशत्संख्यकानां नवीनच्छन्दसां प्रवर्तकस्तावद् वीरेन्द्रः। विशेषेण सुघोष-बालभाषित-मन्दयाना-नीलकण्ठी-विद्युद्दामादिच्छन्दोभिः नाट्यकृता बहवः श्लोका निर्मिताः। साधारणतया 'वास्तवानुगे दृश्यकाव्ये श्लोकप्राचुर्यं मनागसाम्प्रतम'पि अभिनयावसरे 'बहवः श्लोकाः परिहर्तव्याः' इति नाट्यकृता निवेदनांशे स्पष्टीकृतम्।

घ). सिद्धार्थचरितम्

भारतीयाग्रगण्यस्य तात्त्विकप्रेमिकस्य बुद्धदेवस्य पूतजीवनं समाश्रित्य अष्टमाङ्कविशिष्टं 'सिद्धार्थचरितं' वीरेन्द्रो व्यलिखत्। अधुना हिंसोन्मत्तपृथ्व्यामस्यां दार्शनिकप्रवरस्य बुद्धदेवस्य वाणी निःसंशयं प्रेरणादायिकेत्यत्र नास्ति संशयः। तस्मात् ग्रन्थोऽयं शुद्धोदनसूनोर्लोकोत्तरजीवनं तथा बौद्धनयान् वर्णयति वाक्यालापकवितासङ्गीतैः इति मुखबन्धे नाट्यकृता ईरीतम्। केवलेन मासद्वयेन

निरन्तरं परिश्रमफलत्वेन निर्मितं नाटकमिदं १९७० ईशवीयाब्दे प्रचरद्रूपतां गतम्। ग्रन्थस्यास्याधाररूपेण वीरेन्द्रेण अवदानशतक-सर्वदर्शनसंग्रह-बुद्धचरितादिग्रन्थानाम् ऋणं नम्रशिरसा अङ्गीकृतम् – 'अवदानशतकम्, अश्वघोषस्य बुद्धचरिताख्यं महाकाव्यम्, सर्वदर्शनसंग्रहस्तथा आङ्गलभाषालिखितं राधाकृष्णन् इत्यस्य भारतीयदर्शनम्, आनन्दकुमारस्वामिनो बुद्धबौद्धधर्ममतं चेत्यादीनि पुस्तकानि व्यवहृतानि मया[७२९]'।

आधिव्याधिप्रपीडितस्यास्य जगतः समुद्धाराय प्रेमावतारस्य बुद्धदेवस्य अमृतवर्षिणी वाणी एव अस्मच्छरणम्। तदर्थं प्रस्तावनायां नटी प्रवदति – 'हिंसाभुजङ्गा दिक्षु वमन्ति जिघांसाकालकूटम्। प्रेमावतारस्यातो बुद्धदेवस्य सुधाववर्षिणी वाणी रोचते रसेप्सुवृन्दारेभ्यः'[७३०] इति। तस्मादेव बुद्धदेवं प्रणम्य नमस्कारात्मकं मङ्गलाचरणं विहितं वीरेन्द्रेण – 'ज्ञानाब्धिं सौम्यमूर्तिं निखिलनरमतं स्तौमि तं बुद्धदेवम्'[७३१] इति।

यीशु-चैतन्यादयो महापुरुषा बुद्धदर्शितपथेनैव चरन्तो मानवेषु प्रेमोपदेशं वितरन्ति स्म। तथापि अनुदिनं वयं मनुजान् हन्मः तथा बाणैर्विहगान् पशूंश्च[७३२]। तस्मादस्मिन् प्रपन्ने जगतीतले शुभं हितञ्च प्रियं क्रियतामिति बुद्धदेवस्याशयो वीरेन्द्रेण स्ववाचा प्रोक्तः[७३३]।

वीरेन्द्रस्य नाट्यशैल्या अन्यतममेकं वैशिष्ट्यं तावत् प्रत्यङ्कं स्वतन्त्रनाम्ना निर्दिष्टमिति हेतोः 'हंसरक्षण'मिति प्रथमाङ्के हंस-शावकवृत्तमतिमनोज्ञतयोपवर्णितम्। देवदत्तेन शरबिद्धस्य कस्यचित् हंसशावकस्य प्राणान् सिद्धार्थो रक्षितवान्। अयञ्च सुप्रियायाः पालितो हंसशावकः। तथाहि सुप्रिया जीवान् प्रति सिद्धार्थस्य प्रेमभावं प्रेक्ष्य हर्षेण नृत्यन्ती गायन्ती च प्राह –

"निष्ठुरप्रदलति मुह्यति वराक
बन्धुसाधितहित गच्छति विपाकः

[७२९]सिद्धार्थचरितम् (मुखबन्धः), पृ. – १०)।
[७३०]तत्रैव (प्रस्तावना, पृ. – ३)।
[७३१]तत्रैव (१।१)।
[७३२]तत्रैव (१।१३)।
[७३३]'नात्र पापात्मभिर्गृह्यते तद्वचो मृग्यते केवलं कल्मषं हन्त तैः'। (तत्रैव, १।४)।

सपदि सञ्चरसि हि दिगन्ते सयत्नम्।
तपनदीप्तनभसि गृहं तेऽसपत्नम्"[७३४]॥

प्रासङ्गिकवृत्तरूपेण देवदत्त-छन्दकयोर्वाचोयुक्तिर्नितरां हृदयावर्जका। पुनश्च सर्वार्तित्राणाय सिद्धार्थ-देवदत्तयोर्मध्ये हंसशावकरक्षाविषयको द्वन्द्वः सत्यमेवोपभोग्यो वर्तते।

गौतम-शुद्धोदनयोर्वैदिकधर्माचरणादिसन्दर्भे कथोपकथनादभिद्योत्यते गौतमस्य संसारवैराग्यम्। पितृत्वेन शुद्धोदनस्तस्य असहायत्वं प्रकटीचकार –

'पितृभ्यां केवलं कार्यं सन्तानानां सुपोषणम्।
काले काले वयःप्राप्ताः स्वाभिमतं चरन्तु ते'[७३५]॥

तस्माद् द्वितीयेऽङ्के गौतमी-यशोधरयोरपि संवादाः प्राप्यन्ते। चरित्राणां दीर्घतरसंलापैर्नाटकीयत्वं व्याहन्यते कथमपि। तत्र शुद्धोदनस्याद्यसंलापः षड्विंशतिपंक्तिभिर्विन्यस्तश्चान्ये संवादा नूनमेव दशाधिकपंक्तिसमन्विताः। अत्र नाटकीयत्वं नूनमेव परं कथावस्तूनामाधिक्यं नयनयोरापतति।

तृतीयाङ्कस्य 'संवेगोत्पत्ति'रिति नामकरणम्। अत्र मालविका-तरलिका-मन्दारिकाणां सखीनां वार्तालापैः सिद्धार्थस्य पूर्ववृत्तान्त-स्वभावादिगुणाः प्रगुणीभवन्ति। सिद्धार्थो यथा प्रव्रज्यां नेयात्, तदर्थं राजा शुद्धोदनः साडम्बरपूर्णमुपभोग्यं भ्रमणायोजनं व्यवस्थापितवान्। किन्तु पथि जराजर्जरितमन्येभ्यो वीभत्सं नखदन्तविहीनं रुग्णं शवं दृष्ट्वा अनिमेषनिबद्धदृष्टेः सिद्धार्थस्य मनः संभिन्नं जातम्। स कथमपि शान्तिं नाप। प्रसङ्गतः उल्लेखार्हं यदश्वघोषस्य बुद्धचरितस्य तृतीयाङ्कः 'संवेगोत्पत्ति'रिति नाम्ना अभिहितः। तत्रापि सिद्धार्थः प्राह –

"क एष भोः नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः।
भ्रूसंवृताक्षः शिथिलानताङ्गः किं विक्रियैषा प्रकृतिर्यदृच्छा"[७३६]॥

सिद्धार्थः सारथिं प्रपृच्छति – 'छन्दक, किं वित्तशालिनां तथा पूतचारिणां

[७३४]सिद्धार्थचरितम् (१।२९)।
[७३५]तत्रैव (२.३२)।
[७३६]बुद्धचरितम् (जयश्रीचट्टोपाध्यायसम्पादितम् ३।२८)।

राजन्यानां चावश्यम्भाविनी करुणैषावस्था? अपि देहभृन्मात्रं कालक्रमेण जराक्रान्तं भवेत्'?[७३७] छन्दकस्तदोत्तरयति – 'जरा तु सर्वेषां नराणां तथा जीवान्तराणां ह्यन्तिमदशा'। तथा नित्यं मृत्युयन्त्रणा हि रुजो विकर्म इति सारथेः छन्दकस्य मुखाच्छ्रुत्वा सिद्धार्थः संसारसारं निरूपयति – 'संसारसरणिर्न हि सुखप्रसूनैरास्तीर्णा, जगज्जनकाभिधेयस्य वात्सल्यपर्याप्तैरितस्ततो विक्षिप्तैः'[७३८] इति।

'अभिनिष्क्रमणा'ख्ये चतुर्थाङ्के शुद्धोदनः पुत्रगतं मनोभावं जराव्याधिदर्शनाद्विमनायमानतां विषयवैराग्यञ्च विदित्वा न केवलं बहिर्यात्रामादिदेश, परं पुत्रस्य कामोद्दीपनाय योग्यतमाश्चतुःषष्ठौ कलासु सुनिपुणाः मालविका-तरलिका-मन्दारिकादिपण्यस्त्रियो गन्तुमादिदेश। ताः यौवनप्रदर्शनेनापि व्यथितचित्तस्य सिद्धार्थस्य मनो रञ्जयितुं यथासाध्यं प्रयत्नवत्यः परं साफल्यं न प्रापुः। तस्माद् बहुधा प्रयासेनापि सिद्धार्थो लक्ष्यपथान्न भ्रष्टोऽभूत्। मालविका स्वयं पतङ्गी बहिवक्षो विवक्षुरासीत्। पुण्यप्रेमाश्रयः सिद्धार्थस्तामपि न दयते। सिद्धार्थवपुसः स्पर्शात्तस्याः सर्वाङ्गेषु रोमहर्षो जायते। अन्ततो गत्वा तस्योपलब्धिरियं यत् प्रतिपदं तस्य शतशः कण्टकानि स्थातुमर्हेयुः देवाः करकाश्च किरन्तु। तथापि लौकिकं सुलभ्यद्रव्यजातं परिहार्य सौभाग्यात् परमं सुखामृतं लेभे सः। तदुक्तं सिद्धार्थेन –

"संसारः प्रसभं हि यन्त्रयति मां रात्रिन्दिवं बन्दिनं
जीवार्तेः परिमोक्षणाय तु कथं यत्नं करिष्ये गृहे।
पत्नी पुत्रवती पिता च जननी क्रन्दन्ति मे बान्धवाः
सन्न्यासं शरमं तथापि विवृणे रोरुद्यमानः स्वयम्"[७३९]॥

'तपश्चरणा'ख्ये पञ्चमाङ्के छन्दक-वृद्धयोः कथोपकथनाज्ज्ञायते यत् सिद्धार्थो 'बहुजनहिताय सुखाय च' प्रव्रज्यां गतः। स कठोरतपसि मग्नः। तस्य तपःप्रभावादेव हिंस्रपशवोऽपि खाद्य-खादकसम्पर्कं त्यजन्ति स्म। ध्यानादुत्थाय सिद्धार्थोऽनुभूतवान् यच्छरीरस्य कृच्छ्रसाधनया कथमपि सिद्धिर्न लभ्यते। ध्यानस्थावस्थायां सिद्धार्थः

[७३७]सिद्धार्थचरितम्, पृ. – ३६।
[७३८]तत्रैव (३९)।
[७३९]तत्रैव (४।१२४)।

'शृण्वन्तु विश्वे अमृतस्य पुत्राः...' इति वैदिकमन्त्रमुच्चार्य ब्रह्मतत्त्वविषये स्वचिन्तनं व्याकृतवान्। सुजातायाः गृहं गत्वा पायसञ्च भुक्त्वा जनपदाभिमुखं प्रतस्थे।

षष्ठाङ्कस्य 'बोधिप्राप्ति'रिति नामधेयम्। अङ्कस्यास्य विष्कम्भके छन्दक-काश्यपयोः संवादो वर्णितः। तयोः संवादात् सिद्धार्थस्याभ्युदयः संसूच्यते। तस्य ध्यानभग्नार्थमिन्द्रस्यादेशेनापि कामदेवस्य प्रयत्ना विफलीभवन्ति। तिस्रो वाराङ्गनाः स्वकामोपचारान् प्रकाश्य तं वशीकर्तुमपि व्यर्थतां गताः। अस्मिन् अङ्के पञ्चदशी-सप्तदशी-अष्टादशी-कीर्तिकुण्डलानां मायाकन्यकानां संलापाः लक्षणीयाः। तासां कण्ठेभ्यः सनृत्यं सुमधुराणि संगीतानि श्रोतुमर्हन्ति सामाजिकाः। तासां विनोदनेनापि सिद्धार्थो ध्यानान्नोत्थितः। तथाहि पञ्चदशी व्यर्था सती आह – 'धिङ् मे जीवनं यौवनं विप्रकृतायाः!' ध्यानस्थः सिद्धार्थः संसारस्य गूढतत्त्वानि श्रावयति –

"खलकालसर्प इह केलिसम्मदो
मनुजं विवष्टि मणिभोगरश्मिना।
सह सा करोति विषमान्तदंशनं
रतये नु हन्त शमनस्य कामिनः"[७४०]॥

तेन निर्वाणलब्धये चत्वारि आर्यसत्यान्युच्चारितानि –

"शृण्वन्तु शोकसन्तप्ता बोधिलब्धस्य मे वचः।
आर्यसत्यानि चत्वारि सन्ति निर्वाणलब्धये॥
जीवनं दुःखसत्त्वं हि दुःखं पुनः सहेतुकम्।
हेतौ नश्यति कार्यञ्च मार्गोऽस्ति द्वयनाशनः"[७४१]॥

'धर्मव्याख्यानं' नाम सप्तमाङ्गे बोधिप्राप्तेरनन्तरं नैरञ्जनातीरे सारनाथतपोवने तालीकुञ्जवेदिकासीनो बुद्धाख्यः सिद्धार्थः शिष्येभ्यः आर्यसत्यचतुष्टय-अङ्गाष्टक-शीलपञ्चक-प्रमाणद्वय-निर्वाणादिविषये उपादिशत्। राजा विम्बिसारोऽपि तन्मुखाद्धर्मव्याख्यानं श्रुत्वा सन्मुग्धोऽभूत्। राजानं समक्षं सर्वे कथयन्ति –

"बुद्धं शरणं गच्छामि!

[७४०]सिद्धार्थचरितम् (६।१९२)।
[७४१]तत्रैव (६।२०६)।

धर्मं शरणं गच्छामि!
संघं शरणं गच्छामि!"[७४२]

'पुनर्मिलन'नामके अष्टमे अङ्के सञ्जय-पुष्कर-दुर्भाष-श्रावन्तीनां नागरिकाणां संलापैः सिद्धार्थस्य विश्ववन्दनीयत्वमभिद्योतितम्। शारीपुत्र-काश्यप-आनन्दादिभिर्वारितोऽपि सिद्धार्थो मत्तमातङ्गसकाशमागत्य तं वशीकरोति। सिद्धार्थस्य अहिंसासिद्धिं वर्णयित्वा नाट्यकृद् वीरेन्द्रः यशोधरा-गौतमी-शुद्धोधनादीनां बौद्धधर्मं प्रत्याग्रहं वर्णितवान्। राजप्रासादमागतः सिद्धार्थः सर्वेभ्यः परिजनेभ्यो धर्मोपदेशं प्रददौ। सर्वान् बौद्धधर्मेण दीक्षितान् कृत्वा स प्रवदति –

"पिता भिक्षुस्तथा पुत्रो भिक्षुणी यस्य जन्मदा।
भिक्षोर्हि गौतमस्याद्य भिक्षवः सर्ववान्धवाः"॥ इति

तथाहि युक्तमेवोक्तं त्रिपाठिना राधावल्लभेन – '*Siddharthacarita Nāṭaka* of Bhattacharya brings out the massage of Buddha.' वस्तुतः कृत्स्ने रूपके सिद्धार्थस्य अपारो महिमा वीरेन्द्रेण कीर्तितः। इह नाट्ये सप्तति: नूतनच्छन्दसां प्रयोगो विहितो नाट्यकृता। तेषां वृत्तानां परिचयविज्ञानाय छन्दोनिघण्टुः संयोजितः कविना। अस्मिन् पञ्चदशगीतिनां प्रयोगोऽस्माभिर्लक्ष्यते।

सिद्धार्थस्य पूतचरित्रं वर्णयितुं प्रासङ्गिकवृत्तत्वेन नाटकानुसारिचरित्राणि योजितवान् नाट्यकृद्। तेषाञ्चरित्राणां वचोयुक्तिभिर्बौद्धधर्मस्य राद्धान्तान् सहृदयानां सविधे उपायनीकरोति नाट्यकारो वीरेन्द्रः। प्रसङ्गानुसारं वीरेन्द्रेण पूर्वाचार्याणां ग्रन्थेभ्यः प्रसिद्धा उक्तयः[७४३] समुद्धृताः।

आत्मतत्त्व-निर्वाण-बौद्धदर्शनलब्धतत्त्वादिविषये नाट्यकृतो सुस्पष्टं ज्ञानं सिद्धार्थचरितस्य प्रतिच्छत्रमुपलभ्यमानं विलसति। प्रवेशक-विष्कम्भक-प्रस्तावना-सन्धि-सन्ध्यङ्गादिनाट्यतत्त्वानि नाट्यकृता सुष्ठुतया योजितानीति कृत्वा रूपकमिदमुच्चकोटिकमित्यत्र नास्ति संशयः।

[७४२] सिद्धार्थचरितम्, पृ. – ११८।

[७४३] 'शृण्वन्तु विश्वे अमृतस्य पुत्राः' (पृ. – ७१), 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' (पृ. – ३९), 'अघटनघटनापटियसी' (पृ. – ९२), 'धर्मस्य तत्त्वं यन्निहितं गुहायाम्' (पृ. – २४)।

ङ. श्रीगीतगौराङ्गम्

'श्रीगीतगौराङ्गं' तावन्नाट्यकर्तुः वीरेन्द्रकुमारभट्टाचार्यस्य उच्चकोटिकं तथा मनोज्ञं गीतिरूपकमेकम्। भक्तिधर्मस्य ऐतिहासिकपृष्ठभूमौ गौराङ्गस्य पूतचरित्रमुपजीव्य पञ्चाङ्कात्मकं नाट्यमिदं १९७४ ईशवीयाब्दे ग्रथितम्। परमुल्लेख्यं यत् प्रत्यङ्कं दृश्यैर्विभक्तमिति। कृत्स्ने रूपके विलसन्ति त्रिंशद् दृश्यानीति यन्नाट्यशास्त्रदिशोल्लेखार्हम्। इह रूपके एकाशीतिः गीतानि, षड्रागेषु चतुःसप्ततिसंख्यकासु रागिणीषु च समाविष्टानि। एतेन काव्यस्यास्य गीतिमाधुर्यं तथा नाट्यकर्तुर्गीतिप्रियत्वञ्च प्रमाणीभवतः। परमत्रेदमुल्लेखार्हं यत् संगीतशास्त्रदृष्ट्या सर्वे राग-रागिण्यश्च वीरेन्द्रेण संप्रयुक्ता इत्यत्र नास्ति संशयलवः कश्चित्। तथाहि राधावल्लभेन आधुनिकसंस्कृत-साहित्यसन्दर्भसूच्यां युक्तमेवाभ्यधायि –

"*Gītāgourāṃgam* by him dramatises the life of*Caitanyal*, a mystic and saint from Bengal in dance drama form. Eighty one songs of this play are composed in six *Rāgas* and 75 *Rāgīnis* and the five acts have numerous scenes".[७४४]

अस्य नाट्यस्य मुख्यं वस्तु तावत् गौराङ्गस्य महज्जीवनकीर्तनम् इति। तस्मान्नाट्यकृता स्वयमेवाभाणि –

"I have depicted Gouranga as an extra ordinary dedicated rebel (not a god in human garb) who primarily aimed at a social revolution through abolition of the perniciously custom ridden caste system and preaching the lesson of universal love, which he himself practiced. Even though, I am no beliver in God or religion (in its usual sense), most theists look upon God essentially as Supreme Love, and I myself regard the tender candle of love as of supreme significance in our daily life. Indeed, this is my basis raison d'etre for portraying lyrically the life of Krishna's beloved devotee. Lastly, I am at times

[७४४] आधुनिक-संस्कृत-साहित्यसन्दर्भसूची, पृ. – ४०।

inclined to agree with Yeats that, 'whatever of philosophy has been made poetry is alone permanent." नाट्यकृता स्पष्टतया मन्त्रयते मुखबन्धे गीतिनाट्यस्योपजीव्यं केभ्यः प्रामाणिकग्रन्थेभ्यः संकलितमिति –

"गोस्वामिकविराजस्य चैतन्यचरितामृतम्।
ग्रन्थेऽस्मिन् मामके दीने भूयसा त्ववलम्बितम्॥
वैष्णवमहाराजानां पदावली रसान्विता।
सङ्गीतरचनाञ्च गृहीता भक्तवाञ्छिता॥
आधुनिककवीन्द्राणां गीतिमाल्याच्च कोरकम्।
कुत्र कुत्रापि क्लृप्तं चेन् माधुर्यसृष्टिकारकम्"[७४५]॥

भक्तिप्रवरस्य चैतन्यमहाप्रभोर्दीव्यजीवनदर्शनं यद्यपि वीरेन्द्रस्य नाट्यग्रथनस्यास्य मुख्यं लक्ष्यं तथापि सहजया कारयितृप्रतिभया कविरयं समाजस्य कुसंस्कारान् प्रति विद्रोहिभावं, स्वकीयसमाजसंस्कारभावनां, भक्तिधर्मस्य प्रचारं, प्रेमभावनाञ्च पुष्कलीकरोति[७४६]। तस्मान्नाट्यारम्भे श्रीचैतन्यदेवं प्रति प्रणामं विनिवेद्य नाट्यवस्तु व्यक्तीकरोति भक्तिधर्माश्रयी कविर्वीरेन्द्रः –

"उदात्तं ध्वनितं कण्ठे नववाक्यं महात्मनः।
चण्डालोऽपि द्विजश्रेष्ठो हरिभक्तिपरायणः"॥ इति।

प्रथमाङ्कस्य दृश्यचतुष्टये श्रीगौराङ्गस्य जन्मनः आभासः, तस्य पित्रोर्वात्सल्यं, तस्य गुणाः, पत्न्याः प्रेमदर्शनं तथा विश्वरूपस्य सन्न्यासग्रहणञ्च वर्णितानि। लक्ष्मीदेव्याः प्रणयातिशय्यं नाट्यकृद् वर्णयन्नाह –

"त्वमसि मम दुःखहन्ता भाग्यनियन्ता त्वमसि ननु मर्मभूषणम्।
ज्वालानाशं दत्वाश्लेषचुम्बनं यच्छ मे नूतनजीवनम्"[७४७]॥

परं कालकरालग्रासेन सर्पदंशनेन चाकाले स्वर्गमिता लक्ष्मीः। अङ्केऽस्मिन्नद्वैताचार्यमुखाद्भैरवीरागेण 'ओइ महामानव आसे' इति संस्कृते

[७४५]श्रीगीतगौराङ्गम्, पृ. – १।
[७४६]विद्रोहिणं तद् गणये प्रधानं चैतन्यदेवं नृसमाजरिष्ट्या।
तर्कं विहाय प्रणयात्मगानं भक्तेश्चकार प्रथमं स दिष्ट्या॥ (तत्रैव, प्रस्तावना)
[७४७]तत्रैव, पृ. – २२।

रवीन्द्रसंगीतानुवादः आध्यात्मिकं भावं प्रगुणीकरोति।

विलसन्ति द्वितीयाङ्के सप्त दृश्यानि। तत्र प्रथमे दृश्ये विष्णुप्रियया समं गौराङ्गस्य द्वितीयविवाहविषयकं रोचकं वर्णनं लसति। द्वितीये दृश्ये रघुनाथ-गौराङ्गयोर्वार्तालापश्चित्रितो निरवद्यतया। ततः श्रीवत्स-अद्वैतयोः, शची-विष्णुप्रिययोश्च कथोपकथनान्महाप्रभोश्च वैराग्य-लोकोपकारभावौ वर्णितावास्ताम्। चतुर्थे दृश्ये विरोधिपण्डितान् शास्त्रयुद्धेन पराजित्य गौराङ्गेन भक्तेरमोघमाहात्म्यं संस्थापितम्। तदा कैश्चिद्विरोधिभिरुच्चैः प्रशंसिता गौराङ्गस्य शास्त्रबुद्धिः।

तृतीयाङ्कस्य प्रथमदृश्ये गौराङ्ग-विष्णुप्रिययोर्दाम्पत्यं सकृद् वर्णयन् कविः तस्य सन्न्यासकृत्यं वर्णयति। द्वितीये दृश्ये नवद्वीपे गौराङ्गभक्तानां संवादात्तस्य सन्न्यासग्रहणं ततः 'श्रीचैतन्य' इति नामकरणं जातम्। तदुक्तं वीरेन्द्रेण –

"कानने लतासु पुष्पाणि न मोदन्ते
मन्थरपवनो गायति करुणसंगीतम्।
शष्पाणि गतासु कल्पानि म्लायन्ते
पार्थिवरुदितं तु वियतिः किं प्रतिध्वनितम्"॥

तृतीयदृश्ये नित्यानन्दस्य मार्गदर्शनेन तीर्थाटनमुपवर्णितम्। चतुर्थदृश्ये नित्यानन्दस्यागमनं तथा च पुत्रसंदर्शनार्थं शचीप्रस्थानं वर्णिते। ततः शची शान्तिपुराख्ये स्थाने सन्न्यासिनं पुत्रं श्रीचैतन्यं दृष्ट्वा दुःखिता सती प्रत्यावर्तते[७४८]। विष्णुप्रियापि निरन्तरं विरहक्लिष्टा सती रोदिति। षष्ठे दृश्ये भक्तैः समं नीलाचलधाम प्रति प्रस्थितश्चैतन्यः प्रतिनियतं गायन् नृत्यंश्चलति च।

चतुर्थाङ्कस्य प्रथमे दृश्यचतुष्टये कथञ्च गौराङ्गस्तं भक्तिधर्मेण प्रभावयतीति वर्णनं दृश्यते – 'चक्षुरुन्मीलितं मेऽद्य गुरुश्रेष्ठेन हि त्वया'। ततो विष्णुप्रियाया विरहः, गोदावरीनद्यास्तीरे श्रीचैतन्यस्य रामानन्दादिभिः सन्न्यासिभिः सह मेलनं भक्तिमार्गगतोपदेशप्रदानञ्च वीरेन्द्रः प्रस्तौति। सप्तमे दृश्ये रामानन्दस्य प्रश्नोत्तरमाध्यमेन नवधा भक्तिधर्मस्य तथा नारदीयभक्तिसूत्रस्य अनवद्यं व्याख्यानं कृतं श्रीचैतन्येन। तदुक्तं–

[७४८]'हा पुत्र वसनं क्षौमं दधासि नवयौवने।
माता तव कथं शक्ता शान्तिमाप्तुं तु जीवने'॥ (श्रीगीतगौराङ्गम्, पृ. – ७४)।

“राधामाधवयोः परश्चिरनवः प्रेमात्वभेदात्मकः।
का कान्ता खलु कश्च वल्लभवरः पार्थक्यमूनं द्वयोः।
वैवर्तौ रमणाम्बुधिप्रतिकरः स्यान्न प्रेमासूचको
ह्लादिन्या अपि लीयते स्मृतिलवो भोक्तुश्च तादृल्लयः”[७४९]॥

पञ्चमेऽङ्के रामानन्दादिभक्तानां सविधे राज्ञः कृष्णशरणप्रार्थनं, विष्णुप्रिया-शची-श्यामकान्तानां दुःखवर्णनञ्चोपायनीकरोति वीरेन्द्रोऽनन्यवाचा भक्तिरसाप्लुतो भूत्वा। आधिव्याधिप्रपूर्णेऽस्मिन् पञ्चतत्त्वाञ्चिते प्रपञ्चे कृष्णशरणगतिर्हि जीवनस्य चरमं लक्ष्यमिति चैतन्यमतिः। चैतन्यमुखेन वीरेन्द्रः कथयन्नाह – ‘सर्वाचारान् परित्यज्य श्रीकृष्णं शरणं व्रज’ इति। भक्तवृन्दमुखेभ्यश्चैतन्यमाहात्म्यकीर्तनं खलु पञ्चमाङ्कस्य तृतीयदृश्यस्य मुख्यमालोच्यम्। अन्ततो गत्वा वैष्णवी चैतन्यदेवाय कान्ताप्रेमरूपस्य भक्तिधर्मस्य मुख्यमुपजीव्यं श्रावयति। चैतन्यपदावलम्बी हरिदासस्त्यजति प्राणान्। कृष्णभावेन महाप्रभोर्विरहावस्था वास्तवजनोचितभङ्ग्योपस्थाप्यते गोविन्द-जगदानन्दाभ्यां सेवकाभ्याम्। ततो भक्तिभावाभ्यामाप्लुतश्चैतन्यः उन्मत्तवद्विरहिणी राधिकेव नृत्यति भैरवीरागेण गायति जल्पति च।

रूपकस्यास्य सर्वे संवादाः पद्यात्मकाः। गद्यप्रयोगाभावो नितरां लक्ष्यते। अत्र एकोक्तीनां बाहुल्यं नयनयोरापतति। विशेषेण सर्वाणि गीतानि एकोक्तिरूपाणि। अनवद्यसारल्येन प्रदासागुणेन वैदर्भीरीत्या भक्तिरसैरार्द्रीकृत्य परञ्चानलंकृतभाषया चैतन्यप्रभोः पूतजीवनं नाट्यकृता वीरेन्द्रेणात्र उपायनीकृतमिति। नाट्ये कुत्रापि अर्थावबोधेऽसौविध्यं न जनयति पाठकानाम्। दिङ्मात्रमुदाहरणं तावत् –

“आयाति यदा तु मरणं कोऽपि न भवति शरणम्।
कृष्ण केशव हे स्मरामि ते चरणतरणीम्”॥ इति।

रूपकस्यास्य कथावस्तुनि चैतन्यचन्द्रोदयस्य प्रभावः प्रत्यक्षग्राह्य इत्यत्र न संशीतिः। समीक्षकाणां नये, गीतिनाट्यम् ‘अपेरा’ इत्यनेन सह समानम्। अपि च, ‘अपेरायां’ गीतितत्त्वेन समं कथातत्त्वमपि विलसतीति कृत्वा श्रीगीतगौराङ्गम् अपेरा इत्यन्तर्भूक्तमिति मन्मतम्।

[७४९]श्रीगीतगौराङ्गम् (पृ. – ११४)।

च. वेष्टनव्यायोगः

वीरेन्द्रकुमारभट्टाचार्यस्य समसामयिकसमस्याधारितम् एकाङ्करूपकं तावद् ‘वेष्टनव्यायोगः’। साधारणतया संस्कृतरूपकेष्वाधुनिकजीवनस्य वर्णनं न हि सुलभमिति कृत्वा वीरेन्द्रेण श्रमिकाणामाधुनिकशस्त्रं वेष्टनमुपजीव्य ‘शार्दूलशकटि’मिति प्रकरणं निरमायि। रूपकमिदं प्रहसनमित्युक्तेर्नातिशयोक्तिः।

आसीद् राष्ट्रियपरिवहनसंस्थाया उच्चपदस्थः प्रशासको वीरेन्द्रकुमारभट्टाचार्य इति कृत्वा श्रमिकश्रेणीयानां प्रशासकानाञ्च साफल्यं वैफल्यञ्च पुङ्खानुपुङ्खरूपेण पर्यवेक्ष्य समस्यां समाधातुं स्वकमतं व्यक्तीकरोति नाट्यकृत् – “सदिच्छाप्रणोदितेन केनचिद् राजनीतिज्ञेन श्रमिकहितसाधनाय शिल्पसंस्थाधिकारिणां वेष्टनं हि मुख्योपायो गण्यते स्म। परन्तु तेन युगपद् अपायो न चिन्तितो विशदेन। अतो वेष्टनपद्धतिः शिल्पविघट्टं जनयामास यस्य हेतोः श्रमजीविनाञ्च स्वार्थहानिः सञ्जाता। वेष्टनपद्धतेः प्रयोगस्य कौतुककरः परिणाम एव दर्शितः”[७५०] इति।

विंशशताब्द्यामन्तिमे लग्ने वङ्गेषु विविधश्रेणीभाजां नागरिकाणामधःपतितं नग्नचरित्रचित्रञ्चित्रयता वीरेन्द्रेण समुन्नतसमाजसंघटनाकूतं विशेषतोऽभिव्यञ्जितम्। तस्मादेव नाट्यकृतेह न्यायेन न्याय्येतरेण वा पथाभिलषितस्याधिकारस्याधिगमाय कर्मचारिभिर्बलादधिकारिणां वेष्टनावरोधस्य चित्रमुपायनीकृतम्।

रूपकेऽस्मिन् अष्टौ चरित्राणि विलसन्ति। तद्यथा – कल्किः (जननेता), शिल्पाध्यक्षः, श्रमाध्यक्षः, श्रमिकाणां प्रातिनिध्यं कुर्वन्ति सञ्जयः, अभिजित्, जयद्रथः, सत्राजित् तथा अरिजित् चेति। रूपकस्यास्य प्रवेशके वेष्टनस्योपयोगित्वं विवृतम्। नान्द्यां कलियुगावतारस्य कल्केः स्तुतिर्विहिता – ‘तं नौमि कल्पिरूपं वङ्गेष्वहं वेष्टनायुधवन्तम्’। अर्थात् पञ्च श्रमिकाः शिल्पाधिकारिणं वन्दीकृत्य स्वाधिकारं प्रतिष्ठापयितुं बद्धदरा आसन्। शिल्पाध्यक्षस्त्वाह – ‘शिक्षिता अपि कर्महीनाः सन्ति बहवो युवानो इदानीमपि। परन्तु नियोगरता वेतनवृद्धये सततं घटयन्ति कर्मव्याघातम्’। परं सर्वे श्रमिकाः मिलित्वा वेष्टनायुधस्य प्रशंसां कारं कारं स्वस्वार्थरक्षायै वेष्टयन्ति शिल्पाध्यक्ष-श्रमाध्यक्षौ। तदा ते एकीभूय गायन्ति –

[७५०]वेष्टनव्यायोगः (मुखबन्धः)।

"वेष्टनं वेष्टनं वेष्टनं केवलं वेष्टनं यच्छति क्षत्रलभ्यं फलम्।
चित्ते जिघांसा नृत्यतु जोषं स्तोकं न मन्ये छद्म सदोषं
निर्बलं विग्रहे कौशलं, सङ्घशक्तिश्चिरं कर्मिणां सम्बलम्"[७५१]॥

गत्यन्तरं न प्रेक्ष्य शिल्पाध्यक्षः श्रमिकाणामभियोगपत्रं शिल्पमन्त्रिणं प्रहिणोति। श्रमिकाणां रूक्षव्यवहारान्नितरां दुःखितोऽपि श्रमाध्यक्षः सर्वेषां सौजन्यव्यवहारं कामयते। अन्ततो गत्वा निर्वहणे नेतृत्वेन कल्केरभ्युदयोऽस्माभिर्दृश्यते। नाट्यकृता 'यदा यदा हि धर्मस्य...' इति गीतोक्तिं संस्मृत्य व्यङ्गात्मकशैल्या प्रोक्तं यत् निपीड़ितानां श्रमिकाणां स्वार्थं रक्षितुं वेष्टनरूपामोघास्त्रधारी कल्किराविर्भवति। नेता कल्किः प्रविश्य स्ववेष्टनायुधस्य साफल्यमनुभवति श्रमिकस्वार्थाय। वेष्टनं धर्माधिकरणे महाकरणे भुक्तिपतिनिलये आरक्षककेन्द्रेषु च। सर्वेषां विश्वासोऽयं यत् कल्किस्तान् उद्धर्तुमलमिति। तस्मात् सर्वे कर्मचारिणस्तमभिनन्दन्ति।

नाट्यकृता न केवलं श्रमिकाणां मङ्गलं काङ्क्षितं, परञ्च राजनैतिकनेतृजनान् उद्दिश्य परोक्षतया अमोघा सावधानवाणी उच्चारिता – भोः कल्किदेव! त्वं सर्वमङ्गलदायकरूपेण दरिद्रजनतारकत्वेन दुर्जनशासकेन चावतीर्णो भव इति[७५२]। परिशेषे शिल्पाध्यक्षो भरतवाक्यमुच्चार्य उपस्थापितवान् ग्रन्थसारम् –

"नियुज्यतां श्रमिकहिताय शिल्पनीः
स्वशर्मणे न तु विरमन्तु कर्मिणः।
प्रतन्यतां दिशि दिशि कल्किनो यशः
श्रियं जयं जनयतु वेष्टनायुधम्"[७५३]॥

वङ्गीयप्रवाद-प्रवचनानां संस्कृतायितं रूपं तथा संगीतीनां रुचिरप्रयोगश्चात्र रूपकस्यास्य सौन्दर्यं वर्धयेतेतराम्। देशजशब्दानां वैदेशिकशब्दानाञ्च संस्कृतायित-रूपाण्यत्रास्माभिः द्रष्टुमलम्।

[७५१] वेष्टनव्यायोगः, पृ. – ७।
[७५२] 'वन्दे युगावतारं कल्किनम्' (शिल्पाध्यक्षः, पृ. – १५)। 'नमस्तुभ्यं महाभाग दरिद्रजनतारक' (श्रमाध्यक्षः)। 'जयतु जयतु कल्किदेवो दुर्जनशासकः' (श्रमिकः)।
[७५३] वेष्टनव्योयोगः (४०।१३)।

छ. शरणार्थिसंवादः

वङ्गविभागात्परं पूर्ववङ्गतः समागतानां शरणार्थिनां समस्यामधिकृत्य व्यलिखद् वीरेन्द्रः 'शरणार्थिसंवाद' इति। नाट्यमिदं १९७२ ईशवीयाब्दे प्रचरद्रूपतां गतम्। बांलादेशवासिनः प्रति पाकिस्तानदेशीयसर्वकारस्य अकथ्यात्याचाराः निर्यातनञ्च वास्तवोचितभङ्ग्या निरूपितानि वीरेन्द्रेण रूपकेऽस्मिन्।

वांलादेशवास्तव्येभ्य आश्रयं दत्वा महान् उपकारः साधितो भारतवर्षस्य सर्वकारेण। यतो भारतवर्षस्य व्रतं तावत् 'अतिथिर्देवो भव' इति। प्रसङ्गेऽस्मिन् भारतवर्षस्य प्रधानमन्त्रिण इन्दिरागान्धिनो योगदानमनस्वीकरणीयम्। तस्याः साहाय्यमृते कथमपि वांलादेशस्य शरणार्थिनां जीवनं न रक्षितं स्यात्। अगणितानां शरणार्थिनाम् आतिथ्यं, निःशुल्कं चिकित्सा-भोजनादिकं भारतीयसर्वकारेण व्यवस्थापितम्। तदर्थञ्च त्रिपुरा-आसाम-पश्चिमवङ्ग-मेघालयादिराज्येषु अस्थायिरूपेण वासस्थाननिर्माणं विहितम् इन्दिरागान्धिमहाभागया।

शरणार्थिनां त्रास-शङ्का-हर्षाद्यभिव्यक्तयो यथा नाट्यकृता वर्णितास्तथैव आक्रमणकारिणां क्रूरत्व-द्वेष-निर्यातनादयः। स्वाभाविकगत्या देशत्रयस्य मुजीबुररहमान-इन्दिरागान्धि-यह्यखानादिराजनैतिकनेतृवर्याणाञ्चरित्राणि सुष्ठुतया चित्रितानि। वीरेन्द्रो दोरथि-फरीद-मन्दवी-आनन्द-आदिशूरादिचरित्रमुखेन वांलादेशे शरणार्थिनां करुणावस्थाञ्चित्रितवान्। इह नाट्ये वांलादेशस्य स्वाधीनताप्राप्तये मुजिबररहमानस्यात्मत्यागो वर्णितः। शरणार्थिशिबिरेषु विराजमानस्य आदिशूरस्य रोचकञ्चरित्रमत्र संयोजितं नाट्यकृता। प्रसङ्गेऽस्मिन् तस्य काचनोक्तिः संस्मरणीया –

"शिविरवसतिः कुत्र महतः सुखाय कल्पते।
क्लेशो न गण्यते क्लेशो भवद्भिरिति सुखम्"॥ इति।

नाट्यस्यान्तिमे भरतवाक्यं संस्मर्यते –

"अत्रास्ति वङ्गदेशस्तत्रास्ति स एव मध्ये प्रीतिप्रवाहो
वङ्गीयवांनिबद्धे चित्ते द्वितयस्य दुर्भेद्यस्ततप्रबन्धः।
मत्वा प्रवासदुःखं तुच्छं स्मरथात्र शुश्रूषां केवलं नो
जीयासुरार्यमिश्रा भूभारतमद्यच्चजीयाः स्वर्णभूमिः"॥

ज. शूर्पणखाभिसारः

'श्रीगीतगौराङ्गमि'वाद्यन्तं गीतिनाट्यं तावत् 'शूर्पणखाभिसारम्' इति। अत्र बहूनि गेयपदानि प्रयुक्तानि नाट्यकृता। रावणभगिन्याः शूर्पणखाया अभिसारवृत्तं गीतिकाव्यवर्णनच्छलेन वीरेन्द्रश्चित्रितवान्। सूत्रधारो नवीनरूपकेऽस्मिन् भिन्नस्वादेन सामाजिकान् आकर्षयितुं प्राह –

"नवीनमाहो रसिकाय रोचते
न हर्षदं स्यात् सततं सनातनम्" इति॥

शूर्पणखा रामं प्रणम्य स्तुत्या च गायन्ती दृश्यते –

"सौरवंशदीपं दुर्जनप्रतीपं श्रीरामं रम्यतनु भूपगौरवम्।
नौमि मर्मतोषं रिक्तसर्वदोषं वन्दे त्वां कल्पतरुं प्रेमसौरभम्"॥ इति।

अपरतो लक्ष्मणस्तस्याः सौन्दर्येण विमुग्धः सन् आसीत् तया सह विवाहार्थी। शूर्पणखायाः सौन्दर्येण उर्मिलां पूर्णतया विसस्मार लक्ष्मणः। तस्मात् प्रेमोन्मादेन अगायत् रामानुजो लक्ष्मणः–

"झटिति किमपि किरति सुहसमतनु-
र्लसति मुखमपि तव सखि सह मया।
नयनविशिखमिह न कुरु विषयुतं
तव चरणयुगमयि मम हि शरणम्"॥

परं रामस्तं विवाहात् भूयो भूयो वारितवान्। यतो ह्ययोध्यायां लक्ष्मणस्यैकवेणीधरा धर्मपत्नी उर्मिला पतये अपेक्षमाना तिष्ठति। रामप्रेरणया स शूर्पणखां विरूपितवान्।

कविः शूर्पणखायाः कुचकलशादिवर्णनायां ग्राम्यतादोषेणाभियुक्तो भवितुमर्हति। परमन्योक्तीनां प्रभविष्णुत्वमत्रोल्लेखार्हम्।

७. श्रीजीवन्यायतीर्थस्य साहित्यसाधना

०. प्रस्तावना

संस्कृतसाहित्याकाशे नक्षत्रमिव रवीयते पण्डिताग्रगण्यस्य पञ्चाननतर्करत्नस्यात्मजः श्रीजीवन्यायतीर्थः। स ईशवीयाब्दे १८९२ तमे पश्चिमवङ्गस्य भाटपाडास्थाने जनिं लब्धवान्। पिता पञ्चाननो वाराणस्यामाधुनिक-प्राचीनन्यायशास्त्रयोरध्ययनार्थं महामहोपाध्यायं राखालदासन्यायरत्नं निकषा प्रेषितवान्। हरप्रसादशास्त्रिणां मार्गनिर्देशेन श्रीजीवेन 'आधुनिकतर्कविज्ञानस्य क्रमविवर्तनम्' (Evolution of Modern Logic) इति शोधबन्धं विरच्य उपाधिपदमधिगतम्। 'न्यायसूत्रस्य प्राचीनत्वम्' (Antiquity of Nyāya-sūtra)। इति प्रबन्धः कलिकाताविश्वविद्यालयेन प्रकाशितः।

अध्ययनं समाप्य स आदावेव पितृदेवस्य चतुष्पाठ्याम् अध्यक्षत्वेन, ततः कलिकाताविश्वविद्यालयस्य संस्कृतविभागे (१९३७-५८) अध्यापकरूपेण चान्तिमे यादवपुरविश्वविद्यालयस्य संस्कृतसंकाये (१९५९-६८) अध्यापनां कृतवान्। काव्यतीर्थ-व्याकरणतीर्थ-न्यायतीर्थाद्युपाधिभिः सम्मानितोऽयं तु कलिकाता-वर्धमानविश्वविद्यालयाभ्यां डि.लिट् इत्युपाधिना भूषितः। अपि च, १९६८ खृष्टाब्दे भारतसर्वकाराद् 'राष्ट्रपतिसम्मानं', प्रयागविद्वत्समाजपक्षतो 'भारतशिरोमणिं', हावडापण्डितसमाजादेव 'व्याकरणशिरोमणि'ञ्च उपाधिपदमवाप महात्मायम्। विश्वभारतीविश्वविद्यालयेन स तु देशिकोत्तमोपाधिना सत्कृतः। विविधैः पुरस्कारैः सम्मानितः श्रीजीवः प्रदेशे अस्मिन् साहित्यसाधनां स्वकीयां प्रगुणीकृतवान्। तस्य श्रव्यकाव्यानि रूपकाणि विशेषेण प्रहसनानि साहित्यस्याभिनवान् मानदण्डान् स्थापयन्ति।

१. श्रीजीवस्य कारयितृप्रतिभायाः निदर्शनम्

तस्य सारस्वतविद्याधारा तु षष्ठिः वर्षाणि यावत् प्रवाहिता निरवच्छिन्नरूपेण। अयन्तु महाकाव्यमेकम्, चित्रकाव्यम्, गीतिकाव्यानि त्रीणि, दृश्यकाव्यानि एकोनत्रिंशतः प्रणिनाय। तस्य रचनासु नाटक-भाण-व्यायोगादिरूपकाणां समावेशो दृश्यते। पुनस्तु

द्विसप्ततिसंख्यकानि स्तोत्रकाव्यान्यपि अनेन रचितानि। आदौ तु तत्प्रणीतानां मौलिकग्रन्थानां सूची प्रस्तूयते –

श्रव्यकाव्यानि –

1. पाण्डवविक्रमम्[७५४] – अष्टादशसर्गसमन्वितं महाकाव्यम्
2. सारस्वतशतकम्[७५५] – चित्रकाव्यम्
3. ऋतुचक्रचंक्रमणम्[७५६] – गीतिकाव्यम्

दृश्यकाव्यानि –

क). नाटकानि –

1. महाकविकालिदासम् (पञ्चाङ्कसमन्वितम्)
2. साम्यसागरकल्लोलम् (द्वितीयाङ्कयुक्तम्)
3. श्रीशङ्कराचार्यवैभवम् (द्वितीयाङ्कयुतं नाटकं)
4. नागनिस्तारणम् (द्वितीयाङ्कयुक्तं नाटकम्)
5. स्वातन्त्र्यसन्धिक्षणम् (द्वितीयाङ्कयुक्तं नाटकम्)
6. विवेकानन्दचरितम् (पञ्चाङ्कोपेतं नाटकम्)
7. निगमानन्दचरितम् (षष्ठाङ्कसमन्वितं नाटकम्)
8. सिन्धु-सौवीर-संग्रामम् (एकाङ्कनाटकम्)
9. श्रीकृष्णकौतुकम् (एकाङ्कनाटकम्)
10. रघुवंशम्[७५७]
11. कुमारसम्भवम्[७५८]

ख). प्रकरणम् –

12. माधुरीसुन्दरम् (दशाङ्कप्रकरणम्)

[७५४]यादवपुरविश्वविद्यालयस्य अन्वीक्षायाम् आदिमा दशसर्गाः प्रकाशिताः।
[७५५]कलिकाताविश्वविद्यालयतः १९६५ खृष्टाब्दे प्रकाशितम्।
[७५६]संस्कृतसाहित्यपरिषत्पत्रिकायां १९८० खृष्टाब्दे प्रकाशितम्।
[७५७]कालिदासकृतस्य रघुवंशमहाकाव्यस्य नाट्यरूपम्।
[७५८]कालिदासकृतस्य कुमारसम्भवमहाकाव्यस्य नाट्यप्रतिरूपम्।

ग). भाणद्वयम् –

13. विधिविपर्यासम्
14. पुरुषपुङ्गवः

घ). व्यायोगाः –

15. कैलासनाथविजयम्
16. गिरिधरसम्बर्द्धनम्

ङ). प्रहसनानि –

17. विवाहविडम्बनम्
18 चण्डताण्डवम्
19. भट्टसंकटम्
20. पुरुषरमणीयम्
21. क्षुतक्षेमीयम्
22. शतवार्षिकम्
23. चिपिटकचर्वणम्
24. रागविरागम्
25. वनभोजनम्
26. राम-नाम-दातव्यचिकित्सालयम्
27. दरिद्रदुर्दैवम्
28. चौरचातुरीयम्
29. नष्टहासम्

क. पाण्डवविक्रमं महाकाव्यम्[७५९]

भारविमाघादयो महाकवयो यथा महाकाव्यप्रणयनेन संस्कृतसाहित्यमाला-पञ्चकं विभूषितवन्तस्तथैव ‘पाण्डवविक्रमम्’ इति महाकाव्यरचनामाध्यमेनैव श्रीजीवस्तु साहित्यविबुधानां हृदि सततं राजितः। महाकाव्यमिदं यादवपुरीय-

[७५९]‘पाण्डवविक्रम’मिति महाकाव्यस्य आलोचनांशः ऋताचट्टोपाध्यायस्य ‘श्रीजीवन्यायतीर्थेर सारस्वतसाधना’ इति ग्रन्थात् कुत्रचित् सङ्कलितोऽनूदितश्च। तस्माद् अध्यापिकायै कार्तज्ञ्यं ज्ञाप्यते।

संस्कृतविभागीय-पत्रिकायाम् अन्वीक्षायां प्रचरद्रूपतां गतमिति। परमुल्लेख्यं यत् केवलं दश सर्गास्तत्र प्रकाशिताः। अपि च, 'प्रणवपारिजाताख्य'टीकायां सटीकं पाण्डवविक्रमस्य प्रथमसर्गः श्रीजीवेन प्रकाशितः।

महाभारतस्य विराटपर्वान्तर्गतां कथामाश्रित्य अष्टादशसर्गसमन्वितं विरचितमिदं महाकाव्यम्। पाण्डवानां वनवासाद् अज्ञातवासं यावत् सम्पूर्णवृत्तमाधारितमिदं काव्यम्। अत्र पञ्चशताधिकं सहस्रं श्लोकाः प्राप्यन्ते। महाकाव्यस्यास्याङ्गिरसस्तावद् वीरः, यतः पाण्डवानां वीरत्वव्यञ्जकं कथानकमत्र स्थानं लभमानम्। चान्तिमे प्रधानरसस्य उपकारकत्वेन शान्तरसो विन्यस्तः। साहित्यसमालोचकानाम् ऋताचट्टोपाध्यायानां मते, 'पाण्डवविक्रमम्' अभिनवं परिकरबन्धात्मकं महाकाव्यम्। राजशेखरेण परिकरबन्धलक्षणं लक्षितं काव्यमीमांसायाम् –

"मूलैक्यं यत्र भवेत् परिकरबन्धस्तु दूरतोऽनेकः।
तत्पुरप्रवेशप्रतिमं काव्यं सुकविभाव्यम्"॥ इति।

मनुजानां विविधाः जीवनाभिज्ञताः काव्यविरचनेन एव श्रीजीवेन समभिद्योतिताः। तस्मात् पाण्डवानां जीवनालेखवर्णनच्छलेन कविना तदुपस्थाप्यते। राजपुत्रास्तु राजपुत्रीं द्रौपदीं नीत्वा द्वादशवर्षाणि व्याप्य अरण्यं परिभ्रमन्ति स्म। तथाहि श्रीजीवः उवाच –

"वनेऽटतां कण्टगुल्मवल्लीप्रतान-वल्मीक-शिला-वकीर्णे।
मुनिव्रतानामिव पाण्डवानां च सस्मार स द्वादश हायनानि"[७६०]॥

अर्थात् कण्टकाकीर्णेऽरण्ये ते तु द्वादशवर्षाणि परिभ्रमन्तः बभूवुः। अज्ञातवासावसरे राज्ञो विराटस्य राज्यमध्ये पञ्च पाण्डवाः द्रौपदीमादाय यथाक्रमं कङ्क-वल्लभ-बृहन्नला-ग्रन्थिक-तन्त्रीपाल-सैरिन्द्रीनामभिः कालं यापितवन्तः। इतः परं तेषां गौरवोज्ज्वलः कालः समायातः। पुनः ते राजोचितवेशं परिधाय वायुगतियुक्ते रथे हस्तिनापुरमाजग्मुः। अर्थात् विद्युत्स्फुरणात् परं यथा वज्रपातस्तथैव दुःखावाप्तेरनन्तरं सुखप्राप्तिर्भवतीति जीवनसत्यम्। प्रसङ्गतः संस्मर्यते महाकवेः कालिदासस्य उत्तरमेघस्य कश्चन विशिष्टः श्लोकः –

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।

[७६०]श्री.सा.सा. (ऋ), पृ. – ५।

नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण[७६१]॥ इति।

पुनस्तु द्वितीयं श्रीजीवस्य जीवनदर्शनं तावत् – सत्य-धर्मयोर्विजयः। सन्मार्गावलम्बिनां जयोऽवश्यम्भावीति। तथाहि शास्त्रोक्तिः – 'यतो धर्मस्ततो जयः'। पाण्डवविक्रमे महाकाव्ये सत्य-शिव-सुन्दराणां सहावस्थानं द्योतितम्। तस्माद् अर्जुनेनोक्तम् –

"अग्रे सरन् अवददर्जुन आशु राजन्।
सत्यं शिवं भवति सुन्दरमित्यभिन्नम्"[७६२]॥

प्रत्येकं श्लोकस्यान्तिमे पितृदेवं पञ्चाननतर्करत्नं प्रति भक्तिरर्प्यते –

"योऽभूद् गौतमगोत्रभूतिरतुला भा भट्टपल्लीभुवः।
प्रस्थानत्रयभाष्यभास्वरयशाः आचार्य्यपञ्चाननः"॥

महाकाव्यस्य अष्टादशसर्गे विश्वनाथप्रोक्तानां प्रायः समेषामेवांलकाराणां व्यवहारो यथाक्रमं युज्यते श्रीजीवेन। महाकाव्यस्यास्य अन्यतमं वैशिष्ट्यं तावदत्र साहित्यदर्पणे स्वीकृतालंकाराणां पर्यायक्रममनुसृत्य संयोजनम्। पाण्डवानां परिचयज्ञापनम्, उत्तरायाः शुभपरिणयः, अभिमन्युना सार्धञ्चेति पाण्डवविक्रमस्य कथानकम् अलंकारप्रयोगाद् रमणीयतरं जातम्। इत्थं कृत्स्नस्य महाकाव्यस्य द्वादशाधिकं शतं श्लोकेषु द्विनवतिसंख्यकेषु श्लोकेषु अलंकाराणां बहुविचित्रितो व्यवहारः कृतस्तेन।

वृत्त्यनुप्रास-यमकादिशब्दालंकाराणां प्रयोगे समासीत् श्रीजीवः सिद्धहस्तः। उत्तराया विवाहवार्ता सर्वत्रैव प्रचारिता। पुरःजनानामुच्छवासन्तु श्रीजीवः वृत्तानुप्रासगर्भश्लोकमाध्यमेनोपस्थापयति –

"राजान्तःपुर-राजिताजिर-मिलद्-राजीवदृग्-योषितां
श्रेणीषूज्ज्वल-वेणि-बद्ध-मणिषु श्रोणी-लसद्दामसु।
मल्लीमाल्यममूल्यमण्डनमलं-धम्मिल्लमूले दधुः।
काचिद्वा कमलाङ्कुराणि-चिकुरालंङ्कारतां चक्रिरे"[७६३]॥

[७६१]मेघदूतम्, उत्तरमेघः – ४८।
[७६२]पाण्डवविक्रमम् (१८।६५)।
[७६३]श्री.सा.सा. (ऋ), पृ. – ६।

प्रचलितानाम् इन्द्रवज्रा-वंशस्थविल-प्रहर्षिणी-स्रग्धरा-वसन्ततिलकादीनां छन्दसां व्यवहारनैपुण्यं यथा तथैव अप्रचलितानां मत्तमयूरादीनां मृगेन्द्रमुखादीनां च छन्दसामपूर्वप्रयोगः समुपलभ्यते अस्यैव खलु महाकाव्यस्य दशमे पञ्चदशे च सर्गे।

'सर्गबन्धो महाकाव्य'मिति तथा च अष्टसर्गान्न न्यूनं त्रिंशत्सर्गाधिकं न भवति महाकाव्यस्य सर्ग इति आलंकारिकवचनमनुसृत्य श्रीजीवोऽष्टादशसर्गैर्महाकाव्यमिदं प्रणिनाय। 'इतिहासोद्भवं वृत्तमे'व महाकाव्यस्य विषयो भवेदित्यालङ्कारिकाणां मतम्। रामायणमहाभारतपुराणादयः खलु इतिहासपदवाच्याः। तस्मात् महाभारतस्य वनपर्वान्तगतो विषयो हि महाकाव्यस्यास्य उत्सः। विश्वनाथेन तु महाकाव्यस्य नायकस्य धीरोदात्तत्वं मुक्तकण्ठेनोद्घोषितम् – 'तत्रैको नायकः सुरः'। परमत्र श्रीजीवेन पञ्चपाण्डवानां नायकत्वं संसूचितम्। अतः विषयविन्यास-प्रकृतिवर्णन-चरित्रचित्रण-रससंयोजनादिगतदिशा संस्कृतमहाकाव्यपरम्परायां श्रीजीवस्य उच्चकोटिकं स्थानं वरीवर्ति इति सर्ववादिसम्मतो नयः।

ख. सारस्वतशतकम्

'सारस्वरतशतकम्' तावच्छब्दालंकाराणामुदाहरणसम्भूतं विचित्रमेकं चित्रकाव्यम्। यद्यपि आलंकारिकदृष्ट्या चित्रकाव्यं[७६४] नाम अवरकाव्यम्, तथापि केवलं शब्दानां बहुविचित्रितं सौन्दर्यं पाठकानां मनः समाकर्षति। वस्तुतः व्यञ्जनावृत्तिरहितमपि यद्रमणीयं तदेव चित्रकाव्यम्। तथाहि अप्पय्यदीक्षितेनोक्तम् – 'यदव्यङ्ग्यमपि चारु तच्चित्रम्'।

सहजकारयितृप्रतिभया श्रीजीवः संस्कृत-आङ्गल-वङ्गभाषाभिः चित्रकाव्यस्येतिहासमुखेन उपक्रमणिकां विधाय काव्यं निरूपयति। तेन विस्तृतभूमिकया समं कलिकाताविश्वविद्यालयात् प्रकाशितम् एकादशाधिकैकशतश्लोकैः सम्पूर्णं 'सारस्वतशतकम्' इति नाम्ना १९६५ ईशवीयाब्दे। वङ्गभाषायाञ्चतुष्षष्ठिचित्रैस्तथा पञ्चाशदधिकैकशतपुटैश्च सम्पूर्णो ग्रन्थोऽयं संस्कृतटीकोपेतः। चित्रकाव्ये विद्यन्ते सचित्रं काव्यबन्धाः वृक्ष-पद्म-मुरज-गोमूत्रिका-काञ्ची-अक्षमाला-पुस्तक-वीणा-गज-अश्व-घण्टा-रथ-विमान-धेनु-स्वस्तिका-अङ्कुश-सर्पादिबन्धाः पञ्चाशत्संख्यकाः।

[७६४] 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्' (काव्यप्रकाशः, प्रथम उल्लासः)।

प्रत्येकं बन्धानां चित्रमत्र काव्ये समुपस्थापितम्।

सारस्वतशतकस्य श्लोकान् पठित्वा असंस्कृतज्ञोऽपि श्लोकार्थमवगन्तुं शक्नोति। श्रीजीवस्य अस्मिन् काव्ये तत्सम-तद्भवशब्दानां प्राधान्यात् काठिन्यं नास्ति। प्रसादगुणस्य वैदर्भीरीतेश्चोत्कृष्टं निदर्शनमेतत् काव्यम्। शतककाव्यस्यास्य केचिच्छलोकाः संस्कृतेन उत वङ्गभाषया रचिता इति विप्रतिपत्तिर्विद्यते।

काव्यस्यास्यान्तिमे पितृदेवं पञ्चाननतर्करत्नं प्रति विनम्रा भक्तिरर्प्यते –

"स्वच्छन्दाखिलतर्ककर्कशवनीसञ्चारणपञ्चानन-
श्रीपञ्चाननतर्करत्नचरणान् विद्यागुरून् जन्मदान्"।

ग. ऋतुचक्रचङ्क्रमणम्

श्रीजीवस्य 'ऋतुचक्रचङ्क्रमणम्' इति कालिदासस्य ऋतुसंहारस्य प्रतिविम्बनम्। गीतिकाव्यमिदं कलिकातास्थितायां संस्कृतसाहित्यपरिषत्पत्रिकायां १९८० ईशवीयाब्दे (संख्या – ६०) प्रचरद्रूपतां गतम्।

वसन्तादारभ्य षड्तूनाञ्चङ्क्रमणं वर्णयति कविः काव्येऽस्मिन्। ऋतुसंहारात् पार्थक्यं यदत्र ऋतुराजाधिराजो वसन्तस्तु आद्यर्तुः अन्तिमश्च शीतः। वसन्तसमागमे प्रकृतौ परिदृश्यते सकलशुभलक्षणं नवसुन्दरं सुखदृश्यम्। तथाहि श्रीजीवेन वर्णितम् –

"किमिव नवसुन्दरं सकलशुभलक्षणं
परमसुखमन्दिरं प्रकटितमनुक्षणम्
जातमिदमद्यतनविश्वम्।
नयनयुग पश्य सुखदृश्यम्"॥

परिदृश्यते वसन्तस्यागमनेन सर्वत्रैव प्रकृतेः हास्योज्ज्वला आनन्दमयी मूर्तिः। परं वसन्तस्यावसाने प्रकृतिराज्ये ग्रीष्मस्यागमनम्। तदा काननदेशः सहसा मौनव्रतमिव काशते – 'मौनव्रतमिव सहसा लब्धम्'। वर्षासु मेघमल्लारेण समं विद्युतश्चमत्कृतिः। तदा प्रकृत्यां काचिद्रमणीया अपूर्वा विच्छित्तिर्विराजते। तदा वज्रध्वनिः केशवस्य पाञ्जजन्यस्यैव नाद इति कवेः श्रीजीवस्य कपोलकल्पनम्। श्रीजीवस्य शब्दचयनेन मल्लारस्पर्शोऽनुभूयते नाम। तस्मादुक्तम्–

"गगनं सघनं श्यामलभासं

विद्युदुदय-कृत-पीतविलासम्।
अनुकुरुते ननु केशववेशं
पाञ्चजन्य-रव-वज्रोन्मेषम्"॥

ततः परमागच्छतः शरत्कालस्य रूपं शोभमानं विलसति दीप्तमय्या नवराजवध्वा इव। अस्मिन्नेव समये ससन्तानं जगज्जननी महिषासुरमर्दिनी दशभूजा मर्त्यलोकमधिगच्छति। हेमन्तस्तु शान्तसमाहितमुनिरिव राजते –

'शरदवसाने भुवि हेमन्तः स्वैरं प्रसरति मुनिरिव शान्तः'।

अस्मिन् समये सर्वत्र उद्याप्यमानं रासोत्सववर्णनं भूयो भूयः श्रीजीवेन उल्लिखितमनन्यभङ्ग्या। एतेन भारतवर्षस्य पल्लीचित्रं कल्पयति कविरयम्। परं श्रीजीवस्य शीतवर्णनायां करुणरसस्य प्रतिध्वनिः संश्रूयते। अस्मिन् अवसरे समाजे नित्यं दृश्यमानं धनि-दरिद्रयोर्वैषम्यम् उपायनीकृतं गीतिकाव्यकृता श्रीजीवेन। परं प्रकृतौ नास्ति वैषम्यं किमपि। तस्मात् सूर्यो यथा धनिनाम् अट्टालिकां तपति तथैव दरिद्राणां पर्णकुटिरमपि – 'नाधिकतापं नाधिकशैत्यं वितरति शमतां प्राणिषु नित्यम्'॥

संस्कृतालंकारशास्त्रे गीतिकाव्यमित्यस्य काव्यभेदस्योल्लेखो नास्ति। पाश्चात्त्ये Lyrics इति शब्दस्य संस्कृतायितं रूपं तावत् गीतिकाव्यम्। गीतिकाव्ये यथा गेयधर्मिता प्रवाहमयता दृश्येते तथैव वास्तवधर्मित्वं मूलमुपजीव्यम्। तद्वतदृष्ट्या 'ऋतुचक्रचङ्क्रमणम्' उत्कृष्टं गीतिकाव्यम्। अत्रापि श्रीजीवस्य समाजमनस्कता ऋतूनां वर्णनच्छलेन अभिव्यनक्ति। वर्षासु शीततौ च मनुजानां विविधान्यसौविध्यानि जीवनाभिज्ञताश्च काव्यविरचनमाध्यमेन श्रीजीवेनाभिद्योतितानि। अस्मिन् गीतिकाव्ये यथा प्रकृतेः स्वतन्त्रं सौन्दर्यं सहृदयैः पाठकैरास्वाद्यते, तथैव प्रत्येकं श्लोकः सङ्गीतधर्मितया समृद्धः। कवेः श्रीजीवस्य कवित्वशक्तिरत्र पूर्णतया प्रकाशपदवीमेतीत्यत्र नास्ति संशयः।

श्रीजीवस्य स्फुटकवितावली

श्रीजीवस्य विविधाः प्रशस्तयस्तस्यामलां प्रतिभां प्रगुणयन्ति।

रवीन्द्रनाथस्य[७६५], द्विजेन्द्रलालस्य[७६६], सुनीतिकुमारस्य[७६७], सुवर्णजयन्त्याः प्रशस्तिनिर्माणे[७६८], क्षितीशचन्द्र[७६९]-अनन्तकुमारतर्कतीर्थ-अक्षयकुमारशास्त्रि-विजनकुमारमुख्योपाध्याय[७७०]-गोपिकामोहनभट्टाचार्या[७७१]दीनां विलापे, जानकीनाथा[७७२]दीनाम् अभिनन्दने काव्यानि, शङ्कराचार्य[७७३]-रामकृष्ण[७७४]-दुर्गादिभ्यः प्रणीतानि शताधिकानि स्तोत्रकाव्यानि तस्य महतः कवित्वस्य परिचायकानि।

श्रीजीवस्य रूपकप्रपञ्चः

श्रीजीवन्यायतीर्थः स्वजीवद्दशायां बहूनि दृश्यकाव्यानि ससार। तेन एकादश नाटकानि, भाणद्वयम्, प्रकरणमेकम्, व्यायोगद्वितयं तथा च एकादशसंख्यकानि प्रहसनानि निर्माय संस्कृतसाहित्यप्रपञ्चं विभूषितवान्। वङ्गीयेषु स संस्कृतप्रहसननिर्माणे सर्वापेक्षया ख्यातिभाक्। प्रहसनसाहित्यस्य समृद्धौ तस्य महद्योगदानं सर्वातिशायीति नास्ति संशयः।

क. महाकविकलिदासम्

'महाकविकालिदासम्' इति पञ्चाङ्कोपेतं शृङ्गारपरिलसितं रूपकमेकम्। कलिकातास्थ-राष्ट्रियसंस्कृत-महाविद्यालयस्याध्यक्षपदमलंकुर्वतो गौरीनाथशास्त्रिणोऽनुप्रेरणायां विरचितमिदं श्रीजीवेन। परवर्तिनि काले उज्जयिन्यां कालिदाससमारोहे सर्वप्रथमं १९६२ ईशवीयाब्दे नाटकमिदमभिनीतमभूत्।

---

[७६५] 'सोऽयं विश्वकवी रवीन्द्रविभवो जीयाज्जगत्पूजितः' (प्रत्येकं स्तवकस्यान्तिमपादम्)।
[७६६] 'नमत जनास्तं कविद्विजेन्द्रम्' (प्रत्येकं स्तवकस्यान्तिमपादम्)।
[७६७] "बहुविधभाषावारस्त्रीभिः शोभितकण्ठो भाववतीभिः।
सप्तगसप्ततिवत्सरपारो भासि तथापि सुनीतिकुमारः"॥
[७६८] संस्कृत-साहित्य-परिषदञ्चति पञ्चाशत्तमवर्षं या।
जयति सुवर्णजयन्तीं दधती सा सुरपुरन्ध्रीव॥ (सुवर्णजयन्ती प्रशस्तिः)।
[७६९] 'शब्दाचार्य्यक्षितीशचन्द्रस्य महास्तगमने हृदयोच्छ्वासः' (सप्तस्तवकविशिष्टं गीतिकाव्यम्)।
[७७०] 'न्यायाधीश-वियोग-विलापः'।
[७७१] 'गोपिकामोहन-वियोग-विरहगाथा'।
[७७२] "कुशलवसुताविरहेऽपि विभाति यः श्रीलजानकीनाथः।
पुमानपि विपुलमानः पृथ्व्यां प्रथते स्वयं शास्त्री"॥
[७७३] 'श्रीभगवच्छङ्कराचार्य्य-स्तुतिगीतिः'।
[७७४] 'श्रीरामकृष्ण-स्तुतिगीतिः'।

समालोचककानां नये, 'महाकविकालिदासं' विंशशतकस्य अत्युत्कृष्टं सर्वश्रेष्ठञ्च रूपकम्। सूत्रधारेण स्वयमेव प्रस्तावनायां भणितम् – 'श्रीश्रीजीवशर्मणा देवभाषोपनिबद्धं सद्यः प्रयोगायास्मभ्यमर्पितम्'।

विषयः –

दशपुराख्ये जनपदे विद्यावती नाम्नी राजकुमारी स्वयंवरसभायां पाणिप्रार्थिनः समरेन्द्र-नरेन्द्र-मथुरेशान् राजकुमारान् प्रत्याख्यातवती। प्रत्याख्यातास्ते बालिशं कूर्मनाथं व्यलोकयन्। तैस्तु तदा विचारितम् –

"शिखण्डिनं पुरस्कृत्य भाष्मशौर्यं यथा हृतम्।
तथैनं मूढमासाद्य जेतव्यः प्रमदामदः"॥ इति।

अतः प्रथमाङ्के समयोजितायां विद्वत्संगोष्ठ्यां ब्राह्मणवेशधारिणं कालिदासं पुरस्कृत्य ते राजकुमाराः समुपस्थिताः समभवन्। मौनार्थशास्त्रस्य तर्कयुद्धे भागं ग्रहीतुं विद्यावत्यपि समागता। सिद्धान्तितं भवति यत् प्रतिस्पर्धावसरे संकेतेन यो विचारो दर्शितः, स संकेतसूचिकया वाण्या घोषितः। विद्यावती अङ्गुलीयकपरिलसितां तर्जनीं प्रदर्शयामास। तत्पक्षमास्थाय आचार्येण सोमशर्मणा तद्व्यङ्ग्यार्थो व्यक्तीकृतः –

"अधिगगनमनेकास्तारकाः सन्ति दीप्ता
जगदपि परिपूर्णं वस्तुभिश्चित्ररूपैः।
विलसति सकलानां व्यापकः सर्गरक्षा-
लयकृदखिलसारः कः पदार्थः स एकः"॥

कालिदासेन तर्जनी मध्यमा चेत्यङ्गुलिद्वये प्रदर्शिते नरेन्द्रेण तदाशयो व्याख्यातः–

"ब्रह्माण्डभाण्डशतकोटविकाशलीलां
शक्तः स ईश्वरकुलालवरो विधातुम्।
मायामदृष्टमुत वा प्रकृतिं सहायीकुर्वन्
मुदा मृदमिव द्वितयं पदार्थम्"॥

अस्यां विद्वत्संगोष्ठ्यामन्ततो गत्वा कालिदासो विजयी समभवत्। एतेन विद्यावत्या समं तस्य विवाहः समभूत्।

द्वितीयाङ्कस्य विष्कम्भके विवाहात्परं कूर्मनाथस्य मूर्खत्वस्य परिचयः क्रमेणैव प्रकाशितः किन्तु विद्यावती तस्य मूर्खतायाः रहस्यमुद्घाट्य रुदती चावोचत् – "हा दुर्दैवम्! धिक् धिक् मे विद्याविभवम्। यदहं विद्याहीनस्य हस्तयोः पतितास्मि"। स्वभाग्यं विनिन्द्य कूर्मनाथो भृशं तिरस्कृतो विद्यावत्या। तदा नितरामपमानाहतः स गृहाद् बहिर्गतो जीवनान्मृत्युरेव वरमिति मन्यमानो विद्याप्राप्तये नर्मदायास्तटे श्मशाने कालीमातुराराधनं कुर्वन् आसीत्। प्रसन्ना देवी तस्मै वरं प्रददौ – 'वाग्विभूतिमान् भव, विश्वजयी भव। हिमाचल इव सरस्वतीरसमाधुरीप्रभवो भव'।

गृहत्यागावसरे 'किं विद्यया या पतिभक्तिं न ददाति?' इति कूर्मनाथस्यान्तिमवाक्यं निरन्तरं तां पीडयतीति कृत्वा पतिं मृगयितुकामा उन्मत्ता सा कञ्चुकीसकाशमागता। तत्रैव पुनरपि तयोर्मेलनमभूत्।

चतुर्थाङ्के विक्रमादित्यस्य शिविकावाहकेन शिविकावहनाय धृतः कालिदासो बलात्। ततः स राज्ञश्चान्तिकं प्रापितः। कालान्तरेण तस्य कवित्वप्रतिभां विलोक्य विक्रमादित्यस्तं नवरत्नेषु अस्थापयत्।

पञ्चमाङ्के कापि वनचारिणी हिमालयस्य शीर्षदेशे विषण्णाया विद्यावत्याः सकाशमागच्छति। सा स्वामिनं बलाहकं विद्यावतीप्रसङ्गे भूयो भूयो पृच्छति। तस्याः परिचयं विज्ञाय स्वकीये कुटिरे स्वागतं व्याजहार वनचारिणी। कालिदासोऽपि पत्नीमन्वेषयन् तत्राजगाम। नेपथ्यतः सङ्गीतं श्रुत्वा तत्तस्यैव प्रणयिणीविषयकम् इति अनुभूय मूर्च्छितोऽभवत्। बलाहकसकाशाज्ज्ञायते सङ्गीतमिदं विद्यावत्याः हृदयात् स्वतोत्सारितम्। अन्ते विक्रमादित्यस्य माध्यस्थे कविः कालिदासः पत्न्या विद्यावत्या समं मिलितोऽभवत्।

समीक्षा –

नाट्यकृत् श्रीजीवः कारयितृप्रतिभया कविकुलललामभूतं कालिदासं नायकरूपेण उपायनीकृतवान्। काहिनीविन्यासेन रससृजनेन चरित्रसृष्टौ च प्राचीनसंस्कृतसाहित्यस्यास्वादोऽस्माभिरुपलभ्यते। रूपकेऽस्मिन् सूक्तीनां प्राचुर्यमनायासलक्ष्यम्। तद्यथा – 'आत्मन्यप्रत्ययो हि स्वभावो शिक्षितानाम्', 'न हि सुखं दुःखैर्विना लभ्यते', 'न रत्नमन्विष्यति मृग्यते हि तत्', 'खलः फलं रोद्धुं

पुष्पच्छेदं चिकीर्षति', 'कियन्ति रत्नानि लसन्ति सिन्धोरन्तजले लोकदृगन्तराले। कियन्ति पुष्पानि वितीर्य्य गन्धं रहो विनश्यन्ति वनस्थलीषु' चेति। एकोक्तीनां बाहुल्यमस्माभिर्दृश्यत इह नाटके।

'महाकविकालिदास'मिति रूपके छायातत्त्वस्य प्राचुर्यं दरीदृश्यते। मालत्या राक्षसरूपधारणं तस्यैव निदर्शनम्। अस्य नाटकस्यापरमेकं वैशिष्ट्यं तावत् गीतिमयत्वम्। विशेषेण वैतालिको नेपथ्यतः सङ्गीतं गायति –

"एहि सुजनगणवाणी पूजनपुण्यदिवस इह तीर्थे।
मद इदमतिथे मदयमलं कुरु विद्या विलासितकीर्त्ते"॥ इति।

रङ्गमञ्चे गीतस्य नृत्याभिनयोऽस्माकं नयनयोरापतति। नाट्यशास्त्रीयनियमानामनुपालनं यथा श्रीजीवेन यथार्थतया कृतं तथैव अनवद्यकवित्वशक्तेः प्रकाशो लक्षितः। अतः कालिदासस्येव प्राचीनकिंवदन्तीमुपजीव्य रसाङ्गपरिपोषकतया नाट्यविरचनं सत्यमेव प्रशंसार्हमित्यत्र नास्ति संशयः।

ख. साम्यसागरकल्लोलम्

करुणरसविशिष्टस्यैकाङ्कस्यास्य नाट्यस्य वस्तु तावत् स्वाधीनतोत्तरकाले समस्याकीर्णे देशे पथभ्रष्टानां यूनां सम्यग्-मार्गप्रदर्शनम्। नेतारः कथंकारं स्वीयानुचरान् विपथं परिचालयन्तीति रूपकेऽस्मिन् गणनाथचरित्रमाध्यमेन बोध्यते। स च गणनाथः कश्चन साम्यवादी नेता। स क्वचिद् उद्योगकर्मकराणां कदाचिच्च कृषकाणाम् आन्दोलनं परिचालयति।

कश्चनान्दोलनकारी अनशनेन बुभुक्षया आसीत् प्रायेण म्रियमाणः। साम्यवादिनः तं स्कन्धे निधाय आपणं समाजग्मुः। स च विपणिप्रधानो ह्यभियुक्तो यतस्तेन अन्नादिकं न प्रदाय क्षुधार्तो मारितः। नेतुरादेशेन उत्क्षिप्ताः युवानः आपणिकस्य सर्वस्वं लुण्ठन्ति।

एकदा ईश्वरविश्वासिनो यतेराश्रमपदमाक्रान्तमान्दोलनकारिभिः। स च यतिः गणनाथस्य रक्षायै स्वयं गणनाथस्य वेशं परिदधानस्तस्य प्राणान् ररक्ष। अन्ततो गत्वा यतेः प्रकृतं स्वरूपमवगत्य तमालिङ्ग्य गणनाथो गदति – 'भवानेव सत्यदर्शी निःस्वोऽपि निःसहायोऽपि जनगणकल्याणं कामयते। ...अयमेव भारतीयभावमहिमा' इति।

ग. श्रीशङ्कराचार्यवैभवम्

'श्रीशङ्कराचार्यवैभवम्' इति अङ्कद्वयात्मकं शङ्कराचार्यचरितमुपजीव्य ग्रथितं रूपकम्। शङ्कराचार्यस्य जनि-बाल्यदशा-सन्न्यासग्रहणादिकमुपाख्यानं रोचिष्णुतयोपवर्णितम्। रूपकस्यास्य वृत्तानुसारं त्रिचूडग्रामे शिवगुरुनामधेयो ब्राह्मणः पुत्रकामनया शिवस्तुतिं चकार। एतेन तुष्टः शिवः स्वयमेव शङ्कररूपेणावतीर्य वेदान्तस्य ज्ञानकाण्डविषये समुपदिष्टवान्। द्वितीयाङ्के सुधन्वनो विद्वत्सभायां बौद्धाचार्य-कुमारिलयोर्मतानैक्यं परिदृश्यते।

घ. कुमारसम्भवम्

कालिदासस्य 'कुमारसम्भव'मिति महाकाव्यवस्तु उपजीव्य श्रीजीवेन विरचितमङ्कपञ्चात्मकं गीतसंवलितं कुमारसम्भवमिति रूपकम्। नाट्यमिदम् उज्जयिन्यां कालिदास-समारोहे अभिनीतम्। नाटकस्यान्तिमाङ्के पार्वत्याः कठिनतमं तपो वर्णितम्। अन्तिमे शिव-पार्वत्योः परिणयः सम्बभूव। रूपकस्यास्य मौलिकत्वं प्रायेणैव न दृश्यते।

ङ. रघुवंशम्

कुमारसम्भवस्य विषयमवलम्ब्य विरचितं 'रघुवंशाख्यं' रूपकम् उज्जयिन्यां कालिदाससमारोहे अभिनीतमभूत्। दिलीपस्याश्वमेधयज्ञानुष्ठानेनैव रूपकस्यास्यारम्भः। द्वितीयाङ्के रघोर्दिग्विजययात्रा वीररसच्छलेनोपवर्णिता। तृतीये चतुर्थे चाङ्कद्वितये यथाक्रमं कौत्सस्य वृत्तम् तथा च स्वयंवरे अजेन्दुमत्योर्विवाहो वर्णितः। पञ्चमे दशरथस्य मृगयावर्णनं विद्यते। तत्र तस्यैव बाणेन श्रवणकुमारो निहतो बभूव इति दृश्यते। तदा पुत्रवियोगविधुराभ्यामसहायाभ्यां पितृभ्यां दशरथोऽभिशप्तः।

नाट्यतत्त्वदिशा यथा इदमुच्चकोटिकं तथैव स्थानेषु गीतीनां समावेशः परिलक्षितः।

च. नाग-निस्तारम्

षडङ्कोपेतं रूपकमिदं श्रीजीवेन महाभारतस्य जनमेजयनामकं प्रसिद्धं वृत्तान्तमुजीव्य उपनिबद्धम्। प्रणवपारिजातपत्रिकायां १३८३ वङ्गाब्दे भाद्रमासि प्रकाशितम्। नाट्यस्यास्याङ्गी अद्भुतरसः। श्रीजीवेन स्वयमेवोक्तम् – 'कृतां वा

शृङ्गारवीररसयोरपेक्षयास्मिन् नाटके अद्भुतरसः'। अत्र गीतीनां प्राचुर्यं दृश्यते। नाट्यकृतः पात्रकल्पनमभिनवम्।

राजा परीक्षित् शमीकर्षेः आश्रममागत्य भूयो भूयः प्रतिबोधितोऽपि समाधिष्ठ ऋषिः किमपि नोक्तवान्। तदा रुष्टेन राज्ञा तस्य कण्ठे मृतसर्पे परिवेष्टिते सति शमिकपुत्रः शृङ्गी सपद्येवाभिशशाप – 'सप्ताहाभ्यन्तर एव राजा तक्षकदष्टो भूत्वा कथाशेषतां प्रयास्यतीति'। फलतः सप्तमे दिवसे ब्राह्मणसकाशात् प्राप्तात् कुसुमात् तक्षको निर्गत्य राजानं दष्टवान्।

तृतीयाङ्के जरत्कारुः नागकन्यकाम् उपरेमे। पञ्चमाङ्के जनमेजयस्य नागयज्ञेन सर्वे सर्पाः हवणकुण्डे दग्धीभूय मृत्युपदं प्रापिताः। अनन्तरं जरत्कारोः पुत्रस्य वासुकेः महानुभवतया सन्मुग्धाः ऋषयः जनमेजयश्च। तदा जरत्कारुः नागयज्ञं रोद्धुं वरं प्रार्थयामास। अन्ततो गत्वा जनमेजयस्य नागयज्ञं विरमय्य जरत्कारुः नागान् ररक्ष इति कथांशः।

छ. निगमानन्दचरितम्

श्रीजीवस्य 'निगमानन्दचरितं' सप्तमाङ्कसम्पूर्णं चरितात्मकं रूपकम्। मूलतो निगमानन्दस्य पवित्रं जीवनमाश्रित्य ग्रथितमिदं नाटकं १९५२ ईशवीयाब्दे कलिकातास्थे राममोहन-लाइब्रेरी-भवने अभिनीतम्। ऋषिकल्पस्य निगमानन्दस्य परमहंसोपाधिप्राप्तिः इह नाटके रूपकायिता वर्तते।

ज. विवेकानन्दचरितम्

स्वामिविवेकानन्दस्य जीवने मुख्यं घटमानं वृत्तमाधारीकृत्य श्रीजीवेन पञ्चमाङ्कविशिष्टञ्चरितात्मकं 'विवेकानन्दचरित'मिति रूपकं निरमायि। परिशेषे विवेकानन्दस्य श्रीरामकृष्णप्रशस्त्या रूपकमिदं समाप्तिं गतम् –

"श्रीरामकृष्णकरुणा तरुणायमाना नित्यं समास्तु शरणं परमं चिराय।
गौरी प्रभेव तरुगुल्मलताप्रतान-प्रापा ममापि भवत उभयपदासा"॥

झ. कृष्णकौतुकम्

'श्रीकृष्णकौतुक'मिति एकाङ्कात्मके शृङ्गारोद्दीपके कौतुकावहे चेह प्रहसने कृष्णस्तुतिर्वर्णिता। रजन्यां कृष्णस्य वंशीध्वनिं श्रुत्वा राधाप्रभृतयो गोप्यः स्वकहन्मन्दिरे श्रीकृष्णं ध्यायन्ति। ते अदृश्यं कृष्णं सकृदेव द्रष्टुं अशोक-तमालादिवृक्षान् पुरतः पृच्छन्ति–

कुत्र परमाराध्यस्य निवास इति। वस्तुत एकः कृष्णः सर्वसखीकरग्रहणाय बहुरूपो दरीदृश्यते। अत्र गद्यांशानां न्यूनत्वं पद्यांशानाञ्चाधिक्यं लक्ष्यते। सङ्गीतस्याप्याधिक्यं लक्षणीयम्।

ञ. सिन्धुसौवीरसंग्रामम्

भारतराष्ट्रगौरवप्रख्यापकमिदं श्रीजीवस्य वीरत्वव्यञ्जकमेकाङ्करूपकं 'सिन्धुसौवीरसंग्रामम्'। जम्मु-काश्मीरभूखण्डगतं विवादमवलम्ब्य ग्रथितेनानेन रूपकेण पाकिस्तानस्य परराज्यलोभस्तथा च भारतवर्षस्य चिरन्तनशान्तिप्रस्तावः ध्वनितौ। सिन्धु-सौवीरयोः स्वरूपोद्घाटनपुरःसरमत्र नाट्यकृता भारतवर्षस्य ज्वलत्समस्या उपायनीकृता। पाकिस्तानस्य सेनाध्यक्षस्य – 'हा हा तदर्थमिदानीमपि तत्रास्माकमवाधः अधिकारो वर्ततेतराम्' इत्युक्त्या तल्लक्ष्यं प्रकटीभवति। अपरतः, 'मित्र! पुनरपि भणामि – वयं शान्तिकामा अपि अहिंसा-मन्त्र-साधका अपि पराक्रमण-प्रतिरोधाय स्वराष्ट्र-रक्षणाय च मृत्युपणे सन्नद्धाः स्म' इति भारतीयानां चिरन्तनी मतिः।

ट. स्वातन्त्र्यसन्धिक्षणम्

'स्वातन्त्र्यसन्धिक्षणम्' इति श्रीजीवस्यैकाङ्कप्रहसने भारतवर्षस्य अखण्डस्वरूपं भाविगौरवञ्च समूलमुत्पाटयितुं बद्धदराणामाङ्गलानां कूटचरित्रं विधृतम्। संस्कृतसाहित्यपरिषत्पत्रिकायां रूपकमिदं श्रीजीवेन प्राकाशि।

ठ. माधुरीसुन्दरम्

'माधुरीसुन्दर'मिति दशाङ्कविशिष्टं लौकिकं प्रकरणम्। रूपकस्यास्य वस्तु तावत् वीणावादक-राजकन्ययोः सुन्दरसिंह-माधुर्योरपूर्वप्रणयवृत्तम्। सुन्दरसिंहस्य कण्ठ-यन्त्रसङ्गीतयोर्मूर्च्छना कियत् प्रभावयति मानवराज्यं प्रकृतिञ्चेति विशद्य वीर-शृङ्गार-भयानकरसैः विवृणोति नाट्यकृत्। नाट्यकृतो नाट्यधर्मितया भाषा-भावादिविन्यासेन कलाकौशलेन च रूपकमिदमुच्चकोटिकभूत्। परिशेषे राजा नायक-नायिकयोर्गुणावलीमङ्गीकृत्य कथयति –

"सभासु भूयाद् गुणिनां समादरः।
पवित्ररूपः प्रणयोऽस्तु पूजितः"॥

प्रसङ्गतो मनसि आयाति मनोरुक्तिः– 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः'।

ड. पुरुषपुङ्गवः

श्रीजीवरचितोऽन्यतमो भाणोऽयं 'पुरुषपुङ्गवम्'। संस्कृतसाहित्य-परिषत्पत्रिकायां प्रकाशितोऽभिनीतश्चायं भाणः साहित्यपरिषदः सारस्वतोत्सवे। रूपकस्यास्य नायकस्य वाग्वीरस्य आत्मकथात्र लिपिबद्धा। व्यङ्गात्मको हास्यरसोऽत्र अङ्गी। वाग्वीरस्य चरित्रकीर्तनेन श्रीजीवेन पुरुषशासितसमाजस्यैकांशं प्रति सुतीव्रसोपहासदृष्टिर्व्यक्तीकृता।

विषयः –

रूपकस्यास्य नायको वाग्वीरो ग्राम्यनवयुवतिभ्यो विज्ञानविषयकमुपदेशादिकं प्रददाति। स सर्वदा परस्त्रीभ्यः स्वेच्छाचारितायाः असदुपदेशान् दातुमुत्कण्ठितो वर्तते, परं स्वपत्नीं यवनिकान्तरालं स्थापयति। स्वपत्नी परपुरुषासक्ता स्याच्चेत् स्वस्य सम्पदादिकं विनष्टतां गच्छेत्। अतः स्वगृहं सावधानतया रक्षणीयम् इति वाग्वीरस्याभिप्रायः। स परपीडनाय नीतिवर्जनं करोति, निरीहशासनाय सिहंवद् गर्जति, नारीसदसि वीरायते, कीरायते च विद्वत्परिषदि।

एकदा स कस्यचित् श्यालकस्य सकाशे ग्रामं गतः। तत्र स यत्कुशासनमुपवसति, तस्यैव कुशासनस्य कुशस्तस्य वस्त्रेण संलग्नोऽभवत्। सामान्यकुशस्य सा प्रत्यर्पणेन स्वमहानुभवता प्रकटीकृता वाग्वीरेण। परन्तु तत्रैव भूमौ कस्याश्चिद् रमण्याः पतितस्वर्णकुन्तलमात्मीकृतवान्। द्वारपालकेन स धृतोऽपि श्यालकस्य कौशलयुक्त्या स मुक्तोऽभवत्।

अत्रान्तरे काचिद्रमणी तद्गुणराजिनासक्ता सती तत्सकाशमागत्य प्रेम निवेदयति। किन्तु वाग्वीरः कथयति यत् तस्य विक्रमा पत्नी शान्तिप्राप्तये स्वर्गमियाच्चेत् स तस्याः पाणिं ग्रहीष्यति, अन्यथा 'न सहेत द्वितीया'। प्रेमिकायाः विरहगाथां श्रुत्वा सन्तप्तः स सङ्गीतं गायति –

"मधुरं मधुरं मधुरतरगिच्छलयसि किं मां गीतनवभङ्गिः।
सुनृतवाणाश्रवणविलासी किमहं न स्यां तव मिलनाशीः"॥

तस्मिन्नेवावसरे कश्चिज्जनः तां ललनां प्रसह्य अपहर्तुं चेष्टते। सा रक्षायै भूयो भूयो वाग्वीरमाह्वयति। तदा वाग्वीरस्य स्वगतोक्तिः – या स्त्री स्वच्छन्द-विहारचारिणी, अन्याय्यमपि तस्याः कृते कार्यमिदं यथार्थमेव। तन्नयः – 'यदिदं स्त्रीणां स्वातन्त्र्यमुपदिश्यते सधवानाम् अधवानां विधवानां च तत्सर्वं परनारीविषयकम्' इति।

समीक्षा –

नाट्यतत्त्वदिशा पुरुषपुङ्गवं सार्थको भाणः। अत्र आकाशभाषितेन उक्तिप्रत्युक्ति-सम्बोधनानि परिदृश्यन्ते। नाट्यकृतो विषयकल्पनमाधुनिकं युगोपयोगि चेति नात्र संशयः। विद्रूपात्मकहास्यरसः अत्राङ्गी परं वीर-शृङ्गारयोः अङ्गत्वं स्वीकार्यम्। इह रूपके नाट्यकृतः समाजमनस्कता स्फुटं काशते। भानेऽस्मिन् पुरुषतान्त्रिकसमाजस्य नग्नचित्रमुपवर्णितम्।

ढ. विधिविपर्यासम्

'विधिविपर्यास'मिति श्रीजीवस्य प्रहसनमिदं पञ्चाननस्मृतिग्रन्थमालास्थ-तृतीयपुष्पत्वेन १३५६ वङ्गाब्दे प्रकाशपदवीं गतम्। 'नूतनहिन्दुविवाहविधिर्न' हि भारतीयधर्मशास्त्रसम्मत इति वल्लभाचार्यश्रीगोकुलनाथमहाराजेन स्थापितायाः परिषदः सिद्धान्तं चिराय संस्मर्तुं श्रीजीवेन रूपकमिदं विरच्य १९५० ईशवीयाब्दे प्राकाशि।

स्त्री-पुरुषयोर्मध्ये यथा प्राकृतिकं तथैव मौलिकञ्च पार्थक्यं वरीवर्ति। आधुनिककाले 'प्रगतिशीलतेति' नाम वादेन उभयोः पार्थक्यदूरीकरणेन कश्चन कृत्रिमप्रयासो नरनार्योर्मिलनसेतुं निर्माति।

प्रहसनस्यास्य नायको विनोदसुन्दरो नाम युवा स्त्री-पुरुषयोः धर्मशास्त्रप्रतिपादितस्य वैषम्यस्य आसीद् विरोधीति –

"एको गर्भः स्नेहसन्दर्भ एको बीजं तुल्यं किन्तु मूल्यं विभिन्नम्।
पुत्रः प्राप्तस्तात सर्वमन्या पुत्री मूत्रीभावमेतीव घृण्या"॥ इति।

तस्य सम्मत्तिं पुत्र-कन्ययोर्मध्ये समानांशेन विभजयितुं वाञ्छति सः। परं तस्य विवाहो नाभवत्। घर्घरकण्ठेति काचिद् युवती तस्मै उपदिशति यत् विवाहादनु सन्ततिषु सम्पत्तेः समभागेन विभजनेन जीवनं सार्थकं स्यादेव। तदा तयोः स्त्री-पुरुषविषयको वैषम्यविवादः प्रचलन्नस्ति। विनोदो मनुते यत् स्त्रीपुरुषैः जीवने नोद्वाहं सम्पादयितुं प्रतिज्ञा करणीया। घर्घरकण्ठा शास्त्रीययुक्तीः समुपस्थाप्य प्रमाणीकरोति विवाहं विहाय सृष्टिः कथमपि न सम्भवतीति। तदा विनोदो विज्ञानबलाद् युक्तिमुपस्थाप्य कथयति –

स्त्रियं विना पुरुषः स्वयमेव सन्तानोत्पादनं कर्तुमलम्।

जम्बालजिनी नाम्नी काचिन्नेत्री घर्घरकण्ठायाः युक्तिं द्रढीकर्तुं रङ्गमञ्चमागत्य दशसूत्राणि प्रस्तौति – क. प्रलम्बकेशच्छेदनम् ख. वक्षःपेषकपट्टबन्धनम् ग. व्यायामाभ्यासः घ. मृगयाव्यासङ्गः ङ. खड्गचालनम् च. सेनायां प्रवेशः छ. अवगुण्ठनत्यागः ज. सम्पत्तौ पूर्णस्वत्त्वम् झ. सगोत्रासवर्णविवाहः ञ. विवाहविच्छेदश्चेति।

ततो दृश्यते रङ्गमञ्चे कस्यचिच्चिकित्सकस्याविर्भावः। उभयोर्वादानुवादान् श्रुत्वा सोऽवगतवान् यत् विनोद-घर्घरकण्ठौ सन्तानोत्पत्तिप्रक्रियातो विरतौ सन्तौ वैज्ञानिकपद्धत्या सन्ततिं प्राप्तुकामौ। तदा चिकित्सकः प्राह – 'अनुमन्यतां प्रथमं भवतोरावश्यकाङ्गकर्त्तनं नपुंसकाङ्गयोजनम्' इति। एतच्छ्रुत्वा उभौ भिया सनातनविधिना परिणयसूत्रेणाबद्धौ। अन्ततो गत्वा नपुंसकेन तदुपलक्ष्य सङ्गीतं परिवेशितम् –

"निर्झरकण्ठे किमिति सुकण्ठे पथिकमनुमाल्ये प्रसरसि कन्ये।
क्व तव शैलसरिदिव चलभासा क्व च शुभबन्धननियमितभाषा"॥

समीक्षा –

श्रीजीवस्य प्रहसनमिदं कलात्मकरूपेण प्रयुक्तं यच्चारित्रिकविकाशस्य सहायकमभवत्। अत्र नपुंसकस्यावतरणं छायातत्त्वानुसारि वर्तते। विनोद-घर्घरकण्ठयोर्विवाह-सन्तानोत्पत्त्यादिविषयको विवादः सत्यमेव पाठकानां मनःसु अपारमानन्दं जनयति। प्रहसनेऽस्मिन् विदूषकस्य प्राकृतभाषाप्रयोगो नाट्यशास्त्रीयरीत्यनुकूलो मनोरञ्जकश्चेति। हास्यरसोऽत्राङ्गी। नपुंसकस्य वर्णनेन 'विधिविपर्यास'मिति प्रसहनं संकीर्णप्रहसने पर्यवसितम्। विशेषेण विनोदस्य चरित्रे पुरुषतान्त्रिकसमाजस्य छाया स्फुटा एव। वस्त्वाङ्गिकगतदृष्ट्या प्रहसनलक्षणस्य विशेषस्थलेष्वस्य रूपकस्यार्वाचीनत्वमालक्ष्यते।

ण. कैलासनाथविजयम्[७७५]

'कैलासनाथविजय'मिति श्रीजीवस्य पौराणिकाख्यानमुपजीव्य

[७७५] संस्कृतप्रतिभा (१९५९)।

वीररसाश्रितस्तावद् एकाङ्कव्यायोगः। कालं विजित्य गर्वोद्धतस्य रावणस्य कैलासपर्वतोत्पाटनवृत्ताश्रितोऽयं व्यायोगः। अत्र लङ्का-कैलासयोः रमणीयानि दृश्यानि प्रदर्शितानि। दिव्यपुरुषो रावणोऽस्य नायकः। परं स्त्रीचरित्ररूपेण मन्दोदर्याः भूमिकात्रातिस्वल्पा।

त. गिरिसंवर्धनम्

'गिरिधरसंवर्धन'मिति व्यायोगकोटिकं दृश्यकाव्यमिदं श्रीकृष्णस्य गोवर्धनधारणकथाश्रितं वीररसमयमेकाङ्कम्। सुदामायाः स्वगतोक्त्या रूपकमिदं प्रारभते। सुदर्शन-योगमाया-संवर्त्तकादिपात्राणि छायातत्त्वानुसारमवतारितानि श्रीजीवेन। रूपकमिदं प्रणवपारिजातस्य प्रथम-द्वितीय-तृतीयसंख्यासु प्रकाशितम्।

थ. भट्टसंकटम्

भट्टसंकटं श्रीजीवस्य पञ्चाङ्कसम्पूर्णमुच्चाङ्गं प्रहसनमेकम्।

विषयः –

रूपकस्य उपजीव्यं वस्तु इत्थम् – आसीत् यज्ञकर्मोत्साहिनो भट्टस्य कलहप्रिया कुरूपा पत्नी। पत्नीभयाद्भट्टः सदा भीतो बभूव। परं पत्नीसाहचर्यं विहाय कथमपि यज्ञकर्म न भवतीति कृत्वा स पत्न्याः साहचर्यं ग्रहीतुमासीद् बद्धदरः। अत्रान्तरे कश्चन राक्षसो भट्टपत्नीमपहरति स्म। किंकर्तव्यविमूढः सन् भट्टः सर्वमेतद्वृत्तं राज्ञे निवेदितवान्। तदा राजा तस्मै उपदिष्टवान् पत्न्याः स्वर्णप्रतिमामेकां निर्मातुम्।

सहसा कश्चन सर्वज्ञः पुरुषो योगबलेन भट्टस्यापहृतपत्नीं मृगयितुम् उपायं व्यक्तीकरोतीति विज्ञाय राजा रहसि भट्टपत्न्या अनुसन्धानार्थं गूढपुरुषं संप्रेषितवान्। राज्ञो विश्वस्तो जनस्तत्रोपस्थित्य ज्ञातुं प्रभवति यत् भट्टपत्न्या समं कस्यचिद् वानरस्य उपद्वाहे कृतसंकल्पो बभूव स राक्षसः। तदा नृपप्रेरितः पुरुषः कपिवेशं परिधाय उपांशु स्वपरिकल्पनां भट्टपत्न्यै विज्ञाप्य विवाहे तस्याः सम्मतिं प्रार्थयते। पूर्वपरिकल्पनानुसारं राजभटास्तत्र समुपस्थित्य सानुचरं राक्षसं वन्दीकृतवन्तः। परं राक्षसेभ्यो मुक्तिं प्रदाय पत्न्यै सौन्दर्यं प्रदाय च भट्ट-तत्पत्न्योर्विवादं मीमांसितवान् राजा। भट्टः पुनः पत्न्या समं सुखेन जीवनं यापितवान्। अन्ते भरतवाक्यमुच्चार्यते ब्राह्मणेन –

"सन्तु स्त्रियः स्वामिमनोऽनुकूला

लसन्तु धर्मा विधिबोधमूलाः।
वसन्तु विद्या नृषु धर्म्यवैशा हसन्तु
धर्मैकधनाश्च देशा"॥

समीक्षणम् –

शिल्पसौन्दर्यगतदृष्ट्या भट्टसंकटमनन्यं प्रहसनमेकम्। अत्र विदूषकस्यौदार्यम्, अश्लीलत्वं तथा शृङ्गाररसस्य प्राधान्यञ्च क्वचिदुपलब्धानि। गूढ़पुरुषस्य वानरच्छद्मवेशधारणं तावत् छायातत्त्वस्य निर्दशनमेकम्। इह प्रहसने बहुत्रैव प्राकृतभाषायाः प्रयोगो लक्ष्यते। रूपकमिदं संस्कृतसाहित्यपरिषत्पत्रिकाया नवमे खण्डे १९२६-२७ ईशवीयाब्दे प्रचरद्रूपतां गतम्। नाटके बहूनि प्रवादवाक्यानि परिलक्ष्यन्ते– 'आत्मानं सततं रक्षेद्दारैरपि धनैरपि', 'न विश्वसेद् विश्वस्ते, विश्वस्ते नातिविश्वसेत्', "अविज्ञातनिदानस्य रोगस्य हि चिकित्सितम् / अपि धन्वन्तरे व्यर्थं तेन किं मम दूषणम्?" चेति। इह रूपके पञ्चमाङ्के सर्वे सम्मिल्य गायन्ति –

"गहने गहने कुसुमविकाशजः।
कुसुमे कुसुमे सुषमा हासः।
विलसति दिशि दिशि महिमा विकाशो
मुखरविहगवनमधुमासः"॥ इति।

द. पुरुषरमणीयम्

अङ्कद्वयात्मकं कविकल्पितमभिनवं प्रहसनमिदम्। नाट्यकृता स्वयमेवोक्तम्– "Regarding the nature of this play, I leave to the public to have their own judgement. I have classed in under *'Prahasana'* (Farce or Comedy) in the absence of any better classification". प्रहसनमिदं १९३३ ईशवीयाब्दे पदव्रजेन वङ्गदेशस्य तीर्थपरिक्रमार्थं काञ्चीकामकोटिपीठस्याचार्यस्य शङ्कराचार्यस्यागमनमुपलक्ष्य अभिनीतम्। आदावेव नाट्यकारेणोक्तम् – "साम्प्रतं स्वतन्त्रे भारते देवभाषया राष्ट्रभाषा प्रतिष्ठा काम्यया सम्यगाधुनिकविषयानुवद्धि लोकरोचकं लघु साहित्यमावश्यकमिति"।

नाट्यवस्तु –

प्रथमाङ्के सुबन्धुः सोमदत्तश्चेति द्वौ स्नातकौ वृत्तिलाभाय राज्ञ्यः सीमन्तिन्याः प्रासादमुपनीतौ। राज्ञी सीमन्तिनी दरिद्रेभ्यः दम्पतीभ्यश्च उपायनं प्रददाति। परं तस्याः सान्निध्यलाभाय राजपुरुषं निकषा कृत्स्नं सम्पदादिकं न्यासरूपेण दातव्यमिति नियमः। अर्थप्रदाने अस्वीकृतः सुबन्धुः राजपुरुषेण समं कलहमानो दृश्यते। भिक्षुकापेक्षया तस्करवृत्तिः वरमिति पुरुषमुखात् श्रुत्वा सुबन्धुः क्षुब्धोऽभूत्। अत्रान्तरे काचन दम्पती सीमन्तिनीसकाशाद् दानं गृहीत्वा पुनस्तत् प्रत्यावर्त्य सुखेन दाम्पत्यजीवनं यापयति –

"झनं झनन्त मिदुसद्दं विमिप्सहप्सं
सिककन्त निस्पविदलानीं मुहं सिजन्ती
काशोवमान सिदबाल विलोन चर्म्म
वत्तं स्म मुहु चहु चुहुत्ति तदा विचुम्बे"॥

सुबन्धुः अपहृतमर्थं राजपुरुषात् प्रसह्य अधिग्रहीतुम् उद्यते सति वृद्धः अवोचत् यत् 'पापकर्म कथं साधये? सभार्य्यं सीमन्तिनीं निकषा गत्वा उपायनं गृहाण' इति। तदा वृद्धस्य परामर्शानुसारं सोमदत्तस्य नारीरूपेण शाटिका-सिन्दुरादिवेशपरिधानात् सुबन्धुः उपायनं गृह्णाति। परं 'विना विवाहं दाम्पत्यं परिहासाय कल्पते/ स्वतः पुमाननागाः स्याद् योषा दोषास्पदी भवेत्'[७७६]।

द्वितीयाङ्के राज्ञ्याः सकाशाद्धनानि प्राप्य प्रत्यागते सति सहसा प्रतीयते यत् सोमदत्तः पुनः पुरुषशरीरं परिधातुं नार्हति। सुबन्धुना तदा कथितम् –

"कृत्रिममुमोजयुगलं सरोजमुकुलं जयति समुन्नतम्।
कठिनं पीनं श्रीफलमपि विफलयति श्रिया निजया"॥

सोमदत्तं विहाय सुबन्धोर्जीवनं निष्फलमिति सुबन्धोरभिप्रायः। सोमदत्तस्तत्पितुः एकलः पुत्र इति कृत्वा पितृवंशावलोपभयात् स जलमग्नेनात्मानं हन्तुं मनश्चकार। अनन्तरं राजपुरुषो नार्योऽपहरणकारिरूपेण सुबन्धुमभियुक्तवान्। परन्तु राजपुरुषो बलवान् इति कृत्वा स कथमपि वश्यतां न गच्छेदिति मन्यते सुबन्धुः। उपायान्तरं न प्राप्य – 'रक्ष रक्ष नो विपदः' इति कथयित्वा राजपुरुषस्य शरणं गतः सः। तदा राजपुरुषः परिवर्तते

[७७६]पुरुषरमणीयम्, पृ. – १८।

शङ्कररूपेण। स सुबन्धोर्भक्त्या प्रीतः सन् नारीरूपधारिणं सोमदत्तं प्राह – भवतः पिता शीघ्रमेव अचिरेणैव द्वितीयं पुत्रं लभेत इति। ततः शङ्करेण सुबन्धुः प्रोक्तः – कर्मफलेन तव पत्नी क्षणकालाय पुरुषशरीरं परिधर्तुमलम्। अधुना स पत्नीत्वेन स्वामिनं निकषा प्रत्यागतः।

समीक्षणम् –

प्रहसनस्यास्य वृत्तम् अम्बिकादत्तव्यासस्य सामवताख्यं नाटकाश्रितम्। परं श्रीजीवेन तथ्यमिदं न स्व्यकारि। नाट्यकृता गभीरमननशीलतया आपातदृष्ट्या सरलविषयः हास्यरसात्मकरूपेणोपस्थापितः। प्रस्तावनातः हास्यरसस्य अविच्छिन्ना निर्झरिणी प्रवाहिता। विशेषेण सूत्रधार-विदूषकयोः दीर्घसंलापेन श्रोतृणां मनसि परमानन्दो जायेत। तस्कराः शिवस्तुतिं विधाय गायन्तीति दृश्यते –

"जय नटनाथ पुरारे!
कुटिल जटा-कलिताम्बरवारे!
शशिधर सुन्दर रङ्गं विषधरभीषणमङ्गम्
धृतवरपर शकुरंगं वहसि दहनमपि भाले।
धु धु कुटुधुं कुटुताले प्रविकटहास्य कराले
नन्दसि ताण्डवकाले कम्पित जगदाधारे"॥

छायातत्त्वस्य प्रभावभावितं रूपकमिदम्। सोमदत्त-शङ्करयोर्यथाक्रमं पत्नीरूपं तस्कररूपञ्च धारणं छायातत्त्वानुसारि।

नाट्यकृता श्रीजीवेन प्रहसनमिदं देशकालोपयोगि कृतम्। निम्नोक्तश्लोकः तत्प्रमाणीकरोति –

"प्रतारणा नो भवति प्रतारणा संसारदुःखार्णवपारदायिनी।
फलञ्च सद्यो दधति सुखायति प्रतीयते दैवदयानुवर्त्तिनी"[७७७]॥

सुबन्धु-सोमदत्तयोः कथोपकथनेन समाजे शिक्षितेषु वृत्तिहीनत्वसमस्याम् उपायनीभवति। सुबन्धुः कथयति – "स्वपृष्ठादवतार्यतां सा विद्यागोणी या गुरुसकाशाद् अधिगता गुरुभूताद्य गतिं मन्दीकरोति" इति।

[७७७]पुरुषरमणीयम्, पृ. – १५।

इह प्रहसने ईश्वरभक्त्याः परमो महिमा प्रकटितः। आसीत् सीमन्तिनी शिवभक्तिपरायणा।

प्रहसने प्राप्यन्ते काश्चन सुष्ठूक्तयः – 'धिगाहो भिक्षात्मिकां जीविकाम्', 'को जीवः शिवः प्रेरणामतिशेते', 'किं नात्मिखरो भूयाद् व्याघ्रचर्मावृतः वरः' च इति।

ध. क्षुतक्षेमीयम्

श्रीजीवस्य प्रथमाङ्कसम्पूर्णं परं मुखसन्धिभ्यां सन्निबद्धं प्रहसनमिदम्।

विषयमूलम् –

प्रहसनस्यास्य प्रस्तावनायां सूत्रधारेण ज्ञापितं यत् क्षुधाप्रशमनाय 'क्षुतक्षेमीय'मिति प्रहसनस्य निर्माणम्। समाजे धनि-दरिद्रयोर्वैषम्यं रूपककृता अनन्यशैल्या व्यङ्गविद्रूपात्मकभङ्ग्या सोपहासञ्च उपायनीकृतम्।

यमराजस्य कर्मकरश्चित्रगुप्तः पदव्रजेन परिश्रान्तः सन् रङ्गनाथस्यातिथ्यं गृहीतवान्। रङ्गनाथस्य गृहे तिष्ठतः पाचको भृत्यश्च गृहस्वामिनः अहोरात्रं सेवार्थमन्नादिनिर्माणार्थञ्च। गृहे अतिथीनां नास्ति किमपि स्थानम्। धनिनो गृहे निमन्त्रितस्य दरिद्रस्य भोजनव्यवस्थापि प्रसहनं मन्यते नाट्यकृता श्रीजीवेन – 'ही ही भोः पश्यतु इतः काष्ठासनश्रेणीम् इतश्चषकपूर्णम् उष्णपानीयम् इतस्ताम्बूलानि इतश्च धूमवर्तिका'। तस्माच्चित्रगुप्तस्य अयाचितातिथ्यग्रहणेन पाचक-भृत्यौ तं तिरस्कृतवन्तौ। परन्तु अतिथिरूपेणागतः चित्रगुप्तः कश्चन गुप्तनिधिवेत्ता ज्योतिषिकश्चेति विज्ञाय तौ मिथः विवदन्ते। अपि च, स च ज्योतिषिको गृहस्वामिनो धनसम्पदादिकं कुत्र गूहितमस्तीति विज्ञाय तौ ससम्मानं पादार्घपुरःसरं तं सभाजितवन्तौ। गृहस्वामी समागत्य चित्रगुप्तस्य परिचयं प्राप्य तस्य सेवकोऽभवत्। आहारान्ते चित्रगुप्तः शय्यायां विश्रामं कुरुते स्म।

गृहस्वामी अनुयोगेनाह – वित्तशाली जनः स्वल्पायुष्को भवतीति कृत्वा स्वस्यायुष्कालः कियान् इति पृच्छति। तदा चित्तगुप्तो वदति यत् यमपुरवास्तव्याः पूर्वपुरुषाः वंशपरस्परानुक्रमेण गृहस्वामिनः सम्पदादिकं जानन्ति। परं रङ्गनाथस्य आयुष्कालः केवल एकवत्सर इति ज्ञात्वा चिरंजीवी भवितुं वाञ्छति सः। तदा चित्रगुप्तः उत्तरयति यत् केवलं धर्मराजो वरमिमं दातुमलम्। तथापि रङ्गनाथस्य पुनः पुनः अनुरोधेन वत्सरं यावत् दीनानां ग्रासाच्छादनव्यवस्थयैव कोऽपि दीर्घजीवी

भवितुमर्हतीति कथयित्वा चित्रगुप्तः प्रतस्थे।

द्वितीये मुखसन्धौ यमपुर्याः दृश्यम्। यम-चित्रगुप्तयोरुपस्थितौ तत्राविर्भावो रङ्गनाथस्य। चित्रगुप्तो रङ्गनाथं दृष्ट्वैव तं मर्त्यलोकं प्रेरयितुमिच्छति किन्तु तस्य परिचयज्ञानाय पर्युत्सुके यमे चित्रगुप्तेन उदितं यत् पुँथ्याः प्राचीनतावशाच्च तत्रास्पष्टतयालिखितं नाम सम्यक्तया नावबुद्धम्। तदा ब्रह्मासदने यमे गते चित्रगुप्तस्य कौशलेन धर्मराजस्य निर्देशेन च रङ्गनाथस्य आयुर्वृद्धिरभवत्। रङ्गनाथस्य पुण्यसञ्चयवृत्तं चित्रगुप्तमुखाच्छ्रुत्वा धर्मराजस्य निर्देशेन यमदूताः स्कन्धमादाय मर्त्यलोकमानीतवन्त इति कथासमाप्तिः। परिशेषे भरतवाक्यमुच्चारयति –

"धर्मेण लोकाः खलु धर्मराजं जित्वा विराजन्त्विह यावदिष्टम्।
धर्मप्रसादादुपसद्य सद्यो मोक्षं यमायासहरं लभन्ताम्"॥ इति।

समीक्षा –

क. नाट्यकृता स्वकप्रतिभाबलात् सुकौशलेन प्रहसनस्यास्य बहुत्रैव जीवनदर्शनं समभिद्योतितम् –

"असारे संसारे सुखमिति धिया दुःखजलधौ।
निमग्ने भग्नाशो मरणमभिकांक्षजनगण॥
इदं धाम प्राप्तुं प्रसरति मनोवेगसहितो
हितैषित्वान्नूनं वयमपि नयामस्तुमिह भोः"॥

ख. श्रीजीवेन रङ्गनाथस्य सङ्गीतेन यमराजस्य रमणीया स्तुतिर्विहिता –

"नम नम देव कृतान्तम् यमयति यो ननु जीवनमनन्तम्।
यदनुग्रहतो न भयं ग्रहतो महतोऽप्यनुतः स नुतो मुनिभिः"॥

ग. नाट्यतत्त्वदिशा प्रहसनमिदमभिनवम्। प्रहसनस्यास्य विभाजनमपि विलक्षणम्। अत्र प्रत्यङ्कं मुखसन्धिनाम्ना व्यपदिष्टम्। अपि च, द्वाभ्यां मुखसन्धिभ्यां प्रहसनमिदं विभाजितम्।

घ. नाट्यकारः अनवद्यदक्षतया आवागभिनयेन हास्यरसं सृजति। वागभिनयसृष्टौ श्रीजीवो धुरीति नास्ति संशयः।

ङ. नाट्यस्य प्रवादवाक्यानि सूक्तयश्च सौन्दर्यं विवर्धयन्ति। दिङ्मात्रं

तावत्– 'स्त्रियश्चरित्रं पुरुषस्य भाग्यम्' (प्रवादवाक्यम्), 'न खलु परिज्ञातब्राह्मणस्य यज्ञसूत्रप्रदर्शनमावश्यकम्' (रूपकचक्रम्, क्षुतक्षेमीयम्, पृ. – २२), 'धनानि धनवन्तमेव धावन्ति, न दुर्भाग्यं दरिद्रम्' (रूपकचक्रम्, पृ. – २७) चेति।

न. शतवार्षिकम्

आधुनिकजगतीतले विज्ञानस्याभ्युन्नतिं परिलक्ष्य श्रीजीवेन 'शतवार्षिक'मिति प्रहसनं ग्रथितं, यच्च कलिकाताविश्वविद्यालयस्य शतवार्षिकोत्सवमुपलक्ष्य अभिनीतमभूत्। प्रहसनमिदं कालोपयोगि तथा च आधुनिकमित्यत्र नास्ति संशयः।

विषयः –

वैज्ञानिको मर्त्यमणी रकेटाख्ययन्त्रेण ब्रह्मलोकमुपागतः। तस्य शरीरेण समं यन्त्रमिदं संलग्नमासीदिति। स्वर्गं गत्वा प्रथममेव तेन सह स्वर्गद्वारपालकस्य द्वन्द्वो जायते। कोऽपि तस्य स्वागतं न व्याजहार। अत्रान्तरे तत्रोपस्थितो वर्तते कुब्जः परं महापराक्रमी मङ्गलो ब्रह्मणा सह साक्षात्काराय। सोऽपि यन्त्रमिदं दृष्ट्वा विस्मयेन विमूढोऽभवत्। स मन्यते यन्मर्त्यमणये खलु तस्य विकलाङ्गावस्थेयम्। तस्मात् क्षणादेव वैज्ञानिकस्य मर्त्यमणेरागमनसंवादमशुभमिति ज्ञापयितुं वुध-शुक्रयोः समीपं गतो मङ्गलः शङ्कया। अनेन मर्त्यमणिना भिया मङ्गल-वुध-शुक्र-चन्द्रादयो न संवदन्ते। सर्वे आत्मनां रक्षायै भयाकुलिताः सन्तः उपायं निर्णेतुं पर्यालोचयन्ति। मर्त्यमणिकृतेन ट्याङ्कनिक्षेपेण सुधाकरः कथमपि कम्बलेनात्मरक्षां विदधाति। अत्रान्तरे शुक्रस्तत्र समागत्य चन्द्रं पृच्छति यत् कथंकारं कलसद्वयं चन्द्रेण सह योजितम्। चन्द्रः प्रत्युत्तरयति – पुत्रवधूना तद्रक्षार्थमेतद्विहितम्। अनन्तरं वुधः शुक्रस्य मस्तके हण्डिकाबन्धनं कृत्वा मन्त्रोच्चारणं प्रारभते –

"हण्डिका चण्डिका चैव कथिता जगदम्बिका।
दर्वी-तण्डुलसंयोगादन्नाभावस्य खण्डिका"॥

मर्त्यमणेः रकेटसञ्चालनं प्रेक्ष्य राहुश्चन्द्रं जिज्ञासते – 'अरे चन्द्र किं त्वं वञ्चयितुमेव भाण्डपुटितोऽसि?' राहुस्तदा हुंकृतेनाह – रकेटधारिणं मर्त्यमणिमहं भक्षयिष्यामीति। उभयोः महतः संग्रामात् परं राहुः सविनयं प्राह – 'अरे मर्कटदर्शन कस्त्वं देवलोकं विप्लवार्थमागतोऽसि?' अनन्तरं राहोः परामर्शेन सर्वे रकेटयन्त्रमुपरि उपविश्य

ब्रह्मासमीपं विज्ञानपरीक्षाप्रदानार्थं गताः। चन्द्रस्तदा मर्त्यमणेः परिचयप्रदानपुरःसरं कथयति –

"दूरात् क्षतानि कुरुते कायवक्षो मनांसि नः।
विद्यतामक्षिपैर्यन्त्रैर्यन्त्रणादायिभिः सदा"॥

अन्ततो गत्वा ब्रह्मणो माध्यस्थेन समाधानं भवति। यन्त्रविज्ञानस्य नियन्त्रणेनैव जगतः अभ्युन्नतिर्भविष्यति –

"क्रियते चेन्न यन्त्रीयविज्ञानस्य नियन्त्रणम्।
शतवर्षाभ्यन्तरे पृथ्वी नूनं ध्वस्ता भविष्यति"॥

नाट्यमिदमभिनवं विषयगतदिशा। अनेन नाट्यकृतो वैज्ञानिकी दृष्टिः सुतरामेव काशते। नाट्यतत्त्वदिशा किमपि विलक्षणत्वं नास्त्यत्र।

फ. चिपिटकचर्वणम्

कस्यचित्कृपणस्य उपहासास्पदं चरित्रमाधारीकृत्य ग्रथितमेकाङ्कोपेतं सहृदयहृदयार्वजकं 'चिपिटकचर्वणं' श्रीजीवस्यापरमेकमुत्कृष्टं प्रहसनम्।

आसीत् कपाली कश्चन धनलोभी श्रेष्ठिपुरुषः परं चातिकृपणः। तत्पत्नी खलु रङ्गिणी। उभौ नित्यं कलहमानौ दृश्येते। तदर्थं रङ्गिण्योक्तम् – 'चतुर्मुखोऽसि कलहे ताडने च चतुर्भुजः'। तयोः दासी मन्थरा दासः पङ्गुरामश्च अपि मिथः कलहायेते। गृहस्वामी तयोः कहलेन सुतरामभवत् विरक्तः। उभयोः कथोपकथनाज्ज्ञायते यत् पङ्गुरामेण कपालिनः छिन्नपादुकायां निक्षिप्तायां दासी जीर्णच्छत्रं पथि निक्षिप्तवती। सहसा मुखे पादुकामादाय धावन्तं कुक्कुरं दृष्ट्वा पादुकां प्राप्तुकामः तस्य पश्चाद्धावनं कुर्वन् कपाली शुना दष्टः। रुधिरेण तस्य सर्वं शरीरं सिक्तम्। स्त्री रङ्गिणी वैद्यमाह्वयति। परं वैद्यस्य अर्थमूल्यं दातुं नाङ्गीकरेति। वैद्यो कुक्कुराय धृतं देयं तथा च गृहस्वामिनो दष्टं स्थानं तप्तलौहखण्डेन स्प्रष्टव्यमिति आदिशति। तदुक्तं श्रीजीवेन –

"अद्भुतं द्रव्यमुद्भूतं वनस्पतिघृताभिधम्।
न घोषो गौ न वाघासो गोरसोऽपि न युज्यते॥
श्वदन्तक्षतमत्यलपिमित्यतः कल्पते स्वयम्।

लौहतापजदाहेन मद्देहे विपुलं क्षतम्"[७७८]॥

कुक्कुरदंशनहेतुना उन्मत्तवदाचरन् स वैद्यं दंष्टुमुद्यते गृहं परित्यज्य वैद्यः भिया पलायितवान्।

अत्रान्तरे पङ्गुरामः पादुकाचतुष्टयमादाय स्वामिनं स्तोतुमिच्छति। परन्तु पुनः पुनः पृच्छायां पङ्गुरामः स्वीकरोति यत् यत्र छिन्नं पादुकाद्वयं तेन निक्षिप्तं, तत्रैव अन्यत् पादुकाद्वितयं प्राप्तम्। अपि च, तस्य उच्चैः क्रन्दनं दृष्ट्वा दयार्द्रचित्तेन कश्चित् स्वकीयं जीर्णं पादुकाद्वयं तस्मै प्रददाति। तच्छ्रुत्वा अधिकक्रोधेनोन्मत्तः कपाली पङ्गुरामं ताडयति। अनन्तरं आहूतः कश्चन छद्मवेशी तान्त्रिकः समागत्य परिकल्पनाञ्चक्रे यत् सकौशलं गृहस्वामिनः सर्वं धनादिकमपहृत्य रङ्गिन्यै प्रदातुम्। कपाली आत्मानं डाकिनीग्रस्तो मनुते। परं चतुरस्तान्त्रिकः शास्त्रानुसारं प्रमाणयति –

"आत्मानं मन्यते स्वस्थ मन्यान् सर्वान् विकारिणः।
श्वमुखात् पादुकाग्राही विकारग्रस्त उच्यते"॥

तन्त्रप्रयोगस्य दक्षिणारूपेण तान्त्रिकः हरितकी-आमलकी-वहेडाख्यं फलत्रयं प्रार्थयते। अपि च, मासत्रयं यावद् दिवसे समेषाम् आत्मीयानां निमित्तं खाद्यरूपेण केवलं चिपिटकं दातव्यम् इति स्थिरीकृतम्। एतेन स्वल्पव्ययात् कपाली सन्तुष्टोऽभवत् परं रङ्गिनी व्रतमिमं पालयितुं नालमिति कथयित्वा प्रतस्थे।

तान्त्रिकेण स्वस्त्ययनकर्मणे स्थापनीये घटे पञ्चरत्नानि दातुमादिष्टानि। अपि, विंशतितोलकमितस्वर्णं पात्रे संस्थापयेत् चेत् षष्ठितोलकपरिमितस्वर्णावाप्तिर्भवेदिति। प्रवञ्चकस्तान्त्रिकः पुनः वदति –

"अङ्कशून्ययुतो ग्राह्यः स्वर्णत्रैगुण्यकर्मणि।
शून्यहीनो यदाह्यंकः शङ्क्यः सर्वलयस्तदा"॥

अनन्तरं तान्त्रिकस्य आफिममिश्रितचूर्णं खादित्वा कपाली निद्रां गतः। क्षणादेव तेन कलसात् स्वर्णमपहृतम्। कपालिनि जाग्रति सति तान्त्रिकेणोदितं यत् पङ्गुरामस्य स्पर्शेन स्वर्णं जलरूपेण विपरिणतम्। अत्रान्तरे प्रतिवेशिनः तान्त्रिकसकाशात् प्राप्तं दशतोलकमितस्वर्णं रङ्गिन्यै समर्पितवन्तः। तदा रङ्गिनी प्रकाश्येन गदति यत्

[७७८]रूपकचक्रम्, पृ. – ५०।

पत्युर्जीवनरक्षायै सा अवश्यमेव चिपिटकव्रतं पालयेत्। अन्ततो गत्वा तान्त्रिको भरतवाक्यं पठति –

"कृपणा विदुषे कृपार्पणे कमला पङ्कभवाङ्कशोभिनी।
सरसा भवतात् सरस्वती प्रियसूनुस्त्वपहाय वैरिताम्"[७७९]॥

समीक्षणम् –

चिपिटकस्य भक्ष्यद्रव्यविशेषस्य (चिडेति भाषेति शब्दकल्पद्रुमः) चर्वणं नाम आस्वादरूपोऽर्थः। यतः कृपाणः कपाली यथा चिपिटकचर्वणेन स्वयमेव दिनानि यापयितुमलं तथैव अपरान् अपि तथा कर्तुं प्रचोदयतीति कृत्वा प्रस्तुतविषयस्य गर्भितार्थप्रकाशकत्वात् रूपकमिदम् अन्वर्थसंज्ञकमिति निश्चिता मे मतिः। इह रूपके कस्यचित् कृपणस्य हास्यकरचरित्रचित्रणेन नाट्यकृत् हास्यरसात्मकं प्रहसनरचनादाक्ष्यं प्रमाणीकृतवान्। पङ्गुरामो मन्थरा च मध्ये मध्ये प्राकृतभाषां व्यवहरतः। नायिकायाः रङ्गिण्या भाषा तु संस्कृतमिति हेतोः श्रीजीवस्य भाषाव्यवहारः विलक्षणः। अत्र नान्दी-भरतवाक्य-प्रस्तावनादीनां सम्यक्तयोपपस्थापनं कृतं श्रीजीवेन। हास्यरसोऽत्र अङ्गी। प्रहसनेऽस्मिन् हास्यरसच्छलेन समाजस्य ध्वनिदरिद्रयोः वैषम्यं प्रकटितमिति प्रतीयमानार्थः।

ब. विवाहविडम्बनम्

'विवाहविडम्बनं' श्रीजीवस्यापरमेकमत्युत्कृष्टं प्रहसनं यत्र समाजस्य कुरीतीनां नग्नं घृण्यं च वर्णनमुपलभ्यते। यद्यपि वृत्तमिदमतिरञ्जितं तथापि अद्यावधि वङ्गसमाजे कुसंस्कारस्यास्य प्रतिफलनं संदृश्यते। श्रीजीवस्य शाणितव्यङ्गलेखन्या समाजस्य वास्तवचित्रं स्फुटं काशते प्रहसनेऽस्मिन्।

रतिकान्तः षष्ठिवर्षीयो वृद्धो वर्तते। स विवाहार्थमत्यन्तम् उत्कण्ठितः। आदावेव ज्ञातव्यमस्माभिः यत् वत्सरद्वयात्पूर्वं रतिकान्तस्य पत्नी परलोकं गता। तस्य 'खर्गाधारी' नाम्नी विधवा भगिनी तत्रैव वसति – 'एको भृत्यो विधवा भगिनी काचन दासी च प्रतिपाल्यन्ते'। भगिनीविषये रतिकान्तः कथयति –

"भोजने द्विगुणमात्रा शयने च चतुर्गणा।

[७७९] रूपकचक्रम्, पृ. – ६२।

कर्मकाले खमात्रा च ततः शूर्पणखास्वरः"॥

सा च 'वैधव्य-दाव-दग्धमुखी शृगाली' कटुकथां सर्वदा उच्चारयति रतिकान्तः। रतिकान्तस्य पुनः विवाहप्रीतिं ज्ञात्वा सा स्पष्टतया वदति – 'पलितकेशस्य गलितदन्तस्य लुलितगात्रस्य स्थविरस्य विवाहघटकयोजनाम्...' इति। घटकेन केनचित् रतिकान्ताय विवाहस्य पूर्णव्यवस्था कृता। घटको गृहमागत्य जिज्ञासते – 'हम्, एका विधवा भवद्गृहे दृष्टा, का सा'? तदा गृहस्वामी कथयति – 'मम सेवार्थं काचन परिचारिका गृहे रक्षिता'। घटकस्तदा ब्रूते – 'सा तु कथयति भवतो भगिनी'ति। रतिकान्तः पुनः सक्रोधं प्रत्युत्तरयति – 'एवमेव परिचारिकाणां भवति स्पर्धा'। वस्तुतः अनयोः कथोपकथनाज्ज्ञायते रतिकान्तः भगिन्यै नूनमेव न रोचते। एतेन रतिकान्तस्य मानसिकमधःपतनं स्पष्टतया बोध्यते।

स घटकस्तत्रागत्य रतिकान्तमवोचत् – 'गम्यतां कन्यां विलोकयितुम्'। कन्या शोभनीया भवेच्चेत् तदा द्विसहस्ररूपकाणि कन्यायाः पितुः ऋणपरिशोधनार्थं तथा च सहस्ररूपकाणि विवाहव्ययार्थमविलम्बेन दातव्यानि। रतिकान्तो विवाहात्प्राग् सकृदेव चन्द्रलेखां द्रष्टुमिच्छति। वस्तुतः, प्रतिवेशिनाम् एकस्तरुणो भास्करशर्मनामधेयो वरत्वेन पात्रीपक्षसकाशे प्रदर्शितः घटकेन। तत्र वरकर्तृत्वेन कन्यां विलोकयितुमनुरुद्धवान् घटकः। विवाहावसरे स वरपदं प्राप्स्यतीति कृत्वा घटको रतिकान्तं विबोधयति स्म। अपरतः, स कन्यागृहस्थजनान् आश्वासयति यत् रतिकान्तस्यार्थव्ययेनैव भास्करशर्मणा सह चन्द्रलेखायाः विवाहो भविष्यति। चन्द्रलेखां दृष्ट्वा प्रीतः सन् स गृहं प्रत्यागत्य विवाहस्यालंकारक्रयार्थं स्वर्णकारमाह्वयति। यदा वरवेशं परिधाय विवाहाय प्रतस्थे, तदा विधवा भगिनी तस्य निर्बुद्धितायै विलपति स्म। कन्यां सज्जीकर्तुं यदा रतिकान्तः अलंकारान् प्रेषितवान्, तदा स श्रुतवान् यत् तस्यैवार्थेन प्रतिवेशी भास्करवर्मा चन्द्रलेखायाः पाणिं जग्राह। परिशेषे रतिकान्तो विलपन् आह –

"घटको घोटकश्चैव स्यान्मनोरथचालकः।
क्वचित् सन्निधिमासाद्य पदाघातप्रियः पुनः"॥

समीक्षा –

प्रहसनमिदं समसामयिकसमाजचेतनताया उज्ज्वलं निदर्शनमेकम्। हास्यरससृष्टौ

अनुपमं रूपकमिदं श्रीजीवस्य कारयितृप्रतिभायाः फलम्। अत्र नैके प्रवादाः उक्तिरूपेण नाट्यकृता व्यवहृताः – 'दशाचक्रगतो नूनं भगवानपि भूतति'[७८०], 'विधेर्विधानात् सर्वं सम्भवति[७८१]', 'विकीर्णेष्वन्नेषु काकानामभावो न भविष्यति'[७८२], 'आहारा वा प्रहारो वा लभ्यो भवति भाख्यतः'[७८३] चेति।

व. दरिद्रदुर्दैवम्

श्रीजीवस्यान्तिमं प्रहसनमिदम् १९६८ ईशवीयाब्दे प्रकाशितम्। नाट्यकृतादावेवोक्तं यत् 'प्रहसनं नाम किञ्चिल्लघुसाहित्यं पलाशतरोरिव यस्य रचनया न ज्ञानकाण्डगौरवं न वा यशः पुष्पशौरभं प्रकटीभवेत्'। महर्षिवङ्गिमचन्द्रमहाविद्यालयस्य देवभाषापरिषदो वार्षिकोत्सवे नाट्यस्यास्य अभिनयोऽभवत्।

रूपकस्य वृत्तमित्थम् –

रूपकस्यास्य नायको वक्रेश्वरो भिक्षावृत्त्या जीवनं यापयति। छिन्नकर्पट-पादुका-तपत्रादिना तस्य दारिद्रता सूच्यते। एकदा अपूर्णभिक्षापात्रमादाय गृहं प्रत्यागतः सः। तस्य स्त्री मन्दोदरी नित्यं कलहमाना वक्रेश्वरं नितरां खेदयति। तदा स सखेदमाह – 'अहो! त्वद् भाग्ययोगेन दुर्भिक्षं न जहाति माम्'। सहसा कच्छवस्त्रे उन्मुक्ते सति तण्डुलाबद्धपेटिका सर्वसमक्षं प्रकाशं गता। तदा पत्नी परिजनेभ्यो भिक्षान्नगोपनात् भृशं तर्जति तम्।

ग्रीष्मर्तौ असौ कदाचित् निजपरिवारस्य सदस्यैः समं भिक्षार्थं क्वचिज्जगाम। सर्वे ते तृष्णार्ताः। तेनैव मार्गेण क्षुद्रामो नाम वणिग् गच्छन्नस्तीति दृष्ट्वा वक्रेश्वरस्तस्मात् किमपि ययाचे किन्तु पथि भिक्षान्नप्रदाने पितृमातृकृतं निषेधं प्रोच्य असौ भिक्षां दातुं नैच्छत्। त्वमपि मत्सदृशो भव इति अभिशशाप वक्रेश्वरः। ततः कमण्डलुमादाय कश्चित् सिद्धपुरुषः आगतः। तदा सिद्धदम्पत्योराशीर्वादात् प्राप्तपाशकस्य प्रयोगेण स प्रचुरतया तण्डुलान् लभते। अपि च, सिद्धसाधकेनोक्तम् – "एतस्य दिव्यपाशस्य प्रभावाद् यावन्मात्रं धनं त्वया प्राप्स्यते तद्द्विगुणं धनं प्रतिवेशिभिरुपलभ्यते। सात्त्विकप्रयोगाभावे

[७८०] संस्कृतप्रतिभा (विवाहविडम्बनम्), पृ. – ९६॥

[७८१] तत्रैव, पृ. – ९१।

[७८२] तत्रैव, पृ. – ८५॥

[७८३] तत्रैव, पृ. – ८६।

पाशोऽयं विगलितो भविष्यतीति"। तत्क्षणादेव वक्रेश्वरस्याभिलाषानुसारं तस्यात्मीयानां सर्वाणि भिक्षापात्राणि अन्नैः पूरितानीति दृश्यते। इतरे भिक्षुकाः प्रचुरमन्नं लब्ध्वा दारिद्र्यान्मुक्ता अभवन्। एतन्न सोढुमलम् वक्रेश्वरः। तस्मात् स गदति –

"अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।
समानधनगर्वेण स्पर्धमानो हि दुःसहः"॥

तदा स पाशकान् ज्वालयितुं गृहिणीमादिदेश – "सर्वेषां तण्डुलागमो मम कर्मफलेन समानो यदि स्यात् तदा वरं मे दारिद्र्यम्।...गृहिणी सत्वरं ज्वलय वह्निम्। पाशकास्तत्र नूनं क्षिपामि। अन्यथा न मे शान्तिरस्ति"।

समीक्षणम् –

प्रकरणस्यास्याङ्कारम्भः सूच्यते नायकस्य वक्रेश्वरस्य स्वगतोक्त्या। किन्तु तस्य वक्तव्येन सामाजिकानां करुणरसाभिव्यक्तिः प्रकटिता दृश्यते। इह रूपके लम्बोदर-षडाननयोः कलहावस्थायां वक्रोक्तितत्त्वस्य प्रभावो दृक्पथमायाति।

प्रहसनस्य द्वितीयमुखसन्धौ रङ्गपीठे आङ्गिकाभिनयो रमणीयः। अत्र 'देव दयामय शमय पिपासां सुफलय बालकयुगलहृदाशाम्' इति शिवस्तुत्याः समावेशेनैव नाट्यमिदमधिकं रोचकमभूत्।

म. चण्डताण्डवम्[७८४] –

चण्डताण्डवं श्रीजीवस्य उच्चकोटिकम् अङ्कद्वयात्मकं प्रहसनमेकम्। द्वितीय-विश्वयुद्धे योरपमहादेशस्य बृहतां राष्ट्राणां हिंसात्मकमनःप्रवृत्तिं विरुध्य नाट्यकृता परिहासच्छलेन रूपकमिदं निरमायि। विश्वनाथादिभिः उक्तानि प्रहसनलक्षणानि सर्वाणि नात्र सङ्गच्छन्ते। तथाहि श्रीजीवेन स्वयमाभाणि – "This two act-play should come under *prahasana* (farce) in the absence of any other classification".

रूपकमिदं प्रथममेव कलिकाताताः प्रकाशिताया आचार्यपञ्चाननस्मृति-ग्रन्थमालायाश्चतुर्षु खण्डेषु प्रकाशितमपि परं ग्रन्थत्वेन संस्कृतसाहित्यपरिषदि

[७८४] नन्ददुलालमित्रस्य 'विंशशताब्दीते वाङालीर संस्कृत नाट्य साधना (१९०१-१९८१)' इति ग्रन्थात् कानिचित् तथ्यानि उत्कलितानि। तदर्थं ग्रन्थकारं प्रति अहमधमर्णतां प्रकाशयामि।

प्रथमप्रकाशोऽस्य। विश्वयुद्धावसरे विश्वशान्तये स्वामि-करपात्रिणा दिल्ल्यां समायोजिते महायज्ञे रूपकमिदमभिनीतम्।

विषयः –

प्रथमाङ्के युद्धार्थिनां कथोपकथनेन वाचिकसंघर्षो वर्णितः। युद्धाभिलाषी रुशनेता स्ट्यालिनो धर्मध्वंसनमुद्घघोषयति –

"धर्मो नाम कुकल्पनाल्पधिषणप्राणान्तकृद् भीषणो
यन्त्रं किञ्च पुरोधसां द्रविणदं दीनार्थविद्राविणम्।
दौर्बल्यं भजतामलीकशरणं द्वन्द्वैककन्दं नृणाम्।
स्त्रीणां मानसमोहनः स हि कथं नोत्सार्यतां मादृशैः"॥

तन्नये धर्मो हि विश्वस्य विनाशात्मकप्रवृत्तेर्जन्मदाता। अयञ्च धर्मः दूष्वणो विवेकिनां भूषणं, कपटपटूनां घातकः, सर्वशुभानां पातकञ्च सर्वराष्ट्राणाम्। स्ट्यालिनः कथयति – 'उत्सार्यताम् उत्सार्यतां सर्वथा धर्मप्रसङ्गः'।

स च स्ट्यालिनस्तस्यैवादर्शग्रहणाय सर्वान् राष्ट्रनेतृजनान् अनुरुद्धवान्। तस्यैव सेनानायकः समागत्य विवृणोति यत् कथंकारं तत्पक्षीयाः सैन्याः धर्माचार्यादीन् निहत्य तेषां रुधिरैः राजपथं रञ्जितवन्तः। तदा स्ट्यालिनः कथयति यत् अद्यापि धर्मस्य ध्वजारूपेण अवशिष्टानां जीवितानामपि परलोकः प्रेषणीयः।

समागतो धर्मपुरुषो राष्ट्रनिर्माणात्मकं विशेषत्वं विश्लेषितवान्। स्ट्यालिनस्तस्य निग्रहार्थं राजपुरुषान् आदिदेश। धर्मपुरुषस्तु ज्योतिर्मयो भूत्वा गायन् भारतमाजगाम। अपरतः पापपुरुषो योरपे शक्तिं वर्धितुं प्रयतते।

ततो हिटलारो रङ्गपीठमागत्य नृत्यन् जम्बीरफलहस्तोऽसौ ब्रवीति – 'जम्बीरफलमिव वीरनीरसारं वश्यं मे धरणीतलं ह्यवश्यभाव्यम्'। हिटलारेण सममासीत् मुसोलिनी तत्र समुपस्थितः। सोऽवोचत् –

"तिष्ठामि पृष्ठे भवतो गरिष्ठे जम्बीरखण्डे लवणानुकारी।
अहं मुदास्तीर्य निजञ्च वीर्य..." इति॥

अनन्तरं रङ्गमञ्चे आङ्गलसचिवस्ताभ्यां सह सम्मिलितो बभूव। सोऽपि प्रतिज्ञाञ्चक्रे – 'विश्वं नूनं हुणहीनं विधास्ये' इति। अर्थात् पृथिव्यामस्यां जर्मानीदेशस्य

नामापि चिराय लुप्तं गच्छेदिति तेषामभिप्रायः। रुश-आङ्गलराष्ट्रप्रधानयोर्मध्ये सन्धिरभूत् जार्मानि-इटालीदेशौ विरुद्ध्य सशस्त्रं युद्धाय। हिटलारः स्वयमेव जुघोष –

"स्वस्तिकांको ध्वजो योऽयमुच्छितः स्वेच्छया मया।
प्राच्य-प्रतीच्यनिर्भेदं विश्वखेदं हरिष्यति"॥ इति

आङ्गलशासकानां भारताधिकारमन्त्रो भारतस्यैव कृते मङ्गलजनक इति चिन्तयन्ति हिटलार-मुसोलिनीप्रभृतयो राष्ट्रनेतारः। जापानदेशः क्रमेणैव तेषां सामरिकशक्तिं वर्धयति। हिटलारेण समं मित्रतां संस्थाप्य एशियामहादेशं स्वकप्रभावेण वशीकर्तुम् आङ्गलानामभिप्रायो वर्तते। स खलु पृथिवीं द्विधा विभज्य पूर्वभागे जापानदेशे तथा च पश्चिमायां दिशि स्वाधिकारं प्रतिष्ठापयितुं कृतप्रयत्नो वर्तते। उभयोः पक्षयोर्मध्ये महति सम्पराये आङ्गलसेनापतिना हिटलारः पराजितोऽभवत्।

प्रथमाङ्कस्तावत् लोभ-क्रोधयोः कथोपकथनेन समाप्तिं गच्छेत्। पापपुरुषस्तत्र समागत्य सोल्लासं घोषितवान् यद् आमेरिकाद्वारा जापानभूमिः परमाणुबोम्बस्फोटेन ध्वस्ता। अनन्तरं स पुत्रद्वयमादाय विश्वानि जेतुं बहिर्गतः। आदौ पृथिव्याः पश्चिमप्रान्तीयदेशानां ततः भारतवर्षस्य जयस्तस्योद्देश्यम्।

द्वितीयाङ्के क्रोध-लोभ-हिंसा-पापपुरुषाः देवमन्दिरसमीपमागत्य स्वकसंकल्पं व्याकृतवन्तः – 'अग्रेसरीभव विमुक्तशरीरकुण्ठा वर्षश्च भारतमनारतमाश्रयस्व' इति। धर्माद्भीता हिंसा अकथयत् – 'हिंसे नट नट भारतवर्षं मानवशोणितपानहर्षम्' इति। ते अन्नादिप्रदानपुरःसरं देवतामुद्दिश्य धर्मेण विहितां पूजां वाधन्ते। प्रत्युत स्वयं पूजोपहारादिकमाप्तुकामः। उभयोर्मध्ये यज्ञोपयोगविषयको वितर्कः समभूत्। अनन्तरं धर्मपुरुषस्यागमनेनैव पापपुरुषादयस्तत्स्थानाद्गताः। अन्ततो गत्वा 'विश्वकल्याणमस्तु' इति भरतवाक्येन धर्मस्य विजयो दर्शितः।

समीक्षणम् –

प्रथमतः, रूपकस्यास्यादावेव रङ्गमञ्चे रुशनेतुः स्ट्यालिनस्य सुदीर्घं स्वगतोक्तिर्नयनयोरापतति। अत्र स्ट्यालिनः सरोषं धर्मविरोधिमनोभावान् व्यक्तीकरोति। परन्तु नाट्यशास्त्रीयरीत्यनुसारं स्वगतोक्तौ रोषादेरभिनयो न करणीयः।

द्वितीयतः, अत्र केषाञ्चिद् गीतानां संयोजनेन रूपकस्य मनोहारित्वं विवृद्धिं

गतम्। नाटकीयपात्राणां नृत्येन वाद्यध्वनिना च रूपकमिदमधिकतया मनोहारि अभूत्। यथा लोभो रङ्गमञ्चे नृत्यति –

"अन्तकमुखयन्त्रहसितशब्दितशतवज्रम्।
घर्घर-घर-गर्गरगर-घोरविकटगर्जम्"॥

बहुत्रैव वाद्यध्वनिव्यवहारेणैव नेतॄणां विजयोल्लासो दर्शितः।

तृतीयतः, मानवपात्रैः सह भावात्मकपात्राणां युगपत्तया व्यवहारः संस्कृतसाहित्ये प्रविरलतया सन्दृश्यते। तस्मिन् कर्मणि श्रीजीवोऽद्वितीयः।

चतुर्थतः, रङ्गमञ्चे युद्धो न दर्शनीयः इति नाट्यशास्त्रीयनियमं नानुपालितवान् श्रीजीवः। दिङ्मात्रं तावत् – "इति परस्परं कण्ठदेशमाक्रम्य परिक्रम्य च हुणप्रभुः नाटयति आङ्गलसचिवश्च रोमकनेतुः कष्टं रुद्धनं दूरे तं निक्षिपति" इति।

पञ्चमतः, 'चण्डताण्डवं' प्राच्य-प्रतीच्यनाटकानां संमिश्रणं व्यनक्ति। शृङ्गारात्मकभावान् परिवर्त्य नवरीत्या विश्वकल्याणात्मकपरिकल्पनायाः समन्वयः श्रीजीवेनात्र परिलसितः।

य. चौरचातुरीयम्

'चौरचातुरीयं' नाट्यकृतः श्रीजीवस्य सन्धिद्वयात्मकं प्रहसनम्। नाट्यमिदं १९५१ ईशवीयाब्दे संस्कृतसाहित्यपरिषत्-पत्रिकातः प्रकाशितमभूत्। अत्र चौर्यकलायाः विविधनिगूढरहस्यानि नाट्यकृता अनन्यशैल्या प्रभोविष्णुतया च परिवेशितानि।

प्रहसनस्यास्य नायको घटङ्करश्चौर्यकर्मणि कुशलः। स चौर्यवृत्तिं कृत्वा प्रचुरं सम्पत्त्यादिकमात्मसात्कृतवान्। राजपालकास्तस्य निग्रहार्थं सदा यतन्ते। क्वचिन्नेत्रहीनस्य (नेत्रहीनस्य मे यथा दिवा तथा रात्रिः) कदाचिद्वा उन्मत्तस्य चाभिनयं कृत्वा आत्मानं कथमपि तेभ्यो रक्षति। कदाचिच्च राजपुरुषाणां नेत्रेषु तप्तधूलिं निक्षिप्य शीघ्रं पलायते सः।

द्वितीयसन्धौ कश्चन साधुः घटङ्करस्य गृहमागतो भिक्षार्थम्। चौरगेहे साधुं दृष्ट्वा राजपुरुषास्तं चौर इत्यनुमाय वध्नन्ति परं पारिपार्श्विकीमवस्थां विविच्य तं मुञ्जन्ति। ततः स गृहं प्रत्यागत्य पत्नीं कालिन्दीं निकषा चौर्यद्रव्यजातं प्रदाय तां दूरं गन्तुमादिदेश। तस्मान्नाट्यकृता सत्यमेवाभाणि – "स्तेयं हि स्वभावधर्मो मानवानाम्।...दुर्लभं मानुषं

जन्म लब्ध्वा अहं किमकृतार्थो मरिष्यामि? चौर्यं पापमिति घुष्यते स्नायुदुर्बलैः स्थविरैः अकर्मण्यैः भीरुभिर्वा"[७८५]॥

साधुसकाशाद् स रूपपरिवर्तिनीं विद्यामायत्तीचकार। फलतो यदा राज्ञः कृष्णवर्णीयमश्वमेकमपहृत्य देवदर्शनार्थं मन्दिरं प्रवेष्टुकामो घटङ्करो राजपुरुषेण धृतस्तदा सः तमश्वञ्च श्वेतं कुरुते।

प्रतिज्ञां मनसिकृत्य परिवर्तितस्तथा च सत्यवादी घटङ्करश्चौरचौतुर्यम् उन्मोचितवान् राजसमक्षम्। गुरुदक्षिणात्वेन स साधवे आत्मजीवनमुत्सर्गीकृतवान्। अन्तिमे राजा साधोः सनिर्बन्धानुरोधेन घटङ्कराय मुक्तिं प्रदाय आजीवनभोग्यां वृत्तिं प्रादात। ततः तस्य साधोरुपदेशेनैव असौ चौरः चौरवृत्तिं परिहाय कल्पषाणां क्षालनाय काशीं जगाम।

रूपकमिदमारभते घटङ्करस्य स्वगतोक्त्या। कृष्णाश्वस्य श्वेतत्वे परिवर्तनं छायातत्त्वस्य निदर्शनम्। प्रहसनमिदं 'प्रबुद्धरौहिणेय'मिति मध्ययुगीयनाट्यस्य अनुकरणात्मकमिति रामजी-उपाध्यायमतम्।

र. रामनामदातव्यचिकित्सालयः

सीताराम-दासोङ्कारनाथेन लिखितः संलापकोटिको 'रामनामदातव्य-चिकित्सालया'ख्यः प्रबन्धो भाव-विषयादिग्रहणपूर्वकं संस्कृतेन रूपकायितः श्रीजीवेन। रामनाम-दातव्य-चिकित्सालयं संस्थाप्य सर्वरोगहरं रामनामाख्यम् औषधिं प्रदाय राजयक्ष्मादिरोगान् निवारितवान् कश्चन मत्तः। नाट्यकृतः हास्यरसपरिवेशनेन रूपकमिदं लोकोत्तरं चमत्कारि चाभूत्।

ल. वनभोजनम्

श्रीजीवस्य 'वनभोजन'मिति प्रहसनकोटिकं रूपकमिदं हास्यरसव्यञ्जकं सुप्रिय-देलप्रिय-सुमन्त्रादीनां षण्णां छात्राणां वनभोजनमुपलक्ष्य मुखसन्धिभ्यां विभक्तम्। श्रीजीवस्य अन्यरूपकवदत्रापि सरसगीतीनां प्राचुर्यं लक्ष्यते।

---
[७८५] स.सा.प. (१९५१), पृ. – ३४।

भ. रागविरागम्

'रागविराग'मिति द्व्यङ्कात्मकं मिलनान्तं प्रहसनं श्रीजीवेन १९५९ ईशवीयाब्दे विरच्य १९७२ ईशवीयाब्दे रूपकचक्राख्ये ग्रन्थे प्राकाशि। भगवल्लाभोपायो हि संगीतानुशीलनम् तथा च मानवमनसि संगीतस्य प्रभावः कियानिति प्रतिपाद्यं वस्तु रूपकस्यास्य। कस्यचिन्नृपस्य राज्ये संगीतानुशीलनं निषिद्धमिति कृत्वा संगीतप्रेमिणः भिक्षुक-सैनिक-तरुणाश्च सर्वे सन्ति अपराधिनः। परं सङ्गीतस्य मूर्च्छनया राजकुमारः पितृहत्यातो विरमते। सन्यासी अपि संसारं परित्यज्य यतिधर्मस्य आश्रयञ्चक्रे। तदा राज्ञो ज्ञानचक्षुः उन्मीलितमभूत् – 'सत्यं सङ्गीतमहिमा मां मोहयति। सङ्गीतेनैवाद्य मे जीवन-धन-मानाश्च रक्षिताः। नाहं कृतघ्नः'।

परिशेषे वक्तव्यं यत् संक्षेपप्रस्तावात् श्रीजीवस्य प्रतिभाप्रमाणं मन्यते, न तु विस्तरः। तदितं लाघवं सारगर्भत्वं च श्रीजीवस्य नाट्यानाम् उल्लेखनीयो गुण इति स्पष्टं स्यात् पाठकानाम्। तस्य रूपकेषु वैयक्तिकभावानामपेक्षया सामाजिकमान्यतानां श्रेष्ठत्वमङ्गीक्रियते। तस्य वर्तमानजीवनं प्रति रमणीया बिम्बदृष्टिः अस्माकं मनसि नीडं रचयति। पौराणिकचरित्राणाम् अवहेलितानाञ्च तथा युगोपयोगिचरित्राणाञ्च भव्यरूपप्रदाने नाट्यकाराः श्रीजीवन्यायतीर्था बद्धदरा दृश्यन्ते। तस्मात् संस्कृतनाट्यजगति नाट्यकृदयं सर्वोच्चस्थानमधिकुर्वते। कारयतृभावयित्र्योः प्रतिभयोर्विरलाधारः किल श्रीजीव इति। यतस्तस्मिन् कविसहृदययोरनन्याश्रयत्वं स्फुटम्।

८. सिद्धेश्वर-चट्टोपाध्यायस्य कारयितृप्रतिभा[७८६]

०. उपोद्घातः

आधुनिकसंस्कृतसाहित्यस्य परिव्याप्तिर्बृहती। तस्यायं रत्नभाण्डः समुज्ज्वलः समृद्धश्च संबभूव बह्वीनां मनीषाणां लेखनीसंस्पर्शेन। रत्नकोशस्यास्य पश्चिमवङ्गप्रदेशे मौक्तिकतुल्यमासीत्तावत् सिद्धेश्वरचट्टोपाध्यायः, यो हि बुडोदानाम्ना ख्यातिमगाज्जगतीतले। संस्कृतनाट्यजगतीतले एकस्या स्वतन्त्रधारायाः प्रवर्तको (अधुना वांलादेशे तदानीञ्च पूर्वपाकिस्ताने) जातजन्मायं कविवरः परं पश्चिमवङ्गस्य वर्धमान्-विश्वविद्यालये अध्यापकपदलंचकार। न केवलं नाट्यकृद्रूपेण तस्य प्रसिद्धिरासीदपि च, प्रसिद्धो नटो नाट्यनिर्देशको नाट्यतत्त्वविशारदयम्। नाट्यजगति तदीयं विशेषमवदाननिमित्तं 'स्वर्णकलसः'(Golden Pitcher) इत्युपाधिना पुरस्कृतोऽभूद् अयं नाट्यकृत्। सिद्धेश्वरो हि प्रथमो वङ्गीयो यः सागरनन्दिप्रणीतस्य नाटकलक्षणरत्नकोशस्य वङ्गभाषया सम्पादनं विहितवान्। वङ्गप्रदेशस्य समसामिकनाट्यकृत्सु सिद्धेश्वरो महीयते नाट्यवर्णनकौशलेन सांवादिकसामञ्जस्येन भाषासौष्ठवेन मधुरमसृणरसपेशलपदगुम्फेन रसस्पर्शेन च। तस्य नाट्यविश्वं सर्वदा समसामियकसमस्याधारितं वास्तवमतवादपरिप्रेक्षितञ्चेति।

१. सिद्धेश्वरस्य साहित्यविच्छित्तिः

तत्प्रणीतानि चत्वारि नाटकानि तावत् –

१) धरित्रीपतिनिर्वाचनम्[७८७]

२) अथ किम्[७८८]

३) ननाविताडनम्[७८९]

[७८६]'नाट्यशास्त्रस्य नाट्यलोकधर्मिन्योः परम्परयोः सेतुबन्धने सिद्धेश्वरः सिद्धेश्वरचट्टोपाध्यायः', (स.सा.प., LXXXXVII, Nos-1-4) मदीयभ्रातुः सौम्यजित्सेनस्य प्रबन्धस्यांशविशेषोऽत्र प्रसङ्गानुसारं गृहीतः। तस्मै कार्तज्ञं ज्ञापयामि।

[७८७]धरित्री.नि. (एकाङ्करूपकम्), स.सा.प., कोलकाता, १९७१।

[७८८]अथ किम् (प्रहसनम्) तत्रैव (अङ्कः – ६), कोलकाता, १९७२।

[७८९]ननाविताडनम् (प्रसहनम्), तत्रैव (अङ्कः – १-३), कोलकाता, १९७४।

४) स्वर्गीयहसनम्[७९०]

ब्रेकट्-महोदयः सिद्धेश्वरेणैव वङ्गदेशे तथा समग्रेऽपि भारतवर्षे सर्वप्रथमतया उपस्थापितः। श्रूयते यन्न केवलं वङ्गदेशे भारते वा, अखिलायां दक्षिण-एशियायां रङ्गमञ्च एव ब्रेकट्मतं प्रतिष्ठितं प्राथम्येन सिद्धेश्वरेण। तस्मादेव वार्लिनस्थिते 'ब्रेकट्-ग्यालारी' इत्यभिधेये मञ्चे सिद्धेश्वरचट्टोपाध्यायस्य नाम स्वर्णाक्षरैः अङ्कितम्।

सिद्धेश्वरस्य प्रत्येकमेव नाटकं साक्षेपधर्मि (Satirical)। तच्च क्वचित् सामाजिकविषयं क्वचिद्वा राजनैतिकविषयं, क्वचिच्च सामाजिक-राजनैतिकादिविषयान् प्रति कठोरकषाघातं कृतवत्। किं बहुना, स्वजीवने तेन यद्यद्दृष्टं तत्तदेव तेनोपस्थापितं तदीयैश्चतुर्भिर्नाटकैः। अतः प्रत्येकमेव नाटके सत्यस्यातिदारुणस्वरूपं समुद्घाटितमित्यत्र न संशयः।

क). धरित्रीपतिनिर्वाचनम्

आन्तर्जातिकपरिसरे राजनैतिकसमस्याम् उपजीव्य रचितमिदम् अनवद्यञ्च व्यङ्गनाटकम्। अत्रान्तर्जातिकराजनीतिक्षेत्रे बृहच्छक्तीनां पारस्परिकशक्ति-प्रतिस्पर्धितायाः नग्नञ्चित्रञ्चित्रितं प्रतिभाति।

धरित्र्याः पतिः धरित्रीपतिस्तस्य निर्वाचनमिति धरित्रीपतिनिर्वाचनम्। अस्याः पृथ्व्याः प्रधानशासकचयनमित्यर्थः। नाटकेऽस्मिन् सन्ति नव पुरुषचरित्राणि, एकञ्च स्त्रीचरित्रम्। सा नायिका धरित्र्येवात्र। अभिनयस्थलं तावत् काचित् पान्थशाला, यस्या अधिकारी स्वयं भगवान् तस्य सहायकश्च विश्वकर्मा। धरित्री चोद्वाहोचिता कन्यका भगवतः। रूपलावण्योपेतत्वात्तस्याः परितः पात्रौघसंमर्दो नो नयनयोरापतति। तेषु पात्रेषु कस्यचिदपि नास्ति निःस्वार्थपरकप्रेम, केवलं सम्पद्बाहुल्येन केचित्, केचिद्वा बलदर्पेण तामधिकर्तुं सततं प्रयतन्ते।

अत्र प्रश्नः समुदेति यत्कस्तावदधिकर्ता अभूद् धरित्र्याः? न कोऽपि। न रोचते धरित्र्यै कश्चिदपि। हस्ताहस्ति-केशाकेशि-बाहूबाहविद्वन्द्वान्ते सर्वाण्यपि पात्राण्याहतानि विध्वस्तानि परिश्रान्तानि च। तर्हि नाटकेनानेन कस्य किल सत्यस्यानुसन्धानं विहितं नाट्यकृता?

[७९०] स्वर्गीयप्रहसनम्, स.सा.प., कोलकाता, १९७७।

पूर्वमेवोक्तं यत्संस्कृतनाट्यसाहित्ये सत्यसन्धानसातत्यन्त्वस्त्येवेति। कैश्चित् प्रत्यक्षतया कैश्चिद्वा परोक्षतया कैश्चित्पुनः नाटकावसाने सत्यानुसन्धानेन सहृदयहृदयेषु प्रश्ननिचयोत्पत्तिर्विहिता।

नाटकारम्भे नाट्यकृता निवेदितम् – "रचनाकालात् परमतीतानि कति वर्षाणि, किञ्चित्परिवर्तनं जातं नाटिकावर्णितस्य दृश्यस्यैव। अङ्कस्तु नाधुनापि परिसमाप्तः। धरित्रीपतिनिर्वाचनसभाया आयोजनं प्रचलतितरां, सभा तु नानुष्ठिताद्यापि" इति। नाटकेन दर्शकचेतसि पाठकमनसि वा केषाञ्चित् प्रश्नानामुपस्थापनं न केवलं हास्यरसपरिवेशनाय भवितुमर्हति, शैक्षिकमूल्यबोधोऽप्यनेन प्रकटित इति तु निश्चप्रचम्। तस्मादेवात्र नान्दनिक-शैक्षिक-मूल्यबोध-समन्वयोऽप्यत्र (a union of Aesthetic value and educative value) काङ्क्षितः। तेन अभिनयेक्षणावसरे दर्शकस्यानन्दावाप्तिरपि भवेत्, सममेव समाजविषयेऽपि तस्य चिन्तनोद्रेको जायेत।

विधातुः उपाहारगृहमेव नाटकस्यास्य प्रेक्षालय इति तु प्रागेवोदितम्। सूत्रधारमुखेन भाविवृत्तवर्णनन्तु ब्रेक्ट्महोदयस्य विशेषत्वम्। शक्तिसम्पन्नदेशैः आटोमबोम्ब-हाइड्रोजेनबोम्ब-क्षेपणास्त्रादिमारणास्त्राणि निमीर्यन्ते। एतदतिरिच्य, आणविकास्त्रप्रयोगपरीक्षणेन तेजष्क्रियं दूषणं भवत्येव इत्यादिकं सर्वमेव तथ्यं सूत्रितं सूत्रधारेण। एतेन नाट्यकर्तुर्विवक्षा तु सुस्पष्टैव।

१९४५ खृष्टाब्दे निखिलेऽपि विश्वे शान्तिस्थापनाय, निरापत्ताप्रदानाय, विविधदेशानां मध्ये पारम्परिकसौहार्द्यवर्धनाय च इउ-एन्-ओ-नामकसंघस्य (U.N.O) प्रतिष्ठाभूत्। यद्यपि संघस्यास्य निरपेक्षत्वमेवाभीष्टं तथापि शक्तिसम्पन्नैरेव देशैः स्वस्वमतारोपेण संघोऽयं नियन्त्रितो भवति। तत्र भारत-पाकिस्तानाद्युन्नयनशीलदेशानां नास्ति काचिदपि भूमिका।

नाटकेऽस्मिन् प्रदत्तानि चरितनामानि व्यञ्जनागर्भाणि च सर्वाण्येवार्थवन्ति। इउ-एन्-ओनामकसंघकर्ता भगवान् एव। सङ्घस्य चिरस्थायिनः सदस्याः हयङ्गल-लघुवञ्चक-धुरन्धर-वरण्डलम्बुक-प्रभृतयो वस्तुगत्या आमेरिका-राशिया-फ्रान्स-इंलण्डादिदेशानां प्रतिनिधयः इति नाटकाध्ययनेनैव स्पष्टीभवति। तथाह्यधस्तात्प्रदीयते नाटकस्यास्यांशविशेषः – 'पृष्टदेशात् झटित्याकृष्य किं पातयामि भूमौ वरण्डलम्बुकम्'

इति।

एवं राजनीतेः अन्तर्निहितस्य सत्यस्य सन्धानं कृतम्, उन्मोचितञ्च तत्सिद्धेश्वरेण। शान्तिकामिनां देशानां समेऽपि प्रयत्ना व्यर्थाय व्यवसिताः। तथाह्युच्यते नाट्यकृता– "प्रत्यहमेव संवादपत्रिकायां दृश्यते कति रणधुरन्धरा राष्ट्रनायका धरणीमिमां मनुष्यरहितां कर्तुं व्यवसिताः। अद्भुतमारणयन्त्राविष्कारेण प्रतिस्पर्धा तेषामस्माकं हृत्कम्पं जनयतितराम्" इति।

अत्रापि ब्रेक्ट्महोदयस्य प्रभावः स्फुट एव। न केवलं सिद्धेश्वरनाटकानि, मध्यप्रदेशस्य राधावल्लभत्रिपाठिमहोदयस्य तथा च गुजराटदेशस्य हर्षहेवमाधवस्यापि रूपकाण्यपि सर्वथा ब्रेक्ट्प्रभावभावितानीत्यत्र नास्ति संशयलवः।

दरिद्राणामुपरि धनिजनानामत्याचारस्य निर्ममवृत्तमत्र स्फुटं काशते। अपराधी यदि प्रभावोपेतराजनैतिकनेतृजनस्यात्मीयो भवेत्तदा तत्कृताः सप्तहत्या अपि क्षन्तव्या इति साम्प्रतिकं तथ्यमेवात्र मूल्यम्। तथाह्यधस्तात् समुद्धृतेन पुरुषश्रेष्ठिकथोपकथनेन नाट्यकर्तुर्वैदग्ध्य-भङ्गि-भणितिः स्पष्टं प्रकाश्यते –

"पुरुषः – स्वामिन् मा अस्मै कुप्यतु। अयं मुख्यमन्त्रिणः श्यालस्य
भागिनेयस्य भ्रातृव्यो वर्तते।
श्रेष्ठी – अत एवायं मम सेवकेषु नियुक्तिं प्राप्तवान्"। इति।

ख). अथ किम्

पाश्चात्त्यनाट्यरीतिं प्रादेशिकनाट्यशैलीं वा समाश्रित्य अर्वाचीनसंस्कृतवाङ्मये भावनाट्यानि (Abstract Plays) प्रतीकनाट्यानि (Symbolic Plays) वा विरच्यन्ते। एतान्येव संस्कृतनाट्यधारायाम् अभिनवसंयोजकत्वेन विवेचयितुमलम्। तस्मात् सिद्धेश्वरेण विनिर्मितायां प्रतीकधर्मिण्याम् 'अथ किम्' इति व्यङ्गनाटिकायां राजनीतौ वीतश्रद्धानां राजनैतिकनेतॄणाम् अयथावागाडम्बरेषु अनारोपितगौरवाणां शिक्षितानां, मध्यवित्तश्रेणीभाजां निम्नवर्गीयमानवानाञ्च जीवनचित्रमलेखि। भारतवर्षस्य गणतान्त्रिकव्यवस्थाया निर्वाचनपद्धतिं प्रति तीव्राजिह्मकटाक्षपातः सिद्धेश्वरेण 'अथ किम्' इति नाटकेन कृतः। तत्रादावेव सूत्रधारमुखेन कविना समाजस्य करुणावस्था स्फुटीकृता – "परमद्यत्वे सर्वं जातमसंस्कृतम् – देहे, चित्ते, समाजे संस्कृतस्य

गन्धोऽपि नास्ति। अभिनयश्च भवति सर्वत्रैव मार्गे, हट्टे, घट्टे, परिवारे, विद्यालये, विधानसभायामपि"[७९१] इति।

आदौ नान्दी, मध्ये नाटकीयपात्राणां नामकरणम्, अन्ते च भरतवाक्यम् इति सर्वत्रैवाभिनवत्वं प्रदर्शितं नाट्यकारेण नाटकेऽस्मिन्। नाट्यशास्त्रानुसारं रूपकारम्भे पूर्वरङ्गविधानमुल्लेख्यं वैशिष्ट्यमेकम्। पूर्वरङ्गस्य पुनः प्रधानमङ्गं तावन्नान्दी। अत्राप्यवश्यकर्तव्यायां नान्द्यां स्तुतिर्विधीयते समुद्भटाख्यस्य कस्यचिन्नवनाट्यदेवस्य। नान्द्या अभिनवत्वेन नाट्यस्य सर्वमेवात्र गतानुगतिकताविवर्जितमिति प्रत्यपादि। तथाहि फ्रान्स्-जार्माणी-आमेरिकादिदेशानां नवनाट्यान्दोलनानुसारं वङ्गभाषायां यथा अद्भुतरसमिश्रिताद्भुतनाटकानि प्रणीतान्यभवन्, नाट्यकारस्य सिद्धेश्वरस्य नाटकमिदमपि तस्मिन्नेव विशेषनाट्यप्रकारेऽन्तर्यातीति शक्यवचम्।

वङ्गसाहित्ये तृतीयनाट्यमित्यस्य पथिकृद्रूपेण यो हि विख्यातः – स खलु वादलसरकारः। तथैव संस्कृतनाट्यजगति सिद्धेश्वर एव तृतीयनाट्यमित्यस्य पुरोधेति वक्तुमलम्। नाटकेषु भरत-सागरनन्द्यादीनां नाट्यधर्मिण्याः परम्परायाः प्रभावो यथा वर्तते, तथैव विद्यते हि ब्रेक्ट्-बेकेट्-वादलसरकारादीनां नाट्यतत्त्वविदां लोकधर्मिपरम्परायाः प्राधान्यमपि।

नाटकस्य सर्वत्रैवागमिता हि सः, तस्य कृते वा परीक्षेति विशेषो विषयो निःसन्दिग्धं स्मारयति स्यामुयेल्-बेकेट्पादानां विख्यातं दुःखमिश्रितहास्यरसाश्रितं (Tragi-comedy) 'Wanting for Godot'(१९५४) इति नाटकम्।

अपि च, सिद्धेश्वरस्यास्मिन्नाटकेऽन्यतममेकं वैशिष्ट्यं तावन्नाटकीयपात्राणां नामकरणम्। वस्तुतोऽत्र नास्त्येव नाम चरित्राणाम्। पुरुषपात्राणि 'क' 'ख' 'ग' 'घ' इत्येवं – प्रकारेण स्त्रीपात्राणि च 'आ' 'ऊ' इत्येवंभावेनात्र निर्दिष्टानि।

प्रागप्यस्माभिर्दृष्टं यत् कालिदासादीनां काव्येषु शब्दतात्पर्यं कियद्व्यापकं भवितुमर्हतीति। तत्र मेघदुते यक्षः न केनापि निर्दिष्टेन नाम्नाबद्धः केवलं 'कश्चित्' इति पदेन परिचीयते। तेन स यक्षः देवदानवमानवनिर्विशेषं सकलविरहिवर्गाणां प्रेमार्तिं प्रकाशयितुं समर्थोऽभूत्। तथैवात्रापि चरित्राणां नामकरणाभावेन कस्यचिज्जनस्याप्राधान्यं तथा च

[७९१] सिद्धे.अथ.किम्., पृ. – २२।

कस्यचिद्विशेषदलस्यैव प्राधान्यं स्फुटं काशते। तत्र मध्यवित्तश्रेणीस्थितानां शिक्षितजनानां प्रतीकत्वेन उपस्थापितं 'क' इति चरित्रम्। निम्नमध्यवित्तश्रेणीभाजां जनानां प्रतीकरूपेण चत्रितं 'ख' इति चरित्रम्। विविधराजनैतिकदलेषु मुखप्राप्ततां गतानां जनानां प्रतीकत्वेन अवतारितानि ग-घ-ङ प्रभृतानि चरित्राणि।

निर्वाचनात्प्राक् राजनैतिकनेतॄणां प्रतिश्रुतिः, वक्तृतासभासु साधारणजनानां जिगमिषाभावः नेतृजनेष्वास्थाभावः, क्षमतारूढदलस्य निर्वाचनकालेऽन्यायपूर्वकं मतप्रदानम् (Rigging-इति नाम्ना यद्धि प्रसिद्धम्), साधारणमनुष्याणां हत्यादिकं सर्वमेव सुन्दरतया नाटकेऽस्मिन् प्रदर्शितं नाट्यकृता। तथाहि नेतृजनानां भाषणेन धैर्यमास्थाय श्रोतॄणां प्रतिक्रिया कविना व्यक्तीक्रियते –

"गः – किमेषा विद्यालयस्य इतिहासश्रेणी? वयं किं छात्राः?

साधारणमानवानामपरः कश्चिद्वदति –

गः – वारे तु अस्मिन् सर्वेषामेव नाम्नां पार्श्वे चिह्नान्यङ्कयिष्यामि" इति।

तीक्ष्णविद्रूपबाणबिद्धानि भवन्ति मनुष्यरहितनेतृचरित्राणि साधारणमनुजनुगिरा –

"ङः – तदर्थं तु वर्तन्ते तरुणाः

आ – ये तावत् शहीदाख्यमुपाधिं लब्धुकामाः।

कः – तत्र तु तन्नामधेयः स्तम्भो वर्तते, तत्र यदि सभा काचिदनुष्ठीयते तर्हि

बहवः शहीदेत्याख्याभाजो भवेयुः"[७९२] इति।

मनुष्याणां सर्वथा सर्वदा च स्वार्थचिन्ता स्फुटिता भरतवाक्येन –

"कालस्य गतिमालोक्य साम्प्रतं प्रार्थयामहे।

अस्तु मे मङ्गलं नित्यं भवतामस्तु वा न वा"[७९३]॥ इति।

राजेन्द्रमिश्रस्य 'स्वप्नाज्जागरणं वरम्' इति एकाङ्कं रूपकमपि प्रतीकधर्मि। हर्षदेवादिभिः विरचितानि कब्रेस्थानेमुख्यानि रूपाकाण्यपि निगूढतात्पर्यवहानि प्रतीकधर्मितां गाहमानानि प्रतिभान्ति।

[७९२] सिद्धे.अथ.किम्., पृ. – २०।

[७९३] अथ किम् – स.सा.प., (अङ्कः – ६), पृ. – २४।

ग). स्वर्गीयहसनम्

विश्वविश्रुतेन रवीन्द्रनाथरचितेन 'स्वर्गीयहसनम्' इति प्रकरणेनानुप्राणितेन सिद्धेश्वरेण नाटकमिदं प्रणीतमिति। तथाह्युच्यते तत्र –

"नमो रसिकजनेभ्यः,

रचितमेकदा कविसार्वभौमेन

रवीन्द्रनाथेन स्वर्गीयहसनम्।

सरसं तत् प्रहसनमक्षममपि मां

कृतवत् प्रोत्साहितम्। स्वर्गीयहसनं

तस्यैव दीनमनुकरणमिति तु मया

सबहुमानं सानन्दं स्वीक्रियते।"[७९४] इति।

अत्र मन्त्रिणां सांसदानां राजनैतिकनेतॄणाञ्च दुर्नीतिलोभचक्रान्तस्वार्थपरतादीनां निरावरणं चित्रमुपस्थापितमत्र नाट्यकृता सिद्धेश्वरेण। एतादृशी केवलं साम्प्रतिकी, अपि तु सर्वकालिकी, सर्वयुगीया, सर्वदेशीयेति नाटकेस्मिन् तेन व्याकृतम्। समेषामेव धर्माणां मानवा एवानया संपृक्ताः। तथाहि प्रत्येकं नाटकीयपात्राणां नामकरणविषये तेन वैचक्षण्यं प्रकटितम्। अत्र बृहस्पति-इन्द्र–अशोक-आक्बरादीनि प्रधानपात्राणि सर्वाण्येव कूटं रचयन्ति। कुचक्रिणो बृहस्पतेर्वचसा तेन कथितं – 'स्वार्थरक्षायै स्वार्थसिद्धये वा संघः, संघस्वार्थाय च देशः, देशाय तावत् किं तन्नाहं जाने' इति।

सर्वत्रैव कुटिला राजनीतिः। अपरसंघच्छेदमाध्यमेन निर्वाचनजयलाभाय सम्पत्सु राङ्गनादिप्रदानेन स्वसंघसामर्थ्यवर्धनप्रचेष्टा सन्दृश्यत एव। तथाह्युक्तं तेन– 'निषिद्धानि द्रव्याण्येव समधिकप्रियाणि' इति। प्रभूतविभवस्वायत्तीकरणमेव तेषां समेषामेव प्रधानमुद्देश्यम्। तथाहि कवेर्व्यङ्गभणितिः –

"बृहस्पतिः – नाधुना वाक्चातुर्येणैव मुग्धा भवन्ति युवतयः।

इन्द्रः – तर्हि किमुत्कोचेन?

बृहस्पतिः – अ-ह-ह, नैतदुच्चार्यम्। अभद्रोऽयं शब्दः। उपहारेण

[७९४] स्वर्गीयहसनम् (निवेदनांशः)।

उपायनेन।"[७९५] इति।

नाटकेऽस्मिन्नास्ति कश्चिदपि नान्दीश्लोक इति वैशिष्ट्यमेकतमस्य। अत्रेदमवश्यमेवानुसन्धेयं यदस्माकं नाट्यकर्ता त्वाशावादीति। तथाहि नाटकान्ते इन्द्रस्य पार्श्वद्वये धुन्धपुङ्गसंज्ञकं प्रतिनिधिद्वयं संलक्ष्यते। अपि च, नाटकस्यानवद्ये भरतवाक्येऽपि वैतालिकमुखेन नाट्यकर्तुराशान्विता प्रार्थना –

"जयतु जयतु देवराजो
जयतु जनकल्याणकारी।
(येन) ध्वस्तो भेदः स्वर्गनरकयो-
र्लब्धा सहायता धुन्ध-पुङ्गयोः,
स जयतु संकटोत्तीर्णो
वज्रपाशधारी।
जयतु जयतु देवराजो
जयतु जनकल्याणकारी॥" इति।

गणतन्त्रे गणमुख्यान् प्रणम्य सूत्रधारमुखेन नाट्यकृत् स्वर्गमर्त्यपातालेषु कथं राजनीतिः प्रचलतीति विमृशति। नाट्यकथावस्तुवर्णनाछलेन नाट्यकारस्यास्य नाटकानि समाजस्य प्रत्यग्राभिः ज्वलन्तीभिः समस्याभिः सह न्यायं कुर्वन्ति।

घ). ननाविताडनम्

नना नाम माता। अतो मातुः विताडनम् इति संस्कृतस्यैव विताडनमेवोच्यते। सूत्रधारमुखेन भावस्यास्य प्रकाशो ब्रेक्ट्महोदयस्यान्यतमं विशेषत्वम्। दर्शकैः समं सूत्रधारादिनाटकीयपात्राणां कथोपकथनं वादलसरकारस्य '3rd Theatre' इत्यस्यैव प्रभावः। अत्र वङ्गीयशिक्षार्णवकर्णधारानुद्दिश्य तीक्ष्णाः व्यङ्गाः सम्प्रयुक्ताः। एते तावत् शिक्षाविदः शिक्षाव्यवस्थातः संस्कृतस्य निर्वासनाय नियतमुद्युक्ताः। परं बहिः ते तस्य कृते कुम्भीराश्रुविसर्जनं कुर्वन्ति। एवं शिक्षानीतिनिर्धारकाणाञ्चारित्रिकी कपटचारितात्र साधिक्षेपभङ्ग्या प्रकाशिता।

ननाविताडनमित्यस्याध्ययनावसरे ब्रेक्ट्महोदयस्य 'ग्यालिलिओचरित'स्य

[७९५]स्वर्गीयहसनम्, पृ. – २-३।

गिरिशकारनाडस्य 'हयवदन'स्य च प्रसङ्गः स्वत एव मनसि समायाति। तत्र ग्यालिलिओचरिते प्रत्येकमङ्कारम्भ एव सूत्रधारः समागत्याङ्कस्य भाविवृत्तान्तं श्रावयति। तत्र सूत्रधारो नटश्चैक एव जनः। 'हयवदननाटके' अधिकारिण उक्त्या नाटकस्यारम्भः, समाप्तिश्च भवतः। अत्रापि सूत्रधारस्तथैव दृश्यते। तथाहि दर्शक-सूत्रधारयोर्मध्ये नास्ति कश्चिल्लौकिकान्तराय इति नाट्यकृता सम्यक्तया प्रदर्शितम्।

संस्कृताध्ययनाध्यापनादिकस्य यथा सर्वथा विरतिर्भवेदित्यस्यात्यन्तिकः प्रयत्नो विधीयते पश्चिमवङ्गस्याध्यापकैः। अतस्तेऽध्यापकाः सुतरां सरसभङ्ग्या तीक्ष्णविद्रूपवाग्वाणबिद्धाः समभूवन्। तथाहि अस्वस्थाया ननायाः परीक्षार्थं विशेषज्ञाः स्त्रियः समाहूताः। ताभिः पूर्णतया ननां परीक्ष्य जीवन्नना एव मृतेति समुद्घोषितमिति वृत्तं नाट्यकाररीत्या प्रदर्श्यतेऽधस्तात् –

"पूरवी – किन्तु ननादेवी तु अधुनापि संज्ञां न लब्धवती। किं विधेयम्?

उत्तरा (स्वगतम्) – चिरमेव लुप्तसंज्ञा यथा स्यात्तदेव विधास्यते।

वसुकुम्भः – प्रत्नशालायां सुरक्षितो ननादेहः कौतुकाय भविष्यति बहूनामागामिनि काले।

स्वकुम्भः – गवेषणाकार्यस्यापि सहायता भविष्यति।

पण्डितः – नना-स्मृतिस्मृतिरक्षायै मठस्थापनमवश्यमेव करणीयम्।

नना – स्मृतिरक्षायै गवेषणागारः कश्चित् प्रतिष्ठापयितव्यः।

उत्तरा – सर्वकारसकाशात् तदर्थमनुदानं यथाचिरेणैव कालेन आयाति तदर्थमहं यतिष्ये"[७९६]॥

नाट्यशास्त्रस्य पञ्चमाध्याये पूर्वरङ्गविधानप्रसङ्गे भरतेन संगीतविषयः समुत्थापितः। नेपथ्यसंगीतविषयिणी चर्चाप्यत्रावाप्यते –

"एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः।
प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च"[७९७]॥ इति।

[७९६]ननाविताडनम् – स.सा.प. (अङ्कः – १-३), पृ. – २२-२४।
[७९७]ना.शा. (नागरः), (५।८)।

सिद्धेश्वरनाटकाध्ययनावसरे पौनःपुण्येन वादलसरकारस्य '3rd Theatre' इति स्मर्यते। विशेषतयाङ्गिकगतदृष्ट्या तस्य 'नदीते', 'मिछिल', 'गण्डी' चेत्यादीनां नाटकानां कथा मनसि समायाति। एकस्यां भूमौ एकस्यैवालोकस्य तले जीवन्तो दर्शका जीवतश्च नाटकीयपात्राणि समागच्छन्ति अभिनयशब्दस्य जीवनवृत्तमित्येवार्थवत्वात्। अतो दर्शकासनस्थले अन्धकारः नटादीनां शरीरोपरि आलोकपात इति तत्त्वं तु '3rd Theatre' इत्यत्र नास्ति। तथाहि प्रागेवोक्तं यत् सिद्धेश्वरस्य नाटकेषु भरत-ब्रेक्ट्-वादलसरकारादीनाम् अनन्यः समन्वयः समवलोक्यते।

भरतकथिता सैव ध्रुवा गीतिरद्यत्वे रवीन्द्रनाथ-गिरीशकार्नाड-सिद्धेश्वर-राधावल्लभादीनां प्रत्यक्षीभवति नाटकेष्विति। ध्रुवायाः समेऽपि भेदा यद्यपि न सन्ति, तथापि क्वचित्प्रावेशिक्याः क्वचिद्वा गेयपदस्य क्वचित्पुनो मृदङ्गलयस्य प्रयोगात् तदेवैतिह्यं निरवच्छिन्नत्वेन प्रचलतीत्यत्र नास्ति काचिद्विमतिः। तथाहि ननाविताडने लौकिकस्वरं स्वीकृत्य सूत्रधारेण गीतम् –

"शृणु शृणु समागत सर्वगुणिजन।
अधिकारिगीतेऽधुना दीयतां हि मनः।
ननावृत्तं समालम्ब्य निवेद्यते मया
सरसकटुकाकथा हीनताललया"[७९८]॥ इति।

गीतस्यानवद्योऽयं प्रयोगः सत्यमेवास्मान् चकितचकितान् विदधाति –

"अस्ति तत्र ननानाम्नी देवी महीयसी।
सर्वजनवन्द्या सा हि माता गरीयसी।
पूरवी कन्यका तस्या रङ्गदेशे जाता
उत्तरापि सुता तस्यास्तत्र समायाता॥
काले तत्र समागता विदेशिनी कन्या॥
रूपयौवनवती सा सर्वजनमान्या"[७९९]॥ इति।

[७९८]सिद्धे.अथ.किम्., पृ. – २०।
[७९९]तत्रैव।

३. नाट्यकृद्रूपेण सिद्धेश्वरस्य मूल्याङ्कनम्

विंशशतके संस्कृतसाहित्ये भाषाव्यवहारविषयिणी विविधा परीक्षा विहितेति दृश्यते। नाटके नायकादीनि पुरुषपात्राणि सुरगिरा नार्य्यश्च प्राकृतभाषया वार्तालापं करिष्यन्तीति विश्वनाथेनोक्तम्। एष खलु नियमस्तु न सार्वत्रिकः। स्थान-काल-पात्रभेदेन नाट्यकृता नियमस्यास्य परिवर्तनं कर्तुं शक्यते। अतो विंशशतकीयसंस्कृतनाट्यकारः प्रयोजनानुसारं हिन्दी-वङ्ग-ओडिया-प्रभृतिभाषाणां व्यवहारं कुर्वन्ति एवेत्यत्र नास्ति किमपि विचित्रम्। वङ्गाङ्गल-ओडिया-हिन्दीप्रभृतिभाषाणां शब्दाः प्रयुज्यन्ते नाट्यकृद्भिरनायासेनैव। ग्रन्थस्यास्य द्वितीयेऽध्याये विषयोऽयमालोचितः। वङ्गभाषायाः प्रवादाः वाग्भङ्ग्यो (idioms) वानायासेन सिद्धेश्वररचनासु समाजग्मुरित्यत्र किमस्त्यस्वाभाविकत्वम्।

४. उपसंहृतिः

नाट्यकला-नाट्यतत्त्वादिविषये प्रत्येकमेव तदीया रचना तथ्यबहुला मननार्हा च। सिद्धेश्वरस्य रचनाप्रपञ्चे यथार्थादर्शवादयोः कल्पनावास्तविकयोः च समुचितं संमिश्रणं पाठकानां नयनपथे पान्थायते। अत्र वर्तमानपरिप्रेक्षे वृत्तानां सहजं प्रस्तुतीकरणं, पात्राणामन्तर्द्वन्द्वात्मकः संघर्षः, स्वाभाविकं परिवेशचित्रणं, सहजा मार्मिकी च भावाभिव्यक्तिः नाट्यसंग्रहाय प्रशस्यं स्थानं प्रददति। प्रसङ्गतया सिद्धेश्वरविरचितः दशप्रबन्धसंकलनात्मकः 'Theatre of Ancient India' इति ग्रन्थः स्मृतिपथं समायाति। अत्र प्राप्यते 'The Theory of Alienation Effect and Sanskrit Dramaturgy' इति नवपृष्टात्मको बन्धो मूल्यवानेकः नानाप्रश्नोद्भावको नानाप्रश्नोत्तरप्रदायकश्च। अर्थात् कारयितृ-भावयितृप्रतिभयोरनन्याधारोऽयं सिद्धेश्वर इत्यत्र नास्ति विप्रतिपत्तिर्विदुषाम्।

९. यतीन्द्रविमलचतुर्धुरिणो नाट्यसाहित्यम्

०. प्रस्तावना

वङ्गीयकविवरेष्वशेषख्यातिभाग् यतीन्द्रविमलचौधुरी अद्यतन-वाग्लादेशस्य चट्टग्रामजिल्लान्तःपातिनि कदूर्खिलग्रामे १६०८ वर्षे जनिं लेभे। पितुः रसिकचन्द्रचौधुरि-महाभागस्य महत्या प्रचेष्टया आदौ कलिकातायां पठनं समाप्य लण्डननगर्याञ्च यतीन्द्रः पि.एच्.डि. (Ph.D.) इत्युपाधिमर्जितवान्। यतीन्द्रः स्वयमपि छात्रजीवने अर्थोपर्जनमकरोत्। पितुः प्रेरणया संस्कृतशिक्षायै सविशेषमस्य रूचिर्वर्धते स्म। १६२६ तमे वर्षे स 'वैदिककर्मकाण्डेषु नारीति' विषयमाश्रित्य शोधोपाधये लण्डनविश्वविद्यालयं प्रविष्टः। ततः १६३४ ईशवीयाब्दे चोपाधिमधिगतवान् सः। १६३७ वर्षं यावदयं इण्डियान्-आफिस-पुस्तकालये तथा च लण्डनविश्वविद्यालये उपनिर्देशकत्वेन समभूत् कार्यरतः। अक्सफोर्डविश्वविद्यालयस्य दर्शनविषये प्रथमभारतीया गवेषिका रमा तेन संगता, परिणीता च। भारतमागत्य यतीन्द्रो वंगीय-संस्कृत-परिषदो सचिवत्वेन, संस्कृतमहाविद्यालयस्य प्राचार्यत्वेन प्रेसिडेंसीमहाविद्यालये विभागीयाध्यक्षरूपेण च प्राच्यविद्याचर्चाया मानोन्नयने भृशं प्रायतत। १६४६ तमे वर्षे 'प्राच्यवाणी'ति संस्थाकं स्थापयामास सः, यस्मात् संस्कृतग्रन्थाः सानुवादं नित्यं तदा प्रकाशिताः। प्रतिष्ठानमिदं सनातनभारतवर्षस्यादर्शान् न केवलं भारते परञ्च बहिः प्रचारितवत्।

यतीन्द्रस्य रचनाविश्वे काव्यनाटकादीनि, शोधप्रबन्धाः, सम्पादितग्रन्थाश्चानुवादा विलसन्ति। स्वजीवनस्यान्तिमदशस्वब्देषु तेन त्रिंशत् संस्कृतनाटकानि प्रणीतानीति महद्विस्मयावहम्। उल्लेख्यं यत् नाटकमेकं पालिभाषया ग्रथितम्। आङ्गलकवयितुः शेक्सपीयरस्य ओथेलो तथा च 'मर्चेण्ट आँफ भेनिस्' इति द्वयं नाटकमपि अनेनानूद्य प्रकाशि च। विवेकानन्दचरितचम्पूस्तस्य काव्यत्वेन ख्यातिमगात्। गवेषणात्मकरचनासु उल्लेखयोग्यास्तावत् 'Contribution of Women to Sanskrit Literature', 'Contribution of Muslims to Sanskrit Literature', 'Muslim Patronage to Sanskrit Learning', 'Contribution of Bengal to Sanskrit Literature', 'वङ्गीयदूतकाव्येतिहासः' चेति।

तेन विरचितानि नाटकानि निम्नोक्तानि –

१. अमरमीरम् (नाटकम्)
२. आनन्दराधम् (ना.)
३. औथेलो (ना.)
४. देशबन्धुदेशप्रियम् (ना.)
५. धृतिसीतम् (ना.)
६. निष्किञ्चनयशोधरम् (ना.)
७. प्रीतिविष्णुप्रियः (ना.)
८. भक्तिविष्णुप्रियम् (ना.)
९. भारतजनकम् (ना.)
१०. भारतभास्करम् (ना.)
११. भारतराजेन्द्रम् (ना.)
१२. भारतलक्ष्मीनाटकम् (ना.)
१३. भारत-विवेकम् (ना.)
१४. भारतहृदयारविन्दम् (ना.)
१५. भास्करोदयम् (ना.)
१६. भुवनभास्करम् (ना.)
१७. महाप्रभुहरिदासम् (ना.)
१८. महिममयभारतम् (ना.)
१९. मिलनतीर्थभारतम् (ना.)
२०. मुक्तिशारदम् (ना.)
२१. रक्षकश्रीगोरक्षकम् (ना.)
२२. विमलयतीन्द्रम् (ना.)
२३. विश्वविवेकम् (ना.)
२४. शक्तिशारदम् (ना.)
२५. सुभाषसुभाषम् (ना.)
२६. स्वप्नरघुवंशम् (ना.)

१. महिममयभारतम्

अङ्कचतुष्टयात्मकं वैदिक-पौराणिक-महम्मदीय-वर्तमानयुगेषु नदीमातृका-पूजनसंयमनादिकमधिकृत्य 'महिमामयभारतम्' उपरूपकम् १६५८ वर्षे रचितम्। रमाचौधुरीमहाभागाया निर्देशेन तथा च भारतसर्वकारस्योद्योगेन १९५९ ईशवीयाब्दे रूपकमिदमभिनीतमभूत्।

सिन्धुक्षिदिति वैदिकर्षिः सिन्धुनदीं मातृज्ञानेन पूजयामास। द्वितीयाङ्के सुरसलिलायाः गङ्गायाः प्रादुर्भावो वर्णितो नाट्यकृता पौराणिकं कथानकमाश्रित्य। तत्रैव देवर्षिर्नारदः समस्त-राग-रागिनीः अप्राप्य शिवमुद्दिश्य गानाय शिवम् अनुरुद्धवान्। ब्रह्मा विष्णुश्च तत्र श्रोतृत्वेनोपस्थितौ। सुललितं संगीतं श्रुत्वा विष्णोर्मनो विगलितमभूत्। तृतीयाङ्के शाहजहानस्य कन्यका जाहानारा यमुनां स्तौति भक्तिभावाश्रयेण। चतुर्थाङ्के राम-रहिमनामानौ द्वौ पथनिर्माणकारिणौ कर्मकरौ देशाय आत्मोत्सर्गं कुर्वन्तं महात्मागान्धिमहाभागं प्रशंसयन्तौ मिथः कथयतः। तदा रहिमो महात्मानं स्तौति –

"स्वाधीनतां स्थापयितुं स्वदेश आजीवनं यो युयुधे नयज्ञः।
दयालवे गान्धिमहात्मने मे नमोऽस्तु जातेर्जनकाय तस्मै"॥

सप्रसङ्गं विद्युदुत्पादन-मत्सपालन-नागार्जुनसागरादि-जलाधारनिर्माणादि-विषया उल्लिखिताः। चतुर्थपञ्चमाङ्कौ स्वाधीनतोत्तरभारतस्य वर्णनपरकौ।

'महिममयभारतं' परम्परानुबद्धमपि नवीनं रूपकमस्ति। अत्र पञ्चस्वङ्केषु परस्परमसम्बद्धं वैदिक-पौराणिकमुहम्मदीयाधुनिकयुगगतं घटनाजातं रूपकायितं वर्तते। दृश्यस्थलं देवलोकाद् भारतेषु प्रसृतम्। स्वदेशमातरं प्रति साधारणानां प्रेम्णो जागरणमेव नाट्यकृतो मुख्यमुद्देश्यम्। कार्यव्यापारस्यात्राभावो दृश्यते। इह रूपके बहूनां गीतानां समावेशो लक्ष्यते। तस्मान्नाट्यमिदं सहृदयानां कृते रसोत्तीर्णं मनोरञ्जकमभवत्। नाटकस्य प्रतिपदं जलस्थलनद्यादीनां वर्णनेन देशप्रेमोद्दीपकं वर्तते। अस्माकं देशो यथा विश्वेऽस्मिन् विश्वे श्रेष्ठस्थानं लब्धुमर्हेत्, तदर्थं भूयो भूयो यतीन्द्रः प्रार्थयामास –

"भ्रातरो द्रुतं जागृत भारतसन्तानाः।
स्वराज्य-शासन-भार-ग्रहण-चिन्ताकातर-
मङ्गलसाधनपर-कठोरयातनाः"॥

२. मेलनतीर्थम्

सर्वधर्माणां वर्णानाञ्च मेलनेनैव विश्वेऽस्मिन् विश्वे भारतवर्षं भविष्यति तीर्थक्षेत्ररूपेण परिणमेत इति भावनां मनसिकृत्य यतीन्द्रविमलस्य मातृभूमेर्वर्णनापरकं दशाङ्कसम्पूर्णमिदं 'मेलनतीर्थम्' इति दृश्यकाव्यं ग्रथितम्।

प्रथमाङ्के ऋषिः अथर्वा शिष्यैः सह वैदिकसंस्कृतिमुपादिशन् संदृश्यते। द्वितीयाङ्के मलयपर्वते अगस्त्यः स्वपत्न्या समं तथैव यतमानः। तृतीयाङ्के अशोकस्यानुभावान् उपायनीकरोति यतीन्द्रः। पञ्चमाङ्के आकबरस्य लोकप्रशान्तिकारिणी सर्वधर्मसमन्वयनीतिः प्रपञ्चिता। षष्ठाङ्के चैतन्यदेवस्य भक्तिधर्मेण कृत्स्नं भारतवर्षमुद्वेलितमभवदिति चित्रितमिह। तेन भक्तिप्लावनेन साधारणेषु आध्यात्मिकभावो जागर्ति। सप्तमाङ्के विवेकानन्दस्य विश्वोद्धारमार्गश्चर्चितः। अष्टमे यतीन्द्रो विश्वजनीनमाहात्म्यमनुभूय विश्वसमक्षं भारतवर्षस्य श्रेष्ठत्वपरककीर्तिगाथाम् उपस्थाप्य भारतवर्षं विश्वगुरुत्वे प्रतिष्ठापयति। नवमाङ्के गान्धिनः आखालीयात्रा प्रासङ्गिकतयोपवर्णिता। अन्तिमेऽङ्के जवाहरलालनेहेरोः विश्वमैत्रीप्रयासो वर्णितः।

रूपकमिदं भारतवर्षस्य माहात्म्यपरकं भक्तिरसपरिलसितञ्चेति। स्थानेषु गीतेः प्राधान्यं लक्षणीयम्।

३. भारतहृदयारविन्दम्

महर्षेः अरविन्दस्य दीव्यं जीवनवृत्तान्तमुपजीव्य यतीन्द्रस्य भावाश्रितं नाटकमिदं १६५६ ईशवीयाब्दे पण्डिचेरी-आश्रमे साफल्येनाभिनीतम्। आदावेव इह रूपके अरविन्दः स्वाधीनतान्दोलनस्य सैनिकरूपेण ततो योगित्वेन चित्रितो नाट्यकृता। सप्रसङ्गम् आलिपुरबोम्बबिस्फोटविषयकं प्रसिद्धमुपाख्यानं संयोजितं नाट्यकृता। पञ्चमाङ्के अरविन्दस्य पण्डिचेरी-आश्रमे आरभ्यमानं धर्मीयजीवितं भक्ति-भावयोरनन्यसमन्वयेनाङ्कितम्। अरविन्दस्य सन्देशः सम्यगत्र वर्णितः –

"विज्ञानैरथ धर्मदर्शनकलाशास्त्रैश्चिरादुन्नता-
प्येषा भारतभूमिरद्य भजते कष्टं पराधीनताम्।
छित्त्वा पाशमिमं तदीयवदनं फुल्लं विधातुं वयं

कुर्मः किञ्चन कर्म देशहितकृद् यद् यस्य योग्यं भवेत्"[८००]॥

फरासीदेशवास्तव्यायाः मीरायाः महती भूमिका यतीन्द्रेण प्रासङ्गिकवृत्तरूपेण अङ्किता। स्वाधीनतावाप्तेः परमपि देशस्य खण्डतां दृष्ट्वा यतीन्द्रो विमुह्यति।

इह नाटके ऐतिहासिकचरित्राणां वृत्तानाञ्चाधिक्यं दृश्यते। यत्र तत्र स्तुतिपरकाणां गीतानां भूयान् समावेशो विहितः। मातृपूजायाः माहात्म्यप्रचारः खलु यतीन्द्रस्य नाट्यविरचनलक्ष्यम्। भाव-भाषयोर्मणिकाञ्चनसंयोगेन जीवनीमूलकं रूपकमिदं हृदयग्राहि अभवत्। रूपके वीररस एवाङ्गी।

४. भारतलक्ष्मीनाटकम्

यतीन्द्रेण विरचितमनवद्यं दशदृश्यसम्पूर्णं लक्ष्मीवाई-इत्यस्याः जीवनाधारितं 'भारतलक्ष्मीनाटकं' १९६७ ईशवीयाब्दे प्रचरद्रूपतां गतम्। ऐतिह्य-आख्यानयोर्निरवद्यं संमिश्रणमत्रास्माभिर्लक्ष्यते। नाट्यस्यास्य नान्दीवाक्ये लक्ष्मीवाई-इत्यस्याश्चेरित्रे ऐतिहासिके नाट्यकृता शक्तिरूपिण्या नार्याश्चरितमुपस्थापयता शक्तेर्माहात्म्यं गीतम्– "दैहिकबलं न शक्तिः राजनैतिकप्रभुत्वं शक्तिरपि न तथा...शक्तिराध्यात्मिकबलं...शक्तिराध्यात्मिकैश्वर्यम्"[८०१] इति।

नाटकस्यादौ पुत्रस्य मृत्युजनितेन शोकाग्निना दग्धीभवतः स्म राजा गङ्गाधरस्तथा पत्नी लक्ष्मीः। गङ्गाधरो मृत्योः पूर्वं पत्न्याः सम्मतिमादाय कस्यचिदात्मीयस्य आनन्दनामानं पुत्रं दत्तकरूपेण गृहीतवान्। उभौ पूर्वमेव ज्ञातवन्तौ यत् दत्तकपुत्रस्वीकारम् आङ्गलसर्वकारो न ह्यङ्गीकरिष्यति। स्वाभाविकतया लर्ड-डालहौसिनः स्वत्वविलोपनियमानुसारं दत्तकपुत्रस्योत्तराधिकारप्राप्तेरस्वीकारनीत्या झाँसिराज्यं बलादधिकर्तुं प्रयतन्ते आङ्गलशासकाः। तदा त्रयोविंशतिवयस्का अध्यात्मबलोपेता पुत्रशोकविदारिता राणी लक्ष्मीवाई राज्याधिकारं त्यक्तुमस्वीचकार। तस्मात् सा दृढ़संकल्पं गृहीत्वा असीमशौर्येण इष्टइण्डियासंस्थां विरुद्ध्य युद्धं घोषितवती। ताँतियाटोपी-नानासाहेवादयो विद्रोहिनेतारस्तेषां साहाय्यार्थे युद्धे भागं गृहीतवन्तः। अन्ततो गत्वा दुलाजीत्यस्य विश्वासघातेन आक्रान्ता सती व्रिटिश-भारत-

[८००] वि.स.ना. (रामजी), पृ. – १३९।

[८०१] भारतलक्ष्मीनाटकस्य प्रस्तावना।

युद्धे स्वजीवनार्पिणी युद्धक्षेत्रे झाँसीराज्ञी लक्ष्मीः सगौरवं प्राणान् तत्याज। जन्मभूमिं प्रति प्रेम हि तस्याश्चारित्रिकदृढतायाः कारणम् – 'मन्त्रो मम वन्दे मातरमिति पञ्चाक्षरः, देवता चास्य जननी जन्मभूमिः, तद्भक्तिश्च रक्षाकवचमिति जानीहि' इति।

साहित्यसम्राजो वङ्किमचन्द्रस्य आनन्दमठाख्योपन्यासेन प्रभावितः सन् यतीन्द्रः झाँसिराज्ञ्याः लक्ष्म्या जीवनाधारितं शब्दार्थालंकाराभ्यां वीररसेन च रसोत्तीर्णं रूपकमिदं ग्रथितवान्।

५. सुभाषसुभाषम्

षडङ्गविशिष्टे 'सुभाषसुभाषे' रूपके भारतवर्षस्य स्वाधीनतायै उत्सर्गीकृतस्य सुभाषचन्द्रस्य विद्यार्थिजीवनमनु विदेशयात्राया आख्यानान्युपनिबद्धानि। स्वातन्त्र्यसंग्रामे तस्य नेतृत्वम्, तदर्थं वैदेशिकनेतृभिः सह तस्य सन्धिप्रस्तावश्चेति प्राधान्येन रूपकायिते। अस्मिन् नाटके भारतीयानां वीरोत्साहव्यञ्जकमाख्यानमनवद्यशैल्या चित्रितं यतीन्द्रेण। कथावस्तुदृष्ट्या रूपकमिदं लोकनायकजीवनाश्रितम्। रूपकमिदं १९६३ ईशवीयाब्दे कलिकातायां मञ्चस्थमभूत्।

६. आनन्दराधम्

पुराणादिषूपलब्धां प्रसिद्धाञ्च काहिनीं रसोत्तीर्णतया उपस्थापितवान् यतीन्द्रः। प्राचीनवृत्तं प्रत्यासीत्तस्याग्रहातिशयम्। तदर्थमेकादशाङ्कात्मके 'आनन्दराधा'ख्ये रूपके राधा-कृष्णयोर्गाथा भक्तिरसाप्लुता अङ्किता। प्रणवपारिजाताख्यायां पत्रिकायां तृतीये वर्षे प्रचरद्रूपतां गतं रूपकमिदम्।

इह रूपके कंस-अक्रूर-यशोदा-नन्द-सुदामा-बलरामादीनि पुराणादिख्यातानि चरितानि प्रासङ्गिकपात्रत्वेन रूपककृता उपवर्णितानि। प्राचीनसंस्कृतरूपकेषु शृङ्गारितमनोभावानां प्राचुर्यं लक्ष्यते परं यतीन्द्रस्य रूपकाणि शृङ्गारितप्रवृत्तिभ्यो विलक्षणानि। तस्मान्नाट्यस्यास्य भूमिकायामुक्तम् –

"The cosy flow of Sanskrit must not find any impediment in the rocky thickets of obsolete words or cross-currents of peculiar uses and easy Sanskrit, I have learnt from experience, is quite intelligible

to Indians with an average education".[८०२]

राधा विरहस्य मूर्तविग्रहरूपा। कलियुगे बिष्णुप्रियायाश्चरितं व्यतिरिच्य नास्ति किमपि नारीचरित्रं यत्र विरह एव केवला सम्पद्। कृष्णविरहेण भावातुरा क्लिष्टा च राधा। तथाहि राधामुद्दिश्य नन्दोऽवोचत् – 'आनन्दस्वरूपे राधे! आनन्दं विस्तारय, वत्साः सुबलादयः कृष्णप्रत्यागमनं सुनिश्चितमेव। अन्यत् किमपि युष्माकं कृते कर्तुं शक्नोमि'। एकदा घोरे दुर्दिने राधा कृष्णं ररक्ष। अन्यदा च तुलसी तामाशीर्वदति – 'श्रीकृष्णः सदा तव हृदयलग्नो विलसिष्यति। त्वां समाश्रित्यैव स राधावल्लभ इति परमशोभनामभिधामवाप्स्यति।'

भरतवाक्ये राधया विश्वशान्तेर्वाणी उक्ता –

"संहारास्त्राणां दानविकविक्रमः
प्रयातु प्रशमनं भगवतः प्रसादात्।
श्रीश्रीकृष्णार्चनरतं भवतु विश्वं
राजतां चिरं सुखं पूर्णा च शान्तिः"॥

यतीन्द्रस्य भरतवाक्ये ऋग्वेदीयशान्तितत्त्वं ध्वनितम् – 'द्यौः शान्तिः अपः शान्तिः...'। रूपके बहुत्रैव मुक्तकच्छन्दोबद्धस्य भावधर्मिणश्च संगीतस्याधिक्यं नयनयोरायाति। विशेषेण राधायाः सन्ध्यास्तुत्या, वृन्दा-ललितयोः समवेतसंगीतेन नाटकमिदं सहृदयावर्जकं मनोरञ्जकञ्चाभूत्।

रूपकस्यास्य भाषा सरला हृद्या प्रसादगुणोपेता वैदर्भीरीतिबहुला चेति।

७. भारतजनकम्

षोडशाङ्कात्मके 'भारतजनके' रूपके यतीन्द्रविमलेन महात्मागान्धिनः चरितकथा आफ्रीका-यात्रामारभ्य आजीवनमुपायनीकृता। अत्र भारतीयान् प्रति गोरण्डानामकथ्यात्याचारः, महात्मनः सत्याग्रहनीतिः, भारतवर्षस्य स्वातन्त्र्यञ्चेति ऐतिहासिकवृत्तानि रूपकायितानि सम्यक्तया देशभक्तिपरकेण रसेन[८०३] यतीन्द्रेण। प्रसादगुणो यतीन्द्रस्यास्मिन् रूपके वरीवर्ति।

[८०२]आनन्दराधम् (भूमिका – ८)।

[८०३]अर्वाचीनैरालंकारिकैः देशभक्तेः रसात्मकत्वमङ्गीकृतम्।

८. देशबन्धुदेशप्रियम्

यतीन्द्रस्य जनप्रिये 'देशबन्धुदेशप्रिय'मिति नवाङ्कसम्पूर्णे नाटके देशबन्धोश्चित्तरञ्जनदासस्य महिममयं जीवनं न्यरूपि। चित्तरञ्जनदासो गान्धिनः असहयोगान्दोलनेन प्रभावितः सन् वाक्कीलव्यवसायं (Law-Practice) हेलया उज्झित्वा गान्धिनो निर्देशेन सर्वस्वं परित्यज्य देशसेवायै देशसेवाव्रतमुररीकृत्य च देशस्य स्वाधीनताप्राप्तये वङ्गदेशस्य दक्षसेनानीभिः समं जीवनमुत्सर्गीकृतवान्। ब्राह्मसमाजेन लालितस्य सतोऽपि चित्तरञ्जनस्य परवर्तिनि जीवने वैष्णवधर्मं प्रत्यत्याग्रहः, स्वाधीनतान्दोलने नेतृत्वग्रहणम्, कारागारयन्त्रणास्वीकारश्चेति वृत्तान्यनवद्यदक्षतया गुणरसालंकारैर्विभूषितानि नाट्यकृता। प्रासङ्गिकवृत्तान्तरूपेण देशबन्धोः चित्तरञ्जनस्य सहकारिणो यतीन्द्रमोहनसेनगुप्तस्य राजनैतिकजीवनस्य विविधान्युपाख्यानानि संयोजितानि आधिकारिकवृत्तत्वेन यतीन्द्रेण।

९. विश्वविवेकम्

अष्टाङ्कोपेते 'विश्वविवेक'मिति नाटके आविदेशयात्राया यावज्जीवनान्तं विवेकानन्दचरितं ग्रथितम्। अमेरिकायां विश्वधर्मसम्मेलने भागं गृह्णतः स्वामिनस्तपोमयजीवनं साधु निरुपितम्। विश्वसभायां भारतवर्षस्य चिरन्तनमैतिह्यं कथंकारं प्रतिष्ठितं स्वामिनेति वृत्तं सम्यक्तया प्रभविष्णुतया च नाट्यतत्त्वदिशा यथा उपस्थापितं तथैव गुणालंकाररसादिभिः।

१०. स्वप्नरघुवंशम्

यतीन्द्रस्य प्रथमनाटकं तावत् 'स्वप्नरघुवंशम्' इति। कालिदासस्य रघुवंशमहाकाव्यमाश्रित्यास्य कथा प्रवर्तते। १६५८ ईशवीये वर्षे उज्जयिन्यां कालिदासमहोत्सवेऽस्याभिनयोऽभूत्।

११. रक्षकश्रीगोक्षम्

सप्ताङ्कैर्विभक्ते 'रक्षकश्रीगोरक्षे' रूपके महात्मनो गोरक्षनाथस्य तपोमयञ्चरितमुपनिबद्धं यतीन्द्रविमलेन। तस्य योगसिद्धिः गोरक्षसंस्कृतेः प्रचारश्चात्र रूपकायितौ वर्तेते।

१२. प्रीतिविष्णुप्रियम्

विष्णुप्रियायाः स्तुतिपरके 'प्रीतिविष्णुप्रिये' इति रूपके चैतन्यदेवस्य पत्न्या विष्णुप्रियाया प्रथमजीवनस्याध्यात्मिकी चरितगाथा निबद्धा। परं तस्या उत्तरकालिकी चरितकथा तथाध्यात्मिकी चेतना यतीन्द्रेण स्वककारयितृप्रतिभाबलादेवोपायनीकृता 'भक्तिविष्णुप्रिये'ति रूपके।

१३. अमरमीरम्

यतीन्द्रस्य द्वादशाङ्कविशिष्टे 'अमरमीराख्ये' नाटके मीरादेव्या विवाहोत्तर-जीवनगाथा सविस्तारं प्रपञ्चिता। अमरमीरं नारीगौरवात्मकनाट्यत्वेन जगति प्रसिद्धम्।

१४. विमलयतीन्द्रम्

वैष्णवीयभक्तितत्त्वप्रतिपादके सप्तदशात्मके 'विमलयतीन्द्रे' नाट्ये द्वैतदर्शनस्य परमाचार्यस्य रामानुजाचार्यस्याध्यात्मिकञ्चरितं वर्णितम्।

१५. भास्करोदयम्

जीवनचरितात्मकमष्टादशाङ्कोपेतं 'भास्करोदयं' महानाटकं रवीन्द्रनाथस्य आद्यजीवनमुपनिबध्नाति नाट्यकृद् यतीन्द्रविमलः। १६६१ ईशवीयाब्दे रवीन्द्रनाथस्य जन्मशतवार्षिक्या अवसरेऽस्य नाटकस्य प्रणयनमभूत्। परवर्तिनि काले न केवलं भारतवर्षे चापि विदेशेष्विदमभिनीतम्। भास्करोदय-भारतभास्कर-भुवनभास्कराख्यैर्भागैः सम्पूर्णं कविवरस्य पूतजीवनमत्र विषयीकृतम्।

प्रथमाङ्के जोडासाँकोस्थाने महर्षिभवने देवेन्द्रनाथः ऋणपरिशोधं कर्तुं नालमिति अपराधेन न्यायालयं गन्तुकामः। द्वितीयाङ्के पितृव्यस्य प्रसन्नकुमारस्य जीवितस्य प्रायोगिकपक्षान् विषयीकरोति यतीन्द्रः। परं स कथमपि सत्यपथान्न विच्युतोऽभवदिति। तृतीयाङ्के अष्टमवर्षीयो बालको रवीन्द्रनाथो गवाक्षाद्बहिरवलोक्य प्रकृतेर्निसर्गसान्निध्यम् अनुभवति –

"वटाद्रुमजटालस्त्वं छायामायावपुर्धरः।
अन्यस्ते राजते कोऽसौ विभुर्विश्वविमोहनः"[८०४]॥

[८०४]वि.स.ना. (रामजी), पृ. – १३९।

बालको रवीन्द्रः पुष्करिण्यां विश्वस्य विचित्रदर्शनमनुभवति। चतुर्थाङ्कस्तावत् ठाकुरपरिवारस्य स्त्रीणामाचारव्यवहारवर्णनापरकः। अङ्केऽस्मिन् झम्रु-डम्रुनामानौ द्वौ सान्तालौ मनोरञ्जकतया चित्रितावास्ताम्। पञ्चमाङ्के शारदादेव्याः सर्वेषां सन्तानानां संस्कृतपाठाभ्यासो वर्णितः। विशेषेण रवीन्द्रनाथस्य संस्कृतं प्रत्याग्रहस्तथा सानन्दं रामायणपाठाभ्यासश्च पाठकानां मनःसु नितरामलौकिकमानन्दं जनयतः। षष्ठाङ्के गायकत्वेन रवीन्द्रस्यानायासदाक्ष्यं नो नयनयोरापतति। तत्र रवीन्द्रनाथस्य कण्ठेन 'दिल्लीदरवार' इति कवितायाः आवृत्तिस्तथा च सत्येन्द्रनाथस्य 'गाऔ भारतेर गान' इति गीतिः यतीन्द्रेण नाटके अनवद्यतयोपस्थापिते। पश्यन्तु पाठकाः! गद्यच्छन्दसा निरवद्यो यतीन्द्रकृतानुवादः–

"सम्मिलितभारतसन्ताना एकता नमनप्राणाः।
गायत भारतयशोगानम्।
भारतभूमितुल्यं कतमत् स्थानम् ?
कोऽद्रिहिमाद्रिसमानः॥
फलवती वसुमती स्रोतस्वती पुण्यवती
शतखनी रत्ननिदानम्"[८०५]॥

यतीन्द्रस्यानुवाददाक्ष्यं कियदतलस्पर्शि इत्यत्र पाठकाः प्रमाणम्। परवर्तिनि काले पत्रिकाप्रकाशनेन विश्वकवेः वङ्गभाषाया उन्नताववदानं विश्ववासिभिः सर्वैर्ज्ञायते। रवीन्द्रनाथस्य सारस्वतसाधनायां विहारिलाल-चक्रवर्तिनः प्रभावः साहित्यसमालोचकैः अङ्गीक्रियते। नवमे अङ्के रवीन्द्रनाथस्य लण्डननगर्यां स्कटपरिवारे अवस्थानं सविशदमुपायनीकरोति नाट्यकारः। दशमे च तस्य श्रेष्ठकृतेः वाल्मीकिप्रतिभाया निर्माणमनन्यतुलिकयाङ्कितम्। एकादशे द्वादशे अङ्के च सन्ध्या-प्रभावसङ्गीतयोर्विरचनं तथा तत्र औपनिषदीयराद्धान्तप्रभावञ्च यतीन्द्रविमलो वास्तवोचिततया भङ्ग्या वर्णयति। रवीन्द्रनाथस्य जीवने कादम्बरीदेव्याः प्रभावः सर्वजनविदितः इति कृत्वा तया प्रभावितः सन् 'प्रकृतिर प्रतिशोध' इति कवितां व्यरचयत्। ठाकुरपरिवारस्य प्रत्यक्षप्रभावेण 'बालक' इति शिशुपत्रिकां प्रकाशयति

[८०५]आ.सं.सा.रू., पृ. – ९३।

रवीन्द्रनाथः। अन्तिमाङ्के ठाकुरपरिवारेणायोजिते माघोत्सवे कवेः कण्ठसंगीतं श्रुत्वा देवेन्द्रनाथः कविं पञ्चशतरूपकैः सभाजितवान्। अर्थात् रवीन्द्रनाथस्य जीवनस्याद्यपर्वणो वर्णनं हि 'भास्करोदयम्'। प्रसङ्गत उल्लेख्यं यत् यतीन्द्रस्य 'भारतभास्करं' कवेः रवीन्द्रनाथस्य जीवनस्य मध्यभागस्य कथाश्रितं तथा च 'भुवनभास्करं' तावत् कवेरन्तिमपर्यायस्य वृत्तनिर्भरम्।

अस्मिन् रूपके रवीन्द्रनाथस्य जीवने संघटितानां समेषां प्रसङ्गानां निरूपणमसम्भवपरमेव परं सहृदयानां सामाजिकानाञ्च औत्सुक्यं विवर्धयितुम् एव ते प्रसङ्गा वर्ण-रस-अलंकारैर्विचित्रिततयावतारिताः। विष्कम्भक-प्रवेशकौ निराकृतावत्र। अत्र एकोक्तीनां भूयान् प्रयोगो विहितः। प्रयोगे हास्यरसस्यावतरणा खलु यतीन्द्रस्य विशिष्टा रचनाशैली। यतीन्द्रस्य नाट्यप्रवृत्तेरपरमेकं वैशिष्ट्यं तावत् स्वच्छं संगीतम्। तद्यथा सप्तमाङ्के अक्षयस्य गीतमस्माभिः श्रूयते –

"हा हा हा हि हि हि हो हो हो हि हि हि।
आनन्दभोजनं परमसुशोभनं
केनापि कारणेन नापैक्षणीयम्।
प्रतिवृक्षं विकसिता लजेंस्-लता सदा हिता।
शष्पेषु दृश्यते दलं दलं चकलेटा पराहृयम्"[८०६]॥

१६. भारतविवेकम्

यतीन्द्रविमलेन स्वसहजया कारयितृप्रतिभया १९६३ ईशवीयाब्दे प्रकाशिते द्वादशदृश्यैर्विभक्ते 'भारतविवेका'ख्ये रूपके महात्मनो विवेकानन्दस्य सत्त्वविकासो निरूपितः। नाट्ये इह विवेकानन्दस्य पवित्रं जीवनदर्शनं भिन्नास्वादतयोपस्थापितं नाट्यकृता। नाटकस्य प्रतिच्छत्रं रामकृष्णपरमहंसदेवस्याध्यात्मिकजीवनस्य प्रभावोऽस्माभिरनुभूयते। विवेकानन्दस्य जीवने खेतडीराज्ञोऽवदानं न विस्मरणीयम् इति विदितचरम्। खेतडीराजसभायां राजानमुद्दिश्य विवेकानन्दस्य गानं पाठकानाञ्चित्तमान्दोलयति –

"यमुनाहृदयशोभिपुण्यमधुरजलं

[८०६]वि.स.ना. (रामजी), पृ. – १३९।

दूषितखातवाहि यदिदं समलम्।
गंगास्रोतसि जातं पवित्रं सकलं
हर हर दोषान् मम सर्वदोषहर"[८०७]॥ इति।

नाट्यस्य पञ्चमदृश्ये विष्कम्भक-दृश्यान्तरे विद्येते। अत्र रुचि-परायणयोः संगोतनृत्ययोर्विपुलसम्भारो वरीवर्ति। किञ्च, नाट्यस्यास्य पदे पदे श्रीरामकृष्णपरमहंसस्य भक्तिगीतान्यपि समाविष्टानि। दशमदृश्ये धीवरगीतं सहृदयानां मनो रञ्जयतितराम्। हास्यसृष्टौ यतीन्द्रस्य नैपुण्यं विदितं वेदितव्यानाम्। विवेकानन्दस्य विवाहविषये नापितघटकादीनां मनोज्ञः संवादोऽनवद्यदक्षतया हास्यरसेनार्द्रीकृता प्रदर्शितो नाट्यकृता –

"स्त्रियो देवाः स्त्रियः प्राणाः स्त्रियश्चैव विभूषणम्।
स्त्रीसङ्गिना सदा भाव्यं साधुना मुक्तिकामिना"[८०८]॥

१७. भारतराजेन्द्रम्

१९६३ ईशवीये वर्षे राजेन्द्रप्रसादस्य राजनैतिकजीवनमुपजीव्य 'भारतराजेन्द्रम्' इति नाटकं व्यरचि। अत्र राजेन्द्रप्रसादस्य चरितगाथावर्णनपुरःसरं तदीयं विद्यार्थिजीवनं विषयीकृतम्। यदा गान्धिना समं राजेन्द्रस्य महान् सम्पर्कः संबभूवेति हेतोः महात्मा गान्धी स्वविचिकित्सां तत्सकाशम् उपस्थापयन् प्राह –

"इदं भरतभूतलं चिरनिपीडितं दुर्जनैः
निरन्नवसनप्रजं हतहिरण्यरत्नादिकम्।
समुन्नमयितुं मयि प्रयतमानसे साम्प्रतं
विभो वितरो पीडिते समुचितां शरीरस्थितिम्[८०९]"॥

नाटकेऽस्मिन् क्वचित् यतीन्द्रस्य विचित्रोपमवर्णनानि पाठकानां चित्तम् आवर्जयन्ति। राजनैतिकनेतॄ राजेन्द्रप्रसादस्य जीवनालेख्यं निर्दिष्टतथ्यपुरःसरं निरमायि ग्रन्थकृता। कथावस्तुदृष्ट्या नाटकमिदं लोकनायकगाथात्मकमित्यत्र नास्ति संशयः।

[८०७]भारतविवेकम् (११।२१८)।
[८०८]वि.स.ना. (रामजी), पृ. – १४०।
[८०९]तत्रैव, पृ. – १४१।

१८. निष्किञ्चनयशोधरम्

'निष्किञ्चनयशोधर'मिति दृश्यकाव्यं यतीन्द्रेण सहजायाः कारयितृप्रतिभायाः स्पर्शेन निरमायि यत्र गौतमबुद्धपत्न्याः यशोधरायाः गौरवगाथाया निदर्शनमाप्यते। सप्तमाङ्कसम्पूर्णमपि प्रत्यङ्कं दृश्यैः प्रविभक्तमिति नाट्यतत्त्वदिशा अभिनवमिति मामकी मतिः। नाटकमिदं मञ्जुषापत्रिकायां १९६०-६१ ईशवीयाब्दमध्ये प्रचरद्रूपतां गतम्। श्रीमद्हरिदाससिद्धान्तवागीशैरस्य रूपकस्य आशीर्वाणीत्थं प्रकटिता –

'तदेतन्न केवलं तं प्रति स्नेहप्रकटनार्थं न च केवलं तस्यैवंविधां ज्ञानलिप्सामधिकृत्य मदभिप्रायप्रकटनार्थं वा, परं तस्यायं प्रयत्नः पण्डितसमाजस्य कियानुपकारक इत्यत्र जनानां प्रबोधनार्थमपि'[८१०]। नाट्यस्यास्य प्रस्तावनायां संस्कृतमातुः स्तुत्या समं नायिकायाः यशोधरायाः परिचयो वर्णितः। विविधैः सुकृतैर्धन्या सिद्धार्थजाया यशोधरा खलु पत्युर्धर्मसंघप्रतिष्ठायै आजीवनमुत्सर्गीचकार इति वृत्तन्त्वस्माकं विदितचरमेव।

अत्र प्रथमाङ्कगते प्रथमदृश्ये यशोधरया साकं राजपुरोहितस्य साक्षात्कारो वर्णितः। यशोधराया गुणकलापेन प्रभावितः सन् शुद्धोदनः कथयन्नाह –

"गोपा विशुद्धगुणभूषणजातशोभा
पुत्रोऽपि मे न समनामनया प्रयाति"। इति।

ततो द्वितीये दृश्ये कपिलावस्तुनगर्य्यां राजप्रासादे सिद्धार्थस्यावस्थितिस्तथा च राजपुरोहितेन सह शुद्धोदनस्य कथोपकथनसंवादश्चित्रितौ। तृतीये दृश्ये कपिलावस्तुनगर्याः राजवर्त्मनि खण्डध्वज-देवदत्तयोः प्रवेशः, ततः सिद्धार्थ-देवदत्तयोर्द्वन्द्वस्तथा चाङ्कस्यास्य चतुर्थे दृश्ये यशोधराद्वारा देवदत्तस्य तिरस्कारश्चेति विषयाः साधु ऐतिहासिकतथ्यपुरस्कारेणोपस्थापिताः। चान्तिमेऽङ्कद्वितये नायक-नायिकयोः रोचकं सुदीर्घं कथोपकथनञ्चित्रितमास्ते।

त्रिभिर्दृश्यैः सम्पूर्णे द्वितीयाङ्के यशोधराया उत्स्वप्नायितस्य शुभव्यञ्जनां सिद्धार्थमुखेन यतीन्द्रः कथयति –

"हर्षं लभस्व न च खेदमवाप्नुहि त्वं

[८१०]निष्किञ्चनयशोधरम् (आशीर्वाक्)।

तुष्टिं च विन्द जनयाद्य ममापि हर्षम्।
तूर्णं भविष्यति धराखिलमोहमुक्ता
गोपे प्रिये सकलमेव शुभं निमित्तम्"[८११]॥

अङ्कस्यास्यादावेवास्मिन्नयनपथे पान्थायेते कपिलावस्तुनगर्य्याः सर्वत्र प्रजाजनैः राजवध्वाः यशोधरायाः समालोचनं तथा च राजसभायां तस्याः श्लेषव्यञ्जकं तात्पर्यमयं राजवधूजनोचितं भाषणमिति। भाषणान्ते उभयोः संलापेन नाट्यस्य गतिर्वर्धयतेतराम्। द्वितीयाङ्कस्यान्तिमं दृश्यं तावत् यशोधरायाः स्वप्नवृत्तान्तेन पूरितम्। प्राचीनसंस्कृतनाट्यसाहित्यस्यैतिह्यमनुकृत्य यतीन्द्रेणाप्यत्र स्वप्नवृत्तं संयोजितम्।

तृतीयाङ्कस्तावद् द्विशाखतया विभक्तं नामात्र दृश्यद्वितयं लसति। प्रव्रजिते गौतमे यशोधरा पतिगृहे तपोमयजीवनं व्यतीतवती। सिद्धार्थस्य महानिष्क्रमणवृत्तश्रवणेन नायिका गोपा मूर्च्छामिता। पश्चात्तस्याः अतिकरुणविलापेन नाट्ये करुणरसो ध्वनितः। चतुर्थाङ्कस्य प्रथमदृश्ये सिद्धार्थस्य कपिलावस्तुनगरप्रत्यावर्तनं वर्णितम्। सिद्धार्थपुत्रस्य राहुलस्य सन्न्यासग्रहणसंवादो नाटकीयः इत्यत्र न संशीतिः। पञ्चमाङ्के यशोधराप्रभावेण गौतम्याः पुनः दृष्टिशक्तिप्राप्तिः, षष्ठाङ्के यशोधरयानुप्राणितानां नारीणां बौद्धधर्मे प्रवेशो वर्णितौ आस्ताम्। अन्ततो गत्वा तस्या अनुरोधेन गौतमो भिक्षुणीसंघनिर्माणमनुमेने। सप्तमाङ्के प्रायः अशीतिवर्षीया वृद्धा यशोधरा परिनिर्वाणलाभाय गौतमस्यानुमतिं प्रार्थयते।

यतीन्द्रविमलस्य इह नाट्ये शान्त-हास्य-करुण-अद्भुतरसानां बहुविचित्रितः प्रयोगोऽलक्षि। दिङ्मात्रमुदाहरणं तावत् हास्यरसोचितं रंगपीठे मर्कटविषयकं गीतम् –

"अहो जीव वृक्षचर कलिप्रिय।
विक्रमं ते प्रकाशय झम्पे झम्पे हासय
धीमतो दर्शय वदनप्रियः "[८१२]॥

सिद्धार्थाद् यशोधराया व्यक्तित्वमयञ्चरित्रमनन्यदक्षतया यतीन्द्रेण न्यरूपि। तस्याश्चरित्रनिर्माणे अश्वघोषस्य बुद्धचरितस्य प्रभावो वरीवर्तीति शक्यवचम्।

[८११]निष्किञ्चनयशोधरम् (द्वितीयाङ्कः)।
[८१२]तत्रैव (४।५४)।

पञ्चतत्त्वाञ्चिते दुःखमये प्रपञ्चे 'सत्यमेव जयते, नानृत'मिति ध्वनिः भरतवाक्येनैव स्फुटं काशते।

१९. शक्तिसारदम्

'शक्तिसारदा'ख्ये रूपके रामकृष्णदेवस्य पत्न्याः सारदादेव्या आध्यात्मिकं चरित्रं वर्णितम्। प्रत्येकं नारीषु जगज्जननी विराजते। महाजननीत्वेन सारदादेव्याः स्वीकृतिर्नाट्यस्यास्य मुख्यं प्रतिपाद्यम्। 'काहमिति' पृच्छायां रामकृष्णस्तामवादीत्–

"येयं सृष्टिलयस्थितिप्रणयिनी काली करालानना
या चेदं कृपया शरीरमसृजत् सर्वार्थसंसाधनम्।
सा मे मन्दिरवासिनी नहबत-स्था चापि मे यादृशी
त्वं तादृश्यसि लेशतोऽपि न ततो भिन्नेति मन्ये ध्रुवम्"॥

त्रिपुरसुन्दरीवेषेण सारदामणिं सज्जयित्वा रामकृष्णस्तां प्रपूजयति। अत्र रामकृष्णमुखेन यतीन्द्रो नारीरूपेण सारदादेव्या अशेषशक्तिमत्त्वं वर्णयति। रामकृष्णस्याशयोऽयमेव – 'न त्वं बिन्दुः, सिन्धुरेव त्वम्। त्वमेव मे शक्तिः, मम शाधना मम सिद्धिश्च। जीवनव्रतं मे त्वय्येव प्रमूर्तं जातम्'।

यतीन्द्रविमलस्य भाषा नाटकोचिता परं वैदर्भीरीतिबहुला। अत्र क्वचिद् भावानुसारी क्वचिद्वा यथा अमृतवर्षी नादात्मकशब्दप्रयोगो लालक्ष्यते। गीतानां प्रचुरसन्निवेशो हि यतीन्द्रस्य दृश्यकाव्यस्य महदेकं वैशिष्ट्यम्। नाट्यकृता प्रसङ्गानुसारं हास्यरसो योजितः परमत्र भक्तिरसोऽङ्गीति।

प्रसङ्गतः समुल्लेखार्हं यन् 'मुक्तिसारदा'ख्ये रूपके चित्रितानि श्रीरामकृष्णदेवस्य अमृतालोकगमनादनु सारदादेव्याः चरितानि।

२०. महाप्रभुहरिदासम्

यतीन्द्रविमलस्य 'महाप्रभुहरिदास'मिति रूपकं सप्तमाङ्कसम्पूर्णम्। प्रत्यङ्कं दृश्यैश्च प्रविभक्तमिति नाट्यकृतो विलक्षणं वैशिष्ट्यमेकम्। अस्मिन् नाटके स्वामिनो हरिदासस्य भक्तिप्रवणरूपं समङ्कितं वर्तते। अर्थात् महात्मनो हरिदासस्य पूतमाध्यात्मिकञ्चरितमुपजीव्य यतीन्द्रेण पूरीनगर्यां रथयात्रामुपलक्ष्य १६५८ ईशवीयाब्दे नाट्यमिदं व्यरचि।

नाट्यस्यान्ते हरिदासः लक्षत्रयवारान् नामजपव्रतं पूरयितुमक्षमः सन् चैतन्यस्य पादपद्मं वक्षसि निधाय ब्रह्मणि लीनोऽभूत्। दिवङ्गते तस्मिंश्चैतन्यमहाप्रभुः प्राह – 'हरिदास! तव पादस्पर्शेन धन्या जाता धरणी। तव स्पर्शादहमपि अस्मि धन्यतमः। अद्य प्रभृति तव भक्तिः प्रवहतु नदीकल्लोलेषु, वहतु च सा पवनगतौ। काननपुष्पेषु भवतु सा विकसिता, पक्षिकण्ठेषु ध्वनिता, पार्थिवरजःसु प्रतिकणमुल्लसिता' इत्यादीनि।

नाट्यतत्त्वदिशा रूपकमिदमुपभोग्यम्। अत्र यथा संगीतीनां प्राचुर्यं नयनयोरापतति तथैव पञ्चमाङ्कस्य तृतीये दृश्ये छायातत्त्वानुसारि गर्भनाटकमपि संयोजितमिति।

परिशेषु शक्यवचं यद् यतीन्द्रविमलस्य नाट्यविश्वे समकालिकसमाजस्य सूक्ष्मचित्रणं, मध्यवर्गीयजनानां जीवनगतः संघर्षः, नाट्यकथासंविधाने स्वदेशभावः चेति विशेषाः परिलक्ष्यन्ते। अस्य शैली अलंकरणैर्न भाराक्रान्ता। विशेषेणोल्लेखार्हं यद् देशप्रेमिकाणां महात्मनाञ्च चरित्रविश्लेषणे मनोवैज्ञानिके नाट्यकर्तुरस्य नाट्यविरचन-कैशलं प्रौढत्वञ्च स्पष्टमुद्भासत इत्यत्र नास्ति विमतिः।

१०. नित्यानन्दस्मृतितीर्थस्य साहित्यप्रपञ्चः

०. प्रस्तावना

स्मृतिरत्नस्य रामगोपालमुखोपाध्यायस्य पुत्रोऽयं नित्यानन्दो यशोरप्रदेशस्य संस्कृतशिक्षिते परिवारे १९२३ ईशवीयाब्दे जनिमलभत। तस्य पिता पितामहश्च भारतीयसंस्कृतिपरायणौ लोकभाविनौ च बभूवतुः। शैशवतो मातुः प्रभावात् पारिवारिकैतिह्यस्य परिपालनाय संस्कृतशिक्षाधिगतानेन। काव्य-व्याकरण-स्मृतिशास्त्रेषु स ह्यासीन्निष्णातः। संस्कृतं प्रति प्रीतिवशादेव स प्रतिष्ठाञ्चक्रे हाओडा-संस्कृतसमाजाख्यस्य संस्थाकस्य। सुदीर्घम् अष्टाधिकचत्वारिंशद् वर्षाणि यावन्महाविद्यालये (कलिकातास्थ-शासकीय-संस्कृत-महाविद्यालये) अध्यापकपदमलंकृतं तेन। अष्टाधिकं शतं संस्कृतनाटकानि, सप्त महाकाव्यानि, चतुर्विंशतिः खण्डकाव्यानि, संस्कृतायितम् अनूदितषोडशकनाटकं तत्साहित्यकृतिषु परिगण्यन्ते। संस्कृतसाहित्ये विशेषावदानाय स राष्ट्रपतिपदकेन सभाजितोऽभवत्।

१. नित्यानन्दस्य श्रव्यकाव्यरचनायां दाक्ष्यम्

कश्चिद् दृश्यकाव्यानि रम्यकाव्यानि च रचयन् दर्शकानां चेतांसि विमोहयति। अपरः कश्चित् श्रव्यकाव्यनिर्माणेन सहृदयहृदयं समाकर्षति। परं नित्यानन्दः प्रतिभाद्वितयीयं परस्परस्पर्धितया राजमानो विस्मयं नस्तनोति।

यया चित्प्रकर्षसम्पदा भारतीया मनीषा अद्यापि विश्वे वन्द्यमाना तस्याः भित्तिभूमौ विद्यते विचित्रा दार्शनिकी प्रज्ञा। बहुविधेषु दार्शनिकमतवादेषु भारतभूमौ लब्धोदयेषु वेदान्तदर्शनं विशेषतः अद्वैतवेदान्तदर्शनं वर्तमानविश्वपरिप्रेक्षे सुतरामेव उपयोगिताम् आवहति। राममोहन-रामकृष्ण-विवेकानन्द-अरविन्द-रवीन्द्रनाथादीनां बौद्धिकचेतनायां कर्मसाधनायाञ्च निरुक्तस्य दार्शनिकमतवादस्य युगोचितः प्रकाशः परिलक्ष्यते। अद्वैतवेदान्तदर्शनप्रस्थानस्य प्रतिष्ठायां यस्यास्ति महत्तममवदानं तस्यैव शङ्कराचार्यस्य महिममयं जीवनमवलम्ब्य तत्र भवता नित्यानन्देन त्रयोविंशतिसर्गात्मकं 'शङ्करमहानुभावा'भिधानं महाकाव्यमेकं विनिर्मितम्। यस्य महाकाव्यस्य प्रतिसर्गं प्रतिश्लोकं च युगावतारस्यास्य अध्यात्मगौरवोद्दीप्तं जीवनालेख्यं समङ्कितमाभाति।

भगवत्कारुण्यस्य मूर्तविग्रहरूपेणाविर्भूतस्य नामामृतप्रदानेन संसारक्लेशापहारकस्य श्रीश्रीसीतारामदासोङ्कारनाथस्य पवित्रं जीवनालेख्यं लिखितमनेन महाकविना नित्यानन्देन विंशतिसर्गात्मके 'श्रीश्रीसीतारामदासोङ्कारनाथायने' महाकाव्ये। प्रसङ्गेऽस्मिन् द्वादशसर्गात्मकं 'तारकनाथवैभवम्', विंशतिसर्गात्मकं 'वामाचरणवैभवम्', विंशतिसर्गात्मकं 'तैलङ्गवैभवम्' चैवमादीनि महाकाव्यानि सुतरामेव समुल्लेखमर्हन्ति। सर्वेष्वेव महाकाव्येषु आलंकारिकनिर्दिष्टानि महाकाव्यलक्षणानि पूर्णतोऽनुसृतानि परिलक्ष्यन्ते। किञ्च, उपजीव्यस्य चरित्रस्य गौरवं महत्त्वञ्च यथोचिततया प्रकाश्यमानमालोक्येते।

नित्यानन्दकवेः कवित्वप्रतिभा बहुधा स्पन्दमाना जाता। तस्य कवित्वप्रतिभायाः परिणामत्वेन तेन महाकाव्यव्यतिरेकेण खण्डकाव्य-प्रशस्तिकाव्य-शोकगाथादीनि विचित्ररूपाणि काव्यानि निर्मितानि। तथाहि तेन ग्रथितानि गौरवन्दन-कालिदासवन्दन-ओङ्कारनाथवन्दन-श्रीपशुपतिनाथवन्दन-चैतन्यशतक-श्रीगुरुवन्दन-जातीयपताकाभिनन्दन-विजयकुमारस्मरण-शैलकुमारस्मरण-मातृपूजाकथाकाव्य

(चम्पूकाव्यम्)-भक्तिकुसुमाञ्जलिप्रभृतीनि खण्डकाव्यानि सहृदयहृदयानि रसोल्लासवारिधौ निमज्जयन्ती नितरामेव देदीप्यन्ते। प्रसङ्गानुसारं वक्तुमलं नित्यानन्दस्य खण्डकाव्यजातं 'वन्दनकाव्य'मिति। बहूनां साधूनां महापुरुषाणाञ्च प्रशक्तिमूलिकाः कविताः श्रीमता नित्यानन्देन विरचिताः। अनेकानां विशिष्टानां व्यक्तीनां महाप्रयाणे कवेरस्य शोकरूपविभावसमुद्वेलितान्तकरणात् स्वाभाविकगत्यैव विनिर्गता नैकाश्च कविताः। दिङ्मात्रमुदाहरणं यथा – 'अशेषशास्त्रपारावारपारङ्गमस्य स्नेहसौजन्यादिगुणशतैः समलंकृतस्य श्रीमतो जयदेवगङ्गोपाध्यायशास्त्रिणः महाप्रयाणे नित्यानन्दकवेः हृदयाद् ये अष्टौ श्लोका विनिर्मितास्तेषु तदीया चित्तगता शोकधारा प्रत्यक्षदृश्येव विभाति'। उदाहरणरूपेण श्लोकद्वयमुद्ध्रियते –

"त्वया विनासौ परिषद् विशीर्णा ग्रन्थालयः पालकशून्य एव।
सर्वञ्च शून्यं नितारं विभाति पुनः पुना रोदिति हा च सर्वम्॥
मम च हृदयमेतत् सर्वदा दुःखपूर्णम् असहविरहदुःखं नैव सोढुं समर्थः।
पुनरपि तव सङ्गं कामयेऽहं सदैव भवतु तव च शान्तिः प्रार्थये देवदेवम्"॥

विश्वविबुधपरिषदि लब्धप्रतिष्ठस्य प्राच्यतत्त्ववेदिनां मुख्यतमस्य विचित्रवैदुष्य-ज्योतिषा विशदीकृतदिङ्मण्डलस्य गौरीनाथशास्त्रिमहोदयस्य महाप्रयाणे नित्यानन्दकवेः शोको दशसु श्लोकेषु वाङ्मयीं मूर्तिमलभत। वाल्मीकिकवेर्मुखेन वक्तुमलं – 'शोकः श्लोकत्वमागतः' इति। नित्यानन्दो न हि तद्व्यतिक्रमः। तेषु एकतमो यथा –

"गौरीनाथेन हि विरहिताः पण्डिताः सर्व एव।
क्रन्दन्त्येते विगतशरणा दुःखचित्ताः सदैव।
को वा चिन्तां कुरुत इह वा क्षेमहेतोर्हि तेषां
शून्यं सर्वं भवति सततं वङ्ग एव प्रतीच्यः।
दैव्या वाण्याः प्रसृतिकृतये केन वा यत्यतेऽद्य।
गौरीनाथस्य च विरहतो व्याकुला देववाणी।
माता रोदित्यथ च नियतं सान्त्वनां कः प्रदद्यात्"॥

हाओडासंस्कृतसाहित्यसमाजभवने श्रीश्रीसीतारामदासोङ्कारनाथस्य वारद्वयं पदार्पणावसरे नित्यानन्दकविना तस्य साधकवरिष्ठस्य कृते प्रशस्तिकाव्यद्वितयं व्यरचि।

तत्तावद्भक्तिभावाभिव्यञ्जनया सहृदयहृदयानि सुतरामेव ह्लादयन्ति। दिङ्मात्रमुद्धृतिर्यथा –

"कलिहतजनगोष्ठीत्राणतः कीर्तयंस्तत्।
सकलजनसमाजे तारकब्रह्मनाम॥
जगदिदमतिपुण्यं स्वर्गभूतं विधास्यन्
जयति निजमहिम्ना श्रीमदोङ्कारनाथः।
भक्त्या वयं किल पदाम्बुजपूजनार्थं
यत् किञ्चिदाहृतमिदं भवतामयोग्यम्।
आदाय ते करुणयानुगृहाण चास्मान्
भक्त्यार्पितं स हि हरिर्न निराकरोति"॥

प्रतिभा व्युत्पत्तिरभ्यासश्चेति त्रियतं मिलितमेव काव्यस्योद्भवे समुल्लासे च हेतुतां व्रजति। नित्यानन्दकवेः सहजा निरवद्या नवनवोन्मेषशालिनी कविप्रतिभापि काव्य-व्याकरण-दर्शन-स्मृति-पुराणादिषु शास्त्रेषु समुपार्जितया सुगभीरया व्युत्पत्त्या निरन्तरं काव्यविरचनाभ्यासेन च समन्विता लोकोत्तरचमत्कृतिपरमा निःसंख्येयाः काव्यकृतीः व्यधत्त। किञ्च, कवेरस्य वङ्गसाहित्येन विशेषतः रवीन्द्रनाथ-वङ्किमचन्द्र-शरच्चन्द्रप्रभृतिभी रचितैः साहित्यकर्मभिः सह निविडः परिचयोऽप्यासीदिति स्पष्टतया प्रतीयते। अपरञ्च, कविनानेन तथा वैपुल्ययुक्तानि कविकर्माणि निर्मितानि यैः काव्यरचनायां तदीया निरन्तराभ्यासशालिता अस्मान् विस्मयविमुग्धान् विदधाति।

२. नित्यानन्दस्य रूपकग्रथने विशिष्टत्वम्

कविरयं रूपकविरचने सुतरामासीन्निष्णातः। तेन प्रायेण अष्टाधिकैकशतं नाटकानि ग्रथितानि। तेषु नाटकेषु कानिचिद् ऐतिहासिकमूलकानि, कानिचिच्च जीवनचरिताश्रितानि, कानिचिद्वा आधुनिकविषयाधारितानि, कानिचन पुनः पौराणिकवृत्तकल्पितानि, अवशिष्टानि प्रायेणानुवादरूपाणि च। हावडासंस्कृतसाहित्यसमाजेन प्रकाशितं नित्यानन्ददृश्यकाव्यसंकलनम्। तत्र सर्वेषां नाटकानां मूलं नासीत्। तत्र 'श्रीवाल्मीकित्वलाभम्', 'रहमतख्यानवृत्तान्तम्', 'वङ्गकीर्तिविधानम्', 'आनन्दमठम्', 'बालेश्वरमहायुद्धम्', 'कालिदासः', 'सम्मत्तिसमर्पणम्', 'गुप्तधनम्', 'ध्रुवप्रसादनम्', 'महिषासुरलाञ्छन'ञ्चेति नाटकानि

वर्तन्ते। किञ्च, नित्यानन्दस्य नाटकेषु 'मेघदूतम्', 'तपोवैभवम्', 'प्रह्लादविनोदनम्', 'सीताराविर्भाव'ञ्चेति अन्यतमत्वं भजन्ते। तस्य प्रसिद्धनाटकानां विषये समासतः पर्यालोचनं क्रियते –

२.क. मेघदूतम्

कालिदासस्य मेघदूतस्यावलम्बनेन पञ्चाङ्कविशिष्टं गीतात्मकं नाटकं तावत् 'मेघदूत'मिति। इह नाटके मेघदूतस्य भाव-वाक्यच्छन्दांसि बहुत्रैवोद्धृतानि।

नाटकेऽस्मिन् यक्षपत्नी वनान्तरं यक्षम् अन्विष्यन्ती परिभ्रमति। सा विरहवशात् वृक्षादीन् पतिविषयान् प्रश्नान् परिपृच्छति। शरदि यक्षस्य सविधे कृष्णवर्णीयो मेघो यक्षिणी-विषयक-वार्तामादाय समागतः। तदा यक्षस्तं मेघं दूतीकृत्य अलकापूरीं प्रेषयति। ततः मेघः अलंकापुरीं गत्वा पतिसन्देशं यक्षिण्यै श्रावयति, तस्याश्च कुशलसंवादान् नीत्वा पुनः यक्षाय निवेदयति –

"तवैवार्थं प्रियप्राणा ध्रियन्ते तव कान्तया।
तव मार्गं प्रपश्यन्त्या दास्या तेऽपेक्ष्यते सदा"[८१३]॥

नाटकस्यास्याङ्कास्तु दृश्येषु प्रविभक्ताः। कृष्णमेघचरित्रन्तु छायातत्त्वानुसारीति प्रतिभाति। नाट्यकृतात्र देवदासीनां सनृत्यं गीतं संयोजितम्।

२.ख. प्रह्लादविनोदनम्

नाटकमिदं पञ्चाङ्कोपेतम्। अत्र पौराणिकचरित्रस्य प्रह्लादस्य जीवितं नाट्यकृता नित्यानन्देनोपायनीकृतम्।

विष्णोः द्वारपालकौ जय-विजयौ बालखिल्यमुनेरभिशापात् हिरण्यकशिपु-हिरण्याक्षौ बभूवतुः। हिरण्यकशिपुः सदैव हरिनामसंकीर्तनस्य विरोधी आसीदिति कृत्वा स स्वपुत्रस्यैव प्रह्लादस्य शत्रुर्बभूव। कारणमस्यैतद्यत् प्रह्लादो महान् हरिभक्तः समासीत्। सोऽहर्निशं हरिनाम जपति स्म। हिरण्यकशिपुः विविधैरुपायैः प्रह्लादं हन्तुं नालम्। सर्वं नारायणमयमिति तन्मतिः मिथ्येति प्रदर्शयितुं स्फटिकस्तम्भाद् भगवतः प्रकटीकरणाय आदिदेश। तदा स्तम्भाद् आविर्भूतो नृसिंहो हिरण्यकशिपुं जघान। परं हिरण्यकशिपुः मृत्योः परं दिव्यदेहधारी बभूव। नाटकेऽस्मिन् केषाञ्चित् स्तोत्राणां निवेशो रुचिकर इति

[८१३] वि.स.ना. (रामजी), पृ. – ५७।

प्रतिभाति।

२.ग. सीतारामाविर्भावम्

प्रणवपारिजातपत्रिकायाः प्रवर्तकस्य सीतारामदासोङ्कारनाथस्य पुण्याविर्भावम् उपलक्ष्य नित्यानन्देन नाटकमिदं व्यरचि। तृतीयाङ्के भगवतो नारायणस्योक्तिः संस्मरणीया – 'सनातनवर्णाश्रमधर्मसंरक्षणाय ममैवांशमवतारयामि अचिरादेव भारतवर्षे'।

प्रतीकपरकमिदं नाटकम्। नातिदीर्घमङ्कत्रयं प्रायेण लघुतरदृश्येषु प्रविभक्तम्। अङ्कानां कथावस्तु मिथः सम्बद्धमिति प्रतिभाति। अत्र कलिकालस्य लोभमोहादिरिपुभिः सह दुष्प्रवृत्तीनां समासेन विवरणं प्रस्तुतं नाट्यकृता।

२.घ. तपोवैभवम्[८१४]

कवयिता स्वपितू रामगोपालस्मृतिरत्नस्य तपःसिद्धजीवनमत्र प्रपञ्चितमास्ते। अन्नदानं हि रामगोपालस्य परमो धर्मः। तदुक्तं नाटके –

'अन्नदानं परो धर्मः कलावस्मिन् युगे किल।
अन्नदानाय तेनात्र यतितव्यः त्वया सदा'[८१५]॥

पितुरुक्तिं रामगोपालः स्वीये जीवने प्रत्यक्षरशः अनुपालितवान्। देवीसाधकं गुरुं सच्चिदानन्दं निकषा रामगोपालः दीक्षां नीत्वा साधकत्वपदम् अलभत। निर्वहणे रामगोपालः गुरोरनुग्रहेण परमेश्वरीं मातरं साक्षात्तया पश्यति। अतिरोचकं कथावस्तु विचार्य मन्यते यन्नाटकमिदं विरलकोटिकमिति भाति।

२.ङ. श्रीवाल्मीकित्वलाभम्

पौराणिकचरितमवलम्ब्य अङ्कपञ्चके एकादशदृश्येषु च रत्नाकरस्य परुषस्वभावं परित्यज्य वाल्मीकेः लोकहितकरं वात्सल्यभावञ्च उपायनीकरोति नाट्यकारो रूपकेऽस्मिन्। तस्मिन् समये साधारणजनानां दुर्दशा कियती आसीदिति कवेः लेखनीस्पर्शाद् अवगम्यते – 'आर्त्तस्य दुःखं परिनाश्यमेव यतध्वमस्मै नियतं हि यूयम्' (श्लोकः – ११)। नाट्यकृता प्राचीननाट्यरीतिमवलम्ब्य नान्दी-प्रस्तावना-

[८१४]नाटकमिदं १९७२ ईशवीयाब्दे प्रकाशितमभवत्।
[८१५]आ.सं.सा.रू., पृ. – १०१।

भरतवाक्यादिनाट्योपादानानि व्यवहृतानि। ब्रह्मणः श्रीरामस्य च स्तुतिपरकाः श्लोकाः अस्माभिः दृश्यन्ते नाटकस्य नान्दीतः भरतवाक्यं यावत्। दिङ्मात्रमुदाहरणं तावत् –

"हे राम कार्मुकधर करुणावतार
हे श्यामकान्तिनिलय जगतः प्रपातः।
को वा तवैव चरणे शरणं विनैव
गम्यात्सुखं कथमहो धरणौ कथं वा"[८१६]॥

२.च. महिषासुरलाञ्छनम्[८१७]

पण्डितेन नित्यानन्देन विरचितम् अङ्कचतुष्टयात्मकं नाटकं 'महिषासुरलाञ्छनम्'। नाटकस्य प्रत्यङ्कं कैश्चिद् दृश्यैर्विभक्तम्। चतुर्षु अङ्केषु क्रमशः नवदृश्यानि वर्तन्ते। नाटकमिदं साफल्येन मञ्चस्थं जातम्। किन्तु नाट्यशास्त्रीयरीत्यनुसारं सन्धि-सन्ध्यङ्गादिविभाजनमत्र नास्ति। विविधच्छन्दोभिः पञ्चचत्वारिंशदधिकैकशतं श्लोकाः विलसन्त्यत्र। कालिकापुराणस्योपाख्यानं हि नाटकस्यास्योपजीव्यम्।

प्रथमाङ्कस्य प्रथमे दृश्ये मातृदर्शनार्थं कठोरं तपस्यति महिषासुरः। तस्मात् प्रथमाङ्कनाम 'देवीदर्शनम्'। कठोरतपसा मातुर्दर्शनं कृत्वा तस्याः निदेशेन कार्यं कर्तुं प्रतिशृणोति –

"न जानामि मन्त्रं न वा ध्यानं तन्त्रं
स्तुतिं नैव जाने कथं वा भजामि।
कृपाख्यातिहेतोर्भजे केवलं त्वां
ममाम्बेति कृत्वा न चान्यत् प्रजाने"[८१८]॥

'महिषासुरराज्याभिषेक'मिति नाम द्वितीयाङ्कस्य प्रथमे दृश्ये सुन्द-उपसुन्दयोः कथोपकथनं विलसति। जन्मान्तरकथासंवलिते द्वितीयाङ्के महिषासुरस्य राज्याभिषेकवृत्तमुपनिबद्धम्। द्वितीये दृश्ये महिषासुरेण सह रम्भासुरयोः संवादो विलसति। महिषेण कथितम् – 'तात! एषोऽहं भवदाज्ञां शिरसि अभिवन्द्यं निदेशञ्च

[८१६]श्रीवाल्मीकित्वलाभम् (श्लोकः – ६७)।
[८१७]महिषासुरलाञ्छनम्, हाओडासंस्कृतसाहित्यसमाजम्, १९८२।
[८१८]तत्रैव (१०।१)।

पुरोवर्त्तिनं कृत्वा राजदण्डमिमं गृह्णामि'[८१९]। नेपथ्यगीतेन राज्याभिषेकानुष्ठानं ज्ञाप्यते –

"स्नापय देवं तीर्थजातोयैः भूषय देवं कुङ्कुमगन्धैः।
सज्जय देवं सुन्दरवस्त्रैः पूजय देवं रत्नजमाल्यैः"[८२०]॥

'देवीप्रतिज्ञान'मिति तृतीयेऽङ्के असुराधिपतिना सह देवतानां विरोधः, बृहस्पति-ब्रह्मा-इन्द्रादिदेवानां स्वर्गत्यागः, महिषासुरस्य स्वर्गाक्रमणञ्चेति विषयाः प्रभविष्णुतया वर्णिताः। द्वितीयदृश्ये ब्रह्मा-बृहस्पतिसंवादेन इन्द्रस्य पराजयो ज्ञाप्यते। उपायान्तरं न प्रेक्ष्य देवगुरोः उपदेशेन सर्वे सम्मिल्य महाशक्तिमाराधयन्ति। प्रसन्ना देवी नेपथ्ये इन्द्रमुपदिश्य तिरोभवति। चतुर्थाङ्के गुरुणा सोमाचार्येण सह महिषासुरस्य राज्यशासनविषयकः संवादो वर्णितः। ततः महिषासुरसभां कश्चन दूतः समागत्य युद्धार्थं दशभूजायाः नार्यः आगमनवृत्तान्तं कथितवान्। किन्तु गुरुणा वारं वारं युद्धाद्वारितोऽपि महिषासुरः सेनापतिं प्रेषयामास। द्वितीये दृश्ये वर्ण्येते महिषासुरं विमर्द्य महाशक्तिरूपिण्याः देव्याः दुर्गायाः आत्मप्रकाशस्तथा महिषासुराय वरप्रदानञ्च –

"भक्त्या तव प्रसन्नापि न च किञ्चिदपेक्ष्यते।
अद्य प्रभृति ते पूजा मया सह भविष्यति"॥ चान्तिमे संसारे अयमसुरो धर्मभावं प्रसरतु इति कथयन्नाह –

"बुद्धिहीना जननि सततं धर्मतो भ्रंशहेतोः।
न्यस्तं वित्तं तव चरणयोस्त्वं कृपातोऽस्तु तेषाम्"[८२१]॥

२.छ. अमरवीरवृत्तान्तम्

नित्यानन्देन स्वाधीनतायुद्धे वीरस्य क्षुदिरामस्य वीरत्वव्यञ्जकं वृत्तमाश्रित्य 'अमरवीरवृत्तान्त'मिति ऐतिहासिकं नाटकमेकं विरचितम्। नाटकस्यास्य प्रथमाङ्कस्य प्रथमे दृश्ये वाग्देव्याः स्तुतिर्विहिता। इयं देवी अज्ञानविनाशिका शुभ्रवर्णीया उत्तमकीर्तिमती च। दृश्यते नाटकस्यास्य नायकः क्षुदिरामः देशमातृकायाः शृङ्गलमोचनाय प्रतिज्ञाबद्धः –

[८१९]महिषासुरलाञ्छनम्, पृ. – ३४।
[८२०]तत्रैव (२।३४)।
[८२१]तत्रैव, पृ. – १४५।

"यन्नामस्मरणेनापि धन्यं भवति जीवनम्।
महायोद्धा महावीरः क्षुदिरामः स एव हि"॥

प्रथमाङ्कस्य द्वितीये दृश्ये अनुशीलनसमितौ गुप्तपरामर्शाः प्रचलन्ति क्षुदिराम-अरविन्दघोष-विपिनपाल-नवीनवोसादिनेतॄणां मध्ये। ततः द्वितीयाङ्कस्य प्रथमे दृश्ये कार्जनादिवैदेशिकानां भारतीयजनान् प्रति अन्याय्यं निष्ठुरमाचरणं नाट्योचितभङ्ग्या परं वास्तवोचिततया वर्णितम्। तथाहि उक्तम् –

"पशुवत्पालनीयाश्च भारतीयाः सदैवाह।
दासामामरिकावासा पूरणीया कथं भवेत्॥
मितञ्च खाद्यं मितमेव वारि-
मितो निवासो मितमेव वासः।
यथार्थ्यविद्या भविता यथा न
तथा व्यवसानितरां प्रकार्य्या"[८२२]॥

किंस्फोर्डमते, वङ्गीया बुद्धिमन्त इति कृत्वा वङ्गभङ्गः अवश्यमेव काम्यः, अन्यथा भविष्यतो विपर्ययः अवश्यम्भावीति –

"सुखानुभूतिर्न भवेद् यथैषां
बुद्धेः प्रकाशो भविता यथा न।
सम्मेलञ्चापि घटे तथैषां
तथैव कार्य्यं खलु न शासनं हि॥
समग्रे भारते वर्षे वङ्गदेशोऽदुर्द्दमः।
वङ्गीया बुद्धिमन्तश्च महान्तो रिपवो हि नः"[८२३]॥

द्वितीयाङ्के प्रथममेव अरविन्दः सखेदं कथयति यद्भारतीयैः सह आङ्गलाः मनुष्यवन्न व्यवहरन्ति। तदा विपिनपालः भणति यत् शिक्षाव्यवस्थायां ज्ञानव्यवस्था नास्त्येव। ततः क्षुदिरामस्य प्रवेशो रङ्गमञ्चे। क्षुदिरामस्य परिचयं लब्ध्वा देशमातुः शङ्खलत्वमोचनाय जीवननाशो भवितुमर्हेदिति अरविन्दमतम्। परं क्षुदिरामः सदुत्तरयति

[८२२]अमरवीरवृत्तान्तम् (द्वितीयाङ्कः, प्रथमदृश्यम्, श्लोकः – २५)।
[८२३]तत्रैव (२९-३०)।

देशमातुर्मुक्तये यदि जीवनत्यागोऽनिवार्यश्चेद् तद्वरम्। तत्र दुःखलवोऽपि नास्ति।

२.ज. वङ्गकीर्तिविधानम्[८२४]

नित्यानन्दस्य पञ्चाङ्कविशिष्टं नाटकं 'वङ्गकीर्तिविधानम्' राजनीतिज्ञस्य पश्चिमवङ्गस्य नवरूपककृद्रूपेण प्रख्यातस्य विधानचन्द्ररायस्य जीवनाश्रितम्। नाटकस्यास्य पञ्चाङ्कं पुनः दशदृश्यैर्विभक्तम्। इह नाटके एकोनैकशतं श्लोकाः विद्यन्ते। जन्मभूमेः स्तुतिपरकेण श्लोकेन नाट्यं प्रारभते नाट्यकारो नित्यानन्दोऽत्र –

"या जन्मभूमिः सततं दयार्द्रा
नानोपचारैः क्षितिवारिरूपा।
शस्यादिमूर्तिर्हि विराजमाना
सा पातु युष्मान् बहुकीर्तिमग्ना"[८२५]॥

नाटकस्य प्रतिच्छत्रं ध्वन्यते विधानचन्द्रस्य देशमातृकां प्रति अपारो भक्तिभावः। वस्तुतः, भारतस्य स्वाधीनतादिवसस्य पालनावसरे नाटकमिदं प्रस्तुतम्। नाटकनायकस्य विधानचन्द्रस्य स्वदेशप्रेम सावलीलभङ्ग्या समभिद्योतितम् –

"जननीवरपुत्रो यः सकलेऽस्मिन् समीहते।
जननीं परिहायात्र कथं वा स्थातुमर्हति"[८२६]॥

नाटकस्य प्रथमाङ्के द्विशतं वत्सरान् यावत् पराधीनतायाः ग्लानितो मुक्तिलाभः, जवाहरलालनेहेरुवर्यस्य प्रधानमन्त्रिपदप्राप्तिसंवादं प्राप्य विधानचन्द्रस्य स्वदेशे प्रत्यावर्तनाग्रहश्चेति वर्णितौ। द्वितीयाङ्के वङ्गस्य राज्यपालत्वेन केन्द्रियमन्त्रित्वेन च दायित्वग्रहणाय आमन्त्रणं प्राप्यापि विधानचन्द्ररायस्तत् प्रत्याख्यातवान् – 'विधानचन्द्ररायेण राज्यपालपदं कथं स्वीक्रियते न ग्रहीतुं न बोद्धुं पार्य्यते मया'[८२७]। तृतीयाङ्के पश्चिमवङ्गस्य मुख्यमन्त्रिपदं स्वीकृत्य समस्यासंकुलस्य वङ्गस्य नवनिर्माणाय यतितवान् सः। तदा पश्चिमवङ्गे उद्वास्तुसमस्यायाः समाधानम्[८२८], परिवहनसंस्थाप्रतिष्ठया साधारणानां कृते जीविकाव्यवस्था[८२९], भूमिहीनानां निमित्तं भूमिप्रदानम्[८३०], शिक्षाव्यवस्थासंस्कारे विशेषेण संस्कृतस्य सम्मानरक्षणे संस्कृतविद्यालयादिस्थापनम्[८३१], राज्ये चिकित्साव्यवस्थायामुन्नतिः[८३२] चेति दक्षप्रशासकत्वेन विधानचन्द्रस्य बहुमुखिन्याः प्रतिभायाः परिचयो लभ्यते नाटकेऽस्मिन्। चतुर्थेऽङ्के मानवानामुन्नतये संस्कृतशिक्षायाः प्रसाराय नवद्वीपे संस्कृतमहाविद्यालयं प्रारब्धवान्। संस्कृतविश्वविद्यालयेन सममन्यविश्वविद्यालयानां स्थापनार्थं प्रायतत सः।

पञ्चमाङ्कस्य प्रथमे दृश्ये श्रीविधानरायस्य वलिष्ठनेतृत्वेन प्रशासकरूपेण च कार्याणि दृष्ट्वा प्रधानमन्त्री जवाहरनेहेरुः सुतरां प्रभावितः सन्तुष्टश्चासीत्– 'समस्याजर्जरीभूतो वङ्गदेशोऽद्य...भवता दक्षप्रशासनेन समस्याजर्जरितं राज्यमुन्नतिशिखरे आरोहति'। शेषाङ्के करुणरसात्मकमन्तिमं दृश्यं – यत्र द्वयोर्नागरिकयोः कथोपकथनमुपस्थापितम्, तच्च प्रशंसार्हम्। चान्तिमे भरतवाक्येन नाट्यकृता परमपूज्यं पितरं निकषा प्रार्थितम् –

"प्रपान्तु सर्वान् मनुजांश्च लोकाः
साम्येन बोधेन च पूर्णचित्ताः।
समग्रविश्वस्य शुभकारिणश्च
भवन्तु सर्वेऽत्र विधानदृष्ट्वा"[८३३]॥

विषयदृशा नाट्यतत्त्वदृष्ट्या च नित्यानन्दस्य नाटकेषु वङ्गकीर्तिविधानं सर्वोत्तमम् इति मे मतिः।

[८२४]वङ्गकीर्तिविधानम् (जाह्नवी, १९८७, सप्तदशवर्षः)।
[८२५]तत्रैव (श्लोकः – १, पृ. – ४६)।
[८२६]तत्रैव (१।२५)।
[८२७]तत्रैव (द्वितीयाङ्कः, पृ. – १८)।
[८२८]'वासेन हीनाः गतजीविकाश्च' (वङ्गकीर्तिविधानम् – तृतीयाङ्कः, पृ. – २३)।

[८२९]'परिवहनव्यवस्थां परिगृह्य राष्ट्रियपरिवहनव्यवस्थां संस्थाप्य तत्रैव जीविकाव्यवस्थां करोति एतेषाम्' (तृतीयाङ्कः, पृ. – २३)।
[८३०]'दरिद्रा मनुजा यथा प्राप्नुयुः भूमिमत्रैव तथा प्रयतते यदा'। (तृतीयाङ्कः, पृ. – २४)।
[८३१]'नवद्वीपादौ राष्ट्रियसंस्कृतमहाविद्यालयस्थापनव्यवस्थापि मया कृता, पश्चिमवङ्गे कश्चित् संस्कृतविश्वविद्यालयोऽवश्यं स्थापनीयः'।
[८३२]'सेवाबुद्ध्या करोत्येष चिकित्सां नियमेन हि' (तृतीयाङ्कः)।
[८३३]भरतवाक्यम् (९८, पृ. – ६५)।

२.झ. कालिदासः[८३४]

कालिदासस्य प्रसिद्धां किंवदन्तीमुपजीव्य अष्टभिर्दृश्यैर्विभक्तं रूपकमिदम्। विषयदिशैतिह्य-आधुनिकयोः मेलबन्धनमस्माभिः लक्ष्यते नाट्येऽस्मिन्। रूपकमिदं हावडासंस्कृतसाहित्यसमाजेन १९५६ ईशवीयाब्दे प्राकाशि। मूर्खकालिदासस्य उक्तिषु मूर्खत्वपरकं प्राकृतं तथा च कविकालिदासस्य वचःसु बुद्धिदीप्तां संस्कृतभाषां प्रयुङ्क्ते नाट्यकृन्नित्यानन्दो रोचिष्णुतया। प्रसङ्गतः कालिदास-विद्यावत्योः कथोपकथने नाट्यकृता सचेतनतया नाट्यशैली व्यवहृता यथा सहृदयेषु मनोरञ्जकं भवेत्।

२.ञ. मातृहननम्

नित्यानन्देन विरचितं पञ्चाङ्केषु विभाजितं विद्रूपात्मकनाटकं तावद् 'मातृहननम्' (१९८७)। अत्र समाजस्य आपातदृष्ट्या हितकारिणा तथा नामसर्वस्वनेतृत्वेनाभिहितानां चरित्रमुन्मोचितं नाट्यकृता। एते नेतारः वैदेशिकपदं प्रति मोहग्रस्ताः –

"जानन्ति नैते न हि किञ्चिदेव विज्ञानशास्त्रन्त्विति हं तथैव।
भूगोलबोधो गणिते न बोधः चिकित्सने चैव न कश्चित्"[८३५]॥

वस्तुतः, मातुर्नाम संस्कृतजनन्याः हननम् इति मातृहननम् इत्यर्थः। अर्थात् विद्यालयस्य साधारणपाठ्यक्रमतः संस्कृतस्यापसारणम्, संस्कृतचतुष्पाठीनां निर्मूलनञ्च कृत्वा वास्तविकतया संस्कृतशिक्षाया उन्नतिच्छलेन समूलं संस्कृतस्य लोपो हि तेषां लक्ष्यमिति नाटकस्य मूलमुपजीव्यम्। तथाहि संस्कृतसेवकरूपेण किंकरः सक्रोधं प्राह –

"विताड्यते जनन्यद्य स्वपुत्रैर्निजभूमितः।
दुःखं लज्जा च घृणा वा किमस्माद् भविता क्षितौ"[८३६]॥

२.ट. जननीश्राद्धवासरम्

संस्कृतरक्षायै नाट्यकृतोऽत्यादृतो भावः – नाटकस्य मूलं वस्तु। शिक्षाव्यवस्थातः

[८३४]हावडा-संस्कृत-साहित्य-समाजेन प्रकाशितम् १९५६ ईशवीयाब्दे।
[८३५]आधुनिक संस्कृत साहित्य (१९१०-२०१०), पृ. – १५७।
[८३६]तत्रैव।

संस्कृतपाठस्य लोपः कृतः संस्कृतविद्वेषिभिः। मातुः मृत्यौ तस्याः सन्तानाः प्रतिवत्सरं सकृत् श्राद्धानुष्ठानं कृत्वा ब्राह्मणभोजन-दक्षिणादानादिकं कुर्वन्तीति पारम्परिकी रीतिः। संस्कृतपण्डितेभ्यः सामान्यवृत्तिप्रदानं नाट्यकृता व्यङ्ग-विद्रूपात्मकभङ्ग्या ब्राह्मणभोजन-दक्षिणादानादिरूपेण उपवर्णितम्। नाटकस्य भरतवाक्ये नाट्यकृतोऽनुनयस्तावत् – संस्कृतरक्षायै सर्व एकीभवन्तु, अन्यथा संस्कृतस्य चिराय विनष्टिरनिवार्येति।

२.ठ. ध्रुवप्रसादनम्

पौराणिककथामाश्रित्य सप्ताङ्कविशिष्टं चतुर्दशदृश्यैर्विभक्तं 'ध्रुवप्रसादन'मिति रूपकं नित्यानन्देन व्यलेखि। पौराणिककथानकमुपजीव्य विरच्यापि कथावस्तुनि किञ्चित् परिवर्तनं संसाध्य संस्कृत्य तथा च नूतनाङ्गिकेन शैल्या मूलतो विष्णोः स्तुतिः विहिता। देशसमस्यानां समाधानार्थं नाट्यकारो भगवतः सविधे प्रार्थयन्नाह –

"अन्नाभावाद् जलाभावाद् बहुशश्च विपर्ययात्।
क्लिश्यन्ते भारतीयाश्च सर्वता धरणीतले॥
प्रतीकाराय तस्याद्य नाश्रीयते जगत्प्रभुः।
स्वशक्त्यैव प्रतीकार इष्यते मानवैः सदा"[८३७]॥

नाटकस्यास्य प्रथमाङ्कनाम 'सुनीतिनिर्वासन'मिति, द्वितीयाङ्कस्तावत् 'मृगयानिर्याणम्', तृतीयाङ्कस्य शिरोनाम 'सुनीतिसाक्षादि'ति, चतुर्थाङ्कः 'पितृदर्शनम्', पञ्चमाङ्कनाम 'तपस्यार्थं ध्रुवनिर्गमनम्', षष्ठाङ्कनाम 'नारायणनिर्देशः', चान्तिमाङ्कस्य नाम 'भगवद्दर्शनमिति' चेत्यभिधीयन्ते। अन्तिमेऽङ्के ध्रुवस्य कठिनं तपश्चरणं प्रसङ्गतो मनसि समायाति कुमारो पार्वत्यास्तपःसाधनं वर्णयति कवयिता। अन्ततो गत्वा ध्रुवो नारदसकाशान् मन्त्रोपदेशान् प्राप्य भगवद्दर्शनाय प्रस्तौति –

"नवजलधरकान्तिः पद्मनेत्रः स्मितास्य
श्रुतिमितकरयुक्तः पीतवासा द्विनेत्रः।
अभयवरद एष क्षेमदाता वरेण्यः

[८३७]ध्रुवप्रसादनम्।

सकलभुवनभर्ता सौम्यमूर्तिर्दयालुः"[८३८]॥

अन्तिमे मातुः पितुश्च कलुषं दूरीकृत्य भगवद्दर्शनं प्राप्य राज्यशासनं कृत्वा ध्रुवपदं प्राप ध्रुव इति कृत्वा रूपकमिदं समाप्तिं गतम्। नाट्यस्यास्य नामकर्णमन्वर्थसंज्ञकम्।

२.ड. विषयकांक्षणम्

साम्प्रतिकसमस्याधारितं कथानकमाश्रित्य नाट्यकर्तुः नित्यानन्दस्य पञ्चाङ्कसमन्वितं दशदृश्यान्वितञ्च रूपकं तावत् 'विषयकांक्षणम्'। नाटकस्य वस्तु एवम् – गवेशो नाम कश्चन स्वार्थान्वेषी जनः पल्लीमङ्गलसमितेः सभापतिं हरेन्द्रं कपटाचारेण सन्तुष्य समितेः सर्वं धनसम्पत्त्यादिकम् अपहर्तुमिष्टवान्। किन्तु गवेशस्य प्रवञ्चनां ज्ञात्वा सर्वे सरलाः ग्रामवास्तव्याः समितिं त्यक्तवन्तः। गवेशस्तदा विचारालयस्य साहाय्येन अवशिष्टान् जनान् विताडयितुं तथा च सर्वमर्थजातमात्मीकृत्य सानन्दं स्थातुमिच्छति। कूटबुद्ध्या अर्थव्ययाच्च नायकः सर्वमात्मसात्कृतवान् –

"अन्यायं न्यायमेवेह वर्तते ननु सम्प्रति।
अर्थो यस्यास्ति पर्याप्तो न्यायवान् पुरुषः स हि"[८३९]॥

२.ढ. देशबन्धुप्रकीर्तनम्

नित्यानन्देन विरचितमपरमेकं रूपकं तावत् 'देशबन्धुप्रकीर्तन'मिति। नाटकस्यास्याङ्कान्तर्गतेषु दृश्येषु विधृतमासीद् देशबन्धोश्चित्तरञ्जनदासस्य व्यक्तिगतजीवनस्य गुरुत्वपूर्णं पर्व। स्वाधीनतासंग्रामे भारतीयानां प्रत्यहम् आत्मवलिदानं दर्शं दर्शं नित्यानन्दोऽपि दुःखेन रोरुद्यते। तस्मात् तस्य लेखनीतो निर्गच्छन्ति 'देशबन्धुप्रकीर्तना'दिवद् ऐतिहासिकनाटकानि।

२.ण. सुभाषविजयम्

सुभाषचन्द्रस्य संग्राममयजीवनमाधारीकृत्य नित्यानन्देन सुभाषचन्द्रस्य वीरगीथा समभिद्योतिता। सुभाषचन्द्रो न केवलं पश्चिमवङ्गस्य, परं कृत्स्नस्य भारतवर्षस्य स्वाधीनताप्राप्त्यै जनप्रियं तथा गुरुत्वपूर्णं चरित्रं वरीवर्ति। तस्य छात्र-राजनैतिकयोर्जीवनयोः तात्पर्यवहानां वृत्तान्तानां नाट्यरूपमात्रमेतत्। प्रसङ्गतः उल्लेख्यं

[८३८]ध्रुवप्रसादनम् (७।११२)।
[८३९]तत्रैव, पृ. – १०२।

यत् स्वाधीनतासंग्रामः, कारावरणम्, मणिपुरे आजाह-हिन्द-फौजसंघटनमाध्यमेन युद्धयात्रा चेत्यादिविषयाः नाट्योचितभङ्ग्या रोचिष्णुतया च नित्यानन्देनोपवर्णिताः। १९८६ ईशवीयाब्दे नाटकस्यास्य रचना जाता।

श्रीहट्टस्य सुशीलचन्द्रसेनस्य देशाय आत्मत्यागो हि 'सुशीलविजय'मिति रूपकस्य विषयमूलम्।

२.त. बालेश्वरमहायुद्धम्

बालासोरनामके स्थाने वुड़िवालामनद्यास्तीरे यतीन्द्रनाथमुखोपाध्यायेन समं टिग्राटस्य संघर्षकाहिनी हि मूलमुपजीव्यमस्य नाटकस्य। १९८८ ईशवीयाब्दे नित्यानन्देन नाटकमिदम् ऐतिहासिकं विरचितम्।

२.थ. आत्मनिवेदनम्

स्वाधीनतासंग्रामे दत्तचित्तः प्रफुल्लचाकी आङ्गलसर्वकारेण धृत इति कृत्वा स स्वयमेव आत्महननं चकार इति सत्यमैतिहासिकं वृत्तमाधारीकृत्य नित्यानन्देन रचितमिदं रूपकम्।

२.द. देशशत्रुनिपातनम्

विप्लविनः यदा अवगतवन्तो यत् विश्वासघातको नरेनगोँसाइ भारतीयानां गुप्ततथ्यादिकम् आङ्गलेभ्यः प्रयच्छति स्म, तदा कानाइलाल-सत्येनौ द्वौ विप्लविनौ तं जघ्नतुः। परवर्तिकाले कानाइलालस्य मृत्युदण्डोऽभूदिति भारतीयानां निःस्वार्थपरवृत्तान्तमाधारीकृत्य नित्यानन्देन ग्रथितं 'देशशत्रुनिपातन'मिति। देशशत्रोः नरेनस्य निपातनमिति केन्द्रीयं वस्तु नाटकस्यास्य।

२.ध. आनन्दमठम्

नित्यानन्देन प्रायेण षोडश नाटकान्यनूदितानि। तेषु अन्यतमं तावत् साहित्यसम्राजो वङ्किमचन्द्रचट्टोपाध्यायस्य देशभक्तिपूर्णस्योपन्यासस्य आनन्दमठस्य विषयमुपजीव्य षडङ्केषु द्वादशदृश्येषु च विभक्तम् 'आनन्दमठ'मिति। नान्दीश्लोके नाट्यकृता देशमातृकां प्रति तदीया विनम्रा भक्तिर्विनिवेदिता –

"या जन्मभूमिर्नियतं प्रपात्री तदाश्रितानां हि नृणां प्रपूज्या।

सदाश्रया सा सततं प्रयायात् खाद्यान्नतोयैः वसनैः क्षितौ वः"[८४०]॥

सत्यानन्द-भवानन्द-जीवानन्द-शान्ति-कल्याणी-महेन्द्राणां चरित्रेषु नाट्यकृन्मूलानुसारं त्याग-प्रेम-सेवादिगुणान् आरोपितवान्। अनुवादरूपमिदं नाटकं पाठं पाठं मनसि एतदेव मन्यते यन्मूलस्य सर्वे भावाः नाट्यकृता नात्र समाहिताः, परं देशप्रेम्णश्चित्रणे नाट्यमिदं मूलानुसारि इति वक्तुमलम्।

अस्मिन् रूपके नित्यानन्दस्य देशभक्तिः सुतरामेव अभिव्यक्तेति दृश्यते। तस्मात् मातृमुक्तेः चित्रमत्राङ्कितम्। नाट्यकारश्चान्तिमे आङ्गलशासनान्मुक्तिं प्रार्थयते –

"हताश्च यवना दुष्टाः एकं कार्यं प्रसाधितम्।
एकञ्च शृङ्खलं मुक्तं जनन्याः करपादयोः॥
द्वितीयं शृङ्खलं मुक्तं कदा मातुर्भविष्यति।
म्लेच्छानां कबलान्मुक्तिर्जनण्या मे कदा भवेत्"[८४१]॥

२.न. रहमतखानवृत्तान्तम्

रवीन्द्रनाथस्य 'काबुलिबाला' इति कथानकमुपजीव्य विरचितं पञ्चाङ्केषु प्रविभक्तमनुवादात्मकं नाटकमिदम्। लघुवाक्यैः कोमलभावोद्दीपकैश्च संवादैः रहमतखानस्य वात्सल्यम् अमलेशस्य महत्त्वञ्च नित्यानन्देनानवद्यभङ्ग्या निरूपिते। इह नाटके नाट्यकृता केवलं दश श्लोकाः संवलिताः। अनुवादेऽस्मिन् नाट्यकृतो भाषाशैली अनवद्या सरला सुखबोध्या चेति। मूलस्रष्टुः भावान् सर्वान् समाहर्तुं न शक्नोति नित्यानन्दः, परं मूलकवेः मूला भावसम्पत्तिः रक्षितात्र।

२.प. गुप्तधनम्

नित्यानन्देन रवीन्द्रकथाः अनूद्य दश नाटकानि प्रकाशितानि। नाटकस्य नायको मृत्युञ्जयो यदा स्वकं लोभातिशयं नियन्त्रयति, तदा स चिन्तामुक्तो भवति। नाटकमिदमनुवादमूलकम्। नाट्यतत्त्वानुसारि भरतवाक्यमत्र लसितम्।

२.फ. सम्पत्तिसमर्पणम्

रवीन्द्रकथाया नाट्यरूपं 'सम्पत्तिसमर्पणम्' इति ह्येतदेकाङ्करूपकं एकादशदृश्यैर्विभाजितम्। विदूषक-सूत्रधारयोः कथोपकथनमत्र उपन्यस्तम्। तदुक्तं नाट्यकृता – 'कृता रवीन्द्रनाथेन या सम्पत्तिसमर्पणम्...आम्, ज्ञातम् एष कुसीदजीवी धनसञ्चयमात्रतत्परः'[८४२]। करुणरसात्मके रूपके नायकस्य यज्ञेश्वरस्य स्वसम्पत्तिरक्षायै कृपणचरित्रं नाट्यकृता सम्यक् चित्रितम्। नाटकस्य भरतवाक्यं तावत् –

"नानादुःखसमकीर्णा स्वार्थपरतयान्विता।
कृपणत्वादिदोषेण मुक्ता भूमिः भवत्यसौ"[८४३]॥

परिशेषे नित्यानन्दरचितानां दृश्यकाव्यानां समीक्ष्यमानेन आचार्येण रमाञ्जनमुखोपाध्यायेन यदुदितं, तदंशमात्रमत्रोल्लिख्यते – "It is interesting to note that *Pandit Nityānanda Smritītīrtha* is not only aware of the fine distinction amongst Wit, Satire and Homour, but after assimilating the characteristic features of these three types of Humour he has implemented them in practices by writings specimens of Wit, Satire and Humour in Sanskrit." कवेरस्य नाटकानि सूक्ष्मेक्षिकया परिशील्य वक्तुमर्हो यत् नाट्यवस्तुषु नूतना शैली, सहजा हृद्या प्रसन्ना च भाषा, संक्षिप्यनाट्यवस्तुप्रस्तुतेः कौशलम्, औत्सुक्यविस्मयादिसंयोजनप्राधान्यं सर्वञ्च संस्कृतसर्जनस्य नवोन्मेषं प्रतिनिदधातीति परिलक्ष्य कस्य चेतो न चमत्कुरुते इति।

[८४०]आनन्दमठम् (नान्दीश्लोकः), पृ. – ६६।
[८४१]तत्रैव (श्लोकः – ८७-८८), पृ. – ८९।

११. गीतिकविः दीपकघोषः

भूमिका

विंशशताब्द्याः संस्कृतसाहित्यगगने ज्योतिष्कायमानेषु विबुधमुख्येषु एकतमस्तत्र भवान् ड० दीपकघोषः। कविरयं १९८२ ईशवीये संवत्सरे जानुयारीमासस्य चतुर्विंशतिदिवसे कलिकातायां सुखरञ्जनघोषस्य प्रफुल्लनलिनीदेव्याश्च पुत्रत्वेन जनिं लेभे। वङ्गेषु संस्कृतमातरं संसेव्य मध्ये मध्ये काव्यादीनि ग्रथयति सः। विद्याभ्यासादिकं

[८४२]सम्पत्तिसमर्पणम्, पृ. – २-३।
[८४३]तत्रैव, पृ. – २६।

समाप्य प्रथमे वयसि कलिकातास्थिते सिटिमहाविद्यालये समारब्धम् अध्यापकपदेनास्य कर्मजीवनम्। ततः परं कलिकाताविश्वविद्यालये पाठनसमये 'रीडार्' तथा अन्तिमे वयसि 'प्रोफेसर्'-पदमपि एतेनालङ्कृतम्। एतेन 'भारतीयदर्शने अभावविमर्शः' इति विषयमवलम्ब्य कलिकाताविश्वविद्यालयतः पि.एइच्.डि. इत्युपाधिः अधिगता। २००० खृष्टाब्दे 'साहित्य-एकादेमी'त्यनेन प्रतिष्ठानेन स पुरष्कृतः। न केवलमयं कश्चन प्रख्यातोऽध्यापकः, अपि तु प्रौढः कविरासीत्। कवेः सहजा सारस्वता कारयित्री प्रतिभा आसीत्। अनया प्रतिभया अस्य कवेः रचनाप्रपञ्चः एवम् –

क). विलापपञ्जिका

ख). राजनीतिलीलामृतम्

ग). संस्कृतसंगीतम्

घ). अभावविमर्शः

क). विलापविपञ्जिका[८४४]

खण्डकाव्येऽस्मिन् कविना दीपकघोषेण विप्रलम्भशृङ्गारभूयिष्ठाः पञ्चविलापाः रचिताः। ग्रन्थस्य सूक्ष्मेक्षिकया पर्यालोचनाज्ज्ञायते यत् कालिदासस्य मेघदूतस्य प्रभावभावितोऽयं मौलिकग्रन्थः। इह ग्रन्थे उपायनीकृता विलापास्तावत् अ). मेघविलापः आ). सुरवाग्विलापः इ). अमरविलापः ई). उज्जयिनीविलापः उ). अलकाविलापश्चेति। अत्रेदमुल्लेखार्हं यत् स्वतन्त्रा विलापकाव्यपरम्परा प्राचीने अलंकारसाहित्ये प्रायेण नालक्षि। किन्तु अर्वाचीने काले कविभिः युगमानसिकतामनुभूय भूयांसि विलापकाव्यानि ग्रथितानीति महदानन्दप्रदं कर्मेति मन्ये। आदौ ग्रन्थोऽयं १९८९ ईशवीये वर्षे काव्यसंकलनात्मकेन प्रकाशितोऽवर्तत। परं २००१ ईशवीये वर्षे आङ्गलानुवादयुक्ततया संस्कृतपुस्तकभाण्डारात् प्रकाशितोऽयं ग्रन्थः। 'विलापपञ्चिके'ति काव्यस्य प्रथमसंस्करणं कलिकातास्थितस्य संस्कृतपुस्तकभाण्डारात् एकोननवत्यधिकोनविंशतितमे (१९८९) खृष्टाब्दे प्रकाशितम्। प्रत्येकं श्लोकस्य आङ्गलभाषयानुवादो विहितो जयदेवगाङ्गुलिमहोदयेन। संस्करणस्यास्यैव आमुखमालिखितं दिल्ली-

[८४४] विलापपञ्जिका, संस्कृतपुस्तकभाण्डार (प्रका०), कलिकाता, २००१।

विश्वविद्यालयस्य प्रख्यातप्राचार्यप्रवरैः सत्यव्रतशास्त्रिवर्यैः। किञ्च, भूमिकारूपेण स्वकमतमुपस्थापितं कलिकाताविश्वविद्यालयस्य विश्वविश्रुतेन प्राध्यापकेन सत्यरञ्जनवन्द्योपाध्यायमहाभागेन।

'मेघविलापः' इत्यत्र मन्दाक्रान्ताछन्दोभिः कवयिता मेघदूते समुपवर्णितं सुखसागरमुपालम्भ्य स्वदैन्यदशां विवृणोति असाधारणवाङ्माध्यमेन। त्रयोदशश्लोकात्मको 'मेघविलापो' मेघदूतकाव्यस्य व्यङ्गात्मकानुकारः।

मेघदूते दूतरूपेणालकां प्रति गमनशीलस्य मेघस्य गमनपथे उज्जयिनीनगर्यां समृद्धिरवलोक्यते। सन्ध्याकाले ज्योत्स्नाया विद्यमानत्वाद्यक्षनगरी समेषां सकाशे सुप्रिया इव दृश्यते। यक्षनगर्यां लक्ष्म्या विद्यमानत्वान्नित्यसुखमासीत्। किन्तु अत्र दीपकघोषेण कविगृहे सुखाभावात्कवेर्हाहाकारः वर्णितः। ततः परं कवेर्दुःखदारिद्र्यवर्णनम् –

"अत्रास्त्येका बलिमयजरा कुत्सितं शीर्णदेहा
छिन्नं भिन्नं भवति हृदयं तीक्ष्णकण्ठेन यस्याः।
नित्यो रोगश्चलति भवने तद्गताश्चार्तनादा
नित्याभावं सततकलहं मद्गृहं नित्यशोकम्"[८४५]॥

प्रातः समारभ्य रात्रौ शयनपर्यन्तं सर्वे तत्रैव नित्यं कलाहयन्तो। येन कविगृहे सततमेव शोकच्छाया विद्यमाना संदृश्यते। एतेन गम्यते यत् कविगृहं सदैव ईश्वराभिशापेन सततं लग्नम्। येन कवेर्मनः शोकपूर्णं जातम्। भययुक्तमज्ञानं कविमनसि सर्वदैव विद्यमानं दृश्यते। अज्ञानकारणात् कवेर्जीवने नूनमपि सुखस्पर्शो नास्ति। त्रासादेव कवेर्नेत्राभ्यां दुःखाश्रूणि निर्गच्छन्ति, न कदापि आनन्दाश्रूणि। अग्निर्यथा क्रमशः सर्वं भस्मीकरोति, तथैव सन्तापः कवेश्चित्तं सदा दहति। यतो मनसोऽसमीचीनत्वे सति तेन शरीरस्याप्यसमीचीनत्वं स्पष्टमेव संदृश्यते। आदावेव कवेः सम्मुखे तद्भार्या नित्यं हसन्ती आसीत्। किन्तु अधुना गृहे अर्थाभावात् क्षुधापीडितादिना कष्टेन तस्याः सुखमवलुप्तम्। साधारणतया आनन्दपूर्णे वसन्तकाले सर्वेषां मनसि स्वत एव प्रेम स्फुरति। किन्तु अधुना न तथा।

गेहस्यात्यन्तदूरवस्थादृष्ट्या गेहो भूमौ पतितः स्यादिति चिन्तयतो कवेर्हृदयं

[८४५] विलापपञ्चिका – ३।

सर्वदैवाशान्तं भयग्रस्तञ्च तिष्ठति। वृष्ट्या दूरवस्थापूर्णं वासायोग्यञ्च गृहं कविः द्रष्टुमपि नेच्छति। यथा –

"वर्षाकाले भवति भवनं भीतिदं मग्नकण्ठं
सद्यस्त्यक्त्वा ससकलजनं गम्यते क्वापि दूरम्।
वर्षान्ते तत्प्रियतमगृहं व्याकुलं किं पुनर्वा
वर्षाघर्षैर्विमथिततनुं वीक्षितुं मे निवृत्तिः"॥[८४६]

कवेर्भार्या कवये क्रुध्यति। कवेः गेहे भार्या सर्वदा क्रन्दनरता। अपि च, जीर्णवस्त्रपरिहिता सा सम्यक्तया न शेते। अतः तस्याः शरीरं विशीर्णञ्च म्लानमासीत्। गभीरशोकेन तया भण्यते यत् – हा हा स्वामिन्! मम यौवनं जीवनञ्च व्यर्थं सञ्जातम्, अवश्यमेव मया पूर्वस्मिन् जन्मनि महत्पापं विहितम् इति।

गेहस्य दुर्दशावशात्तस्याः स्वप्नः ध्वस्तो जातः। कविभार्याया आशा चूर्णा। क्रोधवशात् सा कविं कथयति यत् – भोः विफल पुरुष! धिक् धिक् त्वाम्, तव पतित्वमपि व्यर्थमेव। कुतस्त्वया मृत्युसागरसमानेऽस्मिन् गेहे अहमानीता। इतः परं कविः स्वभाषया स्वदुःखं प्रकटयति यत् –

"लज्जाभीत्या त्ववनतमुखं केवलञ्चिन्तयामि
किम्पापान्मे सुखमपगतं जीवने दुःखमेकम्।
किंशापाद् वा हृदयमथिताद् जीवनात् सर्वदास्माद्
आकण्ठं मे गरनिगरणं नामृतास्वादलाभः"[८४७]॥

यक्षप्रियापि भगवतः सकाशे प्रार्थयति यद्यक्षः शीघ्रमेव तस्याः समीपम् आगच्छतु। शापावसाने यक्षः मनसा इष्टान् सर्वान् विषयान् प्राप्नुयात्। किन्तु न तथा कवेः जीवने सम्भवेत्। स्वस्त्रीपुत्रादयोऽपि कविं तिरस्कृतवन्तः। यक्षस्य यथा सौभाग्यमासीन्न तथा कवेः। कविनेष्यते यद्भार्यया धिक्कृतं स्वभाग्यं शापान्मुक्तं विगतपापं सद्भगवतश्चरणकमलयोराश्रयेदिति।

'सुरवाग्विलापे' द्वात्रिंशच्छलोकात्मके संस्कृतशिक्षायाः साम्प्रतिकी दुरवस्था

[८४६]विलापपञ्चिका, पृ. – ४।
[८४७]तत्रैव (मेघविलापम् – १०)।

चित्तद्रवीभावमय्या रचनारीत्या वर्णिता विद्यते। प्रसङ्गतः संस्कृतज्ञानाम् औदासीन्यं प्रतिपदमत्र नयनयोरापततीति कृत्वा कविना व्यङ्ग्यविधया शैल्या तदपि प्रपञ्चितमिह। यथा –

"शपामि सत्येन ममापमानेन सतीव विच्छिन्नतनुर्भवेद्धि।
सहस्रधा भारतवर्षभूमिरनेकभाषेति न संशयोऽत्र"॥[८४८]

इदानीन्तने काले संस्कृतभाषा मृता इति जनाः कथयन्ति। अतः सा आत्मनि खेदमनुभवति। वस्तुतः काचित् भाषा मृता जीविता वा न भवितुमर्हति। लोके प्रचारबाहूल्याभावाद् इयं मृता इति जनाश्चिन्तयन्ति। परन्तु स्वार्थनिष्पादनपराः धूर्ताः माम् अन्यथा व्याख्यातवन्तः मृतभाषात्वेन च प्रतिपादितवन्तः इति सुरभारत्या अनुतापः। शिक्षितानां समीप एव मातृसमायाः संस्कृतभाषाया अवमाननं निपीडनञ्च कुर्वन्ति जनाः। तद्दृष्ट्वापि तत्पुत्राणां विकारो नास्तीत्यत आत्मनि खेदम् अनुभवति सुरवाक्। द्रोपदीव स्वस्याः गतिं चिन्तयति सुरवाक् –

"दुःशासनैस्तैर्नवबङ्गकारैः पुनःपुनर्वङ्गभुवां नृशंसम्।
केशेषु धृत्वा पदताडितास्मि नग्नीकृता पाण्डववल्लभेव"[८४९]॥

'अमरविलापम्' इत्यत्र कविना चतुर्दशश्लोकपूरितेन उज्जयिण्या अदूरवर्तिनं दुर्गमेकमाधारीकृत्य प्रसिद्धयोः गायकदम्पत्योः वज्वहादुरखाँ-रूपमत्योः जनश्रुतिमूलकं करुणं प्रेमोपाख्यानमनवद्यभङ्ग्या विषयीकृतम्।

रूपमत्याः संगीतश्रवणेन सर्व एव मोहिताः भवन्ति स्म। संगीतं श्रावं श्रावं कवेर्मनसि प्रश्नः समुदेति – माण्डुनगरीतः समुत्थितो ध्वनिः कस्याः, अयं स्वरः कस्य किञ्चित् पुरुषस्य यन्त्रध्वनितः समुत्थितः, उत कस्याश्चित् किन्नर्याः गीतम्, अथवा इयम् अमृतनिष्यन्दिनी वाणी स्वर्गात् समागता। ततः आवेगद्रवीभूतात् कविकण्ठात् स्वगतं व्याजहार – माण्डुनगरीस्थितमिदं गीतं पतिवियोगिन्याः रूपमत्याः। बहिश्शत्रुणा हतः रूपमतीभर्ता वज-बहादुरखाँन्। एतेनाकालवैधव्यपीडिता रूपमती। प्रियजनविच्छेदः किल मर्मस्पर्शी। तदुदितम् –

[८४८]विलापपञ्चिका, पृ. – १८।
[८४९]सुरवाग्विलापः (१८)।

"चिरं वियुक्ता पतिवक्षसो या पतिप्रिया रूपमती द्विषद्भिः।
माण्डोर्महीध्रस्य शिलासु मूर्त्ता चिरामरं गीतमिदं हि तस्याः"[८५०]॥

रूपमत्याः सौभाग्यसूर्योऽस्तमितः। निशान्धकारे यथा सर्वं समाच्छन्नं भवति तथैव रूपमतीभाग्यं सर्वासु दिक्षु दुर्भाग्यपूर्णम्। कविश्च वर्णयति –

"पुनश्च नैराश्यघनान्धकारे निमज्जयन् नाधविहीननदीनाम्।
दिनावसानेऽथ दिनाधिनाथः संगन्तुकामोऽस्तमितः प्रियां स्वाम्"[८५१]॥

'उज्जयिनीविलापे' कविः दीपकघोषः त्रिभिः श्लोकैः उज्जयिण्याः विगतवैभवं संस्मरति –

"स्वप्ने बभूवोज्जयिनी प्रिया मे मनोमयी प्रेममयी मनोज्ञा।
शश्वतस्फुरद्यौवनगर्वमत्ता महाकवीनां चिरकामनीया"॥[८५२]

कविनात्र स्वप्ने उज्जयिनी प्रियारूपेण कल्पिता। कवेः प्रियारूपिणी उज्जयिनी मनोमोहिनी, प्रेममयी मनोज्ञा च। सा प्रिया सर्वतोभावेन प्रेम्णा प्रपूर्णा चालौकिकी सौन्दर्यमयी। परं कविः अधुना स्वहृदि विद्यमानं खेदभावं व्यक्तिकरोति –

"सा कुक्षणे हा समदृश्यतैकदा निष्प्रेमभूमौ व्यवहारलोके।
स्वप्नोज्ज्वला सोज्जयिनी सुतन्वी क्रमेण वैवर्ण्यमयाद् भयादथ"[८५३]॥

इदानीमुज्जयिन्याः तादृशसौन्दर्यमयत्वाभावात् कविः हृदा अतीव दुःखसंभिन्नो जातः। एतस्मात् कारणात् कविना राद्धान्तोऽयमङ्गीकृतो यत् स्वकपोलकल्पितं वस्तु कदापि स्वप्ने नान्वषणीयम् – 'स्वप्नप्रियं वस्तु कदापि लोके नान्वेषणीयं परिशेषशोकतः'[८५४]।

'अलकाविलापे' शापान्ते अलकां प्रत्यागत्य स्वगृहद्वारे प्रत्युत्तरमप्राप्य दण्डायमानस्य यक्षस्य मनःस्थितिं विरहोत्कण्ठां प्रेमभावनाञ्च षड्विंशतिभिः वियोगिनीभिः सम्यग् निरूप्य कविना तत्तु शुन्यगृहमिति प्रत्यपादि। तद्यथा –

[८५०]विलापपञ्जिका (अमरविलापम् – ५)।
[८५१]तत्रैव (११)।
[८५२]तत्रैव, पृ. – २६।
[८५३]तत्रैव (उज्जयिनीविलापम् – २)।
[८५४]तत्रैव (उज्जयिनीविलापम् – ३)।

"नवपल्लवराजिरञ्जित उपभोगसुयोग्यतां गतः।
कुसुमैः कुसुमैर्नवोद्गतैः समुपागतयौवनोऽधुना"॥[८५५]

सर्वमशुभं कृष्णवायसं शकुनञ्च दृष्ट्वा ऊलूकस्य कर्कशशब्दं श्रुत्वा च यक्षस्य मनोऽपि दूयते। अहं पुनरागतोऽस्मि इत्येवं पुनरयं विललाप। तथाहि उदितं यक्षेण –

"सव्यापारमहनि न तथा पीडयेन्मद्वियोगः।
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते"[८५६]॥

बहुक्षणं यावत् आहूयापि प्रियायाः प्रत्युत्तरं न प्राप्य खिन्नमनस्को यक्षकः चिन्तयति यत् प्रासादमेनं परित्यज्य प्रिया अन्यत्र गता एव। स तिष्ठति चेद्बहिः अवश्यमेव आगच्छति –

"प्रियया मम शून्यमिदं हि गृहमधुनाधिवसन्ति पिशाचगणाः।
इति यक्ष इतश्चिरमेव यया अलकां परिहाय विदीर्णमनाः"[८५७]॥

प्रियाशून्यं भवनमिदं तत्समीपे निशायां पिशाचाश्रयस्थलमिव आभाति। अतः तत्र तस्य निवासोऽसम्भवः। एवं बहुधा विचिन्त्य प्रियाविरहेण भग्नहृदयः सन् चिरादेवालकापुरीं परित्यज्य जगाम। साधारणतया संदृश्यते अन्ततो गत्वा उभयोर्मेलनम्, परं मेघविलापे अन्तिमे नायक-नायिकयोः मेलनं कविना न दर्शितम्।

ख). राजनीतिलीलामृतम्[८५८]

'राजनीतिलीलामृतम्' इति काव्यं व्यरचि तत्र भवता दीपकघोषेण विरचितम्। राजनीतिलीलामृतनामकग्रन्थः राष्ट्रियसंस्कृतसंस्थानतः १९९९ संवत्सरे प्रकाशितोऽस्ति। सप्तपञ्चाशदधिकं चतुःशतकमिति संख्यकश्लोकसमन्वितं गीतिकाव्यमिदम्। साम्प्रतिके राजनीतेः घृण्यं स्वरूपम् अत्र सोपहासभङ्ग्या समुपस्थापितं कविना। काव्यमिदम् आबहोः कालादारभ्य देशविभाजनं, शरणार्थिसमस्यां, धर्मघटसमस्यां, राजनेतॄणामधःपतनं, चतुर्वर्गफलप्राप्तये राजनीतिदेवीसेवां, नरपशुयागयोजनादिकं च विषयीकरोति। आधुनिककाव्यनभसि भास्वरं शोभमानेन

[८५५]विलापपञ्चिका, पृ. –३२।
[८५६]तत्रैव (अलकाविलापः – १०)।
[८५७]तत्रैव (अलकाविलापः – २३)।
[८५८]राजनीतिलीलामृतम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, १९९९।

दीपकघोषेण तदीये 'राजनीतिलीलामृतम्' इत्याख्ये ग्रन्थे राजनीतिः देवीत्वेन प्रपूजिता। अतस्तेनादावेव देवीमुद्दिश्य प्रणामो विनिवेदितः। अत्रापि श्लोकेषु आद्ये स्तुत्यात्मकं मङ्गलाचरणं कृतमिति शक्यवचम्। तदुक्तम् –

"भो राजनीते प्रणमामि तुभ्यं पुनः पुनस्ते पदयोः प्रणामः।
अनन्तकीर्तीरमिताश्च शक्तीः शक्नोमि मातुं न तव क्षमस्व"[८५९]॥

सा देवी अनन्तकीर्तिमती, तस्याः शक्तयः अमिताः, विचित्रवर्णोपेताश्च। तस्याः स्वरूपनिर्वचने कविरात्मनः असामर्थ्यत्वं प्रकटीचकार। कविरत्र तस्याः राजनीतिदेव्याः प्रकृतस्वरूपनिर्णये अशक्तः सन् वेदान्तरीतिमवलम्ब्य अनिर्वाच्यपदाभिधया देवीं भूषितवान्। अद्यतनीया राजनीतिः अनिर्वाच्यैव। सा प्रतिक्षणं तस्याः स्वरूपं परिवर्तते स्म। क्वचित् सा भयङ्कररूपा, क्वचित् छलनामयी क्वचिद्वा सरला। वर्तमानां राजनीतिमालोक्य कवेर्लेखनी स्फुरिता –

"युवप्रिये! धुम्रविलासहासे! विस्फोरकाग्नेयपदार्थभूषे!
इत्यादिसम्बोधनपूर्वकं तु प्रेम्णा जनास्त्वां मधुरं वदन्ति "[८६०]॥

कवेः रचनासु 'राजनीतिलीलामृत'मिति गीतिकाव्यं सर्वजनविदितम्। काव्येऽस्मिन् राजनीतेः कुत्सितस्वरूपं कविना प्रस्फुटितम्। प्रतिश्लोकं राजनीतेः जटिलं कुटिलञ्च चित्रं चित्रितम्। साम्प्रतं व्यक्तिकेन्द्रिक-राजनीतेः क्रियाप्रतिक्रियासंघातेन उद्वेलितस्य कविचित्तस्य प्रकाशभूमिरिदं काव्यम्। अधुना सर्वक्षेत्रेषु राजनीतेः प्रभावः मानवजीवनं कलुषयति। शिक्षा-स्वास्थ्य-प्रशासनादिषु प्रतिपदं संलक्ष्यते राजनीतेः प्रभावः। अर्थाद् राजनीतिरेव समाजजीवनस्य विनाशकारणम्। राजनीतिव्यवस्थामिमां काव्योचितभङ्ग्या दुःखेन प्रतिपादयति कवयिता। उपहासेन विद्रूपात्मकभङ्ग्या कटाक्षवृत्त्या च राजनीतेः वीभत्सता कविना चित्रिता। वितथप्रतिश्रुतिवाक्यानि श्रावं श्रावं जनन्यो वीतश्रद्धाः आसन्। दैनन्दिनजीवनसमस्यामाधारीकृत्य राजनैतिकनेतॄणां स्वार्थपरप्रवञ्चनायाश्चित्रं दीपकघोषमहाभागेन समुपस्थापितम्। कविनान्ते राजनीतिदेव्या माहात्म्यं वर्णितम् –

[८५९]राज.लीला. (१)।
[८६०]तत्रैव (५)।

"भगवति भवतोति प्रार्थये राजनीते
शतदलमिव विश्वे शोभथां नाशहीनां
शतशतदलभिन्ना विन्दमाना विकाशं
प्रसरतु मधुगन्धो दिग्दिगन्ते भगवत्याः"[८६१]॥

दीपकघोषविनिर्मिते काव्ये प्राचीनपरम्परया सममाधुनिकतायाः समन्वयो लक्ष्यते। कवेः लेखनी स्वल्पा परं मौलिककाव्यरचनायां तस्य काव्यकौशलं लक्षणीयमेव। अस्मिन् काव्ये काव्यकलैव महीयते कवेः। रचनायां कविः प्रगुणीकरोति गीतिकाव्यपरम्पराम्। काव्यस्य अन्ते शान्तिमन्त्रमुच्चारयति कविः –

"आँ शान्तिर्गगने जले स्थले
आँ विश्वशान्तिर्नरके द्युलोके।
स्वस्त्यस्तु मध्वस्तु नवा शताब्दी
भो नीतिराजप्रणतिः शतं शतम्"[८६२]॥ इति।

संस्कृतच्छन्दोवैचित्र्येण भावगाम्भीर्येण चैते श्लोका अपूर्वशोभामण्डिता प्रतिभान्ति। अत्र कविः नवीनच्छन्दांसि अपि निर्माति। काव्यस्य भाषा नवीना, सरला, शैली च स्पष्टता मनोहारिणी। कुत्रापि काठिन्यं नास्ति बौधसौकार्याय। काव्यभावं सारल्येन समुपस्थापयति कविरयम्। काव्यमिदं मौलिकं प्रसादगुणगरिष्ठं च। शब्दविन्यासः काव्यस्य समग्रशोभां वर्धयति। मौलिकं व्यङ्ग्यभूयिष्ठं प्रसादगुणविशिष्टं च काव्यमिदम्। काव्यस्य श्लोकेषु अलङ्काराः सरलगीतानि च प्राचीनकवीनां कवित्वं स्मारयन्ति। इह काव्ये गुणरसयोश्च विरवद्यः विविधानामलङ्काराणां प्रयोगो लक्ष्यते। काव्ये हास्यरसो न अङ्गी परं प्रधानरसरूपेण स्वीक्रियते। काव्ये तु वेदादिशास्त्राणां वाक्यानि समुपलभ्यन्ते। दिङ्मात्रमुदाहरणं तावत् – 'राष्ट्री तथा संगमनी वसूनां भूर्याविशन्ती विदुषो पुरुत्रा'[८६३] इति। अथवा, 'इहास्ति नास्तीह कुतः कुतः सा स्यादस्ति नास्ति क्षणिका समं स्यात्'[८६४]। व्यञ्जनाविन्यासे सरसशब्दचयने अर्थगौरवे च कवेः

[८६१]राज.लीला. (४४८)।
[८६२]तत्रैव (४५७)।
[८६३]तत्रैव (१०८)।
[८६४]तत्रैव (२८०)।

काव्यं महाकाव्यरूपेण प्रतीयते। समग्रकाव्यं तु कविप्रतिभया चिरं चकास्ति सहृदयानां मनोमुकुरे।

ग). संस्कृतरवीन्द्रसङ्गीतम्[८६५]

पञ्चविंशतिसंख्यानां रवीन्द्रसङ्गीतानाम् अनुवादात्मकं पुस्तकमिदं १९९५ ईशवीये वर्षे साहित्याकादम्या प्रकाशितं वर्तते। गीतेष्वत्र दशाधिकानि गीतानि गीताञ्जलितः संगृहीतानि कविना। अन्यानि तु गीतालि-तपती-गीतमाला-क्षणिकादिग्रन्थेभ्यः अनूदितानि सन्ति। कवेर्दीपकस्य मनोराज्याद्भावाः, रसाः, अलङ्काराः, छन्दांसि च तत्काव्ये अहम्पूर्विकया परापतन्तीति कृत्वा रसस्यैव प्राधान्याद् ग्रन्थेऽस्मिन् रवीन्द्रसंगीतानि रसैर्जारितानीति दृश्यते। अनुवादावसरे कविना शब्दान्वेषणे महान् प्रयत्नः कृतः इति तेषां समीपे न केवलं रसस्य, अपि तु शब्दान्वेषणक्षमायाः बुद्धिवृत्तेः प्राधान्यञ्च दृक्पथमायाति। कविना स्वयमेवाभाणि यदनुवादकार्यं मूलकाव्यग्रन्थनकार्याद्दुरूहतरमेव प्रतिभाति। दिङ्मात्ररूपेण उद्ध्रियते प्रथमं गानम् –

"अग्नेः स्पर्शमणिं लगय प्राणैः।
जीवनं पावय दहन-दानैः।
ममेमं देहं समुत्तोलय त्वम्,
तदैतद्-देवालये कुरु दीपम्-
ज्वलतु दीपशिखाऽनिशं गानैः।
तमसः तनौ तनौ तव स्पर्शात्
स्फुटतु निशां तारा नवा नवा।
नयनदृष्टिरेतु तमोमुक्तिम्,
यत्र पतति च पश्यतु प्रभाम्
ज्वलिता व्यथा मम ऊर्ध्वतानम्"॥[८६६]

अस्य अनुवादकलाकौशलं समीक्ष्य वक्तुमलं यत् रवीन्द्रनाथस्य मूलान्

[८६५]संस्कृतरवीन्द्रसङ्गीतम्, साहित्य-अकादमी, १९९५।
[८६६]तत्रैव, पृ. – १।

स्वरान् भावान् विसंरक्ष्य कविना रोचिष्णुतया महता यत्नेनानुवादाः विहिताः। तस्य रवीन्द्रसङ्गीतयुतं ध्वनिमुद्रिकाद्वयं गाथानीध्वनिमुद्रकसंस्थया प्रकाशितं वर्तते।

प्रसङ्गतो भूमिकायां रमारञ्जनमुखोपाध्यायवर्येणाभाणि सुष्ठुतया – "रवीन्द्रकाव्यस्य अनुवादकर्तृभिः प्रायशः रवीन्द्रनाथपरिवेशितानां भावानां प्रकाशने एवं गुरूत्वं प्रदत्तम्। प्रचलितानां छन्दसाञ्च उपयोगं कृत्वा अनुवादो विहितः। कलिकाताविश्वविद्यालस्य संस्कृतविभागे रीडरपदमलङ्कुर्वाणैः विद्वद्वरेण्यैः अलङ्कारच्छन्दःशास्त्रेषु प्रविष्टैः डक्टरदीपकघोषैः पञ्चविंशतिसङ्खकानां रवीन्द्रसङ्गीतानां वङ्गभाषया विरचितानां गीतानाम् यथा देवभाषायामनुवादो विहितः। नवीना रमणीया चासौ प्रचेष्टा। पूर्वसूरिभिः भावखण्डे एव तात्पर्यं निहितम्, घोषैस्तु भावांशे आकृत्यंशे च द्वयोरेव गुरुत्वं प्रदायि। स्वीकृतञ्च इदं मतं यत् सङ्गीते रूपं भावश्च द्वे एव समप्राधान्ययुते। न खलु रूपं भावात् पृथक्कर्तुं शक्यते, न वा भावो रूपात्। भावरूपे मिलित्वा एवं सङ्गीते रसनिषेकं प्रकुरुतः। एवं घोषकृतानामनुवादानामिदमेव वैशिष्ट्यं यत् मूलसङ्गीतेषु यां शैलीमवलम्ब्य स्वरसंयोजनं कृतम्, तामेव शैलीमनुसृत्य एष्वपि स्वराणां विन्यासो विहितः।"[८६७]

१२. सीतानाथाचार्यस्य साहित्यकल्लोलिनी

०. उपोद्घातः

"यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥"[८६८] इति।

प्रतिभाया उन्मेषेणैव विश्वं प्रकाशपदवीं याति। शक्तेश्चास्याः विचित्ररूपैर्जगदिदम् आस्वाद्यमानतया प्रतिभाति। अस्या अभिनवोन्मेषेण कवेः काव्यं प्रचरद्रूपतां गच्छति। तथाहि प्रतिभामिमां जगत्कल्याणमयीं प्रणमति ध्वन्यालोककृदानन्दवर्धनाचार्यः। अपि च, प्रतिभाप्रसादात् सहृदयो महाकविपदवीमुपालभते। संस्कारजन्यया प्रतिभया शिशूनां

[८६७]संस्कृतरवीन्द्रसङ्गीतम्।
[८६८]ध्वन्यालोकः (१।१९)।

जन्मान्धानामपि कवित्वशक्तिरुन्मीलति। इमाञ्च प्रतिभामवलम्ब्य साहित्यमीमांसकानां विश्रान्तिर्नास्ति। यद्यपि पृथिव्याः प्रतिवस्तुनिर्माणमेव प्रतिभाविलासस्तथापि कविकृतौ तद्रूपं यावन्मूर्तं रम्यञ्च, न तद्वदुज्ज्वलमन्यत्र। तथाहि सौन्दर्यलहर्यामुदितम् –

"कवीनां सन्दर्भस्तवकमकरन्दैकरसिकं
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम्।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरलौ
असूयासंसर्गादलिकनयनं किञ्चिदरुणम्॥"[८६९] इति।

भामहमते – 'काव्यन्तु जायते जातु कस्यचित् प्रतिभावतः'[८७०] इति। अर्थात् कविमात्रमेव न खलु प्रतिभावत्तथा च प्रतिभावतः काव्यमेव कालोत्तीर्णतामेति। प्रकृततया प्रतिभाशक्तिरेव काव्यत्वेन परिणमते। आचार्यदण्डिनये – पूर्वजन्मनः संस्कारेण सह सम्बन्धिता नैसर्गिकी प्रतिभा तावत् काव्यकारणम्। काव्यालंकारे रुद्रटोक्तेन शक्तिपदेन प्रतिभेवावगम्यते। नमिसाधुना भणितम् – "असौ शक्तिर्यस्यामविक्षिप्ते चेतसि सदानेकप्रकारस्य वाक्यार्थस्य विस्फूरणम्। यस्यां चाक्लिष्टानि वागित्येवार्थप्रतिपादनसमर्थानि पदानि प्रतिभान्ति। यद्वशाद् हृदयङ्गमौ नानाविधौ शब्दार्थौ प्रतिभासेते सा शक्तिरित्यर्थः॥" इति।

परवर्तिनि काले कुन्तकाचार्यैः 'काव्यविधात्री शक्तिरूपा प्रतिभा खलु काव्यमार्गप्रसादयित्री'त्युक्तम्। राजशेखरेण काव्यकारणत्वेन प्रतिभामङ्गीकृत्य कारयितृभावयितृभेदात् प्रतिभाया द्वैविध्यमुरीकृतम् – 'सा च द्विधा, कारयित्री भावयित्री च। कवेरुपकुर्वाणा कारयित्री तथा च भावकस्योपकुर्वाणा भावयित्री'[८७१] इति।

कवेः काव्यरचनाया उपकारिका तावत्कारयित्री। सा च कारयित्री त्रिधा विभज्यते– सहजा आहार्या तथा चौपदेशिकी च। अर्थात् संस्कृतालङ्कारजगतः प्रायः सर्वे काव्यमीमांसकाः काव्यकारणत्वेन प्रतिभां स्वीचक्रुः। पूर्वोक्तालोचनादेतदेव प्रमीयते यत्प्रतिभामाहात्म्येनैव कविः शब्दार्थयोः स्वरूपं दर्शयति।

[८६९] सौन्दर्यलहरी (२।४०)।
[८७०] काव्यालंकारः (भामप्रणीतः)।
[८७१] सीतानाथाचार्य-देवकुमाराभ्यां सम्पादिता काव्यमीमांसा (चतुर्थोऽध्यायः)।

आलोच्यमानस्य सीतानाथकवेः सारस्वतसाधनापि जन्मान्तरसंस्कारापेक्षिणी सहजा च। तस्य सारस्वतजीवनं धाराद्वितयेन विभाजयितुं शक्यते – एका तावत् सृष्टिधर्मिणी चापरा धारा ग्रन्थप्रबन्धादिसम्पादनात्मिका। अर्थादाचार्यकविः सीतानाथः कारयितृभावयितृप्रतिभयोर्युगपदाधारविशेषः।

१. सीतानाथस्य व्यक्तिजीवनम्

पश्चिमवङ्गस्य मेदिनीपुरमण्डलान्तर्गतं रासनाख्यग्रामं व्यभूषयत् स्वजनुषा डिसेम्बरमासस्य प्रथमदिवसे १९३९ ईशवीये वर्षे। संस्कृतशिक्षैतिह्यवाहिनि वंशे लब्धजन्मायं सीतानाथो जन्मसूत्रत एव स्ववंशगतं महार्घमुत्तराधिकारमर्जितवान्। तथाहि, शास्त्रिमहाभागः स्वयमेवोक्तवान् भावविलसितमिति काव्यस्य पुरोवाचि –

"शैशवे पितुश्चरणयोश्चतुष्पाठीशिक्षामभ्यसतो मे सहसा कविताया विशेषतः संस्कृतभाषामय्या, विरचने बलवती स्पृहा सञ्जाता। यद्यपि न विद्यते मामकमुच्चकोटिकं प्रातिभं दर्शननैपुण्यं न वा वर्णनापाटवं तथापि प्रभृत्येव कवितासुन्दरी मामभिसरति विनोदयति, कृतार्थयति" इति।

'भारवि-माघकृतकाव्ययोः समीक्षे'ति शोधप्रबन्धं विरचय्य यादवपुर-विश्वविद्यालयात् पि.एइच्.डि (Ph.D) इत्युपाधिमावाप। तस्य शिक्षाचार्येषु कालीपदतर्काचार्य-मधुसूदनन्यायाचार्य-विश्वबन्धुभट्टाचार्य-श्रीमोहनसांख्यवेदान्ततीर्थ-भूपेन्द्रनाथस्मृतितीर्थ-भूतनाथसप्ततीर्थ-दीननाथनवतीर्थ-गौरीनाथशास्त्रिदृशा विश्ववरेण्याः विद्वांसश्चान्यतमा आसन्। कविना तेषामाचार्यवराणां प्रेरणां भूमिकाञ्च नम्रशिरसा च वारं वारं सास्मर्य्यते।

१९६३ ईशवीये वर्षे मेदिनीपुरजिल्लान्तःपातिनः वाजकुल-मिलनी-महाविद्यालयस्य अध्यापकत्वेन कर्मजीवनं प्रारभ्य १९८९ खृष्टाब्दे कलिकाता-विश्वविद्यालयस्य संस्कृतविभागे कृतप्रवेशः क्रमेण प्रवाचकपदे (Reader) समासीनः क्रमप्राप्तं विभागाध्यक्षपदमपि सकृतित्वमलङ्कृतवान्। १९९८ ईशवीयाब्दे सम्मानसूचकं गोपीनाथकविराजाध्यापकपदमप्यलङ्कृतं तेन। विशेषतः समुल्लेखनीयं यत् सर्वभारतीयशिक्षापरिसरे तस्य वैदुष्याय राष्ट्रपतिसम्मानमप्युपलब्धमनेन २०१० ईशवीये वर्षे। २०१६ ईशवीयाब्दे 'काव्यनिर्झरी' इति काव्यसंग्रहाय साहित्य-अकाडेमी-

सम्मानेनापि भूषितः कविवरोऽयम्। पश्चिमवङ्गस्य राज्यपालेन अरविन्दपुरस्कारेण अलंकृतोऽयं कविः समालोकश्च।

२. सीतानाथस्य सारस्वतजीवनम्

प्रतिभाया या धारा विच्छिन्नस्य खण्डितस्य च जीवनस्याखण्डताया उपलब्धिना काव्यसृष्टौ भवत्युपकारिका सा कारयित्री। अनया प्रतिभयाचार्यकविः षट् मौलिककाव्यग्रन्थान् विरचयति स्म। ते काव्यग्रन्था यथा –

१) भावविलसितम्
२) शिशुयुवदुर्दैवविलसितम्
३) का त्वं शुभे
४) काव्यनिर्झरी
५) गौरीनाथचरितम्
६) कविते विश्ववन्दिते
७) काव्यसञ्चयनञ्चेति।

१) भावविलसितम्

प्राथम्येन १९९८ ईशवीयाब्दे प्रकाशितेऽस्मिन् 'भावविलसित'नामके कविताग्रन्थे विविधे प्रसङ्गे कवितासु कासाञ्चित् सङ्कलनमत्र परिप्राप्यते। तत्र संस्कृतभाषामय्यः सप्तविंशतिसंख्यकास्तथा वङ्गभाषामय्यः षट्संख्यकाः कविता विलसन्ति। संस्कृतकवितासु 'स्काइलार्कं प्रति', 'आत्मविलापश्चेति' द्वे कविते तावदनुवादात्मिके। तदितराः सर्वाः कविताः मौलिकरचनारूपाः। साकल्येन संस्कृतकवितानां श्लोकसंख्या प्रायिकदिशा शतत्रयी। कासाञ्चन कवितानां खलु विषयाः पूर्वसूरिभिः समुपस्थिताः प्राचीनभूताः, कासाञ्चन पुनः साम्प्रतिके काले उद्भूता सामाजिकी स्थितिः। काव्येषु एषु शब्दचारुत्वार्थचारुत्वयोः सामञ्जस्यपूर्णा स्थितिर्नितरां चित्ताकर्षका। मौलिककाव्येषु कानिचिच्च स्तुतिपराणि कानिचिन्निसर्गनिरूपणपराणि च मनोभावाभिव्यञ्जकानि सन्ति। सर्वत्र वैदर्भी रीतिरिह लसति। किञ्च, एतेषु क्वचिद् ध्वनेर्विलसनं क्वचिद्रसस्याभिव्यञ्जनं, क्वचिद्वक्रोक्तेः प्रयोगः, कुत्रापि कौतुकमयता, कुत्रापि कल्पनायाः समुदारता च जनमानसमानन्दयन्ति।

विशेषतः समुल्लेखनीयं यत् साहित्यसमालोचकस्य डा० रमारञ्जन-मुख्योपाध्यायमहाभागस्य भूमिका तथा च वङ्गभाषायाः प्रख्यातकविवरेण्यस्य नीललोहितस्य सुनीलगङ्गोपाध्यायस्य मुखबन्धः कवितासंग्रहस्यास्य गुरुत्वं समधिकं वर्धयत इत्यत्र नास्ति विप्रतिपत्तिः। ग्रन्थस्यास्यादावेव कविना श्लोकैः जनकजननीगुरुप्रियासहृदयान् विनम्रचेतसा संस्मृत्य प्रणम्य च भणितम् –

"सहस्रशः प्रणम्याद्य पादयोर्विनिवेद्यते।
भावविलसिताख्येयं कवितापुष्पमालिका॥" इति।

२) शिशुयुवदुर्दैवविलसितम्

कवेरपरं समाजाश्रयं काव्यं तावत् 'शिशुयुवदुर्दैवविलसित'मिति। पश्चिमवङ्गप्रान्ते एकस्मिन् स्वास्थ्यकेन्द्रे प्रतिषेधकस्य औषधविशेषस्य (Palio-vaccine) प्रायोगिकप्रमादद्वारा शिशूनां यूनाञ्चाकालमरणं कारुण्येन चित्रितं कविना सीतानाथेन। बहूनां शिशूनां मृतकथामुपजीव्य निहतशिशुनालम्बनविभावेन जनन्यादेः क्रन्दनाद्यनुभावेन च सीतानाथस्य कारुण्यस्य हेतुभूतो जनन्यादेः शोकः कवेर्लेखन्या विनिर्गत्य काव्यरूपेणानेन परिणतिं परिप्राप्य अनुपमानुभूतेः परमप्रकर्षो जञ्जन्यतेतराम्। एतद्व्यतिरिच्य शिशूनां काश्चित् समस्या अपि कविना निबद्धाः। पुनः भ्रूणहत्या, शिशूनामपुष्टिः, आधुनिकतरुणानामपराधप्रवणतादयः समस्याः आचार्येण मर्मस्पर्शिण्या भङ्ग्याः समुपस्थापिताः।

काव्येऽस्मिन् क्वचित् क्वचित् सोलुण्ठनभङ्ग्या पौराणिकचरित्रचित्रणपुरःसरं कविः समाजस्याधःपतनं प्रति तीव्रकषाघातं विधत्ते। वास्तवोचितचरित्रचित्रणे कवेर्दाक्ष्यमतुलरमणीयमिति।

काव्यग्रन्थस्यास्य पुरोवाचि दिलीपकुमारकाञ्जिलालमहाभागैः सुष्ठूक्तम् –

"The traces of the influence of the classical poets like *Kālidāsa*, *Bhāravi*, and of *Śriharṣa* are visible all through the poem and his comparison of *Aśvamedha* and the *Rājasūya* sacrifices of yore with the genocide of children and the young generation, albeit indirectly resuscitate the following lines of the *Veṇīsaṁhāra* Act

1.25 – 'चत्वारो वयमृत्विजः स भवान् कर्मोपदेष्टा हरिः...'' इति।

कवेः प्रंशसापरकोक्तेरयमेव निष्कर्षार्थो यत् कालिदास-भारवि-श्रीहर्षादि-लौकिककोविदां प्रभावः सुतरामेव समापतति कृष्णात्रेयकवेरस्य कवितासंग्रहेऽस्मिन्। अश्वमेधराजसूययज्ञाभ्यां समं शिशुयुवकादेर्विलोपसाधनस्य तुलनां कुर्वन्नयं कविः परोक्षतया 'चत्वारो वयमृत्विजः...' इति वेणीसंहारोक्तिं स्मारयतीति।

प्रसङ्गतः उल्लेख्यं यत् १९९५ ईशवीयाब्दे कवेर्भ्रातुष्पुत्रोऽरुणाभः पथदुर्घटनायां दिवं गतः। अरुणाभस्याकालमृत्युजनितशोकाग्निः यदा कविमानसं दन्दह्यते, तदा देवग्रामस्य शिशुमृत्युवृत्तेन कवेः 'वियोगोत्थः शोकः श्लोकत्वमागतः' वाल्मीकिवत्। तथाहि काव्यस्यान्तिमे कविनोदितम् –

''ज्वलतस्तस्य शोकाग्नेः किञ्चित् प्रतिचिकीर्षया।
उत्सृज्यते मया खलु साश्रु कृतिरेषा स्मृतौ तव॥[८७२]'' इति।

३) का त्वं शुभे

'का त्वं शुभे' इत्येकं प्रेमोपजीव्यं गीतिकाव्यम्। जगति प्रवहतः प्रेम्णो माधुर्येण विमुग्धं कविचित्तम्। प्रेममन्दाकिन्या विमलधारयाभिस्नाता तदीया कविसत्ता। अतः स तदीये काव्ये कल्याणमयीमेकां प्रेमप्रतिमां निर्मातुमिच्छति – ''इच्छामि किञ्चित्प्रतिमां विधातुं प्रेम्णः शुभां मे किल काव्यबन्धः[८७३]'' इति।

गीतिकाव्यस्यास्य नायिका शुभा कविकपोलकल्पिता ह्लादिन्या चञ्चलेक्षणा स्वयमेव कविकल्पनामवलम्ब्य तस्यैव प्राप्ता जीर्णकुटिरम्। कवेरनास्वादितः प्रेमरसः समुद्बोधितः शुभाया आविर्भावात्। नायिका स्वयं यावत् स्मितं हसति, किञ्चिद्वा भाषते तावन्नायकस्यापि हृदयाभ्यन्तरस्थनयनं प्रबोधितमभवत्, सा शुभाङ्गी शुभा वनभूमौ वाञ्छति भ्रमितुम्। नायकोऽपि तामनुव्रजतीत्यत्र नास्ति संशयलवः। तयोर्मिथो मेलनं शारदपौर्णमास्याः पूर्णचन्द्रालोके गाढतां सम्प्राप्य पूर्णतां प्रति धावति – ''हृदयद्वयभिन्नभावना सहसाभिन्नदशाप्तबन्धना ''[८७४] इति।

[८७२]शिशु.युव.।
[८७३]का त्वं शुभे (३)।
[८७४]तत्रैव (२२)।

कवेर्हृदयाधिष्ठात्री शुभा अपगतायां निशायां स्वयमपि प्रगता। सा यावदन्तर्हिता तावत्करुणातिकरुणं परिदेवनमिव ललितपदं केवलं लक्षयति विप्रलम्भम्। तदा स्वकजीवनमप्रयोजनीयमिति विभाव्य कविनोक्तं –

''अतिजीर्णमरण्यमेव मे वनभूमिः प्रतिभाति मानसे।
हतजीवप्रयोजनं ममावसितं साम्प्रतमित्यहो मतिः[८७५]''॥ इति।

ततो नायकस्य चेतसि सान्तर्हिता वनचारिणी लोकातिक्तान्तमनुभवं स्फुटमस्फुटं जनयन्ती चित्तस्थैव विस्मयं विदधाति। अलौकिकलोकामृतेन कवेर्हृदयमभिषिच्य या प्रगता सा का वेति सम्प्रश्नः परीपृच्छयते कविवरेण। प्रेम्णो रहस्यं वेत्ति कविवरं विज्ञापयति सा लब्धरहस्यविद्यका शुभा। श्वेतवस्त्रशोभिता सूर्यमुखीव प्रतिभाति प्रभाते मध्याह्ने च, स्थलपद्महासा सायञ्च यूथीव भ्राजमाना शुभा कविं विवशीकरोति।

'का त्वं शुभे' इति पृच्छता कविना वारं वारं शुभाया विशेषणानि रमणीयानि प्रदत्तान्यपि कवेर्विश्रान्तिर्न जाता। सा प्रेमराजत्वपदमभिषिच्य तमद्वैतभावं प्रेम्णः सारभूतं तत्त्वं दिव्यपीयूषं पाययति। श्यामायमाना स्वर्णाभा कस्तुरिका गन्धवती मृगीव भ्रमन्ती च नायकं कालिदासकाव्यलक्ष्मीरिव सा अवभासते कविचित्तमन्दिरे। कविकल्पनायां सा हरप्रियायाश्चित्तैषणास्वरूपा अथवा भारतसंस्कृतेर्दिव्यमूर्तिरूपा, उत लोकातिक्रान्ता रसमयी काप्यलौकिकी। तथाह्यनुभूतम् –

''का त्वं शुभे धूततनुः किमु कल्पनासि
लोकातिगा रसमयी कविचित्तभृङ्गी।
अज्ञातवस्तु प्रकृतेरपि वर्णनेषु
या प्रेरयत्यतितरां कविसार्वभौमान्[८७६]''॥ इति।

देवसंसदि उर्वशीसदृशा हृदयविश्रान्तिकारिण्यष्टादशवर्षीया प्रत्यक्षरश्लेषमय-प्रबन्धेषु वर्णिता वासवदत्ता वेति कविस्तर्कयति। कविः क्वचित्कन्दर्पकेतुप्रियाया वासवदत्तायाः, कदाचिद्वा भट्टवाणभणितियुक्तायाश्चित्रलेखायाः, क्वचिच्च ऊषायाः सादृश्यमन्विष्यन् ललितललितं पदजातं स्रगिव गुम्फति। तुप्तोऽप्यतृप्तमानसा

[८७५]का त्वं शुभे (३४)।
[८७६]तत्रैव (९२)।

कविरयमुपसंहरति–

"हे भाविनीच्छा मनसः सुसंवृता
विभोः प्रसादात् सफलैव भाविनी[८७७]" इत्यादिना।

विविधमुक्तककाव्यप्रणेतुरस्य नूत्नां रहस्यवादवाच्याम् अनिर्वचनीय-प्रेमतत्त्वभावनाधाराम् आदाय विलिख्य भावकाव्यं 'का त्वं शुभे' शीर्षकं २००३ ईशवीयाब्दे जुनमासि प्रकाशितम्। सम्बोधनमिदमनिर्वाच्यायै प्रेमपात्रत्वमधितस्थुष्यै कस्यैचन प्रियतमायै समर्पितं किन्त्वत्र विप्रलम्भशृङ्गारस्य वेदनामनुभवन् कविः कदाचन कन्यायाः कस्याश्चन स्मृतेराधारेण तस्याः सम्प्रत्यभावं वर्णयति, कदाचिदनुभूतसौन्दर्यसामग्र्या विवरणं प्रस्तौति। 'Lyric' इति पदेन यत्प्रगीतमुक्तकं विवक्ष्यते, 'Lyricism' इति पदेन च या भावप्रवणता विवक्ष्यते – तयोरुदाहरणत्वेन मुक्तकसंग्रहोऽयं समुपन्यस्तुं शक्यते। १३५ मितेषु प्रणीतमिदं काव्यं प्रो० रमारञ्जनमुखोपाध्याय-राधावल्लभत्रिपाठि-प्रतापवन्द्योपाध्यायप्रभृतीनां प्रस्तावनाभिः, कुलपतीनां चाशिषकुमारव्यानार्जीमहाभागानां शुभकामनया समलङ्कृतम्। काव्यस्यान्तिमानि पद्यानि कविपरिचयप्रदायकानि काव्यकारक्षुण्णरीत्या। अन्वीक्षापत्रिकायां संस्कृताध्यापिकया विजयागोस्वामिमहाशयया 'का त्वं शुभे' इति ग्रन्थसमीक्षावसरे गदितम् –

"The poet here endeavors to capture the passing wonder of love, the momentary loveliness of lighting. His *Śubhā* is thus not a single person or entity but embodies those fleeting moments that come to almost everyone, when all is perfect." इति।

कवेः लेखनी सावलीला प्रसादगुणोपेता माधुर्यगुणान्विता च। आचार्यकवेर्भावानुभूतेर्वाङ्मयप्रकाशे विविधानामर्थालङ्काराणां छन्दसाञ्च प्रयोगाः स्वतःस्फूर्ताः अपृथग्यत्ननिर्वर्त्याश्च।

जगतोऽस्य सृष्टौ स्थितौ च प्रेम्णोऽपरिहार्यतावश्यमेवाभ्युपगन्तव्या। मानवानामुत्पत्तौ विकाशे च प्रकाशे प्रेम्णो गतिमत्ता नितरामेव नेत्रपथमायाति। कवेरस्य

[८७७]का त्वं शुभे (११८)।

साहित्यकृतौ प्रेम्णो द्वैविध्यं परिस्फुरति – सोपाधिकमेकं निरुपाधिकञ्चापरम्। पितृ-मातृ-सुत-सुता-प्रियतमादिषु परिलक्ष्यमाणं प्रेम सोपाधिकम्। आध्यात्मिकमीश्वरविषयकं वा प्रेम निरुपाधिकम्। 'का त्वं शुभे' इति काव्यस्य समर्पणावसरे विरच्यमानेषु श्लोकेषु कवेरस्य प्रेमविषयिणी दृष्टिः प्रतिभासमानालोक्यते। 'का त्वं शुभे' इति कवेः प्रोद्दामप्रेमोपजीव्यं काव्यम्। काव्येऽस्मिन् कवेः प्रेमातिसारिणी चित्तधारा तरङ्गिता वर्तते। 'का त्वं शुभे' इति गीतिकाव्यस्य नायिका शुभा, सा कवेर्मानसी प्रेयसी च। सा प्रेमसौन्दर्ययोः प्रतीकभूता। सा कदाचित् कविसमीपमागता – 'पथविस्मरणादिवागता', क्षणं स्थिता, ततः सा प्रस्थिता – 'प्रगता सा पथिका निशामये'। शुभां प्राप्य कवेः सम्भोगात्मिका चित्तवृत्तिरुद्वेलिता जाता –

"स्मयितं हसितं निरीक्षितं क्रमहीनं बहुजल्पितं मुहुः।
द्वितयं द्वितयं चतुष्टयं समभूज्जागरितं दृशाञ्च नौ॥" इति।

एतादृशस्य प्रेम्णो वर्णनं काव्यस्यास्यादिमभागे विलसति। ततः शुभायाः प्रस्थानानन्तरं कवेश्चित्तं कियन्तं कालं यावत् वेदनाविधुरं जातम्। शुभाया अधरां माधुरीं स्मारं स्मारं कवेर्मनसि सम्प्रश्नः समुदेति – 'शुभा किं तस्यासीत् कल्पनामात्रम्'। किन्तु गच्छत्सु कालेषु कविः धृतिमासाद्य शुभायाः प्रतिच्छविं कृत्स्नेऽपि विश्वे द्रष्टुमनुभवितुञ्चारभते स्म। तथा चोक्तं –

"गच्छत्सु कालेषु सुतीव्रतागुणे विधुर्यवह्नेः शमिते कथञ्चन।
शनैः शनैर्भावसमाधिमग्नता काचिन्मदीये हृदये समागता॥
समाधिना तेन विमुक्तदृष्टिद्रष्टं क्रमे मदीये तां नवप्रत्ययेन।
सान्निध्यमस्याञ्च लभे समन्तान्निवर्ततो नैव तु विस्मयो मे॥" इति।

शुभाया इयमशरीरी सत्ता कविं सुचिरमनुप्राणयति प्रेरयति च। अयमेव काव्यस्य मुख्यो विषयः। केयं शुभा मानवी मानसी वेत्यस्मिन् विषये कविना स्पष्टविधया न किमप्युक्तम्। समीक्षकाणां निर्णयस्तु – मानसीपरत्व एव पर्यवस्यति। कवेः रवीन्द्रनाथस्य काव्ये एतादृशी प्रेमचिन्ता बहुत्र प्रतिबिम्बितालोक्यते। शुभात्र शाश्वतप्रेम्णः प्रतीकरूपेणात्र ग्रहीतुं शक्यते। एतदेव कविना तुरीयप्रेमसंज्ञया काव्योत्सर्गावसरे अभिहितम्। तच्च प्रेम परमात्माश्रयि। जीवात्मा परमात्मना सममैक्यमिच्छति भागवतीं

प्रेमधारामाश्रित्य भक्तो भगवता सहैक्यमिच्छति। भाग्यवशात्तादृशमिलनानन्दः क्षणमनुभूयते क्षणान्तरे तिरोधीयते। एतदेव कविना प्रतीकत्वेन उपस्थापयतोक्तं – शुभा कदाचिन्निशायां समागता निशात्यये च प्रस्थिता। तदनन्तरं तदीयचिन्ताव्याकुलितचेतसा कविना विश्वपरिक्रमा विहिता। अत्रोक्तं शुभापि कवेः कृते वरमाल्यं ग्रथति। भाविनि काले कल्पलोके तयोर्मेलनं भवितेति कवेर्विश्वासः। जीवात्मा यथोचितसाधनसम्पत्त्या परमात्मना सह मिलति, भक्तोऽपि लभते भगवतः सान्निध्यम्।

तथाहि सीतानाथस्य कल्पनाप्रिया शुभा क्वचिद्बृहस्पतेः काव्यलक्ष्मीः, क्वचिद्वा त्यागमैत्रीसहिष्णुताभिः समृद्धा भारतीयसंस्कृतिः, कदाचित् शरच्चन्द्रस्योपन्यासस्य नायिका राजलक्ष्मीः, (किमु राजलक्ष्मीः सृष्टिः शरच्चन्द्रमते र्महार्घा), कदाचिच्च ज्योतिर्मयी ऊषा शुद्धव्रता देवदासी च।

'का त्वं शुभे' इति गीतिकाव्यं क्वचित् सम्भोगशृङ्गारस्य क्वचिच्च विप्रलम्भशृङ्गारस्य प्रयोगाद्रसोत्तीर्णमभवत्।

'का त्वं शुभे' इति द्वितीयं गीतिकाव्यं तमेव महत्तमं प्रेमाणं विषयीकरोति यस्यामोघमनुशासनं मानवसमाजे प्रकृतिराज्ये देववृन्दे च भवति परिलक्ष्यमाणम्। कविनात्र उद्दाम-कल्पनोत्तुङ्गशिखरसञ्चरणक्षमया कविप्रतिभया नवनवै रूपकल्पैः काव्यनायिकायाः शुभायाः चरित्रं चित्रीकृतम्। भावाश्रयस्य (Abstract) औपम्यस्य सार्थकः प्रयोगः काव्यस्यास्य एकतमं वैशिष्ट्यम्। तथा चोक्तं वेदिनामन्यतमेन त्रिपाठिना राधावल्लभेन – "भावाश्रयिणीनामुपमानां प्रयोगोऽत्र काव्ये यथार्थतः चमत्कारजनकः। स्वल्पा एव कवयः तथा सावलीलतया प्रभूततया च भावाश्रयिण्या उपमायाः प्रयोगमकुर्वन् यथा कुरुते अस्मदीयोऽयं कविः"[८७८]। काव्यस्यास्य भूमिकामुपनिबध्नता प्राच्यतत्त्ववेदिनां मुख्यतमेन रमारञ्जनमुखोपाध्यायेन लिखितं– सीतानाथस्य लेखनीनिर्गतं 'का त्वं शुभे' इति काव्यं कालिदासस्य रवीन्द्रनाथस्य च प्रोद्दामप्रेमोपजीव्यैः कविकर्मभिः सह तुलनार्हम्। अतः काव्यमिदं महत्तमानां

[८७८] Very striking indeed is the use of abstract similes in this poem. Very few poets have used the abstract similes with such case and exuberance as our poet has done. ('का त्वं शुभे' – Introduction by Radhavallava Tripathi ; page XII.)।

गीतिकाव्यानामेकतमरूपेण सामान्यतो भारतीयसाहित्ये विशेषतः संस्कृतसाहित्ये स्वीकृतियोग्यम्।

४) काव्यनिर्झरी

सीतानाथः क्वचिद्भावगीताञ्जलिनाराधयति साहित्यदेवतां, क्वचिच्च शिशुयुवदुर्दैवविलसितादिकाव्यविरचनेन समसामयिकीं स्थितिं विशदीकरोति। एवं सततं प्रवहनशीलस्यास्य कवितानिर्झरिणी 'काव्यनिर्झरी'ति सङ्कलने प्रकटीकरोति स्फीतां हृद्यामनवद्याममन्दां वाग्धाराम्।

विविधासु सर्वभारतीयपत्रिकासु प्रकाशितानां कवितानां काश्चनात्र सङ्कलिता वर्तन्ते। ताश्च पञ्चचत्वारिंशत्कविता विषयवैचित्र्ययुताः। तथाहि, तासु काश्चित् देवताः स्तुवन्ति, कतिचन सिद्धसाधकानाञ्चरणपद्मयोर्विनिवेदयन्ति श्रद्धाञ्जलिम्। अपराः काश्चन कवेः शिक्षागुरुभ्यस्तत्सदृशेभ्यो वा माननीयेभ्यः प्रयच्छति प्रणामं, इतराः काश्चित् समकालिकान् विदुषोऽभिनन्दयन्ति तेषां साफल्यद्योतिनि क्षणे, अन्याः देशमातृकाया वन्दनं विदधति। अपरासु कवितासु प्रगुणीभवति कवेरन्तर्लीना वैयक्तिकी वेदनानुभूतिः। किञ्च, नजरुलविरचितायाः 'काण्डारी हुँशियार' इति कविताया अनुवादः 'कर्णधार अवधीयताम्' इति शीर्षकेण, सुकान्तरचित-लेलिनाख्यकविताया अनुवादः, मधुसूदनदत्तविरचिताया 'रसाल ओ स्वर्णलतिका' इति कविताया अनुवादो 'रसालस्वर्णलतिके' इति शीर्षकेण ग्रन्थेऽस्मिन् स्थानं लभन्ते।

अर्वाचीनसंस्कृतसाहित्यसमालोचकानां राधावल्लभत्रिपाठिपादानाम् ऋता-चट्टोपाध्यायानाञ्च मुखबन्धैः प्रशंसाभिश्च काव्यग्रन्थोऽयं विभूषितः। अस्मिन् काव्यसंग्रहे यथा विलसन्ति वन्दनात्मिकाः कविताः, शोकगाथाः, अभिनन्दनात्मिकाः तथा वरीवर्तन्ते 'नागमो धरणीप्रान्ते', 'विश्वानवद्ये वद शिल्पसंस्कृते', 'सदा बिभेति नारीभ्यः', 'चित्त रे बन्धनं छिद्यताम्', 'अन्योपदेशपञ्चकम्' चेत्यादयः मौलिकगीतिकविताः।

इह ग्रन्थे सङ्कलिताः पञ्चचत्वारिंशत्कविता विषयवैचित्र्ययुताः। सनातनानां भावानां व्यक्तीकरणं मिथः प्रत्यास्था चेति ग्रन्थस्यास्य एकः पक्षः। समकालिकी चेतना कवेरस्य सीतानाथस्य काव्ययात्रायाः प्रस्थानमपरम्। कविरयं क्वचित् क्वचिदन्तर्मुख

आत्मानमवलोकयति इति तृतीयपक्षः। सीतानाथस्य कर्तृत्वे वैदिको विश्वबोधः पुनरुन्मीलतीति महान् कवेर्विशेषः। स च 'वद शिल्पसंस्कृते' इत्येतादृशेषु काव्येषु प्रतिफलितः। कवेः काव्येषु क्वचित् कालिदासः प्राणिति, रवीन्द्रनाथो वा जागर्ति। अस्य कविताजातं वेदान्ततत्त्वानुभूतिं नवीनेषु सन्दर्भेषु हृदयङ्गमां विधत्ते। तथाहि प्राच्यतत्त्वविदुषा राधावल्लभत्रिपाठिनोक्तम् – "वस्तुतोऽनुभूतिप्रवणोऽयं कविः। अयं सर्वङ्कषो विशेषो वर्तते कवेरस्य यत् संवेदनशीलता नाम " इति।

अत एवोच्यते –

"सम्प्रति कवयो नैके सुरगिरि विविधा वितन्वन्ति रचनाः।
सीतानाथसदृक्षा विरलाः संवेदनप्रवणाः"[८७९]॥ इति।

५) गौरीनाथचरितम्

आचार्यकवेर्गुरोर्विश्ववरेण्यस्य प्राच्यतत्त्वविदुषो गौरीनाथशास्त्रिणश्चरितमधिकृत्य रचितमिदं काव्यम्। अत्र २४८ संख्यकाः श्लोका वर्तन्ते। गुरोः शास्त्रिमहोदयस्य जन्मशतवर्षे (२००९ ईशवीये वर्षे) रचितमिदं काव्यं कविना गुरवे श्रद्धां विनिवेदयितुम्।

नवद्वीपनिवासिनो वासुदेवसार्वभौमस्य वंशे जातोऽयं गौरीनाथः। प्रथमे श्लोकषट्के वासुदेवसार्वभौमस्य किञ्चिद्विवरणं प्रदत्तम्। नवमादिसप्तविंशत्यन्तेषु श्लोकेषु गौरीनाथशास्त्रिणः पितामहस्य श्यामनाथस्य वृत्तमस्ति काव्यायितम्। श्यामनाथस्य समन्वयधर्मिचिन्ताचित्रं चित्रयता आचार्यकविनोक्तम् –

"शाक्तञ्च वैष्णवञ्चैव भिन्नप्रकृतिकं मतम्।
तस्मिन्नभिन्नतां यातं साधकप्रवरे ध्रुवम्"[८८०]॥ इति।

अष्टाविंशतिश्लोकतः पञ्चचत्वारिंशच्छलोकान् यावद् विस्तृते काव्यांशे सामान्येन श्यामनाथस्य पुत्रयोः अमरनाथपशुपतिनाथयोः तथा कन्यकाया यज्ञेश्वरीदेव्या विशेषतः गौरीनाथपितुः पशुपतिनाथस्य च वृत्तान्तः समुपस्थापितः कविनानेन। परं १९०९ ईशवीयाब्दे पशुपतिनाथप्रभावत्योः औरसेन गौरीनाथो जनिं लेभे प्रपूते वंशे। ततः त्रिषष्टिश्लोकपर्यन्तं शिष्येण सीतानाथेन गुरोः बाल्यजीवनस्य जीवच्चित्रं

[८७९]काव्यनिर्झरी, पुरोवाक् (पृ. – १०)।
[८८०]गौरीनाथचरितम् (२१)।

निपुणतुलिकयाङ्कितं निर्दुष्टतत्त्वपुरस्कारेण। ततः गौरीनाथः पितुरकालवियोगकारणाद् हतोद्यमो न भूत्वा कथञ्च सारस्वतनभोमार्गं दीपयिष्यतीति अनवद्यसारल्येन मर्मन्तुदमनोभङ्ग्या वास्तवोचितपटभूमौ च काव्यायितं स्वभावकविना सीतानाथेन। प्राचीनधाराश्रयिपण्डितानां पादारविन्दे स्वनिष्ठं वसता गौरीनाथेन गम्भीराणि तत्त्वानि ज्ञातानि नैके ग्रन्थाश्च अधीताः। तदनु कविः सीतानाथः शिक्षागुरोः अध्यापनजीवनस्य बहुविचित्रितं चित्रं सूक्ष्मातिसूक्ष्मैस्तथ्यैः परिष्कृत्य प्रायः पञ्चविंशतिश्लोकैः प्रमाणयति यन्न केवलं गम्भीरविषयान् वर्णयितुं दक्षश्चापि कस्यापि स्मृत्यालेखनेऽपि सुतरां प्रौढः सः। दिङ्मात्रमुदाहरणं यथा –

"विद्यासागरपादेन पूर्वमध्यासिते पदे।
गौरीनाथे समासीने युगान्तरमदृश्यत॥
महाविद्यालयो ह्येष लब्धाध्यक्षमिमं वरम्।
शीर्षं समुन्नतेर्यातो यन्नैव भविता क्वचित्॥
आधुनिकीं तथा काषीदुच्छलां कुलप्लाविनीम्।
संस्कृतस्य प्रशिक्षार्थं धाराद्वयमपेक्षितम्"[८८१]॥ इति।
"चट्टीति पादुके धृत्वा पादयोर्गौरीकान्तिकः।
दीर्घावयवसम्पन्नो धूतिगेञ्जिपरिच्छदः॥
ललाटेन प्रशस्तेन भ्राजमानः स्मिताननः।
प्रभावेण स्वकीयेन निखिलानभिभावयन्॥
प्रविश्य नियतं स्वीये महाविद्यालयान्तरे।
सर्वत्र पदसञ्चारं कृत्वा नियमतः सुधीः"[८८२]॥ इति।

प्राच्यविद्यासु तस्य वैदुष्यस्य स्वीकृतिरूपेण भारतवर्षस्य प्रतिनिधिपदं चालङ्कृत्य 'सातीत्य देशसीमानं विश्वेऽभ्रमन्निरन्तरम्' सः।

समाजसंस्कारकत्वेन प्रतिवादिचरित्ररूपेण तस्य च जीवनालेख्यं निरमायि २२० मितश्लोकतः २२७ संख्यकश्लोकान् यावत् कविना असाधारणवाङ्मयेन। परिशेषे

[८८१]गौरीनाथचरितम् (११४-११६)।
[८८२]तत्रैव (१७३-१७५)।

गुरुमुद्दिश्य श्रद्धावनतचेतसा कायिकेन वाचा च प्रणामाञ्जलिर्विनिवेद्यते कविना।

विशेषेण समुल्लेखार्हं यत् २०१२ खृष्टाब्दे संस्कृतसाहित्यपरिषत्पत्रिकायां काव्यमिदं प्रचरद्रूपतां गतम्।

६) कविते विश्ववन्दिते

कविवरोऽयं वङ्गप्रदेशस्य कश्चन विशिष्टः काव्यतात्त्विकश्चालङ्कारिक इति कृत्वा तस्य प्रतिधमणि सततं प्रवहत् लोहितशोणितात्मकं काव्यतत्त्वम्। तथाहि काव्यकान्ततयावैशिष्ट्यानि स्वत एव तद्धमणितो निःसृत्य सरलमनोभङ्ग्या 'कविते विश्ववन्दिते' इति मौलिककाव्यग्रन्थे रोचिष्णुतया पदं कुर्वन्ति। अत्र कवितेति पदं काव्यपरम्। कवितायाः प्रशंसापरकोऽयं काव्यग्रन्थः। कवितेयं वर्धमानविश्वविद्यालयस्य 'ऋताम्भरी'ति पत्रिकायाम् एव प्रकाशिता।

कविता कविमानसोत्थतीव्रानुभूतेर्विशेषे क्षणे स्वसत्तां लभते। विश्वजनीनमानसे तस्याश्चिरन्तनी स्थितिर्विराजते। वयसातिप्रवीणापि नवीना सा सदैव पाठकानां मनो रञ्जयन्ती विराजते। तस्यां गुण-रीति-रस-भाव-वक्तोक्त्यौचित्य-अलंकारणां नित्यं स्थितिर्विद्यते–

"प्रत्यङ्गमालिङ्ग्य विराजते ते
जन्मक्षणाद् विस्मयिता सखीव।
जगुप्सितञ्चेप्सितां प्रयाति
त्वदङ्गसङ्गं लभते यदीह[८८३]"॥ इति।

देशस्य स्वाधीनतान्दोलने देशप्रेमिकान् प्रोत्साहयति कवितेयं – 'स्वतन्त्रतां देशगतां त आसुं/ यच्छन्ति प्राणान् भवतीं स्मरन्तः' इति। प्रतिक्षणं सचेतोभिः काङ्ख्यमानापि सा सङ्गतौ प्राप्तिसीमातमतिक्रम्य सरहस्यमवतिष्ठते। मानवेन मानवान्तरस्य, जात्या जात्यान्तरस्य, अतीतेन भविष्यतः, देशेन देशान्तरस्य, कविना सहृदयस्य, अरण्यप्रकृत्या मानवप्रकृतेर्मिलनं साधयति इयं कविता। सा चाद्वैतवादिनोऽपि द्वैतमार्गे प्रेरयति –

"द्वैताद्वैतमते भिन्नस्वरूपेऽभिन्नरूपता।

[८८३]कविते विश्ववन्दिते (१०)।

कदाचिदेवमायाति कविते तव शक्तितः"[८८४]॥ इति।

कवितायाः नाट्यरूपस्य रामकृष्णादौ, भजनगीतिरूपायाः, शाक्तपदावली-रूपायाः, वैष्णवस्तोत्रात्मिकाया, अरविन्दकवितायास्तथा रोगविमुक्तये च प्रभावो विद्योततेतमाम्। कवितेयं पुरुषार्थसाधिका, कलाप्रावीण्यदात्री, कान्तासम्मितोपदेशदात्री, नियतिकृतनियमरहित्री, प्रतिक्षणं नवायमाना च। किञ्च, सा नरचित्तमूर्द्धं नयति मानवानामानन्दतृष्णामपि। पाठकानानन्दमयसत्तायां स्थापयति, पङ्कजवत्तुच्छात् लब्धजन्मापि सौन्दर्यं वितनोति, सर्वेषु लोकेषु तथा सर्वभाषासु च विचरति सा। तदुक्तं कविना –

"पृथ्वीदिवो भेदमतीत्य कामं
सर्वत्र निर्वाधतया भ्रमन्ती।
भाषासु सर्वासु कृतप्रकाशा
भावैर्विचित्रैः कविते विभासि"[८८५]॥ इति।

वैज्ञानिकसत्याद्भिन्नं तावत् काव्यसत्यम् –

"वैज्ञानिकाद् वास्तविकात् प्रभिन्ने
सत्यात्तथा दर्शनदृष्टिसम्भवात्"[८८६]॥ इति।

कवितायाः छन्दोवैचित्र्येण कविचित्तं मोमुद्यते, सौन्दर्य्येण पृथ्वी सुन्दरी, संगीतेन मानवचित्तमेकतानीभवति, समुद्रे तरङ्गा जायन्ते। कवितेयं निष्प्राणादौ प्राणान् सञ्चारयति। जगति कवितायाः स्वरूपविषये वास्तवता-कल्पनाप्रभव-कल्पना-कलाकैवल्यादिविविधानि मतानि प्रादुरभवन् –

"एवमन्यान्यनेकानि मतानि विषये तव।
कविते परिदृश्यन्ते दुर्विज्ञेया तथाप्यसि"[८८७]॥ इति।

परिशेषे संस्कृतकाव्यधारायाः क्रमविकाशः कविना दशश्लोकैर्विन्यस्तः।

[८८४]कविते विश्ववन्दिते (३२)।
[८८५]तत्रैव (६७)।
[८८६]तत्रैव (७२)।
[८८७]तत्रैव (८४)।

७) काव्यसञ्चयनम्

विविधसमये तैर्विरचितानां कासाञ्चित्कवितानां संकलनम् अष्टाधिकाशीति-पृष्ठात्मकं 'काव्यसञ्चयनमि'ति शिरोनाम्ना २०१६ खृष्टाब्दे प्रकाश्यमानतामगच्छत्। तत्र न केवलं स्थानिताः कवेः सीतानाथस्य स्वरचितकविताः, परं सीतानाथमवलम्ब्य अन्यैः कृता वर्धापनकविता अपि। सङ्कलिताः सप्तत्रिंशत् कविताः विषयवैचित्र्योपेताः।

गद्यपद्यात्मकं हि कविकर्म। गद्यबहुलं भाषणद्वितयमपि इह मौलिकग्रन्थे मुद्रार्पितं वर्तते परं पद्यात्मिकाः कविता एव प्राधान्येन विलसन्ति। कवितासु काश्चन वन्दनात्मिकाः, अभिनन्दनात्मिका, काश्चित् साम्प्रतिकसमाजस्थितेः प्रतिबिम्बभूताः, काश्चिच्च पत्रात्मिकाः। नवीनेऽस्मिन् काव्यसङ्कलने कवेः काव्ययात्रायाः विविधपक्षाः स्फुटं काशन्ते। तद्यथा ऐतिह्यमण्डितभावानां व्यक्तीकरणं परम्परा प्रत्यास्था चेति कवेः सीतानाथस्य काव्ययात्राया एकः पक्षः। स च 'वेदवाणीवन्दना' 'चैतन्यस्तोत्रम्', 'ईश्वरचन्द्रवन्दनम्', 'विवेकानन्दवन्दनम्', 'रासमणिवन्दना', 'श्री-अरविन्दवन्दना' चेत्यादिकवितासु व्यक्तिमुपेतः। कवेः भक्ति-भावावेगाः ताभिः कविताभिः अभिव्यक्ताः जाताः। ऐतिहासिक-महापुरुष-धर्मप्रवर्तक-राजनैतिक-समाजसंस्कारक-साहित्यिक-कवि-विदग्धचरित्राणां जीवितम् उपजीव्य काव्यविरचनमर्वाचीनसंस्कृतसाहित्यसन्तानस्यापरमेकं महद्वैशिष्ट्यम्। दिङ्मात्रम् उदाह्रियते –

"धनं सुखं मानमथो तृणाय
मत्वा महाजीवनमार्गमैषीत्
येऽसौ निरासक्तधियैव तस्य
वन्देऽरविन्दस्य पदारविन्दम्"[८८८]॥

कवेः काव्येषु कलाकैवल्यवादापेक्षया वस्तुवादस्य वास्तववादस्य वा प्राधान्यमधिकतयालक्षि। कविः समाजमतिरिच्य काव्यानि ग्रथितुं नालम्। भरताचार्येण 'नाट्यशास्त्रे' भणितम् – 'त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्'। स्वभावकविः सीतानाथः सामाजिकस्थितिमूलकानि काव्यानि रचितवानिति कृत्वा समकालिकी

[८८८]श्री-अरविन्दवन्दना, २७।

चेतना तस्य काव्ययात्राया अपरमेकं प्रस्थानम्। आधुनिकदृष्ट्या व्यङ्गविधायाः कवितायाः सर्गविधौ कविरत्यन्तं निपुणः। 'वयमहो शिक्षिताः', 'कङ्कालोनविंशतिः' चेति कविताद्वितये साम्प्रतिकजीवनस्य याथार्थ्यमुद्घाटितम्। कवयितुरन्येष्वपि बहुषु काव्येषु समकालिकी विविधा सामाजिकी स्थितिरभिव्यज्यते। कवेः काव्येषु अनुप्रास-श्लेषोपमा-रूपक-अप्रस्तुतप्रशंसाद्यलंकाराः परस्परमहंपूर्विकया परापतन्ति। प्रसादगुणस्य प्रयोगाधिक्यं वरीवर्ति सीतानाथस्य काव्यानां प्रतिच्छत्रम्। गुणालंकारयोरपृथग्यत्ननिर्वर्त्यता कवेः काव्यानामन्यतमं वैशिष्ट्यम्।

कविना आजीवनं व्यक्ति-प्रशासनिकक्षेत्रेषु स्वमित्रेभ्योऽन्येभ्यो वा बन्धुजनेभ्यो प्रेषितानि पत्राणि संहृत्य ग्रथितो ग्रन्थोऽयम्। पत्रमाध्यमेन स्वकपोलकल्पनाजालस्य प्रकटीकरणप्रयासः साहित्यसंसारे प्रविरलतया दृश्यते। इदञ्च 'पत्रसाहित्य'मिति नाम्ना अधिधातुमलम्। सत्यव्रतशास्त्रिणा खण्डद्वयोपेतं पत्रकाव्यं प्रथममेव प्राकाशि। सीतानाथेनापि अस्मिन् कवितासंकलने द्वादश पत्राणि संकलितानि। बन्धुजनान् प्रति प्रेषितेषु पत्रेषु भावोद्रेकः स्वाभाविक एव। कविना ऋता-चट्टोपाध्यायं, राधावल्लभं, रमाकान्तशुक्लं, नारायणचन्द्रगोस्वामिनञ्च प्रति विविधकारणात् प्रेषितानि पत्राणि अत्र स्थानितानि। स्वभावकविना सीतानाथेन काले काले नानाः पद्यबन्धाः शुभाशंसा अपि तत्तत्प्रवृत्त्यर्थं प्रेषिताः। तत्तदभिभाषणार्थं गद्येन प्रबन्धविरचनादौ संस्कृतपद्यैरेव प्रस्तुतम्। तानि पद्यान्यप्यत्र संनिवेशितानि। देवगिरा तत्रापि तदुपनिबद्धैः पद्यैः यथा तदुन्मेषो न तथा अन्यथा। पत्रसमुदाये नानापत्राणि विविधवृत्तोपनिबद्धानि विविधालंकारविभूषितानि यानि सहृदयहृदयेभ्यः सुतरां स्वदेरन्। अस्मिन् कवितासंकलने मानवेन्दुवन्द्योपाध्यायानां सारस्वततापसानां महाप्रयाणे कवेः शोकश्रद्धाञ्जलिः विषयीभवति। अत्र करुणरसधारा स्वत एवोच्छलिता परिलक्ष्यते। अन्याः पञ्च कविताः समकालिकान् ध्यानेशनारायण-प्रफुल्लमिश्र-गोपालचन्द्रमिश्र-वाचस्पत्यादीन् सारस्वतज्योतिष्कान् अभिनन्दयन्ति तेषां साधनासाफल्यद्योतिनि क्षणविशेषे। शिष्यायाः परिणयमङ्गले सीतानाथेन स्रग्धराछन्दसा ग्रथितं मङ्गलाचरणम्। अतो विपदि सम्पदि चाभ्युन्नतौ कवेर्लेखनी सततं सञ्चरन्ती वर्तते स्रोतस्विनीव।

पञ्चाधिकशतसंख्यकश्लोकसमन्वितायां 'कविते विश्ववन्दिते' इति नामिकायां

कवितायां काव्यस्वरूपं विविधप्राच्यपाश्चात्त्यदृक्कोणतः कविजनोचितभङ्ग्या समङ्कितुं यत्नो विहितः। अत्र कवितेति पदं काव्यपरकम्। कवितायाः प्रशंसापरकेयं श्लोकावली। अत्र काव्यवैशिष्ट्यानि सरसभङ्ग्योपस्थाप्यन्ते। अष्टचत्वारिंशदधिकद्विशतश्लोकाधारकं 'गौरीनीथचरिता'भिधानं काव्यम् आन्तर्जातिकख्यातिभाजो गौरीनाथशास्त्रिणो जन्मशतवर्षे तदीयशिष्येण कृष्णात्रेयकविः सीतानाथः ससार। काव्यान्ते गुरुं प्रति तस्य प्रणामाञ्जलिर्निवेद्यते कविना –

"गौरीनाथ गुरो क्वास्ते चरितं ते महत्तमम्।
ज्ञानस्य कर्मणो भक्तेर्योगस्य च प्रकर्षवत्॥
तव प्रसादसम्प्राप्त वाचैव विहितं मया।
गङ्गाजलेन पूजा हि गङ्गायाः क्रियते बुधैः"[८८९]॥

छात्रत्वेन अध्यापकरूपेण परिशेषे समाजसंस्कारकतया च गौरीनाथस्य जीवनालेख्यमसाधारणवाङ्नैपुन्येनाङ्कितम्। अनुष्टुप्छन्दसः सावलीलतया प्रयोगे कवेस्तुलना नास्ति।

कवेः सीतानाथस्य अन्येषु काव्येषु यथा कल्पनावैभवस्य उत्तुङ्गतान्तर्मुखीनता ध्वनिश्च विद्यन्ते, तथैवास्मिन् कवितासंग्रहे नास्ति तथाविधं किमपि विशिष्टत्वम्। मुद्रणविधावपि किञ्चिन्न्यूनत्वमस्मन्नयनपथे पान्थायते। किन्तु वैदर्भी रीतिः सर्वत्र राजते कवितासंग्रहेऽस्मिन्। कविवरेण सरलललितपादैः सालंकारञ्च काव्यमिदं परमप्रमोदायोपस्थाप्यते। सीतानाथस्य वाणी व्यञ्जनागर्भा चानिन्द्यसुन्दरीति। तस्य शब्दचयनं राजशेखरभाषया 'रसोचितं शब्दार्थसूक्तिनिबन्धनम्'। कवयित्रा विषयेण समं सायुज्यं विधाय शब्दप्रयोगोऽकारि। भाषा-भावयोरपूर्वसमन्वयेन काव्यमिदमसामान्यमभवत्। काव्यसम्पादने सूक्ष्मेक्षिका कवेः नियतं स्पन्दनशीला प्रतिभा कलात्मिका तुलिका च नीरसे सरसतां दुर्बोध्येऽपि सुबोधतां प्रकाशयति। परं गद्यच्छन्दसां, प्रचलितवृत्तानाञ्च तथा शब्दार्थालंकाराणां संयोजने कवेः सीतानाथस्य दाक्ष्यं सर्वजनविदितमिति।

[८८९]गौरीनाथचरितम् (२४१-२४२)।

३. सीतानाथस्य अनुवादसाहित्यम्

अनुवादसाहित्ये वङ्गीया प्रतिभा चिरं प्रगल्भा चकास्ति। संस्कृतभाषायाम् अनूदितवङ्गीयसाहित्यं द्वेधा विभक्तम् – १. रवीन्द्रसाहित्यम् २. रवीन्द्रेतरसाहित्यमिति। अत्रेदमुल्लेखार्हं यत् रवीन्द्रसाहित्यस्यानुवादक्षेत्रे वङ्गीयकवीनां यादृशः प्रयत्नः न तथा दृश्यते रवीन्द्रेतरसाहित्यानुवादे। परं सीतानाथाचार्यः क्षेत्रेऽस्मिन् विरलः कश्चन, यस्येदानीं यावत् ३ अनूदिताः कविताः नेत्रातिथ्यं गताः। मौलिककाव्यसर्जकस्यास्य मौलिकरचनापेक्षया अनूदितरचनाः प्रविरलतया एव सन्ति। तथापि तत्रापि परिस्फुरन्ति काश्चन मौलिकसौन्दर्यच्छटाः, शब्दविन्यासचारुत्वं, भङ्गिभणितिवक्रिमा च। तेन चतूर्णां कवीनां पञ्चषाः कविता अनूदिताः सन्ति।

१. आत्मविलापः

विविधच्छन्दोभिः अनूदितायामस्याम् 'आत्मविलापा'ख्यकवितायां सर्वमाहत्य १८ श्लोकाः सन्ति। तेषु सप्त त्रिपादी अनुष्टुप्। प्रथमपङ्क्तिचतुष्टयस्य दीर्घतरेण शार्दुलविक्रीडितच्छन्दसानुवादनात् मूले चाविद्यमानानां केषाञ्चित् पदानां योजनावश्यिकी सञ्जाता। परवर्तिपङ्कतिद्वयमुपेन्द्रवज्रावृत्तेनानूदितमिति अधिकपद-योजनाया नानुभूतावश्यकता। दिङ्मात्रमुदाहरणं यथा –

"आश्रयाश्छलनैर्विमोहितमनालब्धोऽस्मि हा किं फलम्
तस्याश्चित्तपथे समापतति हा चिन्ता विचित्रेदृशी।
कालाब्धिं प्रति धावति प्रतिदिनं जीवप्रवाहो मम
प्रत्यावर्तयितुं तमस्मि च कथं शक्नोमि हा साम्प्रतम्॥
दिने दिने हीनतरं ममायुः दिने दिने हीनतरं बलं मे।
तथापि नाशामदमत्ततेयं निवर्तते हन्त क एष दायः"[८९०]॥ इति।

२. रसालस्वर्णलतिकम्

'रसालस्वर्णलतिकम्' इति मधुसूदनस्यापरायाः कविताया अनुवादः। कवितेयं २३ अनुष्टुप्छन्दोभिः प्रथितैः श्लोकैः अनूदितानुवादकेन। एकोपजातिरन्याश्च अनुष्टुभ एव। काश्चनार्धपङ्क्तयः। तत्र रसालस्वर्णलतिकयोरुक्तिं प्रत्युक्तिं निरूपयन्ननुवादको

[८९०]भावविलसितम्, पृ. – ७९।

मूलकवेर्भावराज्याद्बहुदूरे तिष्ठति। उदाहरणं यथा –

"वहति मलये हन्त शिरस्ते जायते नतम्।
मधुकरभारेणापि नम्रतां त्वं प्रपद्यसे॥
वनवृक्षकुलस्वामी हिमादिसदृशोऽरम्यहम्।
उत्थितं मेघालोके मे शिरो भित्त्वा नभःस्थलम्"[८९१]॥ इति।

क्वचिदनुवादो मूलात् प्रशस्यतरः प्रतिभाति उपजात्या चानुष्टुभा। अत्रेदमुल्लेख्यं यत्कवेः लाफँतेनपादस्य कविताया आदर्शेन सीतानाथस्य 'रसालस्वर्णलतिके'ति कविता विरचिता। लाफँतेन-महाभागस्य 'The Dak and the Read' इति कविताया ईषत्परिवर्तितो भावानुवादस्तावत् मधुसूदनदत्तस्य 'रसाल ओ स्वर्णलतिके'ति। सीतानाथेनापि मधुसूदनस्य कविताया ईषत्परिवर्तितोऽनुवादः कृतः।

साफल्येनानुवादसाधनार्थं मूलस्रष्ट्रनुवादकयोः सहृदयसंवादोपेतहृदयता सुतराम् एवापेक्षते, नोचेत् स्रष्टृदृष्ट्या सममनुवादकस्य सृष्टेर्भावगतवैलक्षण्यं नेत्रातिथ्यमापद्यते।

अनुवादकेन प्रायेण भावानुवादो विहितः। यद्यपि न ईप्सितः कदाचिदपि प्रत्यक्षरमनुवादो, यदि सोऽनुवादः मूलस्रष्टृभावं सम्यक्तयोपस्थापयेत्। उदाह्रियते –

"सुधार्थमायान्त्यलयोः हन्तिके मे
लब्ध्वा सुधां ते प्रतियान्ति दृष्टाः।
कः कुत्र दुःखं लभ्यमान आस्ते
प्रियस्य सख्युर्मिलनात् कदाचित्"[८९२]॥ इति।

कवेरितरोऽनुवाद इव अस्मिन्ननुवादे रोचिष्णुता प्रभविष्णुता च नास्त्येव।

३. कर्णधारावधीयताम्

'कर्णधारावधीयताम्' इति विप्लविनः कवेः नजरुल-इसलामस्य 'काण्डारी हुँशियार' इति कविताया अनुवादविशेषः। मूलकविताया भावरक्षणे अवहितेनापि अनुवादकेन छन्दोनियमपारतन्त्र्यात् मूले अविद्यमानानामपि पदानां विहितोऽनुप्रवेशः।

अत्रापि त्रिपद्या अनुष्टुभो दश प्रयोगा द्विपद्या अनुष्टुभौ द्वौ प्रयोगौ सन्ति। ततश्चैका

[८९१]काव्यनिर्झरी, पृ. – ७१।
[८९२]तत्रैव, पृ. – ७३।

इन्द्रवज्रा, अवशिष्टा अनुष्टुभ एव।

मूलस्य भावसाम्राज्यं कथमपि संरक्षत्यनुवादकः –

"दुर्गमा गिरिकान्तारा मरवश्चातिभीषणाः
पारावाराः सुदुष्पाराः समुत्तालोर्मिसङ्कुलाः।
निशिरात्रौ किल लङ्घनीया इमे च दुर्लङ्घ्यतमाः प्रदेशाः
कृतावधानाः परिभूततन्त्रा भवन्तु हे यात्रिजना भवन्तः"[८९३]॥ इति।

कवितेयं पुनः पुनः स्मारयति राधावल्लभस्य गीतधीवरीयं स्वरम्।

४. लेलिनः

'लेलिनः' इति शीर्षकेण मुक्तच्छन्दसानूदितायाः कवितायाः मूलकविस्तावत्सुकान्तः। सीतानाथेन प्रायेणाक्षरशोऽनुवादो विहितः। परं केषुचित्स्थलेषु भावानुवादोऽपि विहितस्तेन। स्वयमेवानुसर्जको निगदति – "मुक्तच्छन्दसा कृतेऽप्यनुवादेऽस्मिन् मूलकविताया भावः शब्दसम्पत्तिः ध्वनिमाधुर्यञ्चाव्याहतानि सन्तीति प्रतिभाति" इति। उदाहरणं यथा –

"मृत्योः समुद्रः शेषः, नौपट्टे लगति उदासः पवनः।
मुक्तेः श्यामलं तीरं चक्षुषि पतति,
आन्दोलितो घासः लेलिनो भूमिष्ठो रक्ते,
क्लीबता समीपे नास्ति ध्यानम्।
विप्लवस्पन्दितवक्षसा, मनसि भवति अहमेव लेलिनः॥" इति।

५. स्काइलार्कं प्रति

आङ्गलकविना शेलिना विरचितायाः 'To the Shylark' इति कवितायाश्छन्दोबद्धानुरूपा वर्तते 'स्काइलार्कं प्रति' इति कविता। अस्मिन्ननुसर्जनकर्मणि कविना व्यवहृतानि १४ छन्दांसि, यासु ९ उपजातयः, १ इन्द्रवज्रा, १ उपेन्द्रवज्रा, ४ इन्द्रवंशाश्च सन्ति। तासु पञ्चमी चतुर्दशी च छन्दसि त्रुटिते।

कविकल्पनाभिः समं चानुप्रासच्छटा अनुरणिता भवति कवितायाः प्रतिच्छत्रम्–

"स्वकल्पनाकल्पितचित्तलोके

[८९३]रामकृष्णमिशन्-विद्यामन्दिरपत्रिका (वेलुडमठम्, कलिकाता), २००९।

सुखासनासीनः स्वयं प्रसन्नः"[८९४]। इति।

अत्रेदमुल्लेखार्हं यद्वैदेशिकभाषाणां भाषान्तरस्य वानुवादावसरे क्वचित् क्वचित् सामाजिकसांस्कृतिकादिभाववैषम्येण प्रकृतस्य भावो भवितुमर्हो विपर्यस्तः। विषयेऽस्मिन् सीतानाथेन मनो दत्तमिति कृत्वा शक्यवचं यदनुवादावसरेऽनुवादसाहित्यस्य मौलिकाः समयास्तस्य मनसि सदा जाग्रता आसन्। तथाह्यनुसर्जकेन प्रयोजनानुसारं आक्षरिकोऽनुवादः परं प्रयोजनाभावे भाषां परिवर्ज्य भावसम्पत्त्यनुसारेण चानुवादः कृतः। दिङ्मात्रमुदाहरणं यथा –

"Yet, if we could scorn
Hate and pride and fear.
If we were things born
Not to shed a tear,
I know not how thy joy we ever
should come near."[८९५]

इत्यस्य पद्यस्यानुवादः सीतानाथेनैवं कृतः –

"घृणां च गर्वं च भयं च शश्वद्
यदीह हातुं प्रभवा भवेम
तथापि तत्तुल्यमनःप्रसादो
लभ्यो भवेद्वेति न वक्तुमीशाः"[८९६]॥ इति।

सीतानाथस्य भाषा सरला सुखबोध्या च। नास्ति तत्र वचनवक्रता। बोधसौविध्यर्थं नास्ति कुत्रापि काठिन्यम्। प्रसादगुणस्य बाहुल्येन दृश्यते प्रयोगोऽनुवादकस्यानूदितासु कवितासु।

[८९४]भावविलसितम्, पृ. – ७८।
[८९५]'सी.आ.क.प्रा. (ऋ) पृ. – ७०-७१।
[८९६]भावविलसितम्, पृ. – ७७।

सप्तमोऽध्यायः

॥ आधुनिकसंस्कृतसाहित्ये भारतवर्षे कवयित्र्यः ॥

वैदिकयुगात् प्रभृति अद्यतनकालं यावद् देवीनां संख्या यथा देशेऽस्माकं संस्कृतावस्यां च प्रविरलैव संदृश्यते, तथैव प्राचीनकालादेव कवयित्रीणां संख्यापि स्वल्पीयसीत्यत्र नास्ति अस्वाभाविकत्वम्। प्राचीनशास्त्रेषु अनेकासां कवयित्रीणां नामानि श्रूयन्ते। शौनकस्य बृहद्देवतायां सप्तविंशतिसंख्यकानां ब्रह्मवादिनीनाम् उल्लेखोऽस्माभिः समुपलभ्यते –

"घोषा गोधा विश्ववारा अपालोपनिषन्निषत्।
ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः॥
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी।
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती॥
श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः"[८९७]॥

श्रूयन्ते मध्ययुगे (चतुर्थशताब्द्याः अष्टादशशताब्दीं यावत्) बह्वीनां शिक्षितानां विदुषीणां नामानि, याभिर्विकशितं संस्कृतसाहित्यमालापञ्चकम्।[८९८] समयेऽस्मिन् प्रख्याताः कवयित्र्यस्तावत् – भावदेवी, चिन्नम्मा, सरस्वती, शिलाभट्टारिका, सीता, विज्जा, विकटनितम्बा, मदालसा, मारुला, मोरिका, गङ्गादेवी, विश्वासदेवी, वीणावाई, प्रियंवदा, पद्मावती, तिरुमलाम्बा, रामभद्राम्बा, देवकुमारिका, लक्ष्मीः राज्ञी चेति। एताश्च कवयित्र्यः समसामयिकालस्य अर्थनैतिक-राजनैतिकाद्यावस्थानां स्पष्टं चित्रमङ्कितवत्यस्तासां कृतिषु। संस्कृतकवयित्रीणां सैतिह्यवाहिनी परम्परा अद्यापि निरवच्छिन्नतया तोयधौ प्रवहन्ती दृश्यते। विशेषेण स्वाधीनतोत्तरवर्तिनि काले भारतवर्षे संस्कृतकवयित्रीणां संख्या नाङ्गुलिमेया।

'शाङ्गधरपद्धतिरि'ति ग्रन्थेऽपि कासाञ्चित्स्त्रीणां नामान्युल्लिख्यन्ते –

[८९७]बृहद्देवता – २।८२-८६।
[८९८]'मालञ्च' इति अपभ्रंशशब्दस्य संस्कृतरूपं तावत् मालापञ्चकम्।

"शीला विज्जा मारुला मौरिकाद्याः।
काव्यं कर्तुं सन्ति विज्ञाः स्त्रियोऽपि॥
विद्यां वेत्तुं वादिनो निर्विजेतुं
विश्वं वक्तुं यः प्रवीणः स वन्द्यः"[८९९]॥ इति।

किन्तु एतासां लेखिकानां वंशपरिचयोऽद्यापि विवादधूमावृतः। श्रूयते प्रियंवदा सप्तदशशतके 'श्यामरहस्यं' लिलेख। विज्जकायाः कस्मिंश्चिच्छलोक आत्मगौरवः प्रकाश्यते –

"नीलोत्पलदलश्यामां विज्जिकां मामजानता।
वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती"[९००]॥ इति।

पुनश्च मम्मटेन 'काव्यप्रकाशे' शीलाभट्टारिकायाः कश्चन रसप्रधानः श्लोक उद्धृतः –

"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते
चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बनीलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते"[९०१]॥ इति।

किन्तु अस्माकं देशे विद्यायाः प्रधाननियन्त्रकशक्तिः एकस्यामेव देव्यां सरस्वत्यां निहिता वर्तते, तथापि अधुनापि स्त्रियः स्वल्पमात्रयैव काव्यानि कुर्वन्ति। नवनवोन्मेषशालिप्रज्ञावशाद्भारतवर्षे खलु विंशशताब्दीया धीमत्यः अङ्गुलिमेयाः कवयित्र्यः स्वप्रतिभापल्लवविस्तारेण प्रयतमाना दृश्यन्ते।

१. नवदशशतकीयाः काश्चन कवयित्र्यः

१.१. आनन्दमयी देवी

आनन्दमयी देवी अष्टादशशताब्द्याः काचन सुपण्डिता विदुषी। सा वेदेभ्यः अग्निष्टोमयज्ञस्य नैकान् वृत्तान्तान् यज्ञकुण्डस्याकारान् च पित्रे विनिवेदितवती। तया

[८९९]संस्कृतसाहित्येर इतिहास (गोपेन्दुमुख्योपाध्यायः, कोलकाता, इउनाइटेड बुक् एजेन्सी)।
[९००]तत्रैव।
[९०१]काव्यप्रकाशः (प्रथमोद्योतः)।

'हरिलीले'ति काव्यं व्यरचि। तस्मिन् काव्ये प्रयुक्तानि पदानि तस्या असामान्यव्युत्पत्त्याः प्रमाणपरकाणि।

१.२. उमादेवी

उमादेवी आसीत् काचन कवयित्री। 'संस्कृतसाहित्येर् इतिवृत्त' इति ग्रन्थे गोपेन्दुमुखोपाध्यायः कवयित्रीष्वुमादेव्या नामोल्लिखितवान्। तया 'आभाणकमाले'ति ग्रन्थे विविधानां भाषाणां प्रवादजातं समेकत्रीकृत्य संस्कृतभाषयानूदितम्।

१.३. उमादेशपाण्डेयः

कवयित्र्या 'अर्चन'[९०२]मिति लघुकाव्यसंग्रहो विरचितो, यत्र विविधसामाजिक-सांस्कृतिकादिविषयाः स्थानं लभन्ते। ग्रन्थेऽस्मिन् ख्यातिभाजां व्यक्तीनामात्मजीवनं तथ्यपुरःसरं विवृणोति उमादेवी।

१.४. ऋतात्रिवेदी

ऋतादेवी एकविंशशतकस्य प्रसिद्धा कवयित्री। राधावल्लभत्रिपाठी 'आधुनिक-संस्कृतसाहित्य-सन्दर्भसूच्याम्' ऋतादेव्याः सारस्वतकर्मणः समुल्लेखञ्चकार। 'सा सूर्याय ते नमः' इति चतुर्भाषामयं काव्यसंग्रहं २०१० खृष्टाब्दे प्रकाशितवती।

१.५. करुणामयी

पश्चिमवङ्गस्य बाँकुडाजिल्लान्तःपातिनः लेगोग्रामे करुणामयी देवी जन्म लब्धवती। सा ऊनविंशशतकस्य कवयित्री आसीत्। न्यायशास्त्रं सा तस्याः मातुलस्य सकाशादधीतवती। तया सह सङ्गीतशिल्पिनः रमापतिवन्द्योपाध्यायस्य विवाहोऽभूत्। विवाहात्परं सा संस्कृतभाषां वङ्गभाषायाञ्च नैकानि गीतानि विरचितवती। 'सङ्गीतबोधः' तथा च 'गीतरत्नावली'ति ग्रन्थद्वितये तया विरचितानि गीतानि स्थानमलभन्त।

१.६. कामक्षी

इयं कवयित्री १९०२ तमे वर्षे अजायत। सापि विशिष्टा काचनाधुनिक-कवयित्री। तस्याः 'रामचरित'मिति काव्यग्रन्थे कालिदासकृतानां महाकाव्यसंक्षिप्तसारो वर्णितः।

[९०२]अर्चनम् – बडौदा, १९७२।

१.७. क्षमाराव:

विंशशताब्द्या विशिष्टेषु कविवरेषु गद्यकृत्सु च क्षमारावोऽन्यतमा। सा १८९० ईशवीयाब्दे शङ्करपाण्डुरङ्गपण्डितस्य कन्यारूपेण जनिमलभत। शैशवे पितुर्मृत्योरनन्तरं क्षमा महता कष्टेन दुःखेन च जीवनं यापितवती। बोम्बाइनगर्यां सा विद्यामर्जितवती। सा लिलेख बहूनि मौलिककाव्यानि। तानि यथा – मीरालहरी', 'सत्याग्रहगीता', 'उत्तरसत्याग्रहगीता', 'उत्तरजयसत्याग्रहगीता', 'कथापञ्चकम्', 'शङ्करजीवनाख्यानम्', 'विचित्रपरिषद्यात्रा', 'नामदेवचरितम्' चेति। अनया 'तुकारामचरित'मिति महाकाव्यमपि व्यरचि, यच्च बोम्बेनगर्य्यां १९४७ ईशवीयाब्दे प्रकाशितम्।

पराधीनतायाः दुःखवह्निना यदा भारतीयानां मनःसु आन्दोलनस्यौघाः प्रबलाः प्रपतितास्तदा क्षमाया ह्यपि स्वाधीनताप्राप्त्यये वैप्लविकी प्रचेष्टाजायत। स्वाधीनतान्दोलनेन प्रभावभाविता सती सा महात्मागान्धिनो जीवनादर्शं केन्द्रीभूय 'सत्याग्रहगीता', 'उत्तरसत्याग्रहगीता', 'उत्तरजयसत्याग्रहगीता' चेति महाकाव्यत्रयं व्यरचयत्। 'मीरालहरी' इति खण्डकाव्ये तथा च कतिपयासु कथासु गद्यपद्यादिमुखेन तस्याः विरलमानवीयभावाः समभिद्योतिताः। तस्याः 'ग्रामज्योतिरि'ति कथाकाव्यमिति १९५४ तमे वर्षे 'जी० सी० चटर्जी एण्ड कम्पनीतः' प्रचरद्रूपतां गतम्। तया विरचितग्रन्थेषु 'कथामुक्तावली' प्रसिद्धा। तत्र तया अत्युत्कृष्टं गद्यं साहित्यं संप्रयुक्तम्। १९५३ तमे वर्षे सा कवयित्री अमृतालोकं गता।

१.८. ज्ञानसुन्दरी

ज्ञानसुन्दरी प्रख्यातस्य कुप्पुस्वामिशास्त्रिणः छात्रासीत्। सा १९१० खृष्टाब्दे इहलोकं परित्यज्य परलोकं गता। 'हालास्यचम्पूरि'ति चम्पूकाव्यं षट्स्तवकैः प्रपूरितं ज्ञानसुन्दरीदेव्या। 'कविरत्ना'ख्योपाधिमवाप सा। आसीत्सा तदानीन्तनकालस्य विशिष्टैका नृत्यशिल्पी।

१.९. त्रिवेणी

अर्वाचीनसंस्कृतसाहित्यवीथिकायां त्रिवेणी कवयितृरूपेण प्रतिष्ठिता अवर्तत। सा १८१० ईशवीये वर्षे जनिं लेभे। विवाहात्पूर्वमेव तस्याः कवताविरचनाग्रहः

प्रकाशितः सम्बभूव। समस्यापूर्तौ सासीद् अतीव दक्षा। तया विरचिताः कवितास्तावत् 'लक्ष्मीसहस्रम्', 'रङ्गनाथसहस्रम्', 'शुकसन्देशः' 'भृङ्गसन्देशः', 'रङ्गाभ्युदयम्', 'सम्पत्कुमारविजयञ्चे'ति। 'रङ्गराट्समुदयः' 'तत्त्वमुद्राभद्रोदयश्चे'ति रूपकधर्मिनाटकद्वयं तेन व्यरचि। १८८३ ईशवीये वर्षे सा परलोकं गता।

१.१०. नलिनीशुक्ला

नलिनी आधुनिकसंस्कृतसाहित्ये विशेषेण कथाकाव्यादिकृत्स्वन्यतमेत्यत्र नास्ति विप्रतिपत्तिः। सा 'व्यथिते'ति नाम्ना यशो लभते स्म। १९४० ईशवीयाब्दस्य जुनमासस्य अष्टमदिनाङ्के सा इटाओयाजनपदस्य कन्धेसीग्रामं स्वजन्मनालंकृतवती। तस्याः पिता हि पण्डितः इन्द्रदत्तमिश्रः। नलिनी पाठं समाप्य कानपुरस्य ए. एन्. डि. नामके महाविद्यालये संस्कृतविभागस्य प्राध्यापिकाभूत्।

संस्कृतभाषया तया बहवो मौलिकग्रन्थाः विरचिताः – १. भावाञ्जलिः २. स्वरूपलहरी ३. प्रकीर्णम् (१९७६) ४. प्रमथरश्मिः ५. तर्कभाषासमीक्षणम् ६. कथाम्बरा ७. योगभाष्यालोकः ८. गीतम् (१९८१) ९. सप्तकम् १०. निर्झरिणी ११. वाणीशतकम्[९०३] चेति।

उत्तरप्रदेशस्य सर्वकारात् सा वारत्रयं पुरस्कारं प्राप्तवती कारयितृप्रतिभायै। 'भावाञ्जलि'नामके संस्कृतकाव्यग्रन्थे तस्याः सहजा स्पन्दनशीला कविप्रतिभा परिस्फुरति स्म। देवस्तुतिरिह काव्यसंग्रहे मुख्यतया पदं करोति। भारतीयसंस्कृतेः उज्जीवनसन्दर्भे तस्याः स्वकीयजीवनाभिव्यक्तिश्चित्रिता –

"विचार्य त्वया सा पुरा भारतीया
महिमोज्ज्वला विश्वपूज्या स्वकीया।
प्रकृष्टोन्नता ख्यातिरद्यापि गेया।
गरिम्ना स्थिता भारते माहि मुग्धे।।
अहो संस्कृते त्वं कुतो यासि रुष्टे ?"[९०४]

भाषायाः सारल्यं, माधुर्यं, चित्ताकर्षकञ्चेति गुणाः तस्याः कवित्वप्रतिभायां

[९०३]वाणीशतकम् (काव्यम्) – कानपुरम्, १९५६।
[९०४]आ.स.सा.रू., पृ. – १०५।

राजन्ते। अस्मिन् काव्यग्रन्थे कवेर्जयदेवस्य प्रभावः स्फुटः –

"प्रिये चारुशीले क्षणं मुञ्च मानम्
सुधां मे सुखान्निःसृतां देहि दानम्।
क्षणं हास्यज्योत्स्नां वितर मानिनी मे
तृषां चापनय राधिके रागरूपे"॥ इति।

तया 'पार्वतीतपश्चर्या' 'राधानुनय'श्चेति नृत्यनाटिकाद्वयं व्यरचि, यत्र कत्थकशैली समादृता।

१.११. पराम्बाश्रीयोगमाया

प्रतिभामञ्जरीरथ-कादम्बिनीदाश-विनोदिनीनाथ-मनोजाप्रियदर्शिनी-सवितादाश-प्रतिभाषङ्गी-श्वेतपद्माशतपथी-सुदीप्तावारिक-शिप्रामल्लिक-पराम्बाश्रीयोगमादयः बह्वः उत्कलीयाः कवयित्र्यो न केवलं पदेन प्रतिष्ठिताः अपि तु संस्कृतशोधक्षेत्रे, प्रकाशनक्षेत्रे काव्यादिरचनाक्षेत्रे च लब्धसम्मानाः वर्तन्ते। तत्रोल्लेख्यं यत् २००९ ईशवीयसंवत्सरे पराम्बाश्रीयोगमाया भाऊरावदेवरसन्यासस्य अखिलभारतीययुवसाहित्यकारसम्मानेन सम्मानिता तथा च २०१४ ईशवीयसंवत्सरे केन्द्रियसाहित्य-अकादम्या युवपुरस्कारेण सभाजिता।

सा खलु नवीनानां कथा-काव्य-समीक्षा-अनुवादानां पथप्रदर्शिका वर्तते। अस्याः लेखिकायाः रचनाविश्वमेवं वर्तते 'मन्दाकिनी' (संस्कृतप्रबन्धसङ्ग्रहः) 'मृत्युः चन्द्रमसः' (अनूदित उपन्यासः), 'सम्पर्कः', 'हे मदीय दूरबन्धो', 'उपनिषत्सु प्राणविद्या' (शोधग्रन्थः) च।

तत्र 'मृत्युः चन्द्रमसः' इति काश्चन अनूदितकथाः अतिरिच्य एषा डॉ० गोकुलानन्दमहापात्रलिखितं "चन्द्रर मृत्यु" इति उपन्यासं "मृत्युः चन्द्रमसः" इति शीर्षकेण अन्ववदत्। अयमुपन्यासः २००७-८ वर्षयोः 'संस्कृतसम्भाषणसन्देश' इति प्रसिद्धे संस्कृतमासिके धारावाहिनीरूपेण प्रकाशितः, अनन्तरं २००९ संवत्सरे पुस्तकरूपेण प्रकाशितः।

तस्याः 'सम्पर्कः' इति कथाग्रन्थः अस्या ऐषमः साहित्येकादम्याः युवपुरस्कारेण सभाजितः। अत्र सङ्गृहीताः कथाः विविधासु पत्रिकासु प्रकाशिताः। सर्वा अपि कथाः

नायिकाप्रधानाः। सर्वा अपि कथाः नारीवादेन प्रभाविताः। कासुचित् कथासु समाजस्य दुःस्थितीः स्पष्टशब्दैः वर्णयन्त्यां लेखिकायां रोमाण्टिक् – विरोधवादस्य (Anti Romanticism) छायापि दृश्यते एव।

पराम्बायाः काव्यसंग्रहः 'हे मदीय दूरबन्धो'-शीर्षकमत्र स्थानितायाः 'मेधप्रबोधनम्' इति कवितायाः उपान्तपङ्क्तिः। असमये प्रभूतवारिवर्षणमेकदा मनसि भावान्तरमजनयत् तथा 'मेधप्रबोधन'मिति कवितायाः सृष्टिः।

१.१२. पुष्पादीक्षितः

अस्याः कवयित्र्याः रचितसंगीतेषु नारीस्वाधिनतायाः प्रभावोऽभिव्यक्तः। 'अग्निशिखे'ति संस्कृतगीतिकवितां विरच्य काव्यजगति पुष्पादीक्षितस्य प्रथमाविर्भावो दृश्यते। अयं पञ्चाशत्कवितानां संग्रहो वर्तते। अत्र प्रेमिकाद् विच्युता सती काचन रमणी स्वजीवने दुःखभाराक्रान्तमनसा स्वमनोव्यथां प्रकटीकरोति। ग्रन्थोऽयं १९८४ तमे वर्षे प्रकाशितोऽभूत्। अग्निशिखायाः संगीतेषु प्रविरलतया बुद्धिदीप्तवाक्षु च प्रेम-प्रीति-विरहभावाः समभिव्यञ्जिताः।

१.१३. प्रवेशा साक्सेना

प्रेवशा उत्तरप्रदेशस्य कवयित्री। पञ्चाशत् श्लोकैः सम्पूर्णे 'अनुभूति'[९०५]रिति काव्यसंग्रहे इतरभाषाभ्यः कविताः गीर्वाणवाण्यानूदिताः कवयित्र्या। तस्याः 'राष्ट्रदेवताः'[९०६] इति कवितासंग्रहं पाठं पाठं पाठकानां मनो मोमुद्यते। तया व्यस्ततया विरचितं 'दीपिता', 'स्वतन्त्रतादिवस'श्चेति कविताद्वयमुल्लेखार्हम्।

१.१४. मिथिलेशकुमारीमिश्रा

१९५३ ईशवीयाब्दे जनिं लब्ध्वा कवयित्री इयं साहित्यशास्त्र-शिल्पादिकम् अवलम्ब्य प्रबन्धादिकं विरच्य विशेषेण ख्यातिमगात्। सा कारयितृप्रतिभया खण्डकाव्य-कथा-उपन्यासादि-मौलिकग्रन्थान् विरचितवती। तस्याः प्रसिद्धानि काव्यानि तावत् – 'व्यासशतकम्' (१९८२), 'काव्यायनी' (पञ्चाशद्गीतानि), 'चन्द्रचरितम्' (सुभाषजीवनाश्रितम्), 'लघ्वी' (मिश्रकथासंग्रहः), 'आधुनिका' (कथा),

[९०५]अनुभूतिः – परिमलपावलिकेशन, दिल्ली, १९९६।
[९०६]राष्ट्रदेवताः – दे.पी.पावलिसिं हाउस, दिल्ली, २००१।

'आम्रपाली' (९८८४), 'जिगीषा'[१०७], 'दशमस्त्वमसि' (श्लेषमूलकं नाटकम्) चेति।

१.१५. मेनन-देवकीदेवी

तामिलनाडुप्रदेशस्य माद्रास्-नगर्याः कस्यचिन्महाविद्यालयस्याध्यक्षपदम् अलंकृतया देवकीमेननदेव्या प्रेक्षणकत्रयं ग्रथितम्। तच्च –

क. कुचेलवृत्तम्[१०८] (सङ्गीतप्रेक्षणकं सप्ताङ्कविशिष्टम्)
ख. शैलेन्ध्रीप्रेक्षणकम् (एकाङ्कविशिष्टे प्रेक्षणकेऽस्मिन् कृष्णासक्तायाः कुब्जायाः शौरन्ध्याः कथा वर्णिता।)
ग. कालीदर्शनम्[१०९] (रूपकम्)
घ. श्रीसारदादेवीचरितसंग्रहः[११०]

१.१६. वनमाला भाओयालकरः[१११]

काचन स्वल्पप्रसिद्धा कवयित्री वनमाला 'रामवनगमनम्', 'पार्वतीपरमेश्वरीयम्' (सङ्गीतिका, सागरविश्वविद्यालयः, १९६६), 'सीताहरणम्', 'अन्नदेवता' चेति मौलिकग्रन्थान् विरचयति स्म। तद्विरचितानि संगीतानि उज्जयिन्यां कालिदाससमारोहे मञ्चस्थान्यभवन्। 'रामवनगमन'मिति रूपके तालरागादिपुरःसरं रामस्य वनगमनकथा चित्रिता। महादेवस्य विवाहकथा गीतिमाध्यमेन वर्णिता 'पार्वतीपरमेश्वरीय'मिति रूपके। अनया 'आधुनिकसंस्कृतकाव्यम्' इति काव्यसंग्रहो व्यरचि।

१.१७. वलम्मल्

इयं पश्चिमभारतस्य प्रखातेषु उपन्यासकृत्सु एकतमार्वाचीनसंस्कृतसाहित्यं स्वकारयितृप्रतिभादीप्त्या विभूषयति स्म। माद्रासनगर्यां सोवास। 'आर्यारामायणमि'ति

[१०७]जिगीषा – वाणीवाटिकाप्रकाशनम्, पाटना, १९६१।

[१०८]१९६१ ईशवीयाब्दे संस्कृतप्रतिभायां प्रकाशितम्। संगीतप्राचुर्यादिदं रूपकं 'अपेरानाटकमपि कथ्यते।'

[१०९]कालीदर्शनम् – संस्कृतप्रतिभा, अक्टुबर, १९६१।

[११०]श्रीसारदादेवीचरितसंग्रहः – श्रीरामकृष्णमठः, मद्रास्, १९७८।

[१११]सागरविश्वविद्यालयस्याध्यापिका वनमाला न केवलं संस्कृतभाषया, परं माराठीभाषायां स्वस्याः कारयितृप्रतिभयाः दाक्ष्यं प्रादात्। सा स्वयमेव प्रयोगनिर्देशिका, संगीतज्ञा अभिनेत्री चासीत्। इयम् उत्तरप्रदेशसर्वकारेण सभाजिता अवर्तत।

मौलिककाव्यसंग्रहे सरलश्लोकैः महाकाव्यीयसारः समुपवर्णितः।

१.१८. वीणापाणि-पाटनी

इयं प्रख्याता कथाकारा प्रबन्धिका चेति। १९३२ ईशवीयाब्दे कवयित्री जनिं लेभे। संस्कृतपरिवारस्य संस्कारस्तस्याः आत्मना आसीत् निविष्टः। 'अपराजिता' नाम कथानां संग्रहं १९९४ ईशवीयाब्दे प्रकाशितवती सा। कथासंग्रहे अस्मिन् 'अपराजिता', 'कुलीना', 'शङ्खनादः', 'अनुगृहीता', 'जागरितः', 'एकोऽन्यशिविः', 'वातायनञ्चे'ति कथाः स्थानिताः। कथासु मध्यवित्तपरिवारस्थानां स्त्रीणाम् अन्तर्व्यथा समस्याश्च वर्णिताः। 'मधुराम्लम'मिति एकाङ्करूपकं १९८६ तमे वर्षे नागप्रकाशनतः प्रचरद्रूपतामितम्।

१.१९. वेदकुमारीघाइ

इयं काचन जम्मुराज्यवास्तव्या वरिष्ठा कवयित्री। सा 'रामप्रतापः' इति काव्यं तथा स्त्रीपञ्चकजीवनाधारितं 'पुरन्ध्रीपञ्चक'मिति नाटकपञ्चकञ्च विरचितवती। सा हि नारीस्वातन्त्र्यतावादिनी चासीत्। तथाहि नारीणां जीवनस्य दुःखदैन्यादिकञ्च रोचिष्णुतयालिखितं तया।

१.२०. रयम्मा

रयम्मा अपरैका कवयित्री १८७७ ईशवीयाब्दे वङ्गालोरनगर्यां जन्म लब्धवती। सा च माद्रासप्रदेशस्थिते लेडि-उइंटन-महाविद्यालये संस्कृतपण्डितरूपेण अध्यापितवती। तया 'चन्द्रमौलिरि'ति सामाजिकोपन्यासः लिखितः।

१.२१. लक्ष्मीः

इयं केरालाप्रदेशस्यान्यतमा कवयित्री। सा सर्गत्रितयात्मकं 'शान्तिगोपालकाव्यं' रचितवती। कृष्णः सर्गान्मृतब्राह्मणपुत्रत्रयं समानीतवानिति विषयमाश्रित्य काव्यमिदं ग्रथितम्। अन्तिमे सर्गे यमकालंकारस्य पाण्डित्यपूर्णो व्यवहारो दृश्यते।

१.२२. लीलारावः दयालुः

सुप्रसिद्धकवयित्र्याः क्षमायाः कन्येकेयं लीला संस्कृतकाव्यप्रणयनस्य प्रेरणा मातुः प्राप्तवती। तया जनन्याः कथात्मकरचनाः सम्यग् रूपकायिताः। तस्याः कृतयः

१८५५ ईशवीयाब्दाद् १८६५ ईशवीयाब्दं यावद् मञ्जुषाख्यसंस्कृतपत्रिकायां प्रायशः व्यस्तरूपेण प्रकाशिताः। तस्याः कृतिषु निम्नलिखिताः प्रसिद्धाः सन्ति – १. गिरिजायाः प्रतिज्ञा २. बालविधवा (मञ्जूषा, १९९५) ३. होलिकोत्सवः ४. क्षणिकविभ्रमः ५. गणेशचतुर्थी ६. मिथ्याग्रहणम् ७. कटुविपाकः ८. कपोतालयः ९. वृत्तशंसिच्छत्रम् १०. स्वर्णपुरीकृषीवलाः ११. असूयिनी (मञ्जूषा, १९५८) १२. वीरभाः १३. तुकारामचरितम् (१९६५) १४. ज्ञानेश्वरचरितम् १५. जयन्तु कुमाउनीयाः १६. तुलाचलाधिरोहणम्[११२] चेति।

लीलाया रूपकाणि साम्प्रतिकशैलीमनुवर्तन्ते। तेषु प्रायः समसामयिक-समस्यानाम् अभिव्यक्तिः दृश्यते। तत्र नाट्यनिर्देश-रङ्गनिर्देशयोः प्राचुर्यं वर्तते। क्षमारावद्वारा लिखिताया आख्यायिकायाः सम्यग् रूपायणं प्रस्तुतं 'मायाजालं' नाम। कृतावस्यां संवादाधिक्यं वर्तते। किन्तु मञ्चे कार्यस्याभावोऽस्ति। अपि च, क्षमारावद्वारा विरचिता 'गिरिजायाः प्रतिज्ञा' इति नाम्नी आख्यायिका लीलया रूपकायिता। 'होलिकोत्सवो' नामैकाङ्करूपकं दृश्यत्रितयात्मकम्। अत्र होलिकावसरे ग्राम्यश्रमिकपरिवाराणां स्थितेश्चित्रणं रोचिष्णुतया भावुकतोपेतं वर्तते।

'वृत्तशंसिच्छत्र'मिति रूपके जामातैकः श्वश्रूं प्रत्यासक्तो दर्शितः। त्यागी महात्मा (त्यागी बाबा) रामां (रामीम्) प्रति स्वविवाहं प्रस्तावयति। अस्मिन् रूपके योरपीया रीतिः सर्वत्रैव अनुसृता वर्तते।

'मीराचरितं' क्षमारावस्य मीरालहरीम् उपजीवति। मीराया जीवनस्य हरिभक्तिपराः सर्वाः घटनाः चित्रिताः। रूपके त्रयोदशदृश्यानि विलसन्ति। मङ्गलाचरण-भरतवाक्ययोः व्यवहारो न दृश्यतेऽत्र।

'क्षणिकविभ्रमे' रूपके ग्राम्याध्यापकानां दारिद्र्यम्, 'गणेशचतुर्थ्याम्' अन्धविश्वासनिराकरणम् तथा च 'बालविधवा'यां स्वल्पवयस्कायाः युवत्याः यन्त्रणाविद्धजीवनं रोचिष्णुतया कवयित्र्या वर्णितानि।

'स्वर्णपुरीकृषीबलाः' इति एकाङ्कस्य रूपकस्य त्रिषु दृश्येषु स्वर्णपुरकृषकाणां भूकराप्रदानस्य सत्याग्रहस्य तथा च आङ्गलानाम् अत्याचारस्य कथा रूपकायिता

[११२]तुलाचलाधिरोहणम् – विश्वसंस्कृतम्, साधु-आश्रमः, हासियारपुरम्, पाञ्जावः, १९७२।

वर्तते। अत्र महात्मागान्धिनः स्वाधीनतासंग्रामाय आत्मत्यागः चरित्रमुखेन वर्णितः। 'जयन्तु कुमाउनीयाः' इति नाट्यकृतिः लीलायाः परवर्तिरचनासु अग्रगण्या। हिमालये चीन-भारतयोः युद्धस्य कथा रूपके चित्रिता। सैनिकजीवनस्य मनोव्यथां कवयित्री तेषां दृष्ट्या आलोक्य अनुपमतया विषयीकरोति। रूपकेऽस्मिन् सैनिकानां जीवनकथासम्बद्धानि गीतानि वर्तन्ते। 'तुकारामचरिते' तुकारामस्य जीवनस्य निदारुणा व्यथा एकादशाङ्कैः विन्यस्ता। अत्र आद्यन्तं पद्यात्मकसंवादा विलसन्ति। महात्मनो ज्ञानेश्वरस्य समस्तजीवनसंग्रामगाथा चतुर्दशदृश्येषु विन्यस्ता संलक्ष्यते 'ज्ञानेश्वरचरिते'। 'विरभाः' नामैकाङ्करूपकस्य नायिका वीरभा यौवनावस्थायां सर्वं परित्यज्य तपस्विजीवनमङ्गीकृतवती। उल्लेख्यं यत् लीलायाः सहृदयहृदयदर्पणे भूयो भूयः पराधीनतायाः ग्लानितो मुक्तेरुपायं मृगयति।

१.२३. श्रीमती कमलारत्नम्

कवयित्रीयं १९१४ ईशवीयाब्दे जन्म लब्ध्वा संस्कृतमातुः सेवायाम् आजीवनं व्यापृतवती। कालिदाससम्पर्के सविशेषं ज्ञानाय सा 'कालिदासविदुषी' नाम्ना ख्यातिमगात्। तया रूपकपञ्चकं विरचितम् – 'बालरूपकम्', 'नचिकेतोयमसंवादम्', 'विवेकानन्दविजयम्', 'विवेकस्मृतिः', 'विक्रमवेतालनाटिका', 'अखिलं विश्वं राममयम्' चेति। तस्य रूपकेषु ऐतिहासिकचरित्राणि यथा स्थानं लभन्ते, तथैव प्राचीनभावावेगाभ्यां समम् आधुनिकजीवनस्य मेलबन्धनम् अस्माभिर्दृश्यते। सा १९९१ खृष्टाब्दे लोकान्तरिताभूत्।

१.२४. सुन्दरवल्ली

इयं दक्षिणभारतस्य प्रख्यातस्य नरसिंह-अय्यङ्गारपादस्य कन्या। सुन्दरवल्ली ऊनविंशशताब्द्यां संस्कृतसाहित्यक्षेत्रे विशिष्टयोगदानं कृतवती। कस्तुरी-रङ्गाचार्यस्य सकाशात् सा शास्त्राण्यधीतवती। सर्गषट्कविशिष्टस्य 'रामायणचम्पूरि'ति काव्यस्य रचयित्री खलु सा।

१.२५. सौ.दुर्गा पारखी

राष्ट्रसन्त-तुकोजीमहाराज-नागपुर-विद्यापीठस्य वाङ्मयपारङ्गतपरीक्षायाम् उत्तीर्णा। एम्.फिल्.-पदवीधरेयं सेवानिवृत्ता शालेयशिक्षिका। सा

संस्कृतसम्भाषणान्दोलने सक्रिया अस्ति। संस्कृतयोगदानाय कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य राष्ट्रिय-संस्कृत-परिषदि सत्कृता। तस्याः 'काबुलीवाला' नाम रूपकम्, 'प्रहेलिकाशतकम्', 'कथासुमनस्सौरभम्' चेति मौलिकाव्यानि पुस्तकानि प्रकाशितानि। तया 'बालकथावल्लरी'[११३]ति त्रिंशद्बालकथानां संग्रहो रचितः। ग्रन्थेऽस्मिन् शिशुविभागस्य अष्टौ बालकथाः तथा च बालविभागस्य द्वाविंशतिः बालकथाः विलसन्ति।

२. वङ्गदेशीयाः संस्कृतकवयित्र्यः

आधुनिकसंस्कृतसाहित्ये भारतवर्षस्य प्रदेशान्तराणामिव वङ्गीयकवयित्रीणाम् योगदानानि अनस्वीकरणीयानि। वङ्गेषु विंशशतकस्य याः खलु कवयित्र्यः सर्वाधिकतया प्रशंसापदवीं गतास्ताः खलु अर्चनापुरी-बेलादेवी-रमाचौधुरी-गौरीधर्मपालाः-जयश्रीचट्टोपाध्याय-जयश्रीनागाः विशिष्टाः। संस्कृतसाहित्ये तासां सारस्वतदानानि सम्यक्तयालोच्यन्ते।

२.१. अर्चनापुरी

वङ्गप्रदेशस्य अङ्गुलिमेयासु प्रख्यातासु कवयित्रीषु अन्यतमा ह्यर्चनापुरी। १९२८ तमे वर्षे जुलाइमासस्य त्रयोविंशतितमे दिवसे वङ्गदेशाधिकृतदिनाजपुरमण्डले सा जनिं लब्धवती। किन्तु वङ्गान्तर्गतवीरभूमजिल्लान्तःपातिनः शिउड़ीनामके स्थाने सा तस्याः बाल्यजीवनमतिवाहितवती। पञ्चदशतमे वर्षे सा सन्न्यासधर्मं संगृह्यापि संस्कृतसाहित्यविरचनकर्मणि आत्मानं नियोजितवती। अत्रेदमुल्लेखार्हं यत् सा कलिकातास्थितस्य सत्यानन्ददेवायतनस्य पवित्रमातृत्वेन परिचिताभूत् परवर्तिकाले। कारयितृप्रतिभावशादेव तया विरचितेषु साहित्यकर्मसु प्रायेण सर्वाणि एवाध्यात्मिकमूलकानि वर्तन्ते। तेष्वन्यतमानि नाटकानि यथा –

क) कपटसाधुः
ख) पम्पासरोवरस्य वायसभेकौ
ग) कर्षकस्य इच्छाप्राबल्यम्

[११३]बालकथावल्लरी – संस्कृतभारती, गोवा, २०१६।

घ) कौतुकप्रदा परीक्षा
ङ) उन्मादस्य चिन्ता चेति।

क). कपटसाधुः[११४]

रूपकस्यास्य विषय एवम्– साधुवेशधारी कश्चन चौरः स्वात्मानं रक्षितुं ग्राम्यजनानां प्रहारात् पांशुपूर्णेन देहेन जुगुप्समानः साधुवदाचरति। निरपराधाः सर्वे ग्रामवास्तव्यास्तं साधुरिति विचिन्त्य भक्तिपूर्णमनसा तस्य प्रार्थनां ज्ञापयन्ति। अपि च, सर्वे तस्मै नैवेद्यं निवेदयन्ति। भविष्यति दृश्यते यत् स समाधिं लब्धवान्। कस्यचित् पापिनः चौरस्य कथंकारं प्रकृतसाधुत्वलाभः तथा तस्य च नैतिकमाध्यात्मिकमुत्तरणमत्र अर्चनापुरी रोचिष्णुतया परिवेशितवती। तथाहि साधोः स्वगतोक्तिः – 'एतस्य अर्थः विगतरात्रौ अहमासं मिथ्यासाधुः। अद्याहं तु प्रकृतसाधुः प्रकृतसाधुः प्रकृतसाधुः'[११५] इति।

१९९१ ईशवीयाब्दे 'सत्यानन्द'मिति पत्रिकायां नाटकमिदं प्रकाशपदवीं गतम्। उल्लेख्यं यन्नाटकमिदं कथारूपेण श्रीरामकृष्णपरमहंशदेवः वारं वारम् अनुरागिभ्यः वङ्गगिरा कथयन् आसीत्। समालोचकया ऋताचट्टोपाध्यायेन उक्तम् – "Thus the drama shows in simple sanskrit and lucid style, that how even the imitation of character of a saint may convert a sinner to a saint and may cause his upliftment."[११६] इति।

ख) पम्पासरोवरस्य वायसभेकौ

काव्यमिदमाध्यात्मिकभावोपेतम्। ईश्वरेच्छया जगदिदं नियतं परिवर्तते। अशुद्धचैतन्योपहितस्य शुद्धचैतन्यात्मकस्य शुद्ध-बुद्ध-मुक्तस्वभावरूपस्येश्वरस्य सर्वव्यापित्वाद् आनन्ताच्च स सर्वस्मिन् क्षुद्रातिक्षुद्रवस्तुन्यपि राजते। तथाह्यगादि कवयित्र्या – "आ ब्रह्मणः कीटपर्यन्तं सर्वमेव भगवतो हि लीलाप्रकाशस्य

[११४]सत्यानन्दम्, जुलाइमासि,१९९१।
[११५]कपटसाधुः (सत्यानन्दम्), पृ. – ८।
[११६]S.L. (20th) p. – 275.

महत्क्षेत्रम्"[११७] इति। १९९१ ईशवीयाब्दे नाटकमिदं प्रकाशितमभूत्। अत्र कवयित्र्याः उपनिषद्भावनाभिव्यक्ता।

ग) कर्षकस्य इच्छाप्राबल्यम्

आत्मोत्सर्गस्य शक्तिर्यदि कस्यचिन्मनसि जागरिता भवति तर्हि स चरमाध्यात्मिकशक्तेः प्रतीकरूपेण ईश्वरसायुज्यं लब्धुमर्हेत्। हाराधननामधेयः कश्चित् कृषकोऽत्र चरमाध्यात्मिकशक्तेः मूर्तविग्रहत्वेन चित्रितः। तस्मिन् कृषके वैराग्यभावो जागरितः। तथाहि कवयित्र्या कथितम्– "अयं कर्षकः तीव्रवैराग्यस्योपमानम्।"[११८] इति।

गुपिनामकः कश्चन पार्थिवस्वार्थं क्षुद्रं परित्यक्तुं नालम्। स हि मन्दवैराग्यस्य प्रतिनिधिः। विद्यते विषयैषणायाः प्राबल्यं गुपौ। अध्यात्मिकभावनया प्रभावितं न जातं तच्चित्तम्। तथाह्युक्तम्– "तद्धि मन्दवैराग्यस्योपमानम्।"[११९] इति।

घ) कौतुकप्रदपरीक्षा[१२०]

सत्यानन्दस्य जीवनमवलम्ब्य रचितमिदं नाटकम्। सत्यानन्द आसीत् आध्यात्मिकजगत परमः पुरुषः। कथाच्छलेन भक्तानां कृते आत्मतत्त्व-लिप्सायाः पन्थास्तेन निर्देशितः। तस्य साधारणं चित्ताकर्षकं जीवनमस्माकं हृत्सु स्थानं लभमानमस्ति। नाटकेऽस्मिन् कथंकारम् अलौकिकचमत्कारपद्धत्यां स तस्य भक्तवृन्दानां मनःसु आध्यात्मिकताया वाणीं तनोतीति विषयीकरोति सरलया गीर्वाणवाण्या नाट्यकारः।

ङ) उन्मादस्य चिन्ता[१२१]

सा ऐश्वरिकचिन्तया चिन्तितो दृश्यते सत्यानन्दः। तस्य ऐकान्तिकसाधनैवास्य नाटकस्य विषयः। तथाहि तस्य स्वगतोक्तिः संस्मरणीया– "जागतिकमाहार्यं न मम प्रकृतमाहार्यम्। भगवद्ध्यानं हि मम प्रकृतमाहार्यम्। भगवद्ध्यानं मम विश्रामः।"[१२२] इति।

[११७] सत्यानन्दम्, जानुयारीमासि, १९९१।
[११८] तत्रैव, मे-जुनमासयोः १९९०, पृ. – ५।
[११९] तत्रैव, पृ. – ५।
[१२०] सत्यानन्दम्, मे मासि, १९८८।
[१२१] तत्रैव, मार्च मासि, १९९१।
[१२२] तत्रैव, पृ. – ४।

१९९१ ईशवीयाब्दस्य मार्च मासि सत्यानन्दपत्रिकायां नाटकमिदं प्रचरद्रूपतां गतम्।

दृश्यते अर्वाचीनसंस्कृतसाहित्यस्य इतिहासे अर्चनापुरीनामिकायाः कवयित्र्याः नाटकेषु तत्कालिकसमाजस्य ऐशीभावना प्रतिपदमुट्टङ्किता। काव्यादिविनिर्माणावसरे तस्याः रामकृष्णभावान्दोलनस्य प्लावनेन साहित्यजगदासीत् प्लावितम्। स्वाभाविकतया तस्याः सर्वासु रचनासु रामकृष्णभावधारा प्रतिपदं प्रतिभासते। ऋताचतुर्धुरिणा लिखितम्–

"Among them the first three are based on the popolar and interesting stories repeatedly and inspiringly narrated by *Śrī Rāmakṛṣṇa Paramahaṁsadeva* and bearing some deep plilosophical truths."[१२३] इति। आध्यात्मिकविश्लेषणस्यान्तर्दृष्टिस्तलस्पर्शिता च तस्यां राजेते। सा आत्यन्तिकेन मानवजीवनदर्शनस्य मूलीभूतं तत्त्वं ज्ञातवती। नाट्यकृतः रचनासु भाषा सरला सर्वजनग्रहणयोग्या च। तस्या रचनेयम् एकविंशशतकस्य पुरुषकवीनपि प्रभावयन्ति स्म।

२.२. बेलादेवी

ऊनविंशत्यधिकनवशतैकसहस्रतमे वर्षे पश्चिमवङ्गान्तर्गते नदीयामण्डले बेलादेवी अजायत। लिलेख वङ्गभाषायां संस्कृतभाषायाञ्च अनेकानि नाटकानि। तेषु नाटकेषु संस्कृतभाषया विरचितं नाटकत्रयम अनवद्यं व्यतिक्रमि चेति। अर्वाचीनकालस्य कवयित्रीषु बेलादेवी अन्यतमत्वं भजत इत्यत्र नास्ति संशयः। तया विरचितानां नाटकानां विषयवस्तूनि अधस्तात् पर्यालोच्यन्ते–

क) नचिकेतश्चरितम्

"नाटकं ख्यातवृत्तं स्यादि"ति विश्वनाथोक्तवचनमुरसिकृत्य कठोपनिषदो विषयम् आधारीकृत्य दृश्याष्टकविशिष्टं दर्शितमिदं नाटकम्। नचिकेतसः पिता आसीत् उद्दालकः। स एकदा यज्ञाय जीर्णाः गाः प्रददौ। एतत्संदृश्य नचिकेताः नितरां क्लिष्टो जातः। स पित्रे अवदत् – "अस्माकं गोशालायां सुस्था गावो वर्तन्ते। तत्कथमेतादृशान् गाः ददाति

[१२३] S.L (20th) P. – 275.

भवान्।"[९२४] इति।

अपि चैव तेनोक्तं 'कस्मै अहं प्रदास्ये'। तदा पित्रा उक्तम् – "त्वामहं यमाय दास्यामि" इति। तदनु पितुर्गीर्वाणवाण्याः पालनाय स यमाय अगच्छत्। तत्र च यमाद् आत्मविद्यां लभते सः। इदमेव ब्रह्मतत्त्वमुपस्थापितं तत्रभवत्या बेलादेव्या। कवयित्र्याः साधारणमनुजानां कृते आध्यात्मिकपथनिर्देशो हि नाट्यग्रधनस्यास्य केवलम् उद्देश्यम्।

अत्र च भाषायाः सारल्यं तथा रचनाशैल्या औज्ज्वल्यमस्माकं नयनपथे पान्थायते। यथा– "अतो मम अज्ञानपापमुक्त्यर्थं त्रीन् वरान् तुभ्यं दास्यामीति।"[९२५] इति।

किञ्च, "अपूर्वमिदं नचिकेतः तव अपूर्वत्यागमहिम्ना पराभूतोऽहम्।"[९२६] इति। अपि च, भारतीयोपनिषदां चिरन्तनी भावना सम्पूर्णतयात्र प्रतिविम्बिता। कवयित्र्या प्रत्येकं रचनासु अङ्कशब्दं परिवर्त्य दृश्यशब्दः व्यवहृतः। १९७६ ईशवीयाब्दे नाटकमिदं प्रकाशितम्।

ख) महीयसी गार्गी

पञ्चदृश्येषु संबद्धमिदं नाटकम्। कवयित्र्या बृहदारण्यकोपनिषदो गृहीतम् अस्य विषयवस्तु। उपनिषत्सूक्तमत्र नान्दीश्लोकरूपेण परिगण्यते। सूत्रधारस्य वचनतो ज्ञायते यद् विश्वनारीवर्षस्य (World Women's Year) प्रसङ्गे एवास्य नाटकस्याविर्भावः। गर्गकन्या गार्गी एवास्य नाटकस्य नायिका। सा नाटकेऽस्मिन् युक्त्या विजयते। सा एव ब्रह्मवादिनी। तथाहि भरतवाक्यम्– "यावत्कालं भारतवर्षं वर्तते तावत्कालं गार्गीमहिमा सर्वत्र कीर्तितः भविष्यति"[९२७] इति। अत्र सर्वाणि चरित्राणि उपनिषदाम् आनीयन्ते। जगत्यस्मिन् चरमतत्त्वं किं नामेति विषयमवलम्ब्य गार्गीयाज्ञवल्क्ययोर्विवादः उल्लेखनीयः। अत्र नृपस्य जनकस्य चरित्रमपि स्थानं लभते। अपि च, गर्गाश्रमस्य वर्णनमधिकतया चमत्कारित्वं जनयति। नाटकस्य मूलोद्देश्यविषये प्राध्यापिकाया ऋतादेव्या अभिमतमिदमत्रोल्लेखनीयम् –

"The drama is characterized by simple intelligible but dignified

[९२४] नचिकेतश्चरितम्, पृ. – ४।

[९२५] तत्रैव, पृ. – १२-१३।

[९२६] तत्रैव, पृ. – १६।

[९२७] महीयसी गार्गी, पृ. – ३३।

Sanskrit language and strictily lucid style …To remind the present generation of the past glory, the highest ideals of the ancient india and the tradition of the female celebrities seems to be the primary objective of the playwight as revealed through her drama *Mahīyasī Gārgī*."[९२८] इति।

ग) विराड्गृहम्

षड्दृश्योपेतं नाटकमिदं महाभारतस्य विषयमाधारीकृत्य लिखितम्। महाभारतस्य विराट्पर्व एवास्य विषयः। अत्र पाण्डवानामज्ञातवासः, कीचकवधः, सुदेष्णायाः सहचारिणीरूपेण द्रौपद्याः प्रकाशश्चेत्यादीनि मञ्जुलानि वृत्तान्यत्रोपवर्णितानि। परिशेषे उत्तराभिमन्व्योः परिणयेन नाटकमिदं समाप्तिं गतम्। प्राचीनकवीनामिव भारतस्य कथामवलम्ब्य रचितमिदं नाटकम्। अलंकारशास्त्रस्य नाट्यतत्त्वस्य च प्राचीनरीत्या बेलादेवी यथानियमं नाटकानि विरचयामास। किन्तु भाषाया नैपुण्येन सारल्येन च नाटकमिदं विंशशताब्द्या आङ्गिकेन सह सम्पृक्तम्। पाठकानां सविधे प्राचीनवृत्तानां भिन्नरुच्या पुनः नाट्यायितकरणं हि कवयित्र्याः मुलमुद्देश्यमित्यत्र नास्ति संशयलवः। १९७६ ईशवीयाब्दे नाटकमिदं प्रकाशपदवीं गतम्।

२.३. गौरीधर्मपालः

विंशशतकस्य प्रशंसनीयैका कवयित्री आसीद् गौरीधर्मपालः। कलिकातायां सप्तत्रिंशदधिकनवदशतमे वर्षे सा अजायत। आसीत्साध्यापिका लेडिब्रेवर्न-महाविद्यालयस्य।

संस्कृतभाषायां पञ्चविंशतिसंख्यकानि पुस्तकानि सा लिलेख। आधुनिक-विषयमाधारीकृत्य तया रचिता 'तडिद्विरतिः' (load shedding) इति लघुकथापि (Short Story) प्रशंसार्हा। आधुनिकं विषयमाधारीकृत्य तया १९८४ खृष्टाब्दे जननीनाटकमपि व्यरचि। 'जननीनामकं रूपकन्त्वैकाङ्करूपकम्।

रूपकमिदमारभ्यते एकेन वङ्गीयसंलापेन – "गृहिणी ना जननी कि येन एकटा नाम। राजा राजड़ाओ नेइ आर्य पुत्रओ नेइ" इति। अत्र सूत्रधारस्य अभावो

[९२८] S.L. (20th) P. – 211.

नयनयोरापतति। तया मध्यवित्तपरिवारस्य वृत्तमेकं चानवद्यमनोभङ्ग्या मञ्जुलया गिरा न्यरूपि। वास्तवजीवनस्य चित्रं तत्रभवत्या कवयित्र्या समुपस्थापितम्। सर्वधर्मश्रेणिनः प्रति कवेरेकामृतावाणी ध्वनिता– "मानुषमाता भूमिकन्याः वयं पृथिव्याः"[९२९] इति।

वस्तुतस्तस्याः "शृण्वन्तु विश्वे अमृतस्य पुत्राः" इति औपनिषदिकभावनायां विश्वमैत्रीभावनानुरणिताात्र। वस्तुतो 'जननीति शब्देन भारतमाता संस्कृतभाषा पृथिवी वा बोध्यव्या। माता खलु सर्वेषाम् उत्सस्वरूपा। अतस्तस्याः परित्यागो न कर्तव्य इत्येवं तस्या आशयः। यदा सर्वे मातरं परित्यजन्ति, तदा मातावदत्–

"किं ब्रवीषि? नास्ति मया प्रयोजनम्? सर्वेषां दूषणं सहमाना क्षममाणा, सर्वान् अहं धारयामि पोषयामि शिक्षयामि भाषयामि जीवयामि शयाने स्वप्ने जागरणे नृत्ये गीते शिल्पे वसने तत्समुद्भवे मनने ध्याने ज्ञाने विज्ञाने पुरातने नूतने शोके दुःखे रोगे आरोग्ये उत्सवे व्यसने सर्वदा युष्माकं पार्श्ववर्तिनी अहम्, मामेव बहिष्करोषि? भवतु गच्छामि। मया विना सुखं जीवतं सर्वे"[९३०] इति।

यदा माता जिगमिषति, तदा सर्वे कथयन्ति अलं गत्वा। अस्मिन्नाटके कवयित्र्याः प्रातिभविश्लेषणं सततं लक्षणीयम्। नैकेषां वैदेशिकशब्दानां प्रत्ययविभक्तियोगेन प्रयोगो दरीदृश्यते नाटकेऽस्मिन् –

'मासं यावद् ग्यासो (Gas) नास्ति केरोसिनमपि (Kerosene) दुर्लभम्'[९३१] इति।

'अद्य खलु इडेने गवसकारस्य व्याटिङ्'[९३२] इति।

'सव्यञ्जना लुचिका विंशतिः' इति।

'शय्यागतः कों कों इति कम्पते'[९३३] इति।

अपि च, भाषाविज्ञाने तस्याः ध्रुवमेव पारदर्शिता सर्वजनविदिता। ग्रन्थेऽस्मिन् अनेकदेशीयभाषाणां प्रयोगो दरीदृश्यते। यथा–

[९२९]जननी, पृ. – २।
[९३०]तत्रैव, पृ. – ८।
[९३१]तत्रैव, पृ. – ३।
[९३२]तत्रैव, पृ. – ५।
[९३३]तत्रैव, पृ. – ३।

'मात मा परित्यज अस्मान्' इत्यस्मिन् अर्थे प्रयोगः–

हिन्द्यां – मत् याना माइजि।[९३४]

माराठ्यां – आइ गो, तु जाउ नो तु को।[९३५]

काश्मिर्यां – मोजी सि माइ गच्छ।[९३६]

राजस्थान्यां – मा, म कोनी जाउ।[९३७]

मलयाले – आम्मा निपोगल्ले।[९३८]

पाञ्जाब्यां – भिजि तु सि न यओ मेन्यु नइ चइदा।[९३९]

तामिले– पोगादे आम्मा पोगादे।[९४०]

अत्र वङ्गप्रवादानां बहुविचित्रितः प्रयोगोऽपि संदृश्यते। यथा– "कारो पौषमास कारो सर्वनाश" इत्यस्य "छात्रीणां पौषमासः मम तु सर्वनाशः" इति। नाटकस्यास्य समाप्तिर्भवति रवीन्द्रनाथस्य 'भारततीर्थ' इति कवितया। अत्रापि कवयित्र्याः विशिष्टत्वं नयनपदवीमेति। तथाहि ऋतादेव्या उक्तिरत्र संस्मरणीया –

"*Jananī*, with its lucid style, simple but dignified language, with occasional use of Bengali language, with its novel theme revealing the identity of 'Mother'– the 'House Mother', or 'Sanskrit', of 'India' and of 'Mother Soil' or 'Earth', bringing out the multi-lingual and the integrated aspect of India, depicting integration in its different aspects e.g., family integration, linguistic integration, national and East-West integration and with an ultimate objective of ushering into the traditional realm of peace, harmony, tolerance and integration

[९३४]जननी, पृ. – ८।
[९३५]तदेव।
[९३६]तदेव।
[९३७]तदेव।
[९३८]तदेव।
[९३९]तत्रैव, पृ. – ९।
[९४०]तत्रैव।

will ever be enshrined in the hearts of the connoisseurs."[१४१]

२.४. जयश्रीनागः

पश्चिमवङ्गस्य वर्धमान्-नामके स्थाने साम्प्रतं वसति। सा अर्वाचीनकवयित्रीषु एकतमा वर्तते। 'आदिकवेरुद्भावन'मित्येकं नाटकं लिखितं प्राचीनवृत्तमवलम्ब्य कवयित्र्या। आदिकवेर्नाम अत्र वाल्मीकिः। व्याधस्य क्रौञ्चवधं दृष्ट्वा वाल्मीकेर्मनसि शोकात्स्वत उत्सारितभावावेगानां प्रकाशो हि रामायणम्। सहसा तन्मुखाद्विनिर्गतः श्लोकोऽयम् –

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः" इति। कथंकारं श्लोकोऽयं तत्रभवत आदिकवेर्मुखाद्विनिर्गत इत्येवं विषयमाश्रित्य तयालिखितमिदं नाटकम्।

एतानतिरिच्य 'मातृवन्दनम्', 'चौरनिरूपणम्', 'वधिरजामातृसंवादः' चेति नाटकत्रितयं जयश्रीनागेन व्यरचि। एतानि सर्वाणि नाट्यमञ्चस्थान्यभवन्। किञ्च, एतानि रूपकाणि शिशूनां कृते ग्रथितानि।

तया कानिचिद् गीत्यालेख्यानि विरचितानि। तेषु उल्लेखमर्हन्ति 'वर्षामङ्गलम्', 'भारतवन्दनम्', 'मेघदूतम्' चेति। वर्धमान्-विश्वविद्यालये 'मेघदूत'मिति आलेख्यगीतम् अभिनीतमभूत्। नाटकमिदं प्रेक्ष्य स्वर्गीयरमारञ्जनमुखोपाध्यायेन नाट्यकर्त्री बहुधा प्रशंसिता।

२.५. जयश्रीचट्टोपाध्यायः

आधुनिककालस्य वङ्गदेशस्य कवयित्रीषु जयश्रीचट्टोपाध्यायान्यतमा। तया 'निःसङ्गप्रणयः' इति (Love without attachment) स्वरचितकवितानां संकलनात्मकग्रन्थो विरचितः। विशेषत्वमत्रैव यत् कवितानामाङ्गलानुवादः कृतः। ग्रन्थोऽयं संस्कृतपुस्तकभाण्डारतः प्रचरद्रूपतां गतः।

अपि 'निःसङ्गः प्रणयः' तावत् जयश्रीचट्टोपाध्यायस्य गीतिकाव्यमेकम्। विंशतिसंख्यकाः संस्कृतकविता अत्र स्थानिताः। काव्यग्रन्थस्य प्रथमकवितायां 'क्वासि दुर्गा' इत्यत्र वर्तमानसमाजपरिप्रेक्षे देव्याः दुर्गायाः विविधानि स्वरूपाणि चित्रितानि। 'निःसङ्गः प्रणयः' इति कवितायां प्रेम्णो

[१४१]M.S.L. (2), P. – 27.

निःसङ्गावस्था ध्वनिशब्दालंकारादिमाधुर्यैः वर्णिता असाधारणमनोभङ्ग्या। आद्यन्तामित्राक्षरच्छन्दोबद्धायाम् अनुप्रासाद्यालंकारमण्डितायामस्यां कवितायां प्रतीयमानार्थः निहितः। सारदादेव्या जीवनालेख्यं तावत् कवयित्र्याः द्वितीया कविता 'सारदामङ्गलम्' इति। 'जननी'ति पद्ये त्यागमाहात्म्यं ध्वनितम्। तस्याः अन्याश्च कविताः तावत् – 'पार्वती', 'वैदकी उप','वासन्ती शून्यता', 'पर्युत्सुका स्वाधीनता', 'नारीजागरणम्', 'वर्षा', 'वर्षारजनी', 'कलिकातासु वर्षा', 'शारदप्रकृतिः', 'शारदजोत्स्ना', 'सृष्टिराद्येव धातुः', 'कलिकाता' चेति। कवयित्र्याः काव्यग्रन्थेऽस्मिन् कलिदासस्य अपरिमेयः प्रभावः प्रतिपदं लक्ष्यते।

अनुवादचिकीर्षायां तस्याः प्रतिभा नितरां स्पन्दनशीलेति। रवीन्द्रनाथस्य देह-मानसलोक-जीवनदेवतादिकवितानां भावानुवादो विहितः अनया। वाल्मीकिप्रतिभायाः कृत्स्नानुवादः कृतः कवयित्र्या। नजरुल-द्विजेन्द्र-श्यामासंगीतानां संस्कृतानुवादं कृतवती स्वककारयितृप्रतिभाबलात्।

२.६. रमाचौधुरी

सुधांशुमोहनवसुमहोदयस्य कन्यारूपेण १९११ ईशवीयाब्दे रमाचौधुरी जनिं लब्धवती। अभिजातवंशे समुत्पन्नाया रमायाः छात्रजीवनं प्रतिभापूर्णाभिरुपलब्धिभिः मण्डितं विद्यते। चौधुरीत्युपाह्वयस्य डा० यतीन्द्रविमलस्य पत्नी तावत् रमाचौधुरी। रमा यतीन्द्रेण सार्धमेवाधीत्य 'Oxford' विश्वविद्यालयस्य डी० फिल्० इत्युपाधिमुपालेभे। सा त्रिंशद्वर्षाणि यावद् ब्रावोर्ण-महाविद्यालये प्राचार्यपदमलंकृतवती। ततः सप्त वर्षाणि यावद् रवीन्द्रभारतीविश्वविद्यालये प्रथममहिलोपाचार्यत्वेन प्रशासनकार्यं कृतवती।

अर्वाचीनसंस्कृतसाहित्ये सा उल्लेखयोग्या प्रोढा चासीत् लेखिका। अनेकेषां समालोचकानां मते, कवयित्रीषु अर्वाचीनसंस्कृतनाट्यसाहित्येतिहासे सैव नाट्यकाररूपेण प्रथमा। तथाहि ऋताचट्टोपाध्याययोक्तम् – "First lady Sanskrit dramatist to be honoured as the pioneer of Modern Sanskrit Drama movement in india and outside."[१४२] तया प्रबन्धविषयकाः नाट्यग्रन्थविषयका नैके ग्रन्था विरचिताः। सा खलु विंशत्यधिकसंस्कृतनाट्यानां रचयित्री। तानि यथा–

[१४२]M.S.L. (2), P. – 310.

'कविकुलकोकिलम्', 'कविकुलकमलम्', 'मेघमेदूरमेदिन्यम्', 'यतीन्द्र-यतीन्द्रम्', 'शङ्कर-शंकरम्', 'देहदीपम्', 'पल्लीकमलम्', 'मेघमेदुरमेदनीयम्', 'युगजीवनम्', 'निवेदितानिवेदितम्', 'अभेदानन्दम्', 'रामचरितमानसम्', 'रसमय-रासमणिः', 'चैतन्यचैतन्यम्', 'संसारामृतम्', 'नगरनूपुरम्', 'भारतपथिकम्', 'भारताचार्यः', 'अग्निवीणानाटकम्', 'गणदेवतानाटकम्', 'भारततातम्', 'प्रसन्न-प्रसाद'ञ्चेति।

तस्याः प्रायः सर्वाणि नाटकानि व्यक्तिजीवनमूलकानि। महापुरुषाणां सम्मानार्थं तयैतानि नाटकानि लिखितानि। तस्या नाटकस्य भाषा वङ्गभाषावत्सरला सुबोध्या च। यथा वङ्गभाषायां "टाका माटि माटि टाका"- इत्यस्य संस्कृतभाषायाम् – "मुद्रा मृत्तिका मृत्तिका मुद्रा"[१४३] इति। नाटकेषु तस्या वङ्गभाषायाः प्रयोगोऽपि दृश्यते – "दुत्तेरि उन्मत्तजनो न प्रशमनीयः..."[१४४] इति। तस्या नाटकेषु संगीतमयत्वमनुपदमलक्षि। दिङ्मात्रमुदाहरणं दीयते –

"इच्छाजातं तव सर्वं
इच्छामयी तारासि त्वम्।
तव कर्म करोषि त्वमस्य
लोको वदति करोम्यहम्"[१४५]॥ इति।

अधुना प्रत्येकं नाटकानां सारः प्रस्तूयते –

क) शङ्करशङ्करम्

अद्वैतवादिनः शिवावतारस्य शङ्कराचार्यस्य जीवनं दर्शनञ्चाधारीकृत्य ग्रथितमिदं चतुर्दशदृश्योपेतं नाटकम्। इह नाटके कवयित्र्या वर्ण्यन्ते – कथं गुप्तोत्तरयुगे शङ्कराचार्य आसमुद्रहिमाचलं परिभ्रम्य भारतवासिनां हृत्स्पन्दनम् अभूतवान् स्वशास्त्रज्ञानेन शङ्करः तदानीन्तनकालस्य प्रख्यातं पण्डितमूर्धन्यं माधवमिश्रं विज्ञामुभयभारतीं मण्डनस्त्रियमपि च तर्कयुद्धेन पराजितवान्। चतुर्दशदृश्ये दृश्यते

[१४३]युगजीवनम् (प्रथमदृश्यम्)।
[१४४]तत्रैव।
[१४५]तत्रैव।

शङ्करः केदारं गच्छन् तत्र द्वात्रिंशद्वर्षवयसि सम्पूर्णे स्वस्य परमात्मसायुज्यप्राप्तौ प्रकृतजीवनस्योपलब्धीः प्रकटितवान्। तेन भारतस्य चतसृषु दिक्षु चत्वारो मठाः संस्थापिताः। तत्र मठेषु ऋग्यजुःसामाथर्वणामध्ययनव्यवस्था कृता।

सा पाश्चात्यशैल्या समं भारतीयशैल्या नान्दीं, प्रस्तावनां, भरतवाक्यञ्च योजयति। तस्या नाटकानां विभाजनं दृश्येषु विलसति। पटपरिवर्तनमपि तत्र विद्यते। प्रख्यातेन साहित्यसमालोचकेन सातकडिमुखार्जिमहाभागेन लिखितम् – "What has surprised me most is the wonderful ease and flow with which the present work represents to us the most abstruse philosophy of the great Advaitin Shankara.Who could have ever thought that any one would be able to serve the same under the guise of a drama? But the supremely efficient and infinitely courageous Dr. Rama has been able to perform. Who could have thought her capable of producing such a superb dramatic work on *Śankara*'s holy life and teachings, in such a beautiful, poetic, enchantinh easily intelligible language? Further, the numerous verses in different metres as well as the songs add much to the great glory of this exhilarating work of great literary and other kinds of merits."

ख) देशदीपम्

नाटके राष्ट्ररक्षायै दिवं गतानां वीराणां संस्मरणं कृतं कवयित्र्या। एकस्य महतो नायकस्य जीवनमाधारीकृत्य लिखितमिदं दृश्यनवकविशिष्टं नाटकम्। स खलु नायको देशाय प्राणान् तत्याज।

अत्र रमया ग्राम्यपरिसरः कार्यस्थली निर्वाचित इत्यस्य प्रमुख्यं वैशिष्ट्यम्। नाटके वर्णितानां केषाञ्चिच्चरित्राणां वैशिष्ट्यानि विदूषकचरित्रेण सङ्गच्छन्ते। अत्र चम्पकवदनः अभ्रप्रतिमश्चेति युवानौ ग्राम्यौ देशरक्षायै बद्धदरावास्ताम्। चम्पकवदनस्य मृत्यावपि देशदीपं सर्वदा प्रज्वलितमासीत्। नाटके रहिमस्य मुखेन कवियित्री ग्राम्यजनानाञ्चिन्ताधारां वर्णयति –

"श्रेष्ठं व्रतं तत् खलु जीवनस्य स्वदेशमातुर्नियतार्चनं यत्।
आलोकरेखा फलमम्बुवायुर्यस्याः सदा रक्षति जीवनं नः॥
धन्यं भवेदर्जनमर्पणेन दानेन धन्यं ग्रहणं हि लोके।
यदर्जितं जीवनमद्य मातुर्देयं तदस्यै बहुमानपूर्वम्"[१४६]॥

गीतिराशेर्माञ्जुलता कृत्स्ने नाटके विलसति। देशभक्तिसौष्ठवञ्चास्य प्रेरणास्पदम्। वृक-कुक्कुट-पेचकादिपक्षिणां कथास्मिन्नाटके स्थानं लभते। १९७० तमे खृष्टाब्दे नाटकमिदं सहृदयानां कृते प्रकाशितम्। अस्याभिनयः यतीन्द्रविमल-चौधुरीजन्मोत्सवे सम्पन्नः।

ग) नगरनूपुरम्

मेखलाभिधानाया अपूर्वसुन्दर्या गणिकायाः कथामाश्रित्य दशदृश्यमयं लिखितमिदं नाटकम्। शृङ्गाररसोऽत्र अङ्गी।

घ) पल्लीकमलम्

लोकप्रसिद्धां कथामवलम्ब्य रचितमिदं नवदृश्यात्मकं नाटकम्। कमलकलिका-रूपकुमारयोः प्रेमकथाम् आधारीकृत्य ग्राम्यसंस्कृतिञ्च संलक्ष्य कवयित्री नाटकं व्यलिखित्। नायकस्य रूपकुमारस्य नायिकायाः कमलकलिकायाश्च प्रेम्णः परिणतिः अन्ततो गत्वा परिणयेन सम्पाद्यते। इह नाटके कतिपयवङ्गलोकोक्तीनां संस्कृतानुवादः समुपलभ्यते। दिङ्मात्रमुदाहरणं यथा –

"आकाशचन्द्रः पतितः करे मे।
कुक्षौ क्षुधा मुखे लज्जा।
पथि ठक्कुर आद्रियमाणो मस्तकमारोहति" इति।

यदि रूपकस्यास्य सर्वाणि दृश्यानि एकोक्तिमण्डितानि सन्ति, तथापि पञ्चमाङ्कस्य कनककलिकाया एकोक्तौ महती प्रभविष्णुता जागर्ति। लेखिकाया नये इह नाटके अत्यावश्यकं सङ्गीतनिबन्धनम्। पूर्वकथा (Flash Back) चलच्चित्रानुवर्तनपूर्वकं पटपरिवर्तनेन पूर्वदृश्ये प्रदर्शिता। नाटकस्य भाषा सरला सुमधुरा च। रूपकत्वेनात्र नास्ति किमपि अभिनवत्वम्।

[१४६]आ.स.सा.रू., पृ. – ९८।

ङ) संसारामृतम्

केलिनाम्न्याः दरिद्रपरिवारस्य कन्यायाः दुःखमयं जीवनमवलम्ब्य सप्तदृश्यात्मकमिदं नाटकम्। मयूरनामको कश्चन तस्या बालिकायाः प्रतारणामकरोत्। अनन्तरं प्रतारिता सा बाला तं मयूरनामकमेकं धनिनमुद्वहति। किन्तु स मयूर आसीत् चरित्रहीनः। किन्तु तस्या बालिकायाः संस्पर्शात् स शनैः शनैः कुस्वभावं परित्यज्य शुद्धजीवनं यापितवान्। समाजस्य वास्तवजीवनमत्र प्रतिध्वनितं कवयित्र्या।

च) अभेदानन्दम्

रामकृष्णस्य प्रमुख्येषु शिष्येष्वन्यतमस्य अभेदानन्दस्य पवित्रं जीवनं शिरसिकृत्य कवयित्र्या द्वादशदृश्यात्मकमिदं नाटकं लिखितम्। अत्र गुरुं प्रति भक्तिः प्रधानरसत्वेन उपवर्णिता।

छ) निवेदितानिवेदितम्

द्वादशदृश्यात्मके नाटकेऽस्मिन्निवेदिताया जीवनं विन्यस्तम्। रमारञ्जन-मुखार्जिना नाटकस्यास्य समालोचनायामुक्तम् – "Dr. Rama Chowdhuri selects the theme of her drama *'Niveditāniveditam'* from *Rāmakṛśṇa* a movement & describes the life and activities of Sister Nivedita, the ardent devotee and disciple of Swami Vivekananda.[१४७]" इति।

ज) युगजीवनम्

रामकृष्ण-सारदादेवी-विवेकानन्दानां दीव्यजीवनानि तेषां भावादर्शान् चाश्रित्य नाटकमिदं ग्रथितं कवयित्र्या। नाटके दश दृश्यानि सन्ति।

'जीवसेवा शिवसेवा' इति तत्त्वं लेखिका प्रकाशयिष्यते। तथाहि नटी रामकृष्णस्य माञ्जुलवाणीं नाटकस्य प्रारम्भ एवाकथयत् – 'जीवः शिवः शिवो जीवो जीवः शिवः केवलम्' इति। किञ्च, नाटकस्य षष्ठे दृश्ये रामकृष्णस्य वैदान्तिकवाणी श्रूयते – 'ब्रह्म एकमेवाद्वितीयम्' इति। तादृशस्य ब्रह्मणः साक्षादुपलब्धिर्हि सकलदर्शनस्य परमा कथा' इति। अत्र शब्दव्यवहारस्य स्वाधीनता, गीतस्य प्रयोगः, वङ्गीयशब्दानुगमनञ्च

[१४७]'Sanskrit drama in last five decades: The Bengal scenario' इति प्रबन्धे लिखितम्।

संलक्षणीयानि। यथा – "न हि देवपूजा यथेच्छखेला" इति। अत्र क्रीडाशब्दं परित्यज्य खेलाशब्दस्य व्यवहारो दर्शनीयः। पुनश्च–

"सुरापान करिना आमि,
सुधा खाइ 'जयकाली वले'।
आमाय मन माताले माताल करे,
सव मद माताले माताल वले॥" इति।

वङ्गीयगीतस्य संस्कृतानुवादस्तावत् कविना कृत इत्थम् –

"नाहं सुरापानासक्तः
'जयकाली'-ध्वनि-विधानपरः
केवलं सुधापानारक्तः
केवलं जननीचरणधरः॥"[१४८] इति।

१९७६ ईशवीयाब्दे नाटकमिदं प्रकाशितम्। भारते शतशः नाटकमिदमभिनीतम्। भाषा चास्य प्रञ्जला व्यञ्जनागर्भा तस्यवृत्तोपेतो चेति।

झ) भारताचार्यम्

भारतस्य द्वितीयराष्ट्रपतेः सर्वपल्लीराधाकृष्णन्महोदयस्य जीवनमस्य नाटकस्य मूलं वस्तु। अपि च, तस्य दार्शनिकी भावनापि अत्र प्रकटिता। द्वादशदृश्यात्मकमिदं नाटकम्।

ञ) रामचरितमानसम्

तुलसीदासस्तावद्रामचरितमानसस्य रचयिता। स तस्य पत्न्या अनुप्राणितः सन् रामचरितमानसं लिलेख। अत्र तस्यैव कथा उपायनीकृता।

ट) भारततातम्

षट्दृश्यात्मकमिदं नाटकम्। महात्मागान्धी एव नाटकस्य प्रधानो नायकः।

ठ) चैतन्यचैतन्यम्

पञ्चदृश्यसमन्वितमिदं नाटकम्। चैतन्यस्य चारुचरितावली चित्रिता।

[१४८]युगजीवनम् (५.६४)।

तस्याविर्भावः, बाललीला, दिग्विजयः, कृष्णप्रेम, ईश्वरभक्तिः महासमाधिश्चात्र विषया नाट्यायिता वर्तन्ते।

ड) रसमयरासमणिः

रासमणिदेव्या आदर्शजीवनमत्राष्टदृश्येषु विभज्य लेखिकया समुपवर्णितम्।

ढ) प्रसन्नप्रसादम्

साधकरामप्रसादस्य जीवनमाधारीकृत्य दशदृश्योपेतं लिखितमिदं रूपकम्।

ण) गणदेवतानाटकम्

नाटकेऽस्मिन् वङ्गदेशस्य श्रेष्ठानामौपन्यासिकानां ताराशङ्करवन्द्योपाध्यायानां जीवनचरितमुपजीव्यमस्ति। रमायाः नाटकेषु चरितानां सर्वातिशायि प्राधान्यमुल्लेख्यम्।

त) अग्निवीणानाटकम्

नजरुलकवेश्चरितगाथा नाटकेऽस्मिन् वर्णिता। आधुनिकालंकारिकदृष्ट्या स्वदेशप्रेमाख्यो रसः अङ्गीरसरूपेण पदं करोति।

थ) भारतपथिकम्

ब्राह्मसमाजस्य प्रतिष्ठाता भारतपथिको राममोहनः कथं भारतस्य अभ्युन्नतौ प्रयत्नशीलोऽभूदिति विषयमाश्रित्य चरितगाथामूलकं पञ्चदृश्यसमन्वितं नाटकमिदम्। एतेषु नाटकेषु कुत्रचित्संवेदनता, आवेगपरायणता, कुत्रचिद्वा दुःखानुभूतिः, सहानुभूतिः, रसानुभूतिश्च लेखिकया विविधचरितमुखेभ्यः व्यक्तीकृताः। भाषायाः सारल्यम्, वर्णनाया दाक्ष्यं, सामञ्जस्यञ्चात्र नाटकानां प्रतिच्छत्रं लसन्ति।

द) कविकुलकोकिलम्

नाटकेऽस्मिन् दश दृश्यानि विलसन्ति। कालिदासस्य व्यक्तिजीवनमुपाश्रित्य ग्रथितमिदं नाटकम्। मूर्खकालिदासतो महाकवित्वेन कालिदासस्य परिणतिरत्र नाट्यायितावर्तत।

इह नाटके विद्यावती विशिष्टायां स्त्रीभूमिकायामवतीर्णा संबभूव। सा मूर्खं कालिदासम् उपरेमे। परवर्तिकाले पतेः प्रकृतं स्वरूपं विज्ञाय सा कालिदासं बहुधा तिरष्कृतवती। अन्तिमे कालिदासस्य महता तपसा अर्जितेन पाण्डित्येन सा धन्याभवदिति

नाट्यविषयः।

अत्र भावुकतापूर्णानामेकोक्तीनामाधिक्यं राजते। तृतीयदृश्ये कालिदासस्य एकोक्तौ प्रकृत्या सह भव्यं सामञ्जस्यं विलसति। गालिदानस्याधुनिकी रीतिरप्यस्मिन् वर्तते। कवयित्री अत्र कृमि-कीट-कृकलास-शठशृगाल-बर्वर-मर्कट-गर्दभाद्यपशब्दान् प्रयुंक्ते। उज्जयिन्यां कालिदाससमारोहे १९६७ खृष्टाब्दे नाटकमिदमभिनीतं पुरस्कृतञ्च।

ध) मेघमेदुरमेदनीयम्

प्रस्तुते नाटके मेघदूतस्य पूर्वोत्तरघटनानामेकत्र समाकलनं विद्यते। दृश्यषट्कयुतं नाटकमिदम्।

न) कविकुलकमलम्

'कविकुलकमले' महाकवेः कालिदासस्योत्तरकालिकी चरितगाथा वर्तते। अस्मिन्नष्टौ दृश्यानि लसन्ति। भारतवर्षीयाणां कवयित्रीणां रचनासु कुत्रचिद्विषयस्य नूतनत्त्वं कुत्रचिद्वा भाषायाः सारल्यञ्च संलक्ष्येते। तस्याः नाटकेषु अङ्कशब्दस्य व्यवहाराभावाद् दृश्यशब्दस्य प्रयोगोऽर्वाचीनत्त्वं द्रढयति।

अनया संक्षिप्ततया समीक्षया निश्चप्रचमिदं वक्तुमलं यद् वङ्गभूमेः कवयित्रीणां संस्कृतमौलिकसाहित्यसृष्टिपरम्परा सर्वभारतीयपरिसरे स्वीकृतिं लभमाना विलसति। विंशतिवर्षाणि यावत् रमा चौधुरी भारतस्य विविधस्थानेषु विदेशेषु च स्वस्याः स्वपत्युश्च नाटकानामभिनयमुच्चस्तरीयं प्रयोजयते। नाटकानामभिनयद्वारा भारतीयसांस्कृतिकप्रवृत्तिः कल्याणोन्मुखिनी इति कृत्वा सा जीवनस्य सार्थकतां मनुते। वङ्गप्रदेशस्य कवयित्रीषु रमा चौधुरी स्थायिपदमलंकृतवतीत्यत्र नास्ति द्वन्द्वः।

यद्वा भवतु नाम। भारतवर्षस्य सर्वत्रैवाधुनातने काले स्त्रियः काव्य-नाटकादीनि विलिख्याधुनिकसंस्कृतसाहित्यप्रपञ्चं विभूषयन्ति। भविष्यति काले कवयित्रीणां कारयितृप्रतिभया पुरुषाणां समतालमेवार्वाचीनसंस्कृतसाहित्यं परमामुच्चतां प्राप्स्यतीति मामकी मतिः।

॥ उपसंहृतिः ॥

'काव्यनिर्माणावसरे कविः स्वीयजगतोऽतिरिक्तं किमपि नैव प्रत्यभिजानातीति ध्रुवम्। तत्रैव च कवेः एकनिष्ठमन्तःकरणं रमते। परन्तु परस्तात् काव्यनिर्मितेः सहृदयास्तदन्तर्गतान् हृद्यान् अर्थान् अनुसन्दधानाः सूत्रबद्धमालायां पुष्पाणीव कृत्स्नस्य लोकस्य वस्तुनि आकलयन्ति'[१४९]। अतो लोकातिरिक्तं काव्यं नैव काव्यनाट्यपरम्पराविदाम् आशयः सुरुचिरतया भाति। न केवलं काव्यादेः प्रत्युत तदितराणां सकलशास्त्राणां लोकोद्भवत्वं लोकोपकारकत्वञ्च सिध्यतः। तादृशलोकसमाराधनपराणि काव्यानि स्वाङ्के धारयितुं सर्वदा प्रवर्तते अर्वाचीनसंस्कृतसाहित्यम्। तस्मात् साम्प्रतिके काले संस्कृतजननी सदैव नूतनभावोपेतकाव्यादिसर्जनायै आमन्त्रणं विदधाति। अयमस्याः भाषाया महिमा। तथाहि सम्प्रति तादृशा अपि रचनाकृतः संस्कृतसाहित्ये अवतरन्तो दरीदृश्यन्ते यैर्नियमितं संस्कृतं नाधीतम्। संस्कृतेन साकं तेषां जीविकोपार्जनस्यापि नास्ति कश्चन सम्बन्धः, तेऽपि संस्कृते सप्रौढिप्रकर्षं प्रकाशयन्ति। एतादृशेषु यूनो वैज्ञानिकस्य शङ्करराजारामस्य उत फिलाडेल्फिया-नगरवास्तव्यस्य यन्त्रवैज्ञानिकस्य विश्वासवासुकेः[१५०] काव्यानि अस्मद्दृष्टिपथमायान्ति। एतेन प्रमीयते अर्वाचीनसंस्कृतसाहित्यस्य व्यापृतिः कियती बृहतीत्यत्र नास्ति संशयलवः कश्चित्।

ऊनविंश-विंश-एकवविंशशताब्दीषु संस्कृतसाहित्यस्य यत्संहतं बृहत् सावलम्बि च रूपं संदृश्यते, तन्मूलं तावत् संस्कृतस्य समृद्धा पत्रकारिता। अर्वाचीनसंस्कृतसाहित्ये संस्कृतपत्र-पत्रिकाणां महदवदानं वरीवर्तीति निश्चप्रचम्। अर्वाचीनसंस्कृतसाहित्यविनिर्माणे सर्वाधिकतया साहाय्यमाचरितवन्तः पत्रकाराः पत्रिकासम्पादकाश्चेति। संस्कृतपत्रकारिता आरब्धा १८६६ ईशवीयाब्दे काशीविद्यासुधानिधिप्रकाशनेन। परवर्तिकाले अप्पाशास्त्रिराशिवडकरेण संस्कृतचन्द्रिका (१८८३ खृष्टाब्दे) सम्पादिता। तत्र कथा-निबन्ध-उपन्यास-भ्रमणकथा-कविताश्च

[१४९] संस्कृतप्रतिभा, उन्मेषः – ६५ (सम्पादकीयम्)।

[१५०] लोकोत्तरा व्यापृतिः – संस्कृतप्रतिभा, उन्मेषः – ५६, पृ. – १२२-१२३।

प्रकाशिता अवर्तन्त। १९७२ ईशवीयाब्दे राष्ट्रियसंस्कृतसंस्थानेन विश्वसंस्कृतसम्मेलने प्रकाशिते संस्कृतेतिहासे सप्तचत्वारिंशत्पत्रिकाणां नामान्युपलभ्यन्ते। अधुना भारतवर्षे संस्कृतपत्रिकाणां संख्या प्रायेण सार्धत्रिंशदधिका।

श्रीसीतारामदासओङ्कारनाथ-श्रीजीवन्यायतीर्थाभ्यां 'संस्कृतपारिजातः' सम्पादितः। कालीपदतर्काचार्यस्य सम्पादनेन (साप्ताहिकी) 'संस्कृतपद्यवाणी' इति पत्रिकायां सामयिकाः सन्देशाः, काव्यनाटकादीनि, चित्रकाव्य-प्रहेलिका-बिन्दुमत्यादिपद्यबन्धाश्च नियतेन प्रकाश्यन्ते। वस्तुतः, अर्वाचीनसंस्कृतसाहित्य-प्रकाशनाय बद्धदरासीत् पत्रिकेयम्।

याश्च संस्कृतपत्रिकाः निरवच्छिन्नतया मौलिकं समृद्धं संस्कृतसाहित्यं प्रकाशयन्ति, तास्वन्यतमाः – 'संस्कृतप्रतिभा' (त्रैमाषिकी), 'कथासरित्' (षाण्मासिकी), 'पद्यबन्धा' (षाष्मासिकी), 'व्यासश्रीः', 'अर्वाचीनसंस्कृतम्', 'दृक्', 'सागरिका', 'संस्कृतसाहित्यपरिषत्पत्रिका' चेति। आमूलादेव एताः पत्रिकाः नवकाव्यसर्जनां प्रोत्साहयन्त्यः काव्यकर्मणि नवानपि प्रेरयन्तीति विदितमेव वेदितव्यानां विदुषाम्।

संस्कृतं नाम अखिला भारतीया भाषा। सा कृत्स्नस्य भारतवर्षस्य नानाप्रदेशेभ्यो विविधाभ्यो भाषाभ्यो वा सञ्चिनोति आभाणकान् लोकोक्तीर्वा। संस्कृतस्य महासागरः पोषयन्नात्मानं संसारस्य सर्वाभ्यः भाषानदीभ्यो रसं गृह्णन् सार्वभौमतामपि चात्मनो रक्षेत्। भावबोधगम्य एव भाषायाः सार्थक्यम्। काव्येषु संस्कृतायितवैदेशिकशब्दानां प्रयोगात् पाठकानामनर्थावगमः स्याच्चेत्, किं नाम मूल्यं तादृशस्य शब्दप्रयोगस्य! तस्मात् सम्प्रेषणसौकर्याय भावावबोधाय च अर्वाचीनकवयो वैदेशिकभाषागतान् शब्दान् प्रयुञ्जन्ति चेत् कथमपि संस्कृतं न व्याहन्येत, न च संस्कृतपरमुखापेक्षि जायते। परञ्च संस्कृतस्यौदार्यं तेन सुरक्षितं स्यादिति मामकी मतिः।

ऋषिराज-कौशलादयः प्रमुख्याः युवाः कवयः कथाकाराश्च आधुनिकजीवनस्य महातौयधौ संस्कृतस्य महानौकामादायावगाहन्ते। साम्प्रतिके संस्कृतलेखने मेधाविनो रचनाकाराः बहुधा लोकोक्तिच्छायां श्रयन्ते नूतनताया आपादनपुरःसरं समेधयन्ति सौन्दर्यञ्च स्वसाहित्यस्य। तेषां नवीनानां जीवनानुभवो नवः, चिन्तनशैली दृष्टिशैली वा विलक्षणा। स्वाभाविकगत्या स्वकरचनासु तैर्नवीनान्युपकरणान्युपात्तानि। तेषां कथासु

कवितासु च प्रेम्णो विरहस्य चानुभवः आधुनिके प्रौद्योगिके जगति परिवृत्तिं गतः। दिङ्मात्रमुदाहरणं प्रस्तूयते ऋषिराजस्य 'चतुरदूरभाषे आषाढ़' इति गद्यकाव्यात् –

"वातायनसंघट्टनशब्दः प्रो.मह्लारस्य निद्राच्छेदं कुरुते। मह्लारस्य ध्यानं सहसा चतुरदूरभाषेण (Smart Phone) आकृष्टं भवति। स दूरभाषस्य अपटिकायां वोट्स अँप (Whatsapp) विधाने (Application) सन्देशान् पश्यति।

"अपि कुशलः भवान् भ्रातः ?
भवान् कार्यव्यापृतो वा ? 12:00 AM
अद्य आषाढस्य प्रथमः दिवसः
अहं मेघदूतस्य
एकं श्लोकं प्रेषयामि…12:05 AM
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥ 12:08 AM"

"मह्लारः बहिः मेघधनुषो वर्णान् पश्यति किन्तु जलदाः विकीर्णाः। मेघधनुषो वर्णा विशीर्णाः। सहसा स दामिन्याः सन्देशं पश्यति।

भ्रातः मया छायाच्छवयः प्रेषिताः
ताः कन्याः त्वया दृष्टाः? कि भवते रोचते कापि ? 6.20PM
मम परीक्षा समाप्तिं गता।
अधुना अहम् एकम् उपन्यासं पठामि।
हर्षदेवमाधवस्य उपन्यासोऽयं तस्य
एकां पंक्तिं लिखामि।
अहं रामगिरिर्भूत्वा स्थितोऽस्मि
अलकायाः प्रतीक्षां कुर्वन्,
पृथिव्याः प्रणयं प्रतिपालयन्…
एको मूको रामगिरिर्भूत्वा। 6.25 PM"[९५१]

अर्थात् वर्तमानकालस्य साहित्यकाराः प्राचीनभावावेगान् प्रसङ्गपरिवर्तनात् स्वमनसो

[९५१] संस्कृतप्रतिभा, उन्मेषः – ५६, पृ. – ११५-१२१।

माधुरीं सम्मिल्य च वर्णरसैरार्द्रीकृत्य प्रस्तुवन्ति। सुष्टुतया उक्तम् आनन्दवर्धनेन– 'सर्वे नवनवा भान्ति मधुमास इव द्रुमाः'।

आधुनिके साहित्यसंसारे अन्यत्र विस्मृतं जीवनस्य जटिलतायामुज्झितं त्रुटितं वा लयं नवसंस्कृतसर्जनया आविष्कर्तुमलम्। आधुनिकप्रवृत्तीनां वर्तमानस्य संसारस्यापि सम्यग् बोधो भवेत्, परम्पराया अप्यवगतिः स्यात्।

केवलं छन्दोमात्रग्रन्थनेन तु परम्परायाः सम्यग् बोधो न सम्भाव्येत। यदि जीवनस्य लयो न ज्ञातस्तर्हि वृत्तमात्रविरचनेन सारस्वतसाधना न प्रतिफलेत्। राधावल्लभस्य 'संसरण'मिति काव्ये अस्य भावस्यैवाभिव्यक्तिर्द्योत्यते –

"एकं चैकं देयं पदमिह कविनात्र सावधानेन।
पदविक्षेपो माभूत् कवितामार्गः परं कठिन आस्ते"॥

तथा च,

"छन्दोबद्धा कविता प्रवहति कुल्यासमं प्रमाले सा।
पूर्वनिश्चिते मार्गे रुद्धा भवति न सृता सुकरम्॥
छन्दसि मुक्ते कविता रचिता निर्झरसमं प्रवहमाणा।
मार्गं स्वीयं घटयति निघ्नन्ती विघ्नसङ्घट्टनम्॥
छन्दोभङ्गे जाते वृत्तं घटितं विचित्रमेवैतत्।
सहजं यद् यद् रचितं छन्दस्तदेव तु सञ्जातम्॥
जीवन एव छन्दश्छन्दसि विलसति च जीवनं सर्वम्।
छन्दोजीवनयोर्वा न विशेषं कमपि मन्येऽहम्"॥

नाट्यशास्त्रे भरतेनापि छन्दोहीनविधिरयं स्वीकृतः –

"छन्दोहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम्।
तस्मात्तूभयसंयुक्ते नाट्यस्योद्योत्यके स्मृते"[९५२]॥

"साहित्यं समाजस्य दर्पणो भवतीति वयं सर्वे जानीमः। यथा पुरा विरचितं साहित्यं परिशील्य तदानीन्तनस्य समाजस्य संस्कृतेश्च परिज्ञानं भवति तथैवेदानीन्तनं यन्नवलेखनं तस्मादपि भविष्यति काले साम्प्रतिकसामाजिकप्रवृत्तीनां ज्ञानं भविष्यति।

[९५२]ना.शा. (नागरः) – १४।४०।

अधुनातने नवलेखने साहित्यस्य प्राच्यपाश्चात्त्यविधासु कवयः नवनवां साहित्यसृष्टिं कुर्वाणा दृश्यन्ते। विश्वपरिदृश्ये वर्तमानकालपरिस्थितिजन्या विषयाः समस्याः नूतनाविष्काराश्च सन्ति रचनाकाराणां समक्षमुद्दीपका अभिग्रहाः। प्रतिभाशालिनो रचनाकाराः परम्परागतकथानकेष्वपि किमपि नवीनमुद्भावयन्ति सोत्प्रेक्षं च प्रस्तुवन्ति।

साहित्यस्य यत्प्रयोजनं तन्नूनमेव प्रपूरयति नवलेखनम्। नवलेखनं सदैव भवति नवनवं स्फुरणं प्रतिभायाः। वस्तुतः आत्मानुभूतिम् आत्माभिव्यक्तिं वा बाधते, कविप्रतिभामपि संशीतिदोलाम् आरोहति"[९५३]।

यथा वास्तवनिरूपणं शब्दैरेव अभिधया क्रियते, तदा वास्तवस्य चित्रणमनाकर्षकं भवति। कदाचित् कविरुपदेशको धर्मगुरुर्भवति[९५४]। काव्यत्वमेतेन शब्देभ्यः स्रंसते। विद्याशङ्करत्रिपाठिनः 'स्वतन्त्रभारते भयावहा यौतुकप्रथा' इति कवितायाः पंक्तिरेका उद्ध्रियते –

"पर्याप्तं वरपितृवाञ्छितधनं दातुं न शक्तो यदि
पुत्री तस्य चिरं विवाहविधितो लोके भवेद् वञ्चिता।
देशेऽस्मिन्नपरत्र यापि बहुशः पित्रोर्व्यथा पीडिताः
कन्याः काश्चिदसून् स्वयं जनिगृहे मुञ्चन्ति पाशावृताः॥
एवं स्वतन्त्रे खलु भारते या
कुरीतिरेषा प्रसृता प्रचण्डा।
तस्याः समूलोद्धारणाय लोको
लोके श्वरश्चापि प्रबोधनीयौ"[९५५]॥

कदाचित् प्रतिभाभावात् वास्तवनिरूपणं बाललेखनवल्लक्ष्यते। तत्र नास्ति काव्यगुणः, न काचिच्चमत्कृतिः, न वा वक्रोक्तिः। कदाचिद् अतिसरलशैल्यां वास्तवनिरूपणे काव्यत्वं जायते। दिङ्मात्रमुदाहरणं तावत् –

[९५३]संस्कृतप्रतिभा, उन्मेषः – ५६, पृ. – ५१-५२।

[९५४]'कान्तासम्मिततयोपदेशयुजे...' (काव्यप्रकाशः, प्रथम उल्लासः)।

[९५५]सं. विद्याशङ्करत्रिपाठी, प्रभुनाथद्विवेदी, 'संस्कृतवाग्विलासः द्वितीयोन्मेषः', मायाप्रकाशनम्, सन्तरविदासनगरम्, २००५, पृ. – ७१-७२।

"शैशवे
पुत्तलिकाया माता भूत्वा प्रसन्नाभवम्।
अधुना त्वहं
माता च पुत्तलिका चास्मि"[९५६]॥

संस्कृते केशवचन्द्रदाश-कलानाथशास्त्रि-राजेन्द्रमिश्र-राधावल्लभ-बनमालीबिश्वाल-नारायणदाशादीनां गद्यसाहित्ये तथा च राधावल्लभ-हर्षदेवमाधव-पद्मशास्त्रि-रमाकान्तशुक्ल-राजेन्द्रमिश्रादीनां काव्येषु वास्तवयुक्ता रचनाधर्मिता दरीदृश्यते। कदाचित् वक्रोक्तिमार्गेण लक्षणायाश्च प्रयोगात् यथार्थस्य चित्रणं भवति। कदाचिच्च व्यञ्जनया यथार्थनिरूपणं मार्मिकं भवति। हर्षदेवमाधवस्य 'मृगया' इति काव्यसंग्रहस्य 'रावणराज्यम्' तथा च 'मानचित्रपूरणप्रश्न'श्चेति कविताद्वितये व्यञ्जनायाः प्रयोगो लक्ष्यते।

भारतवर्षस्य विविधासु संस्कृतपत्रिकासु नियतरूपेण विगतं शतकत्रितयं यावत् प्रकाशितं संस्कृतसाहित्यप्रपञ्चं न केवलं प्राचीनसंस्कृतसाहित्येन समं प्रतिस्पर्धितुमलमपि तु इतरभाषासाहित्यैः। साम्प्रतं संस्कृतसाहित्यं तदीयं प्रत्नवर्म अपसार्य नित्यनूतनकाव्य-बिम्ब-प्रतीक-मिथ-उक्ति-प्रत्युक्ति-अन्योक्ति-मुक्तकानां प्रादेशिक-वैदेशिकच्छन्दोभिः आलिखितानां प्राचीनकाव्यविधाभिः समं नूत्नाभिः विरचितानाम् अनङ्गुलिमेयकाव्यकर्मणां विषयवैविध्येनोत्तराधुनिकयुगमाप्नोतीत्यत्र न संशीतिः। महदिदं प्रमोदकारणं यदर्वाचीनसंस्कृतवाङ्मयं मानदृष्ट्या परिमाणदृशा च परां काष्ठां भजते। तथाहि निश्चप्रचं शक्यवचं यत् अद्यतनसंस्कृतकाव्यसर्जनायाः मानदण्डो व्यायतः, प्रतिपाद्यक्षेत्रञ्च सुविशालम्। वस्तुतः प्रादेशिक-वैदेशिकसाहित्यकर्मभिः प्रभावभावितमद्यतनं संस्कृतसाहित्यं पुष्टमृद्धञ्चेति। तथाहि युक्तमेव प्राच्यतत्त्वविदुषा रमारञ्जनमुखोपाध्यायेनोदितं 'Sanskrit Drama in Last Five Decades : The Bengal Scenario' इति प्रबन्धे – " Sanskrit Literature has been able to maintain its relationship with the present day world as a part of the continuity of Indian Tradition and the specimens of creative art, that are being created today are trying to project eternal and universal values in the same manner in which these had been attempted to be presented by old artists".[९५७]

[९५६]संस्कृतविमर्शः (नवशृङ्खला, अङ्कः – २, वर्षः – २००९), राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, पृ. – ६।

संस्कृतपरिवारस्य केचित् कूपमण्डूकाः सदस्या एव प्रतिनियतं संस्कृतेन सह शत्रुतामाचरन्तीति मेदृष्टिः। ते विश्वसन्ति यत् संस्कृतं नाम कालिदास-भवभूति-जयदेवादीनां वाङ्मयं केवलम्। किन्तु परिवर्तनेनैव भाषायाः सार्थक्यमिति ते मूढधियो न विदन्ति। याः भाषाः स्वात्मनः परिवर्तयितुं नार्हन्ति, इतरभाषाभ्यः उपकरणान्यात्मीकर्तुं न वाञ्छन्ति, ताः क्रमेण लुप्ततां यान्तीति भाषातत्त्वविदां राद्धान्तः। ते केवलमभिप्रयन्ति यत् भरत-मम्मट-विश्वनाथादिभिः प्रोक्तानि साहित्यतत्त्वानि गङ्गादासादिभिरङ्गीकृतानि छन्दोवैशिष्ट्यानि च यथा कथमपि संस्कृतसाहित्याङ्गैः सममन्वितानि स्युः, अन्यथा तत् साहित्यापरपर्यायं न भवेदिति। स्वाधीनतोत्तरवर्तिनि काले भारतीयाः कवयितारः छन्दोमुक्तकविताः विरचयितुं प्रयतन्ते स्म। सर्वसमक्षं संस्कृतभाषाया उपयोगवृद्धये भाषामिमां सरलीकर्तुं पाठकानाञ्चानायासेनावगतये स्वाभाविकगत्या संस्कृतकवयोऽपि मन्दाक्रान्ता-शिखरिणी-इन्द्रवज्रादीनां प्राचीनच्छन्दसां परम्परानुसारि निशितपथं किञ्चित् परिवर्त्य उत परित्यज्य मुक्तच्छन्दोभिः काव्यानि कुर्वन्ति चेत् का क्षतिः। न ह्येतत् संस्कृतस्यावहेलनम्। न ह्येतद् दूषणं परं भूषणमिति मे मतिः। वस्तुतस्तेषां कविवर्याणां मुख्यं लक्ष्यं रसप्रतीतिः। रसास्वादनेनैव काव्यस्य काव्यत्वम्। परं केचिद् विद्वांस आमनन्ति यत् नाट्यसम्बन्धिज्ञानाभावात् छन्दोबद्धकाव्यग्रथनसमर्थाभावाच्चैव ते छन्दोरहितकाव्यानि विश्वनाथादेर्नाट्यतत्त्वानि च सर्वथा नानुसृत्य किञ्चित् परिवर्त्य विरचयितुमत्याग्रहं प्रकाशयन्ति। परं ते न जानन्ति यत् आदावेवैते कवयः नाट्यकाराश्च प्राचीननियमान् अनुसृत्यैव काव्यनाटकादीनि कुर्वन्ति स्म। ततस्तैः प्रादेशिक-वैदेशिककविभिः अनुप्राणितैः सद्भिर्विलक्षणपथा काव्यानि निर्मीयन्ते परीक्ष्यन्ते च। सममेवोक्तं मद्गुरुवर्यैः कविभिः सीतानाथाचार्यैः तस्य

[९५७]M.S.L. (1), P. – 179.

'अर्वाचीनसंस्कृतसाहित्यसमीक्षा विहङ्गमदृष्ट्या'[१५८] इति प्रबन्धे – "खृष्टीयोनविंश-विंशशतकयोराधुनिकसंस्कृतसाहित्यधारा यदि विलक्षणे मार्गे पदं कुर्यात्तर्हि नास्ति तत्र किमप्यस्वाभाविकत्वम्। साम्प्रतिकेऽस्मिन् समयसीम्नि विज्ञानप्रयुक्तिविद्ययोः क्षिप्रतरोन्नत्या विश्वैकनीडीभवनप्रयासस्य क्रमवर्धमानत्वादैहिकभोगप्रवणतायाः संघातमयतायाश्च प्रबलायमानत्वात् परिवर्तते जीवनबोधो विवर्त्तते च द्रुततरगत्या सामाजिकी स्थितिः। आङ्गलादिवैदेशिकैर्वङ्गादिप्रादेशिकैः कविकर्मभिः सह निविडपरिचयवशात् कविप्रतिभायां यथा वैचित्र्यं सातिशयमापतति सहृदयहृदयरूचावपि तथाभिनवत्वं पदं करोति। एतेषामेव कारणानां फलरूपेणार्वाचीनसंस्कृतसाहित्यशैल्यां वैलक्षण्यं सुस्पष्टविधया परिलक्ष्यमाणं जायते" इति। अर्थात् साम्प्रतिकं संस्कृतसाहित्यं क्रमेणैवाग्रेसरन्ति इति सिद्धमेव।

अधुना संस्कृतसाहित्यस्य सर्वाङ्गेषु वैप्लविकं परिवर्तनं समायातम्। जगन्नाथोत्तरवर्तिनि कालसीम्नि संस्कृतसाहित्यं क्रमेण ध्वस्तमितम् इति समालोचकाः भणन्ति। ते सर्वे मूढधिय एव। सप्तदशोत्तरवर्ति समये भारतवर्षे येन परिमाणेन संस्कृतसाहित्यं काव्यकाराः विरचितवन्तः कुर्वन्ति च, तच्च कस्यामपि पूर्ववर्तिशताब्द्यां नाविरच्यत। तथाहि राधावल्लभत्रिपाठिना 'आधुनिकसंस्कृतसाहित्यसन्दर्भसूच्यां' स्पष्टतया प्रत्यपादि – " Contrary to popular belief, there is an astonishing upsurge of creativity in Sanskrit today. Many of the Modern Sanskrit writings are qualitatively of such high order that they can easily be treated at par with the best of classical Sanskrit works and they can also be judged in contrast to the contemporary literature in other languages. The enormous quantity of the published works in Sanskrit composed during the past two centuries encompasses all forms of literature and variety of genres."[१५९]

[१५८] Special issue on 'Modern Sanskrit Literature' of the Journal *Sāgarikā* by the Dept. of Sanskrit, Sagar University, M.P. (Vol. 35/3-4).
[१५९] आधुनिकसंस्कृतसाहित्यसन्दर्भसूची (Introduction, P – 1)।

परं मानगतदृशा साम्प्रतं संस्कृतसाहित्यं प्राचीनसाहित्यस्य समकक्षं न भवितुमर्हतीति मे मतम्। कथंकारं वा वयं कल्पयितुं शक्नुमो यत् पुनरेव कालिदास-भवभूति-माघ-श्रीहर्षादिवन्महाकवयः साम्प्रतं संस्कृतसाहित्यप्रपञ्चे आविर्भवेयुः। चिन्तयन्तु पाठकाः! आङ्गलसाहित्ये वङ्गसाहित्ये च उत्तराधुनिकयुगमतिरिच्य उत्तरोत्तराधुनिकयुगः समायातः। किन्तु कोऽपि समालोचको न पृच्छति वङ्ग-आङ्गलसाहित्ययोर्मानं पूर्ववदासीन्न वेति। रवीन्द्रनाथ-शरच्चन्द्र-वङ्गिमचन्द्रादीनामिव वङ्गसाहित्यमद्यत्वे किं विरच्यते उत शेक्सपीयार-कीटस्-मिलटनाद्याङ्गलकविरवीणां साहित्येन समं वर्तमानमाङ्गलसाहित्यं किं मानदृष्ट्या प्रतिस्पर्धितुमलम्! गच्छता कालेन अस्माकं मेधा क्रमेणैव क्षीणतामेति। तथापि कथं संस्कृतसाहित्यविषये अयं प्रश्नः! भवन्तः सहृदया एव विचारयन्तु।

मयका अस्मिन् ग्रन्थे साम्प्रतिककालस्य भारतवर्षस्य प्रतिप्रदेशं (एकविंशती राज्यानि) संस्कृतचर्चाया दिग्दर्शनं प्रस्तुतम्। ग्रन्थकारोऽयमपि खद्योतवृत्त्या साहित्य-समीक्षाकानने वर्षाष्टकं यावत् भ्रमति प्रकाशयति च काव्यजिज्ञासाविषयकान् प्रबन्धान् ग्रन्थञ्चेति। अज्ञातावशाद्विस्मृतिवशाद्वा ऊनविंश-विंश-एकविंशशताब्दीसम्भवानां येषां कविवर्याणां नामानि मया कीर्तयितुं न पारितं, तेषामपि अवदानं नाकिञ्चित्करमिति ज्ञातव्यम्। विगतं शतकत्रितयं यावत् प्रायेण देशस्य सर्वप्रान्तेषु संस्कृतकवयः काव्यनाटकादीनि विरचयामासुः रचयन्ति च। भविष्यति ते समतालमेव सारस्वतसाधनां करिष्यन्तीति आशा मे बलवती। एतत्सत्यं यत् पूर्वभारतस्य उत्कल-पश्चिमवङ्ग-विहारेषु तथा च दक्षिण-पश्चिमप्रान्तगतेषु राज्येषु च सर्वाधिकतया मौलिकसंस्कृतसाहित्यसृजनं भवतीति परमाशाव्यञ्जकम्। किन्तु एकविंशशताब्द्यां पश्चिमवङ्गस्य संस्कृतसाहित्यस्य विविधासु शाखासु वङ्गीयप्रतिभाया गौरवमयी क्रियाशीलता क्रमेणैव क्षीणतां यातीति महद् दौर्भाग्यम्। वङ्गीयप्रतिभाया इयं गौरवमयी ऐतिह्यधारा अस्माभिः विशेषतः संस्कृतस्य तरुणैर्विद्यार्थिभिः तरुणीभिर्विद्यार्थिनीभिश्च परिपालनीया परिवर्धनीया च। तेन च विश्वसाहित्यसंस्कृतिः परिपोषं प्राप्नुवन्ती विश्वकल्याणं साधयेत्।

संस्कृतसाहित्यस्य विपक्षवादिनोऽभिप्रयन्ति यत् संस्कृतसाहित्यं केवलं देवराजादीनां स्तुतिपरकं शृङ्गाररसोपेतञ्चेति। एकविंशशताब्द्यामस्य साहित्यस्य

वास्तविकजीवने नास्ति किमपि प्रयोजनमिति हेतोः विद्यालयादिस्तरे पाठसूच्यामस्या भाषाया अन्तर्भावो न करणीयः इति ते मन्यन्ते। परन्तु साम्प्रतिककालस्य संस्कृवाङ्मये यथार्थवादस्य समकालिकसमस्यानाञ्च प्रतिध्वनिः सर्वाधिकतया संश्रूयते।

साम्प्रतिकमहाकाव्येषु वृत्तोपस्थापने यथा गौरवमारोपितं, न तथा रसोपस्थापने। समग्रे अर्वाचीनकाव्यप्रवाहे कलाकैवल्यवादस्य स्थाने वास्तवतावादेन पदं कृतम्। परम्परावैलक्षण्येन जन्मजन्मान्तरीयवृत्तमपि महाकाव्यविषयतां नीतम्। आत्मनः पितुः पितामहस्य वा चरितमवलम्ब्यापि विरचितं महाकाव्यम् इदानीन्तने समये दृक्पथमायाति। संस्कृतमहाकाव्यानामेतेषामाधुनिकीं स्थितिं विलोक्य आलंकारिकैः प्रदत्तस्य महाकाव्यलक्षणस्य पुनर्विवेचनाया अवकाशो विद्यते न वेति युष्माभिर्विभाव्यताम्।

अर्वाचीनदृश्यकाव्यधारायां कालोचितं वैलक्षण्यमाधिक्येनापतितम्। तथाहि रामायणादिप्रसिद्धमितिवृत्तं परित्यज्य आधुनिकैतिहासिकं वृत्तमवलम्ब्य नाट्यकारैर्बहुभिर्विरचितानि वैचित्र्योपेतानि नाट्यानि। किञ्च, धर्माध्यात्मजगति सिद्धसाधकानां शङ्कराचार्य-चैतन्य-रामकृष्ण-विवेकानन्दप्रभृतीनां राजनैतिकजगति विशिष्टव्यक्तित्वभाजां महात्मगान्धि-जवाहरलालनेहेरु-राजेन्द्रप्रसाद-विधानचन्द्र-प्रमुखानां, काव्यजगति रवीयमानानां रवीन्द्रनाथादीनां, वैदुष्यगगने ज्योतिषकायमानानां मोक्षमूलरप्रभृतीनां चरितान्याश्रित्य बहुविधानि दृश्यकाव्यानि रचितानि। अपि च, साम्प्रतिकसमयस्य आर्थिक-सामाजिक-शैल्पिक-शैक्षिक-राष्ट्रियसमस्याः समधिकृत्य बहुभिर्नाट्यकारैर्नाट्यानि विरच्यन्ते। अपि च, कस्मिन्नपि गीतिकाव्ये देशस्य गौरवं प्रख्याप्यते, कस्मिन्नपि गीतिकाव्ये देशस्य समाजस्य निम्नवर्गीयमानवानां वास्तविकी दुरवस्था सोल्लुण्ठनोक्त्या उपस्थाप्यते। कुत्रापि वा गीतिकाव्ये सामाजिक्यः समस्याः परिवर्ण्यन्ते। कथासु च स्त्रीणां दुर्गतिः, राजनैतिकनेतृणाञ्चाधःपतनं, आधुनिकशिक्षाव्यवस्थायाः विपरिणामश्चेति विषयाः पदं कुर्वन्ति। अर्थादैकविंशशताब्द्या द्वारि स्थितं संस्कृतसाहित्यं समकालिकान् विषयान् आत्मसात् करोतीत्यत्र नास्ति संशयः। तथाहि अर्वाचीनसंस्कृतकवितारचनायां पुरोगामिता प्रभूतयशोभाग् राजेन्द्रमिश्रः आधुनिककाव्येष्वाधारत्वेन शाश्वततां पश्यति। अस्यां शाश्वततायामेव आधुनिकतायाः परमां सुरक्षामीक्षतेऽसौ कविः –

"कालदृष्ट्यैव कामं स्यादतीतं भावि साम्प्रतम्।
तथापि किञ्चिदस्त्येव त्रिष्वेष्वपरिवर्तितम्॥
तदेव शाश्वतं यन्न कदापि परिवर्तते।
शाश्वतेनैव तेनेदं धृतं काव्यञ्च जीवनम्॥
ततः शाश्वततावादे श्रद्धा मम महीयसी।
येन प्रावर्तत सृष्टिः काव्ये धर्मेऽथ संस्कृतौ"[९६०]॥

प्राचीन-वर्तमान-भविष्यद्भेदात्कालप्रवाहस्त्रिविधो भवितुमर्हः। परन्तु साहित्ये कालगतं विभाजनं न कदापि युक्तमिति निश्चप्रचं शक्यवचम्। काव्यं सदा भवति नित्यनवीनम्, प्रत्यग्रञ्चेति। नित्यनवीनस्याथ पुराण्युषावत् संस्कृतकाव्यधारापि नित्यनूतना चिरन्तनी च विलसति। खृष्टप्राग्दशसहस्रवर्षेभ्योऽद्यावधि प्रवहमाना धारा नवनवरसैर्जनमानसमाप्यायन्ती सद्यः प्रस्फुटितशतदलमिव दिग्दिगन्तेषु स्वसुरभिं सञ्चारयति। प्रतिकवि समकालिके परिसरे समभूद् आधुनिकम्। कालिदासेनाप्युदितम् –

"पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः"॥

परं न जाने कुतः प्रकल्पितोऽधुनावादोऽयम्। तथाहि अभिराजयशोभूषणे राजेन्द्रमिश्रेणागादि –

"कोऽयम्भो अधुनावादः केन कस्मात्प्रकल्पितः।
कश्चोत्तराधुनावादस्तस्याऽप्यनुसहोदरः??
किमप्याधुनिकं नास्ति काव्यसृष्टौ यतस्त्विदम्।
काव्यं भवति कूटस्थं शाश्वतं नु चिरन्तनम्॥
कवयः कालिदासाद्याः किन्नाऽभूवन्निजे युगे।
आधुनिका नवाचारास्तथैव क्रान्तादृष्टयः॥
सर्व एव कविर्जीवन् भवत्येवाऽधुनातनः।
कीर्तिशेषो व्रजत्येव परन्तु शाश्वतताङ्गताम्॥
हन्ति व्याकरणं वादश्चेदयं नव्यतोन्मदः।

[९६०]अभिराजयशोभूषणम् (पञ्चमोन्मेषः)।

समुल्लङ्घयते यद्वा नाट्यशास्त्रस्य देशनाः॥
मृतं काव्यं मृतं नाट्यं मृतं सर्वं पुरातनम्।
यद्युत्तराऽधुनावादो घुष्यतीति गतत्रपः॥
तर्हि तं प्रणमाम्येव धर्मारण्यघ्नसिन्धुरम्।
प्रणमामि च सिद्धान्तानुरक्तानथ कोविदान्"[९६१]॥

तथाहि संस्कृतपरिसरे आधुनिकशब्दं परिवर्त्य समसामयिकसाहित्यमिति कथ्यते चेत् साहित्यस्य कालगतविभाजनं न स्यात्। तत्र तु शाश्वततावादस्य प्रभावोऽत्यधिकः स्यादिति। शाश्वततावादे यस्य कस्यापि कालस्य साहित्यस्यान्तर्भूक्तिर्भवेदिति। एतेन साहित्यस्य परिवृत्तिः बृहती भविष्यतीति।

वस्तुतः, आधुनिकसाहित्यानुशीलनं विहाय न कथमपि कस्यापि भाषासाहित्यस्य परिशीलनं पूर्णत्वमेतीति समीक्षकाणां नयः। परमेतदपि सत्यं यत् प्राचीनसाहित्यस्य भित्तिभूमावैवार्वाचीनसाहित्यं परिशीलनीयमिति भाव्यम्। तस्मादेव हरिदासेनोदितम् –

"नूतनग्रहणे नास्ति परीक्षापेक्षा, नूतनत्वमेव ग्रहणप्रयोजकम्। पश्य –

नवं नारिकेलं नवीनञ्च चेलं
रम्यञ्चापि नव्यं गृहं नूतनञ्च।
वचश्चाप्यपूर्वं विशेषेण सर्वे
रसज्ञाः पुराणाच्चिरायाद्रियन्ते"[९६२]॥

संश्रूयतेऽर्वाचीनकवेः सीतानाथस्य गिरामपि तस्यैव भावस्य प्रतिध्वनिः –

"या वाणी श्रुतिसञ्चरे समुदिता वर्षे पुरा भारते
व्यासस्यादिकवेस्तथा विरचिनै रूपैश्च पौराणिकैः।
पश्चाल्लोकिककाव्यसृष्टिनिचयैः प्राप्ता प्रतिष्ठां परा-
मर्वाक्चिन्तनरञ्जितैर्विजयते काव्यैर्नवैः साम्प्रतम् ॥
तां वाणीं रसभावमण्डनकलां विज्ञानप्रज्ञोज्ज्वला-

[९६१]अभिराजयशोभूषणम्।
[९६२]हरिदाससिद्धान्तवागीशस्य मिवारप्रतापं नाटकम् (प्रस्तावनांशः)।

मस्माकं किल गौरवं सुविपुलं सन्धारयन्तीं शुभाम्।
प्राचीनामपि नव्यभावसुषमां विस्तारयन्तीं स्वतः
श्रद्धानम्रधिया धियो विमलताप्राप्त्यै नमस्कुर्महे"[९६३]॥

परिशेषे प्राचीनव्यास-वाल्मीकि-कालिदासादिकविवरान् प्रति कायेन मनसा वाचा च नमस्कारं निवेद्य आधुनिककाव्यकारेभ्यः प्रणामाञ्जलिर्विनिवेद्यते। न केवलमेतैराधुनिककविवर्यैः त्रिसहस्रवत्सराणां प्राचीनभाषायाः संरक्षणं संसाधितं परञ्च संस्कारान् संसाध्य मानोन्नयनं कृतमिति राद्धान्तितम्। अपि च, हरिदास-कालीपद-भट्टमथुरानाथ-रेवाप्रसाद-सत्यव्रतशास्त्रि-राजेन्द्रमिश्र-राधावल्लभादयोऽर्वाचीनाः सरस्वतीदत्तवरप्रसादाः कोविदकवयितारः कालिदासादीनां समयसीम्नि जनिं लेभिरे चेत् वैदुष्यसाहित्यगगने इतोऽपि तेषां यशो वर्धितं स्यादिति निश्चप्रचम्।

आमुखे मयका यत् प्रतिज्ञातं 'न मृता न म्रियते न वा मरिष्यति वा भायेषम्', तन्मन्ये प्रमाणीकर्तुं क्षमोऽहम्। अक्षयोऽयं निधिः सर्वथा सर्वदाध्येयोऽनुशीलनीयः सम्मान्यश्च। तथाहि कलिकातास्थस्य राजकीयसंस्कृतमहाविद्यालयस्य प्रथमाध्यक्षस्य होरेस्-हाइम्यान्-उइलसनस्य (Sir Horace Hayman Wilson) वाचा वक्तुमर्हः –

"अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।
न जाने विद्यते किं तन्माधुर्यमत्र संस्कृते॥
सर्वदैव स्वमुन्मत्ता येन वैदेशिका वयम्।
यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ॥
यावदेव गङ्गा च गोदा च तावदेव हि संस्कृतम्"॥ इति।

[९६३]प्रबन्धसमुच्चयः (सीतानाथाचार्यस्य प्रबन्धानां संकलनात्मको ग्रन्थः)।

॥ परिशीलिता ग्रन्थावली ॥

• Primary Sources:

A) Editions of Sanskrit Texts and Translations:

• *Amarakoṣa* – (edt.) Haragovinda Shastri, Chowkhamba Sanskrit Series office, Varanasi, 1978.

• *Daśarūpaka* (of *Dhanañjaya)* – (edt.) Bholashankar Vyas, Varanasi, 1990 (9th Edition).

• *Kāvyakaumudī* – *Haridāsa Siddhāntavāgīśa*, Calcutta, 1362 B.S. (1st Ed.)

• *Kāvyādarśa* (of *Daṇḍī)* – (edt.) Chinmayi Chattopadhyay, West Bengal State Book Board, Kolkata, 1995.

• *Nāṭaka-lakṣaṇa-ratna-kośa* (of *Sāgaranandī)* – (edt.) Siddheswar Chattapadhyay, 1385 B.S. (1st Ed).

• *Nāṭyaśāstra* (of *Bharata)* (Vol. I-IV) – (With the commentary of *Abhinavagupta)* – (edt.) by M. Ramakrishna Kavi, Gaekwad's Oriental Series, Baroda.

• *Sāhityadarpaṇa* (of *Visvanātha)* – (edt.) P.V.Kane, Delhi, 1965 (5th Ed.).

• .... – (edt.) *Haridāsa Siddhāntavāgīśa,* Calcutta, 1876 Śaka (4th ed.), 1841 Śaka (1st Ed.).

• *Suvṛttatilakam* – (edt.) Brajamohan Jha, Chowkhamba Sanskrit Series office, Varanasi, 1968.

B). Modern Sanskrit Texts:

• अथ किम् (वुडोदारचितम्) – सिद्धेश्वरचट्टोपाध्यायः, संस्कृतसाहित्यपरिषत्,

कलिकाता, १९७४।

• अभिनवकाव्यालंकारसूत्रम् – राधावल्लभत्रिपाठी, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१०।

• अभिनवशुकसारिका (भागद्वयम्) – राधावल्लभत्रिपाठी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, २००४ (पुनः संस्करणम्, संस्कृतभारती, दिल्ली, २०११)।

• आयतिः – (सम्पा.) राधावल्लभत्रिपाठी, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१०।

• आशा – राकेशदाशः, कथाभारती, प्रयागः, २०१८।

• ऋणविमुक्तिः – एस्.वि.नागराजरावः, संस्कृतभारती, बैङ्गलौर, २००१।

• ऋषेः क्षुब्धे चेतसि – हर्षदेवमाधवः, श्रीवाणी अकाडेमी, चान्दखेदा, २००४।

• एकताया भारतीया नृत्यसाह्याविष्कृता (काव्यम्) – वेलङ्करः, देववाणीमन्दिरम्, इन्दिरानिवासः, मुम्बइ, १९८५।

• कथा द्वादश – तारापदभट्टाचार्यः (कथाकार), संस्कृतसाहित्यपरिषत्, कोलकाता, २००४।

• कवीन्द्रकथाकल्लोलिनी (अनूदितकथासंग्रहः) – वङ्गीयमूलम् – रवीन्द्रनाथठाकुरः, तन्मयकुमारभट्टाचार्य-नारायणदाश-राकेशदाशाः : (संस्कृतानुवादकाः), संस्कृतभारती, २०१३।

• कापि शायनी – जगन्नाथपाठकः, गङ्गानाथ-झा-केन्द्रियसंस्कृतविद्यापीठम्, एलाहवादः, १९८०।

• काव्यगङ्गाप्रवाहः – श्रीरामवेलङ्करः, साहित्य-अकाडेमी, दिल्ली, १९९५ (प्रथमसंस्करणम्)।

• काव्यनिर्झरी – सीतानाथाचार्यशास्त्री, विजययन, कलिकाता, २०१०।

• काव्यालङ्कारकारिका – रेवाप्रसादद्विवेदी, वाराणसी, चौखम्बा सुरभारती प्रकाशन, १९७७।

• काव्यालंकारकारिका – रेवाप्रसादद्विवेदी, कालिदाससंस्थानम्, वाराणसी, २०१४

(तृतीयसंस्करणम्)।

• काश्मीरक्रन्दनम् (खण्डकाव्यम्) – बदरीनाथकल्ला, प्रभाकररामरत्नशास्त्री, बाजार-भुलियान्, दिल्ली, १९९८।

• कुमारविजयमहाकाव्यम् – रेवाप्रसादद्विवेदी, (अनु०) सदाशिवकुमारद्विवेदी, कालिदाससंस्थानम्, वाराणसी, २००७ (द्वितीयसंस्करणम्)।

• कौमारम् – अभिराजराजेन्द्रमिश्रः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २००८।

• जानकीजीवनम् – अभिराजराजेन्द्रमिश्रः, वैजयन्तप्रकाशनम्, एलाहवादः, १९८८ (प्रथमसंस्करणम्)।

• तदेव गगनं सैव धरा – श्रीनिवासरथः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २००५ (द्वितीयसंस्करणम्)।

• तव जवाधरमृन्मयरेखासु – अरुणरञ्जनमिश्रः, दि वनारस-मर्केण्टाइल-को०, कलिकाता, २०१८।

• ननाविताडनम् (वुडोदारचितम्) – सिद्धेश्वरचट्टोपाध्यायः, संस्कृतसाहित्यपरिषत्, कलिकाता।

• नलदमयन्तीयम् (नाटकम्) – कालीपदतर्काचार्यः, संस्कृतसाहित्यपरिषत्, कलिकाता, १९७२।

• नाट्यपञ्चामृतम् – अभिराजराजेन्द्रमिश्रः, अक्षरवटप्रकाशनम्, एलाहवादः, १९७७ (प्रथमसंस्करणम्)।

• नाट्यानुशासनम् – रेवाप्रसादद्विवेदी, कालिदाससंस्थानम्, वाराणसी, २००८ (द्वितीयसंस्करणम्)।

• निष्क्रान्ताः सर्वे – हर्षदेवमाधवः, संस्कृत-साहित्य-अकाडेमी, गान्धीनगरम्, १९९७।

• पत्रकाव्यम् (खण्डद्वयम्) – सत्यव्रतशास्त्री, इष्टार्न-बुक्-लिंकार्स, दिल्ली, २००९।

• पत्रप्रिया – प्रफुल्लकुमारमिश्रः, पक्षीघरप्रकाशनी, भुवनेश्वरम्, २०१३।

• पद्यवल्लरी – अयनभट्टाचार्यः, संस्कृत-बुक्-डिपो, कोलकाता, २००८ (प्रथमसंस्करणम्)।

• प्रशान्तरत्नाकरम् (नाटकम्) – कालीपदतर्काचार्यः, संस्कृतसाहित्यपरिषत्, कलिकाता, १९७२।

• प्रेक्षणसप्तकम् (एकांकीप्रेक्षणकसंग्रहः) - प्रतिभाप्रकाशनम्, नई दिल्ली, १९९७।

• प्रेमपीयूषम् (नाटकम्) - संस्कृतपरिषद्, सागरः, १९७१।

• बालनाट्यवल्लरी – सौ.दूर्गा पारखी, संस्कृतभारती, गोवा, २०१६।

• भाति मे भारतम् – हर्षदेवमाधवः, चढियापल्ली, औडिशा, २००७ (प्रथमं संस्करणम्)।

• भावविलसितम् – सीतानाथाचार्यः, (प्रका.) दीप्तिमिश्रा, रयालइण्डियनपब्लिकेशन्, १९९८।

• भावस्थिराणि जननान्तरसौहृदानि – हर्षदेवमाधवः, पार्श्व पाबलिकेशन्, अहमदावादः, २०००।

• भासोऽहासः – गजानन-बालकृष्ण-पळसुले, शारदागौरवग्रन्थमाला, पुण्यपत्तनम्, १९८०।

• विलापपञ्चिका – दीपकघोषः, संस्कृतपुस्तकभाण्डारः, कलिकाता, २००१।

• मधुराम्लम् – वीणापाणिपाटनी, दिल्ली, १९८६।

• मन्दाक्रान्तावृत्तम् – कालीपदतर्काचार्यः, संस्कृतसाहित्यपरिषत्, कलिकाता, १९७१।

• माणवकगौरवम् (नाटकम्) – संस्कृतसाहित्यपरिषत्, कलिकाता, १९७२।

• मिवारप्रतापम् – हरिदाससिद्धान्तवागीशः, कलिकाता, १९४८।

• मृत्युशतकम् – हर्षदेवमाधवः, चारुतरसंस्कृतपरिषद्, आनन्दः, १९९९।

• मृद्वीका – जगन्नाथपाठकः, वैजयन्तप्रकाशनम्, एलाहवादः, १९८५।

• मेघमल्लारः (अनूदितवङ्गीयकथासंग्रहः) – वङ्गीयमूलम् – विभूतिभूषणवन्द्योपाध्यायः, अनुवादकः राकेशदाशः, संस्कृतभारती, नवदेहली, २०१६।

• रथ्यासु जम्बुवर्णानां शिराणाम् – हर्षदेवमाधवः, संस्कृतसेवासमितिः, अमदावादः।

• राङ्गडा – राजेन्द्रमिश्रः, वैजयन्तप्रकाशनम्, एलादवादः, १९९२ (प्रथमसंस्करणम्)।

• रूपकचतुष्टयम् – गजानन-बालकृष्ण-पळसुले, ग.बा.पळसुले-सत्कारसमितिः, पुणे,

२०००।

• रूपरुद्रीयम् – अभिराजराजेन्द्रमिश्रः, वैजयन्तप्रकाशनम्, एलादवादः, १९८६ (प्रथमसंस्करणम्)।

• लज्जा – (कथाकारः) नारायणदाशः, नरेन्द्रपुरम्, कोलकाता, २००५।

• वङ्गीयप्रतापम् – हरिदाशसिद्धान्तवागीशः, कलिकाता, १९४६।

• वेष्टनव्यायोगः – वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतसाहित्यपरिषत्, कोलकाता, १९७१।

• वैनायकम् – गजानन-बालकृष्ण-पळसुले, शारदागौरवग्रन्थमाला, पुणे, १९९८।

• भ्यालेण्डाइन्डेसन्देशः – बनमालिबिश्वालः, पद्मजाप्रकाशनम्, झूंसी, इलाहावादः, २०००।

• शतदलम् – रवीन्द्रकुमारपण्डा, परममित्रप्रकाशनम्, दिलशाद गार्डेन, दिल्ली, २००२।

• शिशुयुवदुर्दैवविलसितम् – सीतानाथ-आचार्यः, प्रकाशिका- दीप्तिमिश्रा, संस्कृतपुस्तकभाण्डारः, कोलकाता, १९९९।

• श्रीगीतगौराङ्गम् (गीतिनाट्यम्) – वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतपुस्तकभाण्डारः, कोलकाता, १९७४ (प्रथमसंस्करणम्)।

• श्रीजयेन्द्रसरस्वदीपदावदानम् - रेवाप्रसादद्विवेदी, कालिदाससंस्थानम्, वाराणसी, २०११।

• श्रीहीरकप्राभृतम् (सम्पा०) – इच्छारामद्विवेदी, देववाणी परिषत्, दिल्ली, २०१६।

• सत्यव्रतवाङ्मयसमीक्षा – (सम्पा०) सि.उपेन्द्रराओ, इष्टार्न-बुक्-लिङ्कार्स, दिल्ली, २०१२ (प्रथमसंस्करणम्)।

• सत्यानुभावम् (महाकाव्यम्) – कालीपदतर्काचार्यः, संस्कृतसाहित्यपरिषत्, कलिकाता, १९६९।

• सनातनस्य काव्यवैभवम् – (सम्पा.) ए.पि. सच्चिदानन्दः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१३ (प्रथमसंस्करणम्)।

• समानमस्तु वो मनः – गजानन-बालकृष्ण-पळसुले, शारदागौरवग्रन्थमाला, पुण्यपत्तनम्, १९६५।

• संस्कृतरवीन्द्रसङ्गीतम् – दीपकघोषः (अनु०), साहित्य-अकादमी, नवदेहली, १९९५।

• सहपाठिनी – प्रमोदभारतीयः, मानिकप्रकाशनम्, हरियाणा, १९९९।

• स्वरः – जनार्दनहेगडे, संस्कृतभारती, माता मन्दिर गली, झण्डेवालान, नइ दिल्ली, २०११।

• स्वर्गीयहसनम् (वुडोदाभणितम्) – सिद्धेश्वरचट्टोपाध्यायः, संस्कृतसाहित्यपरिषत्, कलिकाता, १९७७।

• सिद्धार्थचरितम् (नाटकम्) – ड० वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतपुस्तकभाण्डारः, कलकाता, १८९२ (शकाब्दः)।

• षोडशी (काव्यसंकलनम्) – राधावल्लभत्रिपाठी, साहित्य-अकाडेमी, दिल्ली, १९९२।

• हत्याकारी कः – (कथाकारः) नारायणदाशः, नरेन्द्रपुरम्, कलिकाता, २००३ (प्रथमसंस्करणम्)।

• Secondary Sources:

A) Works in English Language:

• Bharatiya, Pramod – Fourteen Novels of Sanskrit, Parimal Prakashan, Delhi, 1999.

• Chattoapadhya, Rita –

I. A Study on Candravaṁśam, Sanskrit Pustak Bhandar, Calcutta, 1988.

II. Mahāmahopādhya Haridāsa Siddhāntavāgīśa: An Apparaisal, Sanskrit Pustak Bhandar, Calcutta, 1989.

III. Modern Sanskrit Dramas of Bengal: (20th Century A.D.) : Calcutta, 1992.

IV. Modern Sanskrit Plays (1970 A.D – 1998 A.D):

A Sociological Introspection, Calcutta, 1999.

V. Modern Sanskrit Literature: Some Observations, DSA, Department of Sanskrit, Jadavpur University, Kolkata, 2004.

VI. 20th Century Sanskrit Literature (A Glimpse into Tradition and Innovation): Calcutta, Sanskrit Pustak Bhandar, 2009.

• De, S.k. – History of Sanskrit Poetics, Banaras, Calcutta, 1960.

• Jha, V.N. – Sanskrit Writings in Independence India, Sahitya Academy, Delhi.

• Joshi, K.R and Ayachit, S.M. – Post Independence Sanskrit Literature, Nagpur, 1900.

• Mishra. A.R.– Contemporary Sanskrit Writings in Orissa, Pratibha Prakashan, Delhi, 2006.

• Misra, Gopalchandra. – Sanskrit Farcical Plays and Those of Srījiva Nyāyatīrtha of Bengal, Sanskrit Pustak Bhandar, Kolkata, 1999.

• Mishra, Rajendra - Catalogue of the 20th Century Sanskrit-work, Akhshayvat Prakashan, Allahabad, 2002.

• Kane, P.V. – History of Sanskrit Poetics, Chowkhamba, Banaras, 1923.

• Kunjunni, Raja.K. – The Contriubution of Kerala to Sanskrit Literature, University of Madras, 1958.

• Patle, Goutam – Contribution of Gujrat to Sanskrit Literature, H.N.G. University Campus, Patan, Gujrat, 1998.

• Prajapati, Mani Bhai K - Post Independence Sanskrit Literature: A Critical Survey, H.N.G. University Campus, Gujrat, 2005.

• Prajapati, M.B.K., H.Hindocha, H.R.Patel – Contribution of Gujrat to Sanskrit Literature (Dr. M.I.Prajapati Felicitation Volumn), M.I.Prajapati, Satipurti Sanman Samiti, Patna, 1998.

• Raghavan, V. –

i) Modern Sanskrit Literature, New Delhi, 1957.

ii) Modern Sanskrit Writings, Adyar, 1956.

iii) The Social Play in Sanskrit, Bangalore, 1952.

iv) Sanskrit Essays on the Value of the Language and Literature, Madras, 1972.

• Ranganathan, S. –

i) Poetry of Dr. Ram Karan Sharma, Pratibha Prakashan, Delhi, 1997.

ii) Post Independence Sanskrit Drama, N.M.K.R.V. Women College, Java Nagar, Bengaluru, 1994.

iii) Abhiraja Dr. Rajendra Mishra and His works, Eastern Book Linkers, Delhi, 2009 (First Edition).

iv) Modern Sanskrit Writings in Karnataka, Rastriya Sanskrit Sansthan, New Delhi, 2009.

• Roy, Biswapati – A Critical Study of Modern Historical Sanskrit Dramas of Bengali Pandits of the 19th and 20th Centuries, Sanskrit Pustak Bhandar, Kolkata, 1999 (First Edition).

• Swamy, Sivakumara – Post Jagannātha Alaṅkāra Śāstra, Delhi,

Rashtriya Sanskrit Sansthan, Delhi, 2012.

• Sastri, G.N. – Recent Sanskrit Studies in Bengal, Calcutta, 1950.

• Sastri, Satyavrat – Kālidāsa in Modern Sanskrit Literature, Eastern Book Linkers, Delhi, 1991.

• Satyavrat, Usha – Sanskrit Dramas of Twentieth Century, Delhi, 1971.

• Tripathi, Radhavallabh – Sixty Years of Sanskrit Studies (Vol-I: India), Rashtriya Sanskrit Sansthan, Delhi, 2012.

• .... – A Bibliography of Modern Sanskrit Writings, New Delhi, Rashtriya Sanskrit Sansthan, 2012.

• Upadhyaya, Vachaspati – Sanskrit Studies in India, Shri Lal Bahadur Shastri Rastriya Sanskrit Vidyapeetha, New Dehli, 2001.

B) Works in Hindi and Sanskrit Language:

• अर्वाचीन-संस्कृत-महाकाव्य-विमर्शः – रमाकान्तशुक्ला, देववाणीपरिषद्, नईदिल्ली, १९७९।

• अर्वाचीन संस्कृत साहित्य (दशा और दिशा) – मञ्जुलता शर्मा, परिमल पब्लिकेशन्स, दिल्ली, २००४।

• अलंकारशास्त्रेतिहासः – जगदीशचन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००१।

• आधुनिक संस्कृत काव्य की परम्परा – मञ्जुलता शर्मा, राष्ट्रिय संस्कृत संस्थान, दिल्ली, २०११।

• आधुनिक संस्कृत नाटक (२ खण्ड) – रामजी उपाध्याय, सगर विश्वविद्यालय, सगर।

• आधुनिक संस्कृत मे यतीन्द्रविमलचौधूरी का योगदान – मनोरमा त्रिपाठी, भारतीय

संस्कृति संस्थान, लक्ष्णौ, १९८७।

• आधुनिक काल का संस्कृत गद्यसाहित्य – कलानाथ शास्त्री, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, १९९५।

• आधुनिक संस्कृत साहित्य – दयानन्द भार्गव, राजस्थानी ग्रन्थागार, राजस्थान, १९८७।

• आधुनिकसंस्कृतसाहित्यश्रीः – (सम्पा.) राधावल्लभत्रिपाठी एवं रमाकान्तपाण्डेय, प्रतिभाप्रकाशन, दिल्ली, २००१।

• विंशशताब्दीकं संस्कृतनाटकम् – रामजी उपाध्यायः, चौखाम्बा विद्याभवन, वाराणसी, २००५।

• विंशशताब्दीसंस्कृतकाव्यामृतम् – सम्पादकौ राजेन्द्रमिश्रः चन्द्रभूषणझा च, दिल्लीसंस्कृताकादेमी, दिल्ली, २०००।

• भारतीय काव्यशास्त्र का आचार्य परम्परा – राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी, २००७।

• संस्कृत का अर्वाचीन समीक्षात्मक काव्यशास्त्र – अभिराजराजेन्द्र मिश्र, विश्वविद्यालय प्रकाशन, वाराणसी, २०१०।

• आधुनिक संस्कृत काव्यशास्त्र – आनन्दकुमार श्रीवास्तव, इस्टार्न बुक लिङ्कस्, दिल्ली, २०१२।

• संस्कृतसाहित्य : बीसवीं शताब्दी – राधावल्लभत्रिपाठी, राष्ट्रियसंस्कृतसंस्थान, दिल्ली, १९९९।

• संस्कृतेऽनूदितं रवीन्द्रसाहित्यम् – (सम्पा०) बनमालीबिश्वालः नारायणदाशः राकेशदाशश्च, मान्यताप्रकाशन, दिल्ली, २०१२।

C) Works in Bengali Language:

• आधुनिक संस्कृत साहित्येर रूपरेखा – अमल कुमार भट्टाचार्य ओ सञ्चिता चक्रवर्ती, एम्.एल्.दे.एण्ड कों, कोलकाता, २०१३।

• वङ्गीय महामहोपाध्याय जीवनी – हेमचन्द्र भट्टाचार्य, कलकाता, १३५२।

• वङ्गीय संस्कृत अध्यापक जीवनी – हेमचन्द्र भट्टाचार्य, कलकाता, १३८३।
• विंश शताब्दीते वाङ्गालीर संस्कृतनाट्य साधना – नन्ददुलाल मिश्र, राणाघाट, १९९७।
• श्रीजीव न्यायतीर्थेर सारस्वत साधना – ऋता चट्टोपाध्याय, संस्कृतसाहित्यपरिषत्, कलकाता, २००४।
• सिद्धेश्वर चट्टोपाध्याय ओ ताँर रचित अथ किम् – ऋता चट्टोपाध्याय, संस्कृत पुस्तक भाण्डार, कलकाता, २००६।
• सिद्धेश्वर चट्टोपाध्याय (वुडोदा) १९१८-१९९३ – ऋता चट्टोपाध्याय, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१७।
• सीतानाथ आचार्य : कवि ओ प्राबन्धिक – ऋताचट्टोपाध्याय, संस्कृत बुक डिपो, कोलकाता, २००८।
• संस्कृत साहित्ये वङ्गालीर दान – सुरेशचन्द्र वन्द्योपाध्याय, संस्कृत पुस्तक भाण्डार, कलिकाता, १९६३।

D. Journals:

• अजस्रा – अखिलभारतीयसंस्कृतपरिषद्, महात्मागान्धीमार्गः, लखनऊ।
• अन्वीक्षा – यादवपुरविश्वविद्यालयीय-संस्कृतविभागीयपत्रिका, यादवपुरम्।
• अमृतभाषा – अमृतभवनम्, कालिदासपुरम्, उडीसा।
• अर्वाचीनसंस्कृतम् – देववाणीपरिषद्, वाणीविहारः, नईदिल्ली।
• दृक् – दृग्भारती, झांसी, इलाहाबादः।
• पद्यबन्धा – वीणापाणीसंस्कृतसमितिः, भोपालम्।
• संस्कृतप्रतिभा – साहित्य-अकादेमी, रवीन्द्रभवनम्, ३५ फोरीजशाहमार्गः, नईदिल्ली।
• संस्कृतविमर्शः – राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।
• संस्कृतसाहित्यपरिषत्पत्रिका – संस्कृतसाहित्यपरिषत्, कोलकाता।
• सागरिका – संस्कृतपरिषत्, संस्कृतविभागः, डाँ हरिसिंहगौरविश्वविद्यालयः, सागरः।

॥ परिशिष्टम् ॥

संस्कृतस्य साहित्य-अकाडेमि-पुरस्कारजेतारः

(१९५६-२०१८)


वत्सरः	**प्रापकः**	***कृतिः***
१९५६	पि. वि. काणे	History of *Dharmaśātra*
१९६१	गिरिधरशर्मचतुर्वेदी	वैदिक विज्ञान और भारतीय संस्कृति
१९६३	बि. एन्. कृष्णमूर्तिशर्मा	A History of *Dvaita* : School of *Vedānta*
१९६४	गोपिनाथकविराजः	तान्त्रिक वाङ्मय में शक्त दृष्टिः
१९६६	वि. राघवन्	Bhoja's *Śṛingāraprakāśa*
१९६७	रामरूपपाठकः	चित्रकाव्यकौतुकम् (काव्यम्)
१९६८	सत्यव्रतशास्त्री	श्रीगुरुगोविन्दसिंहचरितम्
१९७०	वि. सुब्रह्मण्यशास्त्री	शब्दतरङ्गिणी
१९७३	एम्. एस्. आणे	श्रीतिलकयशोऽर्णवः
१९७४	डा० एस्. बि. वर्णेकरः	श्रीशिवराज्योदयम्
१९७७	शान्तिभिक्षुशास्त्री	बुद्धविजयकाव्यम्
१९७९	के. एन् एषुत्तच्छन्	केरलोदयः (इतिहासकाव्यम्)
१९८०	पि. सी. देवस्या	क्रिस्तुभागवतम् (काव्यम्)
१९८१	जगन्नाथपाठकः	कापि शायनी (काव्यसंग्रहः)
१९८२	पि. के. नारायणपिळाइ	विश्वभानुः (महाकाव्यम्)
१९८३	श्रीनाथः एस्. हसूर्करः	सिन्धुकन्या
१९८५	वसन्तत्रिम्बकशिवदे	विन्ध्यावासिनीविजयमहाकाव्यम्
१९८६	कालिकाप्रसादशुक्लः	श्रीराधाचरितमहाकाव्यम्
१९८७	विश्वनारायणशास्त्री	अविनाशी (उपन्यासः)


१९८८	अभिराजराजेन्द्रमिश्रः	इक्षुगन्धा (लघुकथाः)
१९८९	रामकरणशर्मा	सन्ध्या (कवितासंग्रहः)
१९९०	ओगेटिपरीक्षित् शर्मा	श्रीमत् प्रतापराणायणम्
१९९२	रेवाप्रसादद्विवेदी	स्वातन्त्रसंभवम् (महाकाव्यम्)
१९९३	जग्गुः आल्वार-अय्यङ्कारः	जयन्तिका
१९९४	राधावल्लभत्रिपाठी	सन्धानम्
१९९५	रसिकबिहारीजोशी	श्रीराधापञ्चशती
१९९६	केशवचन्द्रदाशः	ईशा (काव्यम्)
१९९७	श्यामदेवपराशरः	त्रिवेणी
१९९८	बच्चूलाल-अवस्थी	प्रतानिनी
१९९९	श्रीनिवास-रथः	तदेव गगनं सैव धरा
२०००	एस्. श्रीनिवासशर्मा	जगद्गुरुश्रीचन्द्रशेखरेन्द्र-सरस्वतीविजयम्
२००१	पि. रामचन्द्रुडुः	को वै रसः (उपन्यासः)
२००२	काशिनाथमिश्रः	हर्षचरितमञ्जरी
२००३	भास्कराचार्यत्रिपाठी	निर्झरिणिः
२००४	देवर्षिकलानाथशास्त्री	आख्यानवल्लरी
२००५	स्वामी रामभद्राचार्यः	श्रीभार्गवराघवीयम्
२००६	हर्षदेवमाधवः	तव स्पर्शे स्पर्शे (काव्यम्)
२००७	हरिदत्तशर्मा	लसल्लतिका (काव्यम्)
२००८	ओंप्रकाशपाण्डेयः	रसप्रिय-पारिस्-राजधानी
२००९	प्रशस्यमित्रशास्त्री	अनभीप्सितम्
२०१०	मिथिलाप्रसादत्रिपाठी	भार्गवीयमहाकाव्यम्
२०११	हरेकृष्णशतपथी	भारतायनम् (महाकाव्यम्)
२०१२	रामजीठाकुरः	लघुपद्यप्रबन्धत्रयी
२०१३	राधाकान्तठाकुरः	चलदूरवाणी (काव्यम्)

२०१४	प्रभुनाथद्विवेदी	कनकलोचनम् (लघुकथासंग्रहः)
२०१५	रामशङ्कर-अवस्थी	वनदेवी (महाकाव्यम्)
२०१६	सीतानाथाचार्यः	काव्यनिर्झरी (कवितासंग्रहः)
२०१७	निरञ्जनमिश्रः	गङ्गापुत्रवदनम् (काव्यम्)
२०१८	रमाकान्तशुक्ला	मम जननी (काव्यम्)


॥ परिशिष्टम् ॥


आधुनिकसंस्कृतकवीनामालोकचित्रावली



पञ्चाननतर्करत्नः


हरिदाससिद्धान्तवागीशः



कालीपदतर्काचार्यः


श्रीजीवन्यायतीर्थः


विश्वेश्वरविद्याभूषणः



सिद्धेश्वरचट्टोपाध्यायः


वीरेन्द्रकुमारभट्टाचार्यः



सुखमयमुखोपाध्यायः


गौरीधर्मपाला


दीपकघोषः



रमारञ्जनमुखोपाध्यायः


सीतानाथ आचार्यः


भट्टमथुरानाथशास्त्री


जानकीवल्लभशास्त्री


श्रीधरभास्करवर्णेकरः



केशवचन्द्रदाशः



रामकरणशर्मा



रेवाप्रसादद्विवेदी




सत्यव्रतशास्त्री



हरिदत्तशर्मा



लीलारावदयालुः



रमाकान्तशुक्लः



अभिराजराजेन्द्रमिश्रः



राधावल्लभत्रिपाठी